वीर सेवा मन्दिर
दिल्ली

★

क्रम संख्या 8762
काल नं० 28.1.11 जौहरी
खण्ड

ग्रन्थांक – ६२

VEDĀRTHA-VICĀRAḤ

Calcutta Sanskrit College Research Series No. XIX

Published under the auspices of the
Government of West Bengal

STUDIES NO. 8

वेदार्थविचारः

SANSKRIT COLLEGE
CALCUTTA
1961

Calcutta Sanskrit College Research Series

Board of Editors :

Dr Radhagovinda Basak, M.A., Ph.D., *Chairman*

Dr Suniti Kumar Chatterjee, M.A., D.Litt. (Lond.)

Professor Durgamohan Bhattacharyya, M.A.,
Kāvya-Sānkhya-Purāṇatīrtha

Professor Anantakumar Nyāya-Tarkatīrtha

Dr Gaurinath Sastri, M.A., P.R.S., D.Litt.,
Secretary and General Editor

VEDĀRTHA-VICĀRAḤ

BY

MAHĀMAHOPĀDHYĀYA
PANDIT SITARAM ŚĀSTRĪ
Senior Research Fellow, Sanskrit Seminar,
Government Sanskrit College, Calcutta

EDITED WITH INDICES BY
HARINARAYAN BHATTACHARYA, Tarka-Vedatīrtha
Lecturer in Veda, Sanskrit College, Calcutta

SANSKRIT COLLEGE
CALCUTTA
1961

Published by
The Principal, Sanskrit College,
1, Bankim Chatterjee Street, Calcutta-12

Price : Rupees Fifteen only.

Printed by
S. N. Guha Ray at the Sree Saraswaty Press Limited,
32, Acharya Prafulla Chandra Road, Calcutta-9

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला——ग्रन्थाङ्कः १६

वेदार्थविचारः

कलिकातासंस्कृतमहाविद्यालयस्थसंस्कृतविद्यागोष्ठीप्रवीणसदस्य-

महामहोपाध्यायश्रीसीतारामशास्त्रिकृतः

कलिकातासंस्कृतमहाविद्यालयवेदाध्यापकेन

श्रीहरिनारायणभट्टाचार्यतर्कवेदतीर्थेन

विविधसूच्यादिसंयोजनया सम्पादितः

१८८२ शकवत्सरे कलिकातानगर्यां प्रकाशितः

विषयसूची

प्राक्कथनम्

कदाचित् पुण्यपत्तनं प्रस्थितेन मया तत्रभवन्तः पूजनीयचरणा महामहोपाध्यायलाञ्छना वैदिकमूर्धन्याः श्रीसीतारामशास्त्रिण. साक्षात्कृताः । तदानी ते खलु प्रार्थिता वेदव्याख्याने या काचन अनितरसाधारणी पद्धतिर्भवद्भिरनुस्रियते तामेवानुसन्धानैर्यदि नाम किञ्चन ग्रन्थरत्नमस्मभ्यमुपाह्रियेत तर्हि वेदपाठिनां सर्वेषामेवास्माकं भूयानुपकार स्यादिति । तत्रभवतां शास्त्रिचरणानां छात्रवात्सल्यं सुविदिततमम् । कालव्ययमसहमानैस्त्वि तैस्तदानीमेव लेखप्रदानाय वचन दत्तम् । तस्यैव परिनिष्ठितं रूपं महताऽऽनन्देन विद्वद्वरेण्यानामत्रभवता शास्त्ररसिकानां पुरतोऽद्यत्वे समुपन्यस्यत इत्यलमतिविस्तरेण ।

इति

श्रीगौरीनाथशास्त्रिणः

निवेदनम्

परमकारुणिकपरमेश्वरकृपया साम्प्रतं प्रकाश्यते वेदार्थविचारो नाम वेदस्यादित्यपरव्याख्यानरूपोऽभिनवो ग्रन्थः। यद्यपीदृशव्याख्यायाः समवलम्बनं तदा तदा तेषु तेषु चानुपपन्नार्थेषु स्थलेषु प्राचीनैर्वेदार्थविचारकैरपि कृतमेवेति नेयं सर्वथाऽभिनवा, तथाप्यस्याः पद्धतेः सर्वस्थलेषु तैः समाश्रयणाभावादेषाऽप्रचलितैवाभूत्। अत्र तु ग्रन्थे तस्या एवातिप्राचीनायाः पद्धतेः सर्वत्रैव वेदे समाश्रयणीयतया प्रतिपादनात् सेयमनभिनवाऽप्यभिनवत्वेनैव प्रतीयमाना भवेत्। ईदृशव्याख्याया मूलभूतं प्रमाणन्तु सर्वानुक्रमणीकारशौनकोद्धृतम् "एक एव वा महानात्मा देवता, स सूर्य इत्याचक्षते, स हि सर्वभूतात्मा, तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेति" इत्यादिवचनोक्तमतमेव।

इह हि साम्प्रतिकसमयोपलब्धाना ग्रन्थानां मध्ये वेद एव सर्वप्राचीनतमो ग्रन्थ इति प्रायेण सम्मतमेव समेषामैतिहासिकानामपि तीक्ष्णधिषणानाम्। अतएव च तदर्थोऽप्यतिगम्भीर इति तन्निर्णयाय बहुभिः पण्डितैर्बहुविधा दृष्टिमालम्ब्य बहु प्रयतितं प्रयत्यते च, तावतापि वेदार्थो नैवासन्दिग्धार्थो जातः सर्वत्रेति सुविदितचरमेव वेदतत्त्वान्वेषिणां विद्वज्जनानाम्।

एतादृश्यामवस्थितौ कलिकाताविश्वविद्यालयस्य भूतपूर्ववेदाध्यापकाः पुण्यपत्तनवासिनः सर्वतन्त्रस्वतन्त्राः पण्डितमूर्धन्या महामहोपाध्यायाः श्रीमन्तः सीतारामशास्त्रिमहोदया महान्तं श्रममुररीकृत्य वेदार्थनिर्णयाय बहुविधसूक्ष्मविचारगर्भस्य प्रशस्यतमस्यैतद्ग्रन्थस्य प्रणयनेन विद्वत्समाजस्य यन्महोपकारं साधितवन्तस्तदर्थं ते न केवलं सर्वेषामपि वैदिकचूडामणीनामेव हार्दिकमभिनन्दनमर्हेयुरपि तु विद्वन्मात्राणामपि प्रमोदमुपवर्धयेयुरित्यस्मिन् नास्ति कश्चित् संशयावसरः। सकलमनीषिणामाकाङ्क्षितसम्मतिरासादिता चेत् नूनमितःपरमपि विस्तररूपेण सकलवैदिकमन्त्राणां ब्राह्मणादीनाञ्चादित्यपरव्याख्यानप्रकाशं ग्रन्थकर्तारः परमुत्साहमनुभवन्तः प्रवर्तेरन्नित्याशास्महे।

वस्तुतस्तु सूक्ष्मेक्षिकया यदि पर्यालोच्यते तर्हीदमवश्यमेवाङ्गीकर्तव्यं यद्विनेमां सरणिं नापरः कोऽपि पन्था विद्यते येन तत्र तत्र वैदिकशब्दविचारोद्भूतसंशयानां सम्यङ्निरासः स्यादिति।

वेदे तावदग्निवाय्वादित्ययमसूर्यभगपूषमित्रवरुणेन्द्ररुद्रप्रमुखा देवताः स्तूयन्ते, तत्रैतासु काश्चन लोकेऽतिप्रसिद्धा अग्निवाय्वादित्यादिशब्दप्रतिपाद्याः, परन्तु कासाञ्चनाप्रसिद्धया तत्स्वरूपस्याज्ञानात् का इमा देवताः प्रतिपाद्यन्त इति विचारे प्राचीनैर्निरुक्तकारप्रभृतिभिरत्र "एकैव देवतेत्यध्यात्मवादः, नानादेवताः पुरुषविधा इत्यैतिहासिकवादः, यज्ञोपयोगिमन्त्रमय्यो देवता इति

याज्ञिकवादः" इत्याद्यनेकविधपक्षोपन्यासपुरःसरं "तिस्रो देवता इति नैरुक्ताः" इति देवतात्रयवाद सिद्धान्तयित्वा तिसृणामेव तासां क्रियाद्युपाधिवशतो विभूतय इमा अपरा देवता इति प्रतिपादितम्। ऋग्वेदानुक्रमणीकारेणापि नैरुक्तं मतं प्रदर्श्य "एकैव वा महानात्मा देवता स सूर्य इत्याचक्षते" इत्यादिना सूर्यस्यैवैकस्य देवत्वस्वीकारेण सौरावस्थानस्यैव वर्णनं दृश्यते वेदे इति प्रतिपादितम्।

एवञ्चाध्यात्मवादे एकदेवतावादे वा एकस्यैव ब्रह्मणो देवत्वेन वचने भेदकल्पनां विना तदसम्भवेनोपाधिवशतो भेदकल्पनाया सूर्यरूपमेवैकमुपाधिं गृहीत्वा तस्य स्तव इति लोकादीनुपाधित्वेनादाय देवतात्रयवाद इति तात्पर्यम्।

एवञ्चैकस्या एव सूर्यरूपाया देवतायाः कर्मविभेदवशतो विभिन्नदेवताशब्दाभिधेयत्वे विष्णु-भग-मित्र-वरुणसवित्रादयस्तु सूर्यतो न विभिद्यन्ते। तथा सति अन्तरीक्षादयोऽपि लोकास्तादृशा वक्तव्या यत्र सूर्यस्यैव सम्बन्धः स्यात्। तथाच मध्यमस्थानसम्बन्धः पूर्वदिक्स्वामितादिकञ्चालक्ष्य विषुववृत्तस्य क्रान्तिवृत्तेन छेदबिन्दु तत्समक्ष देशमन्तरीक्षत्वेन गृहीत्वादित्यस्य मध्यमस्थानवासित्वेनेन्द्रादिनामभिः स्तवः। ततश्च तस्मादन्तरीक्षलोकादुत्तरस्य देशस्य द्युलोकत्वं गृहीत्वा तद्वासित्वेनादित्यता, एवं दक्षिणस्य भागस्य भूत्वेन ग्रहणेन तद्वासितयाग्नित्वम्, दक्षिणोत्तरायणे उपाधित्वेन गृहीत्वा तस्यैवादित्यस्य विष्णुता, मण्डलोदयप्राक्कालिककिरणवत्तया मित्रत्वम्, क्रमशो व्यक्तिमता तेजसा तमोविनाशनकर्मणोषस्त्वम्, सरणात् सूर्यत्वम्, व्यक्ताव्यक्ततेजोवशतोऽश्वित्वमस्तगमनोत्तरकालिकरश्मिवत्तया क्रमशः पदार्थानामावरणेन वरुणत्वमित्यादिरूपेणादित्यपरां दृष्टिमालम्ब्यैव वैदिकमन्त्रादीना व्याख्यानं प्रदर्शयितुमत्र प्रयास: समास्थित। अस्य तावद् युक्तायुक्तत्वं ग्रन्थदृष्ट्या सुधीभिरेव विचारणीयं इति निवेद्य विरम्यते।

अन्ते च येषामात्यन्तिकाग्रहभरेण भूयोभूय प्रवर्तनया च ग्रन्थस्यास्य प्रकाशन सम्भवपदमधिरोहति येषामेव निरन्तरसन्मन्त्रणया समुपदेशेन च ममाप्येतन्महनीयग्रन्थसम्पादनसौभाग्यमुपनीतमस्ति तेषा प्राच्यपाश्चात्त्यविद्याविद्योतितधिषणाना महोदारचरितानां कलिकाताराष्ट्रियसंस्कृतमहाविद्यालयाध्यक्षप्रवराणा डक्टर श्रीगौरीनाथशास्त्रि–(एम. ए, पि, आर. एस, डि, लिट्) महोदयाना महोपकारभारं कैः समुचितैः शब्दैः प्रकटयामीति नूनं नैव जाने।

ग्रन्थस्यास्य सम्पादने निरन्तरमवहितस्यापि मे दृग्दोषेणानवधानवशाद्वा सीसकाक्षरसयोजकप्रमादाद्वा सम्भूताना स्खलनस्थलाना संशोधनपूर्वं पाठेनानुगृह्णन्तु कृपालवो विद्वांस इति।

श्रीहरिनारायणभट्टाचार्यस्य

उपोद्घातः

वेदस्यार्थकरणे बहुभिर्विभिन्नां दृष्टिमालम्ब्य प्रयतितम् । तत्र केषांचन प्रयत्नो भागशः केषांचन सर्वाङ्गीणः । तत्र प्रयत्ने केषांचनाङ्गानुसारित्वं केषाचन व्यवहारानुसारित्वम् । सामान्यतो नियमानुसार प्रायः सर्वेषाम् । तत्र मन्त्रेष्वपि व्याख्यानं मन्त्रार्थस्य, क्वचन प्रश्नपूर्वं क्वचन प्रश्नपूर्वता नास्ति, व्याख्यानं तु वर्तत एव । यथा 'पृच्छामि त्वा परमन्तमि'त्यनेन केचन प्रश्ना उत्थापिताः । पृथिव्याः परोऽन्तः पृच्छ्यते, भुवनस्य नाभिः पृच्छ्यते, वृष्णो अश्वस्य रेतः पृच्छ्यते, वाचः परमस्य व्योम्न पृच्छा । तदुत्तराण्यपि तत्रैव परमन्त्रे उच्यन्ते— वेदिः पृथिव्याः परोऽन्त, यज्ञो भुवनस्य नाभिः, सोमो वृष्णो अश्वस्य रेतः, ब्रह्मायं वाचः परमव्योमनेति । हठात्किमिनीम इम एव प्रश्ना इति प्रश्नबीजं नोल्लिखितम् । यानि चोत्तराणि तैः प्रश्नोत्थिताकांक्षानिवृत्तिरासीदेव । अतएव तेषामुत्तरत्वम् । परन्त्वस्माक न तानि प्रश्नोत्थापिताकाङ्क्षानिवर्तकानि । बीजं त्वत्रास्माक व्यवहारा अन्यादृशाः । यान् व्यवहारानभिप्रेत्य मन्त्रे उत्तराणि, तेषां व्यवहाराणामस्माकमप्रत्यक्षत्वम्, ये चास्माकं प्रत्यक्षा व्यवहारा न तैरुत्तराणि प्रश्नोत्थापिताकाङ्क्षासमाधायकानि । अस्या दशायामस्माक व्यवहारानुमार्गेण तेषामुत्तराणा यथाकथचन समाधायकत्वकल्पन तत्तु न मूलमंस्पर्शि भवति । यथोक्तस्थले पृथिव्याः परान्तपृच्छा, वेदेः परान्तत्वमुत्तरं, तत्रास्माभिः श्रद्धासहकारेण 'एतावती वै पृथिवी यावती वेदिः' इति वाक्यदर्शनेन वेद्या एव पृथिवीत्वमिति व्याख्यायते । अस्माकं प्रसिद्धयाज्ञिकव्यवहारे वेदिरिति स्वल्पभूभागस्य वेदित्वेन प्रसिद्धया व्याख्यायामेवकारार्थाविज्ञानेन न सम्यक्त्वं भासते, वद्या एव पृथिवीत्वमित्यस्य कि वेद्यतिरिक्तस्य भूप्रदेशस्य पृथिवीत्वं नास्तीत्यर्थ उत वेदिरेव पृथिवीति । तत्राद्येऽस्माकमनुभवविरोधः । द्वितीये एतावती वै पृथिवी यावती वेदिरित्यस्य व्याख्येयभागस्य न सम्यक् व्याख्यानम् । अथ एतदर्थमेतस्य प्रशंसापरत्व, वेद्याः प्रशंसाऽनेन बोध्यते इति वर्ण्यते तावता मौलिकप्रश्नोत्तरयोर्न सम्यक् विवरण भवति । तत्र प्रश्ने पृथिव्याः परोऽन्तः पृच्छ्यते न तु का पृथिवीति । एवमुत्तरे वेदिः पृथिव्याः परोऽन्त इति उच्यते न तु वेदि पृथिवीति । एवं सति उक्तप्रश्नोत्तरयोर्न यथार्थत्वेन ज्ञानम् । एवमेवापरापरप्रश्नोत्तरस्थलेऽविज्ञातार्थत्वम् । एतावताऽपि प्रश्नोत्थितिबीजमविज्ञातमेव । को वा पृथिव्याः परान्तविज्ञाने गुणः यदर्थमय प्रश्नः ।

एवं सति पृथिव्याः परान्तपृच्छाया भिन्नोऽभिप्रायः । एवं तदुत्तरस्यापि । एवं मन्त्रे केवल प्रश्नः क्रियते नोत्तरस्य वचन तत्र अपर काठिन्य प्रवर्तते यत्प्रश्नस्य प्रवर्तने कोऽभिप्रायः उत्तरदान तु अस्मदीयप्रसिद्धया कल्पनया । यथा मन्त्रे उच्यते "इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः" इति । अत्रोच्यते येनास्य वामस्य निहित पदं ज्ञायते तेन तदुच्यतामिति । अत्र वामशब्दोऽस्माकं द्विभागे शरीरे दक्षिणविरुद्धशरीरभागबोधकः प्रसिद्धः । मन्त्रे तु आदित्यस्येयं वर्णनेति गृहीतं, तत्र वामशब्दस्यादित्याभिप्रायेणास्माकं प्रसिद्धोक्तरूपरूढशरीरभागविशेषबोधकत्वं नोपपद्यते । न हि आदित्यः

शरीरस्य वामभागरूपः। अप्रसिद्धेः। तस्मात्प्रसिद्धं रूढमर्थं परित्यज्य योगार्थं आश्रीयते। तत्रापि वम् धातोर्वामपदसाधने न प्रकृतवर्ण्यत्वेन गृहीतादित्यवर्णने उपकारः। वम्धातोर्निगीर्णस्य गिरणमार्गेण पुन. परित्यागरूप उद्गिरणे प्रसिद्धिः। न हि आदित्यो निगीर्णः पुनरुद्गीर्ण इति प्रसिद्धिस्तस्माद्धात्वन्तरात्तस्य शब्दस्य सिद्धिः। यथा वन् धातो । तस्य चायमर्थ इति व्याकरणे न विशिष्य निर्देशः। एवमप्रतिषिद्धमनुमतमिति न्यायेन याचनार्थत्व मन्यते। तावतापि न भक्षितलशुनन्यायातिपातः। यतस्तस्माद्धातोर्घञादिना प्रत्ययेन वान इति रूपं प्राप्नुयात् प्रयुज्यते तु वाम इति। तदर्थमन्यायेन नकारस्य मकारं मत्वा वामो वननीयः सेवनीयः फलार्थिभिः। तत्रापि आस्माकीनां परा प्रसिद्धिमाश्रित्य 'आरोग्यं भास्करादिच्छेद' इति वशात आरोग्यार्थिभिरारोग्यार्थ मेवनीय इत्यर्थकरणद्वारा व्याख्यानमतेऽस्मदीयप्रसिद्धयनुसारेण मूले तदभिप्रायकत्वं वान्यार्थाभिप्रायकत्व वेति सन्देहस्य तदवस्थत्वेन उक्तप्रश्नस्य उत्तरं समाधातु न शक्तिरिति।

एव प्रसिद्धार्थानीव सरलार्थानीव पदानि मन्त्रेऽर्थस्य तु तत्र अनानुगुण्य, यथौषधिसूक्ते उच्यते या ओषधयो देवेभ्य पुरा पूर्वा जातास्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च इति। अत्र त्रियुग पुरा पूर्वा इत्येषा पदानामुक्तार्थत्वमिव शतं सप्तधामानि कानि इत्येतद्विषये निर्णयाभाव.। मन्त्रे सङ्ख्येयार्थविरहितानि सङ्ख्यापदान्युच्यन्ते तेपा सम्यगुपपत्त्यभाव.। अविज्ञातार्थाप्रसिद्धपदप्रयोगस्थले तु का कथाऽर्थविवरणे, व्याकरणाद्यनुसारेण यथा कथ च व्युत्पत्तिकल्पनेऽर्थस्यानाञ्जस्यम्।

ब्राह्मणेऽपि क्वचन मन्त्रार्थव्याख्यान दृश्यते यथा 'हंसः शुचिषद्वसुरन्तरीक्षसदि'ति मन्त्रे हंसादिशब्दैरादित्य एवोच्यते इत्युच्यते। तत्रोच्यते 'हंस शुचिषदित्येष वै हंस शुचिषद्' इत्येवमादि। तावता शुचिषदादीनामादित्यपरत्वेन वर्णनं को गुण इति न विशद विवृतम्। यत्र व्याख्याने उपपत्तिमाहित्यमिव वस्तुनस्तत्र न नादृशत्व यथा "सप्तदशो वै प्रजापति"रित्यस्य व्याख्यानं ब्राह्मणे "द्वादशमासा पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान्संवत्सर संवत्सरः प्रजापति." इति। अस्य व्याख्यानस्य "सप्तदशो वै प्रजापतिः" इति प्रजापते. प्रसिद्धसाप्तदश्यप्रदर्शनार्था प्रवृत्ति। तत्र मूलवाक्ये वैशब्दप्रयोगेण प्रजापतेः साप्तदश्यं प्रसिद्धयतिरिक्तप्रमाणानपेक्षत्व द्योत्यते। व्याख्याने तु साप्तदश्यतसवत्सरा-भेदात्प्रजापतेः साप्तदश्यव्यवहारः प्रतीयते। संवत्सरेऽपि साप्तदश्ययोगो न स्वाभाविक. प्रसिद्ध इति तत्साधनार्थ सर्पान्तप्रकार उच्यते तत्र "द्वादशमासा पञ्चर्तवः" इति। तत्र मासेषु द्वादशत्वसंख्या प्रसिद्धा, ऋतुषु तु पञ्चत्वसङ्ख्याया अप्रसिद्धि "षट् वा ऋतव" इत्यादिना षट्त्वप्रसिद्धिरिति संवत्सरेऽपि साप्तदश्यस्याप्रसिद्धिस्तदर्थमृतुषु पञ्चत्वसङ्ख्या-सपत्त्यर्थमुच्यते "समासेन" इति। समासः सक्षेप एकत्वनार्थाद्वयोऋत्वोरेकत्वेन ग्रहणेन ऋतुषु पञ्चसङ्ख्याप्रसिद्धया संवत्सरे साप्तदश्यसंपत्तिः स्यादिति। समासो हेमन्तशिशिरत्वोरिति। परं तत्तु न सम्यगिव। यतो मूले वैशब्देन प्रजापतेः प्रसिद्धं साप्तदश्यमुच्यते न तु पदार्थान्तरा-भेदात्तत्। तत्रापि पदार्थान्तरे यदि प्रसिद्ध साप्तदश्यमभविष्यत्तदानी तदभेदेन तत्सम्भवे-दपि। परन्तु तत्रैव पदार्थे साप्तदश्य न प्रसिद्धं किन्तु कल्पनया साधनीयम्, प्रदर्शितं च तद्दृतु-समासेन। एवं कल्पनया साप्तदश्यसंपादन तदैव सम्भवेद्यत्र प्रकारान्तरेण सिद्धस्य तस्यान्यत्र

प्रयोगः। यथा छन्दोविषये पादानामक्षराणां वा सङ्ख्या प्रमाणान्तरेण नियता, तत्र मन्त्रे प्रयोगे तच्छन्दोव्यवहारस्योपपादनाय "न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्या" मित्यादिना संपत्तिः प्रदर्श्यते, नैवमत्र प्रजापतेः प्रसिद्धं साप्तदश्यमप्रदर्श्य संवत्सरे साप्तदश्यं संपादयितुं युक्तम्। अन्योन्याश्रयप्रसङ्गश्च संवत्सरसाप्तदश्याधीनं प्रजापतिसाप्तदश्यं प्रजापतिसाप्तदश्याधीनं च संवत्सरसाप्तदश्यमिति।

एवं निरुक्ते तदा तदा तेन तेन प्रकारेण व्याख्यानं प्रदर्श्यते। तत्र व्याकरणापेक्षया शब्दस्वरूपसाधनार्था अपरेऽपि प्रकारा उच्यन्ते, यथा वैयाकरणैरग्निपदस्य साधनेऽङ्गेर्निर्नलोपश्चेति तत्पदं साध्यते, निरुक्त उच्यते, "इतादक्ताद्दग्धाद्वा निःपर इति"। नेनेण्धातोरकारोऽञ्जुधातोर्दहधातोर्वा गकारो नयतिः पर इत्यग्निपदसाधना। अर्थानुसारेण प्रयोगानुसारेण व्याकरणाद्युक्तप्रकारासम्भव एषा कल्पनेत्युक्त, तावता कल्पनस्यातिव्यापकत्वेन प्रसिद्धिः सन्दिग्धैव। अर्थश्च प्रयोगानुसारेण निर्णेयः प्रयोगश्च व्यवहारमपेक्षते, वैदिकव्यवहाराविज्ञानेऽस्माकं प्रसिद्धव्यवहारेण तत्कल्पने मूलोक्तार्थासंस्पर्शप्राप्तिः। यथैकया प्रतिधेति मन्त्रे काणुकाशब्दार्थाविज्ञाने तत्र प्रयुज्यमानयोरिन्द्रसोमयोस्तदर्थकत्वं सम्भवि गृहीत्वा 'कान्तकानीति कृतकानीति वा कर्णेहत. कानिहत'इत्यर्थकरणेन तत्तदुचितधात्वादितस्तत्पदसिद्धिरुक्ता, तावता तत्पदस्यार्थः सन्दिग्ध एव, सोमाभिप्रायकता तस्येन्द्राभिप्रायकतेति वेति। एव 'तदद्य वाच' इति मन्त्रे पञ्चजनपदार्थनिर्णयावसरे मतद्वयमुक्तं, 'गन्धर्वाः पितरो देवा असुरा रक्षांसि, निषादपञ्चमाश्चत्वारो वर्णा' इति मतद्वयं प्रदर्शितम्। तावतापि मन्त्रार्थानिर्णयस्तत्पदार्थानिर्णयश्च। ऐतरेये वैश्वदेवशस्त्रे सर्वेषां पञ्चजनानामुक्थमित्युक्तम्। सर्वे पञ्चजनास्तत्रोक्ता "देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितृणां च" इति। तेन साकं विरोधश्च। तत्रानुक्तानामसुररक्षसा ग्रहणादुक्तानां च सर्पादीनामग्रहणात्। किञ्चौक्तौषधसूक्तीयमन्त्रे त्रियुगमित्यस्यार्थस्य स्पष्टमनुक्तिः। सप्तशतपदयोः गुणनेनार्थप्रतिपादकताऽन्यथा वेति सन्दिग्धम्, पुरुषमर्मसङ्ख्याप्रतिपादनद्वारेण मूलोक्तचशब्दप्रयोगविरोधश्च। सायणभाष्यकारादिभिस्तस्य त्रियुगमित्यस्य कृतादियुगत्रयपरतोच्यते, तत्र युगपदार्थस्यास्वारस्यम्। सप्तशतपदयोर्निरुक्तवदेवार्थकरणेन चशब्दविरोधश्चेति मन्त्रार्थास्पष्टत्वम्। अर्वाचीनैर्व्याख्यातृभिः सायणार्थमनुरुध्य प्रायेण विचारस्तत्र दोषोद्भावन क्वचन स्वातन्त्र्येणार्थकरणं, तत्रापि बहूनां स्थलानां वर्णनस्यानाञ्जस्यम्। यथा स्यकम्मूलरमहोदयेनादित्यपरत्व वर्ण्यते परन्तु हिमकाले तस्य तेजोन्यूनत्व वसन्तादिकाले तदाधिक्यमेवंपरतया कानिचन स्थलानि योज्यन्ते बहूनि चासङ्गतानि, वन्दनादिप्रभृतीनां तमसि मग्नानामश्विभ्यामुद्धार इत्यादीनामस्वारस्य च। अपरैरर्थस्यादित्यरूपस्य वेदप्रतिपाद्यत्वं स्वीकृत्यापि तस्य केवल सुमेरुमात्रसम्बन्धितयैव वेदे वर्णनमिति स्वीक्रियते तत्परत्वमेव सर्वस्य वर्णनस्येति।

तत्रोषसां त्रिंशत्त्वमनेककालावस्थायित्व तमसो दीर्घत्वेन वर्णना दीर्घाहस्त्वेन वर्णना वेदे ध्रुवप्रदेशापरपर्यायसुमेरुप्रदेशमात्रसम्बन्धित्वं बोधयन्ति, विदेशीयपुराणग्रन्थकथा अपि तत्सूचका इति तदपि आदित्यपरत्वं बोधयति वेदस्येति न तदंशे प्राचीनसंमतवैदिकमतेन विरोधः किन्तु उक्तविधवर्णनानि सुमेरुकुमेरुरूपप्रदेशद्वयवर्णनसाधारणानि सन्त्यप्येकप्रदेशमात्रसम्बन्धित्वं तेषां गृहीत्वा सिद्धान्तस्थापनं विरुद्ध तादृशकतिपयस्थलोल्लेखेन व्याख्यानापेक्षेति।

वैदिकव्यवहाराः प्राचीनास्तेषामानुरूप्येण वेदादिवर्णनस्य मास्माकीनपरिस्थितिवैषम्येण तदनुरोधेन वैदिकग्रन्थव्याख्यानं न सम्यक्, तासां परिस्थितीनामस्मदादिभिरविज्ञानादास्माकीनपरिस्थितेस्तत्रासम्भवात् इति वेदस्यार्थकरणमेवासम्भवग्रस्ततामायाति। तथापि साधारणनियमानां सर्वत्रैक्यस्य दर्शनात्स्थलविशेषे प्राचीनव्यवहारस्य याज्ञिकपद्धत्या विज्ञानेन तदसम्भवाभावः। अतएव प्राचीनपरिस्थिते. परिपालनार्थं विज्ञानार्थं याज्ञिकपद्धत्याः प्रवर्तनम्, तद्वशतो विभिन्नदेशकालिकानां व्यवहारज्ञानं सुकरमित्यभिप्रायेण मन्त्र एवोक्तं यथा— 'देवानां नु वयं जाना प्रवोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे।' इत्यनेन। यद्यप्यनेन उत्तरयुगे शास्त्रवचनानुसारेण विज्ञानमित्येवोपनिबद्धं तावता न्यायसाम्याद्देशान्तरीयाणामिव कालान्तरीयाणामपि विज्ञानसम्भवः। अतस्तदनुसारेणैव मन्त्रादीनामर्थकरणं न्याय्यम्।

यत्तु देशान्तरीयपुराणकथानुसारेण तदानुरूप्यस्य वैदिकग्रन्थेऽप्युपलम्भेन विशिष्टसिद्धान्तव्यवस्थापन तत्तासां कथानां सम्यग्विचाराभावनिबन्धनम्। तत्र तदर्थमेवमुच्यते यद्वेदे कृत्तिकाविषये "एना वै प्राच्यै दिशो न च्यवन्ते" इति वर्णनेन कृत्तिकानां प्राचीदिक्सम्बन्ध उच्यमानस्तासु वर्षारम्भं ज्ञापयति। अतएव नक्षत्रमालासु तदादित्वेन वर्णना। यथोच्यते—"कृत्तिकाः प्रथमं विशाखे उत्तममेतानि वै देवनक्षत्राणि। अनुराधाः प्रथममपभरणी उत्तममेतानि वा यमनक्षत्राणि"इति। वेदाङ्गज्योतिषग्रन्थे नक्षत्रदेवतानां कथनावसरे "अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः। सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च"इत्यादिना कृत्तिकादिक्रमेणाग्न्यादिदेवतानां वचनम्। नक्षत्रमालासु कृत्तिकादिः क्रमो यथोपलभ्यते वैदिकग्रन्थेषु एवमिदानीन्तनप्रसिद्धनक्षत्रमालाक्रमस्यान्यथात्व दृश्यते। यथेदानी प्रसिद्धो नक्षत्रमालाक्रमोऽश्विन्यादिरेवतीनक्षत्रपर्यन्तः। एतद्विषमत्वे बीजं नक्षत्रमालादिमनक्षत्रस्य वर्षारम्भतोऽप्रमृति। पूर्वं कृत्तिकानां यदा वर्षारम्भनक्षत्रत्व तदा ता आरभ्यैव नक्षत्राणां क्रमो नक्षत्रमालायामासीदिति तथावर्णनमुक्तस्थलेषु। कालक्रमेण यदा ता वर्षारम्भस्थानतो विच्युता नक्षत्रान्तर तत्र स्थाने प्रवृत्तं तदा तदारभ्य नक्षत्रमालाप्रवृत्तिः। नक्षत्रस्य वर्षारम्भस्थाने प्राप्ति. पूर्वनक्षत्रतः प्रायोऽन्यूनसहस्रवर्षैरिति नक्षत्राणा वत्सरारम्भप्राप्तिश्च विपरीतेन क्रमेणेति कृत्तिका तत्स्थानतो विच्युता भरणी तत्स्थानमधिगता सापि विच्युता अश्विनीनक्षत्र तत्स्थानमधिरुरोह। तदादिनक्षत्रमालायामश्विनीनक्षत्रस्य प्राथम्य प्रवृत्तमित्यश्विन्यादिनक्षत्रगणना प्रवृत्ता येदानीमस्माकं प्रसिद्धा।

यद्यपीदानी वर्षारम्भस्थानं रेवतीनक्षत्रमतीत्योत्तराभाद्रपदामतीत्य पूर्वाभाद्रपदासु प्राप्तं तदनुसारेण नक्षत्रमालाक्रमो अश्विन्यादित्वं परित्यज्य भाद्रपदादित्वमपेक्षते तादृशश्च संस्कारो ज्योतिर्विद्भिर्न कृत इति अश्विन्यादिक्रम एवोपलभ्यते, तावता नक्षत्रमालाक्रमविभेदस्योपलम्भेन तत्र वर्षादिस्थानभेदनिमित्तकत्वं विज्ञातु पार्यत एव। एकनक्षत्रतो नक्षत्रान्तरप्राप्तौ वर्षारम्भस्थाने वर्षसहस्रमपेक्षत इति समुपलभ्यमानवर्षादिस्थाननक्षत्रतः कृत्तिकानक्षत्रस्य तत्स्थानप्राप्तयेऽन्यून वत्सरसहस्रषट्कमपेक्ष्यत इति तादृशपरिस्थितेर्वेदे वर्णनेन तस्य वत्सरसहस्रषट्कतः पूर्वं प्रवृत्तिरिति सामान्यतो ज्ञायते। ततः पूर्ववर्तिनक्षत्राणां यदि वर्षारम्भस्थानकत्ववर्णनस्य साक्षात्परम्परया सूचकश्चेन्निर्देशो वेदे उपलभ्येत ततस्ततोऽपि प्राचीनकालिकत्वं

तत्र सम्भाव्येत । तादृशस्य निर्देशो मृगशिरसो विषय उपलभ्यते । तथाहि प्रथमतो गीतावचनं तत्रेश्वरविभूतिकथनावसरे उच्यते "मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकर" इति । तत्र मासानां मध्ये मार्गशीर्षमासस्य भगवद्विभूतित्वं धान्यसमृद्धिशालित्वादिति टीकाकृद्भिर्व्याख्यायामुच्यते । एकेन टीकाकर्त्रोच्यते वर्षादिमासत्वाद्भगवद्विभूतित्वमस्येति । तत्र वर्षादित्वमयनादिमासस्यापि भवति प्रथमर्तुप्रथममासस्यापीति वर्षादित्वविषये सन्देहे तत्रैव "ऋतूनां कुसुमाकर" इति वर्णनेनोपस्थितत्वाद्वसन्तादिमासत्वरूपस्यैव वर्षादेर्ग्रहणम् । तथा सति मार्गशीर्षस्य वसन्तादित्वरूपवर्षादिमासता गीतायामुक्तेति भवति । तत्र यद्यपि मासनामव्यवहारः पूर्णमास्यां चन्द्रमोनक्षत्रयोगितयेति मृगनक्षत्रे पूर्णिमायां वसन्तारम्भरूपवर्षादित्वग्रहणे ऋतुव्यवहारस्य सूर्याधिष्ठितनक्षत्रवशतः प्रवृत्त्या मृगनक्षत्रपूर्णमासस्य वत्सरादित्वे मृगनक्षत्रं पूर्णमास्यां वर्तमानं चन्द्रमसो नक्षत्रं स्यात् । पूर्णमास्यां च सूर्याचन्द्रमसोरत्यन्तविप्रकृष्टत्वेन चन्द्रमोऽधिष्ठितनक्षत्रतश्चतुर्दशे नक्षत्रे सूर्यनक्षत्रता स्यात् । तादृशं च नक्षत्रं ज्येष्ठानक्षत्रं तस्य वत्सरारम्भरूपवसन्तारम्भकत्वे विंशतिसहस्रवत्सरतोऽपि प्राचीनभावः प्राप्नुयात् ।

एवं सति मध्यवर्तिनक्षत्रेषु वसन्तारम्भचिह्नस्योल्लेखोऽपेक्षणीयस्तथोल्लेखस्य वेदादिष्वनुपलम्भेन तथा कल्पनस्यायुक्तत्वं स्यात् । गीतायां च साहचर्याद्वसन्तादिमासत्वरूपवर्षारम्भस्य प्राप्तिरिति विरोधे प्राप्ते उच्यते मार्गशीर्षस्य वसन्तादित्वं न मृगशिरसि पूर्णमासत्वरूपमार्गशीर्षनामनिबन्धनं किन्तु तत्रैव आग्रहायणिकनामनिबन्धनं तत् । तच्च नामाग्रहायणीसम्बन्धात् । आग्रहायणीति मृगशिरसो नामेति अमरकोशे उच्यते, मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी इति । अत्राग्रहायणीति पदं मृगशिरोबोधकमिति बहवः । वस्तुतस्तु वत्सरादौ क्रियमाणक्रियासम्बन्धेनाग्रहायणीपदं तां क्रियां बोधयति सा च क्रिया मृगशिरसीति । अतएव तस्याः क्रियाया बोधकं नाम श्रौतसूत्रादिषु आग्रयणेष्टिरिति प्रतिपाद्यते । आग्रयणशब्दश्च हायनाग्रसम्बन्धेन प्रवृत्तः । तत्र अग्र-हायणेति पदद्वये द्वितीयं पदं हाधातोर्गमनार्थान्निष्पन्नम्, हाधातोर्गमनार्थत्वमिव हय धातोरपि गमनार्थत्वं हय गताविति पाठात् । एवञ्च अग्रहायण अग्रहयनेति पदद्वयं समानार्थम् । पदादिभूतस्य हकारस्य परित्यागः प्रयोगे बहुलं दृश्यतेऽतएव अय गताविति समानार्थकधातूपदेशः । विदेशीयभाषास्वपि हकारपरित्यागस्तद्योजनं वा दृश्यते । एवं सति अग्रहयनेति शब्दो अग्रअयनेतिरूपो भवेत् । तथा च स आग्रायणेति रूपतां प्राप्नुयात् । तत्र ग्रेत्याकारस्य ह्रस्वे चाग्रयणशब्दो हायनस्य वत्सरस्यादिबोधकः स्यात् । तमिमं वर्षादिमभिप्रेत्याग्रयणशब्दः प्रवर्तमानस्तत्र क्रियमाणामिष्टिमपेक्ष्य सूत्रेषु आग्रयणेष्टिशब्देन व्यवह्रियते । यजुषि च रुद्राध्याये चमकभागे सौमिकग्रहवर्णनावसरे "आग्रयणश्च मे वैश्वदेवश्च मे" इत्यत्र ग्रहाभिप्रायक आग्रयणशब्दोऽपि प्रयुज्यमानो दृश्यते । तत्रैव "शुक्रश्च मे मन्थी च मे" इत्यनेन शुक्रामन्थिनोर्ग्रहयोर्वचनं तयोश्चादित्यचन्द्रमोरूपत्वस्य तत्र वेदे वचनेनाग्रयणोऽपि कस्यचन तेजस्विनः पदार्थस्य बोधकः स्यात् । स च आग्रयणरूपः पदार्थ आकाशे दृश्यमानः प्रकृष्टप्रकाशरूपो मृगशिरस्सविधे आर्द्राख्यतारकाविशेषो व्याधरूपः संभवेत् । एवं च आग्रयणशब्दस्य वर्षादिबोधकता, स चाग्रयणशब्दो मृगशिरसो बोधकः ।

ब्राह्मणे प्रजापतेरादित्यस्य दुहित्रारोहं दृष्ट्वा देवैरकृतकार्यकारिणो वेधाय सन्निर्मितस्य रुद्रस्य बाणेन वेधे प्रजापतिरूर्ध्वमुत्प्लुतः, सोऽसौ मृगात्मना सन्दृश्यते "तमेतं मृग इत्याचक्षत" इति तत्र वचनात्। तत्र मृगशिरसि सन्दृश्यमानबाणाकारतारकात्रयं स एव प्रजापतेर्वेधोपयुक्तः शरः पश्चाद्दृश्यमानस्तेजस्वी तारकाविशेष एव प्रजापतेर्वेधकारी रुद्रो देव इति ऐतरेये वचनम्। मृगशिरसि वर्षादिं विना नैतदुपपद्यते। तस्मान्मृगशिरसि वर्षादेरभिप्रायेण तस्यैव बोधको वैदिकाग्रयणशब्दो मृगशिरसि वर्षादिस्थानस्य बोधकः। वर्षादिरेव वसन्तादिभिर्भवतीति गीतायां मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकर इति मार्गशीर्षस्य वसन्तादिरूपवर्षादित्वेन मासानां मध्ये मुख्यत्वं वसन्तस्यर्तुमध्ये प्रथमत्वं वत्सरारम्भे प्रवर्तमानत्वेनेति साहित्यान्मार्गशीर्षस्य वर्षादित्वेन भगवद्विभूतित्वमुच्यमानं संगच्छते। स च मृगशिरसि वत्सरारम्भकालः प्रायेणेतो वत्सरसहस्राष्टकतो न्यूनो न स्यात्। तस्य कालस्येदानीमपि वैदिकैरुपनयने बटोर्वेषविशेषादिनानुकरणं क्रियमाणं दृश्यते। उपनयने बटोर्मृगचर्मसन्धारणेनाभिव्यज्यते मृगशिरोरूपप्रजापतेरनुकारः। तच्च मृगचर्मसन्धारणं पूर्वं सर्वाङ्गीणमासीदिदानीं तस्य चर्मणः खण्डधारण दृश्यते, तावता मृगानुकारो व्यज्यत एव। ग्रीक्देशीयपुराणग्रन्थवर्णवतोऽपि मृगशिरसि वर्षारम्भ आसीदिति विज्ञायते। तत्रोरायणस्य 'इग्रास' इत्यस्या उपरि प्रेम आसीदित्यादिना प्रेमसम्बन्धो वर्ण्यतेऽनेकविधः। तत्र वेधार्थं प्रदर्शितं दूरस्थं वस्तु विद्धं तस्य प्रेमिणःशिरआसीदित्यादिना वर्ण्यते। आकाशे विद्धस्य प्रजापतेरिषुणा साकं शिर उत्प्लुतं मृग इति ब्राह्मणे उच्यते। ओरायण इत्यस्य सायुधराक्षसरूपत्वेन कल्पना पाश्चात्यपुराणग्रन्थेषु, तत्र इग्रास इत्यस्या उपरि ओरायण इत्यस्य प्रेम आर्तिजियेत्यस्या वा तदुपरिप्रेमेति वर्ण्यते। ब्राह्मणे प्रजापतेर्दुहितोषा इत्येके प्राहुर्द्यौश्चैक इति उच्यते। तदुक्तं तत्र "दिवमित्याहुरुषसमित्यन्ये" इति। स चोरायन्शब्द आग्रयणशब्दस्य भाषिकप्रणाल्या रूपान्तरं भवितुमर्हति। आग्रयणशब्दे आकारस्यौकारो गकारलोपो रेत्यस्याकारभावो यणेत्यस्य इन्रूपतेति ओराइन् ओरायणरूपो भवितुमर्हति। यद्यप्यत्र पदमध्ये गकारस्य लोपे भाषिकनियमो न दृश्यते तथापि तादृशगकारलोपः शब्देषु दृश्यते। तत्रेग्रासप्रभृतीना संस्कृत-उषःप्रभृतिशब्दप्रतिरूपकत्वस्य सम्मतत्वेन ओराइन् इत्यस्यापि संस्कृतशब्दो मूलमपेक्ष्यत इति स उक्तरीत्याग्रयणशब्दतो भवितुमर्हतीति पाश्चात्यदेशीयकथातोऽपि मृगशिरसि वर्षारम्भ आसीदित्यर्थ एव सम्यग्भवति।

ऋङ्मन्त्रेषु इन्द्रेण नमुचेः शिरस एव छेदनमुच्यते। "अपां फेनेन नमुचेः शिर इन्द्रो दवर्तयः। विशृङ्गिणमभिनच्छुष्णमिन्द्र"॥ यद्धत्य मायिन मृगं तमु त्वं माययावधीः। शिरो न्वस्य राविपम्" इत्यादिषु व्यक्तमुच्यते। एवं च मृगशिरसि वर्षादित्वमिव ततः पूर्वभाविनि पुनर्वसुनक्षत्रे वर्षादित्वस्य स्पष्टं चिह्नं नोपलभ्यते, अस्पष्टं तु देवानां दिशो व्यामोहेऽदितिप्रार्थनया पूर्वदिग्विज्ञानं तत्रोच्यते 'मयैव प्राची दिशं विजानाथ' इति ब्राह्मणेऽदितिवाक्यम्। अदितिश्च पुनर्वसुनो देवतेति पुनर्वसुन्वपि वर्षारम्भ आसीदिति विज्ञायते। तथा सति स काल इतो वर्षसहस्रदशकात्मेति। तस्मिन्काले जायमानविशेषाणां वेदे उपलम्भात्सा वैदिकी संस्कृतिस्ततः प्रवृत्ता आसीत्। यद्यपि तस्मिन्नवसरे सूक्तोपनिबन्धो न भवेत् परन्तु संक्षिप्य वाक्यैस्तदनुसरणस्य क्रमिकस्य संभव इति तादृशि वाक्यानि

निविदादीनि संभवन्ति । तदनुसारेण परस्तात्सूक्तोपनिबन्धस्य संभव इति । एवमादिवर्णनेन ये सिद्धान्ता व्यवस्थाप्यन्ते तेषां तदसाधकत्वमिव प्रतीयते । तथाहि अत्र बीजं गीतावचनं यत्र मार्गशीर्षस्य सर्वमासमध्ये भगवद्विभूतित्ववर्णनम् । तत्त्वं वत्सरादित्वात्तस्येति । तत्तु न युज्यते वर्षादित्वमेव भगवद्विभूतिमत्त्वे कारणं चेदन्येषामपि मासानां वर्षादित्वसम्भवेन मार्गशीर्षस्य भगवद्विभूतिमत्त्वं निर्बीजं स्यात् । धान्यादिसमृद्धिशालित्वेन तत्त्वे तु मासान्तरेषु तदभावेन तेषां तत्त्वाभावश्चेति वर्णयितुं शक्यम् । किञ्च वर्षादित्वमुच्यमानं कीदृशं वत्सरादित्वं तस्य, किमयनप्रारम्भरूपवर्षादिता तस्योत वसन्तप्रारम्भरूपवर्षादिता तस्य विवक्षिता । आद्येऽपि अयनस्य द्वैविध्येन किमयनप्रारम्भरूपवर्षादित्वं तस्य, किमुदगयनप्रारम्भकत्वात्तत्त्वमुत दक्षिणायनप्रारम्भात्तथा । अन्त्ये मार्गशीर्षे दक्षिणायनप्रारम्भे ज्येष्ठ उदगयनारम्भो भवेत् भाद्रपदे वसन्तसम्पातः प्रारम्येतेति संपातनक्षत्रं फाल्गुनी स्यात् । भाद्रपदे पौर्णमास्यां चन्द्रमसो भाद्रपदानक्षत्रं स्यात् सूर्यस्य च ततोऽत्यन्तविप्रकर्षात् । तादृशं च नक्षत्रमत्र फल्गुनीति तदानी वसन्तसंपातः स्यात्तथा सति नक्षत्रियप्रजापतिवचनविरोधः स्यात् । नक्षत्रियः प्रजापतिः पञ्चस्वेव नक्षत्रेषु संपातारम्भकत्वेनोच्यते, यदि पञ्चनक्षत्रतोऽतिरिक्तनक्षत्रे संपातारम्भस्तदा पञ्चसु नक्षत्रेषु प्रजापतित्ववर्णनं विरुद्धं स्यात् ।

अथ संपातो द्विविधो वासन्तिकः शारदश्च । तत्रैषु हस्तादिषु अनुराधान्तेषु शारदसंपातत्वे वासन्तिको भिन्नेषु नक्षत्रेष्विति तद्वचनं न युक्तमिति चेत्तदपि न शारदसंपातवशतयैव तेषां नक्षत्रियप्रजापतित्वात् । तत्र फाल्गुन्या वसन्तसंपातनक्षत्रत्वे भाद्रपदायाः शारदसपातता स्यादिति नक्षत्रियप्रजापतिविरोधः । संपातसम्बन्धित्वेनैव नक्षत्रियप्रजापतित्वं वक्तव्यमन्यथेन्द्रस्य शतक्रतुवचनं विरुध्येत । पञ्चानामेव नक्षत्राणां शारदसपातनक्षत्रत्वे ततोऽशीत्यधिकशतांशविप्रकृष्टाना पञ्चानामेव नक्षत्राणां वासन्तिकनक्षत्रता स्यात्, शारदसांपातिकानां नक्षत्रियप्रजापतित्वेनोच्यमानानां हस्तादिपञ्चनक्षत्राणां हस्तनक्षत्रतः पञ्चमस्यानुराधानक्षत्रस्य चतुष्पञ्चाशदंशविप्रकर्षेण तावदंशपर्यन्तमेव स संपातो गतिमान् स्यात् आन्दोलितगत्या, अन्यथा नक्षत्रियप्रजापतिवचनविरोधः स्यात् । एवं शारदस्यान्दोलितगतिमत्त्वे वासन्तिकस्याप्यान्दोलितगतिर्वक्तव्या सापि पञ्चस्वेव नक्षत्रेषु । अन्तरमपि तत्र चतुष्पञ्चाशदंशात्मकमेव वक्तव्यं, तथा सति वासन्तिकसंपातस्य दैवदिनादितया वर्णनात्तत्र च पूर्वस्यामुदयात्तानि नक्षत्राणि पूर्वाणि पूर्वदिक्स्थानीति भवेत्, अन्तरं च तेषां चतुष्पञ्चाशदंशरूपमेव स्यात् । तावत्स्वंशेषु सोऽप्यान्दोलितगतिं प्राप्नुवन्नष्टोत्तरशतांशैर्मालारूपः स्यात् । तच्चोषधिसूक्ते या ओषधीरिति मन्त्रेणोच्यते—यास्त्रियुगं त्रयश्च युगं चेति त्रियुगं पञ्च ओषधयो देवानां कृते पूर्वाः पूर्वदिक्स्था वासन्तिकसंपातस्था पुरा जातास्तासां सप्तोत्तरशतं धामानि अंशरूपाणि स्थानानि स्तुवे इति तदर्थात् । ओषधयश्च नक्षत्राणि देवानामाजिधावनस्थानत्वोक्तेः । एवं च पूर्वदिक्स्वामीन्द्रः स तु साम्पातिकस्थानस्थः संपातपरिभ्रमेण तावन्ति कर्माण्यनुतिष्ठति तानि संपातस्थानान्यनावृत्तानि स्थानानि चतुष्पञ्चाशत्सार्धत्रिपञ्चाशदंशरूपाणीव । दक्षिणोत्तरगतिसम्बद्धानि च स्थानान्यनावृत्तानि सप्तचत्वारिंशत्सार्धषट्चत्वारिंशद्वा, तेषां पूर्णान्तं योगे शतं सङ्ख्या तावत्कर्मकर्तृत्वमिन्द्रस्यैवेति स शतक्रतुरित्युच्यते । तानि च कर्माण्यश्वमेधरूपाणि इति परस्ताद्विस्तरेण प्रतिपादितम् ।

एवं नक्षत्रियप्रजापतिविरोधादिन्द्रस्य शतक्रतुवचनविरोधादोषधिसूक्तस्थवर्णन-विरोधाच्च फल्गुन्याः संपातनक्षत्रत्वसम्भवः। अथ मार्गशीर्षस्योत्तरायणप्रारम्भकता सापि न सम्भवति फल्गुन्याः सापातिकनक्षत्रत्वप्राप्त्या नक्षत्रियप्रजापत्यादिविरोधात्। अथ वसन्तप्रारम्भकत्वरूपवर्षादिता तस्य तदपि न सम्भवति। मासनाम्नां पौर्णमास्यां चन्द्रमः-सम्बद्धनक्षत्रवशतः प्रवृत्तेः। तदुक्तं पाणिनिना "सास्मिन्पौर्णमासीति संज्ञाया"मित्यनेन पूर्णमासीनक्षत्रयोगान्मासनामेति पूर्णमास्यां कृत्तिकाया मासनाम कार्तिकश्चित्रायास्तावृशत्वे माग्गनाम चैत्र इत्यादिवत्पौर्णमास्यां मृगशिरोनक्षत्रयोगान्मासनाम मार्गशीर्ष इति स्यात्। संपातार्थं च सूर्यनक्षत्रापेक्षा मृगशिरसञ्च मासनामार्थत्वे ततो विप्रकृष्टं सूर्यनक्षत्रं यद्भवेत्तत्र वासन्तिकः संपातः स्यात्तादृशं च नक्षत्रं जेष्ठा भवेत्तत्र वसन्तसंपातस्वीकारे नक्षत्रियप्रजापत्या-दिविरोधः स्पष्ट एव। एवं सति न मार्गशीर्षस्य वर्षादिताऽयनारम्भकत्वाच्च वा वसन्तारम्भक-त्वादिति वर्षादित्वाभावाच्च वर्षादित्वेन तस्य भगवद्विभूतिमत्त्वम्। किन्तु समृद्धिमत्त्वादेवेति।

यत्तु मृगशिरसो वसन्तादिकल्पनाऽऽग्रयणनामवशतः, आग्रयणनामाग्रहायनत आग्रायणेति वा आग्रयणेतिनाम्नो हायनाग्रसम्बन्धादिति। तदपि न। तस्मिन्नाम्नि आग्रायणेति वा आग्रयणेति वा आकारादित्वात्। अग्रशब्दसम्बन्धेन अग्रहायन अग्रायण अग्रयणेति नाम्नः सम्भवो न तु आद्यकारस्य दीर्घसंभावना। अथ तदर्थं अणः प्रत्ययस्य विवक्षणे अग्रहायनसम्बन्धादाग्रहायणमिति वा आग्रायणमिति वा आग्रयणमिति नाम भवेन् तेन च न हायनाग्ररूपहायनप्रारम्भबोधः। तथा सति हायनाग्रमिनिनाम भवेन्नत्वग्रहायनमिति। तस्मादग्रहायनस्वरूपसिद्धये अग्रहायनपदयोर्बहुव्रीहिर्वक्तव्यः। अग्रे हायनं यस्मादिति। बहुव्रीहौ च हायनाग्रावधित्वमेव प्रतीयते न तु हायनाग्ररूपवर्षा-दित्वम्, एवं च हायनाग्रावधिसम्बन्धबोधनादत्रार्थे हायनाग्रावधि-सम्बन्धिनः सर्वस्य आग्रहायण-आग्रायण-आग्रयणशब्दैर्बोधः स्यात्। एवञ्चामरकोशे तस्मिन्नेवाग्रहायणी-त्यनेनाग्रहायणावधिसम्बन्धिनी क्रिया तस्मिन्नेव मृगशिरस्येवेति तदर्थः, न तु मृगशिरसः स शब्दो वाचकः। अतएव तस्मिन्नेवेति पदप्रयोगोऽमरकोशे। किञ्चाणन्तनिबन्धनस्त्रीत्व-मपि तथैवोपपद्यतेऽन्यथा नपुंसकलिङ्गप्रयोगोऽभविष्यत्। अवधित्वं च पूर्वत्वे परत्वेऽपि वा भवति प्रकृते तु पूर्वावधित्वं तथा च यस्माद् हायनाग्रं पूर्वं प्रथमं भवति स आग्रहायणं वा आग्रहायणी वेति तदर्थः। आद्ये नक्षत्रपरत्वमन्त्ये पौर्णमासीप्रभृतिपरत्वम्। एवं च मृगनक्षत्रं नोदितमर्थात्पूर्ववर्तिनक्षत्रे समुदिते, हायनाग्रप्रवृत्तिः स्यादथवा तस्मिन्नक्षत्रे वसन्तसंपात-प्रवृत्त्या वत्सरप्रारम्भः स्यात्। तच्च पूर्वं नक्षत्रं रोहिणी, रोहिण्यां वसन्तसंपातो भवेत्। तथा सति आग्रयणपदं वसन्तसम्पातस्य रोहिण्या प्रवृत्तौ लिङ्गम्। तथा सति यजुर्वेदे रोहिणी-नामप्रवृत्तौ लिङ्गमुच्यते तस्योपपत्तिः। तत्रोच्यते 'देवा वै सर्वान् रोहानरोहन् यत्सर्वान् रोहा-नरोहन् तद्रोहिण्या रोहिणीत्वमिति। यदि रोहिणीतः परस्तान्मृगनक्षत्रेऽपि वसन्तसंपातो भवेत्तदा रोहिण्यां सर्वरोहाभावात्तद्वर्णनमयुक्तं स्यात्। किञ्च नक्षत्रियप्रजापत्यादिविरोधो-ऽपि। यत्तु ओराइन् इत्यस्य मूलं संस्कृतरूपमाग्रयणेति तदपेक्षया तस्य शब्दस्य रौहिण-शब्दतः प्रवृत्तिर्युक्ता। मुलभाऽपि सा तत्रौकारस्याकारभावो हकारलोपो इण शब्दस्य इन्रूपत्वे आदावोकारे ओराइन इति रूपस्य सूपपादत्वम्। किञ्च विदेशीयपुराणे

आग्रायण इत्यस्य राक्षसरूपत्वकल्पनोच्यते, वेदे रौहिणस्यापि सा। यो रौहिण-मस्फुरद्वज्रबाहुरित्यादौ राक्षसकल्पनाया वचनेन रोहिणशब्दत एव आग्रायणेत्यस्य सिद्धिरनुगुणा। एवं च न मृगशिरसि वसन्तसम्पातबोधकं विदेशीय-आग्रायणकल्पनमिति। किञ्च मृगस्य प्रजापतिरूपत्वं ब्राह्मणे उच्यते, तत्र सशरमाकाशे मृगनक्षत्रं दृष्ट्वा बाणेन वेधकल्पना वेधे निमित्तं च दुहित्रा सम्बन्ध इत्युच्यते, विदेशीयपुराणग्रन्थेषु इम्रास इत्यस्या उपरि प्रेमकल्पनोच्यते। एवं दिव आदित्यस्य दुहिता अस्तोत्तरभाविनी उषाः। तस्या एव तज्जन्यत्वेन दुहितृत्वकल्पना न तु उदयप्राग्वर्तिन्यामुषसि दिवो दुहितृत्वकल्पना। तस्या आदित्यं प्रति मातृत्वकल्पनात्। एवञ्चास्तोत्तरवर्तिनी उषा एव दिवो दुहिता, तया साकं प्रेमनिबन्धन एव तस्य बाणेन वेधः। अतएव विदेशीयमुषसः इम्रास इत्यस्या उपरि प्रेमवचनं सङ्गतम्। एवं च मृगशिरसि तत्रास्तोत्तरकालिकी या उषास्त-कालेऽस्तगिरिशिखरे तस्य नक्षत्रस्य सन्दर्शनेन तत्र प्रेमकल्पना। सम्भवति च रोहिण्यां देवेष्वादित्यस्योदयेऽसुरेषु अर्थात्कुमेरौ तदानीमादित्यस्यास्तमयेन तत्कालिके तस्मिन्नक्षत्रे-ऽस्तोत्तरदृश्योषःसम्बन्धे प्रेमकल्पनासंभवः। किञ्च तत्पुराणग्रन्थेषु अस्तमुपयतस्तस्य नक्षत्रस्य वृष्टिप्रद "इम्बिफर" मिति नामाप्युपपद्यते। तत्र हि कुमेरावादित्यास्ततो वर्षा-कालप्रवृत्तेर्मन्त्रे प्रतिपादनम्, तच्च "देवानां माने" इति मन्त्रे प्रतिपादितम्। रात्रौ तत्र मास-चतुष्टयपर्यन्तं वृष्टिमत्वात्परवर्तिमासद्वये परदिवसीयत्वकल्पनया रात्रौ ऋतुद्वयकल्पना दिने च तत्रर्तुत्रयमिति वत्सरे ऋतुपञ्चकवत्ववचनं "पञ्चपादं पितर"मित्यादिस्यमुपपद्यते। एवं च नाग्रयणशब्द आग्रायणेति नाम वा मृगशिरसो वसन्तसंपातसम्पादकमिति। यत्तु दीक्षा-ब्राह्मणवशतो मृगशिरसि वासन्तिकसपातसाधनमिति तदपि न सम्यगिव। दीक्षाब्राह्मणे संवत्सरसत्रार्थ दीक्षाकालास्त्रयो निर्दिष्टा (१) एकाष्टका (२) फाल्गुनी पूर्णमासी (३) चित्रापूर्णमासी। तत्र हेतवः क्रमेणोच्यन्ते १—एकाष्टका संवत्सरस्य पत्नी तस्यामेष एता रात्रिं वसति। २—फल्गुनीपूर्णमासः संवत्सरस्य मुखम्। ३—चित्रापूर्णमासोऽपि संवत्सरस्य मुखम् इति दीक्षाब्राह्मण यजुर्वेदे उच्यते, सामवेदेऽपि।

तत्र सामब्राह्मणे सर्व इमे प्रकारास्तथैवोच्यन्ते केवलं द्वितीयकालः फाल्गुन इत्येवोक्तः। तृतीयकाले हेतुरुच्यते चक्षुर्वा एतत्संवत्सरस्य यच्चित्रापूर्णमास इति। मुखतो वै चक्षुर्मुखत एव प्रारम्भ इति। प्रतिपूर्वं दोषा उच्यन्ते।

तत्र (१) आर्तं वा एते संवत्सरस्याभिदीक्षन्ते, व्यस्तं वा एते संवत्सरस्याभिदीक्षन्ते, अन्तनामानावृतू भवतः। (२) साम्मेघ्य विषुवान् संपद्यते। (३) तस्य काचन न निर्या। सामब्राह्मणे उच्यते (१) तस्य सा निर्या यदपोऽनभिनन्दन्तोऽभ्यवयन्ति। विच्छिन्नं वा एते संवत्सरस्याभिदीक्षन्ते। आर्तं वा एते सवत्सरस्याभिदीक्षन्ते। अन्तनामानावृतू भवतः। (२) संमेघे विषुवान् संपद्यते। (३) तस्य न कापि निर्या।

अत्रैकस्मिन्ननुष्ठाने त्रयो वर्षारम्भा उच्यन्ते. एकस्मिन्वत्सरे त्रयाणा वर्षारम्भाणाम-सम्भवेन ते भिन्नकालिका वक्तव्याः। तत्रैको वर्तमानकालोऽपरौ द्वौ पूर्वकालिकौ। तत्रेमे वत्सरारम्भाः किमयनारम्भकालिका उत वसन्तारम्भकालिकाः। तत्राद्ये एकाष्टकापक्षे संवत्सरस्यार्तिव्यत्यासदोषौ ऋत्वोरन्तनामत्वदोषश्च। तत्रार्तिः पीडा विनाशरूपो व्यत्या-

सोऽयनान्तरारम्भरूप इति। व्याख्यासु ग्रयनं हि पूर्वं समाप्तं द्वितीयं प्रारब्धमिति। ऋत्वोरन्तनामत्वं च ग्रन्तिमनामकस्तत्रर्तुर्भवति शिशिरो भवतीत्यर्थः। ग्रपामनभिनन्दनं च दोषः तदानीं शैत्यात्। परन्तु फल्गुनीपूर्णमासपक्षे तस्य संवत्सरमुखतोक्तिर्न युक्ता स्यात्। एकाष्टकायामवसितस्य संवत्सरस्य फाल्गुनीपूर्णमासस्य संवत्सरमुखताऽसम्भवः। ग्रयमेव चित्रापूर्णमासपक्षेऽपि दोषः।

ग्रथ वसन्तारम्भकालिका वर्षारम्भा इति द्वितीयः पक्षः। तत्रैकाष्टकायां वसन्तारम्भकालिको वत्सरारम्भ इति वर्णने तस्याः संवत्सरपत्नीत्व ब्राह्मण उच्यमानं न सङ्गच्छते, पूर्वपक्षेऽप्ययं दोषः। तत्र दिने संवत्सरवासकल्पनया द्वितीयदिनतो वसन्तारम्भो भवेत्। तथा सति एकाष्टकायां दिननक्षत्रं ज्येष्ठा तदनुरोधिसूर्यनक्षत्रं धनिष्ठा स्यात्। धनिष्ठायां माघे वसन्तसंपातकल्पने ग्रश्लेषासु श्रावणे शारदसंपातः प्राप्नुयात्। तथा सति नक्षत्रियप्रजापतिवचनविरोधः। तत्रैकाष्टकायां दीक्षणेऽपामनभिनन्दनदोषश्चानुपपद्येत। न हि तदा वसन्तारम्भे शैत्येनानभिनन्दनमपां सम्भवति। यद्यसौ वसन्तसंपातादिर्मन्येत तदानीं संपातस्य सर्ववृत्तपरिभ्रमे एतत्पर्यायगतत्वस्य तत्र कल्पनाऽसम्भवेन पूर्वपर्यायगतत्व वक्तव्यं, संपातस्य वृत्ते विलोमगतित्वेन वर्तमानकालतो वर्षसहस्रद्वयाधिककालोत्तरं सम्भविष्यतस्तस्य वेदे उल्लेखासम्भवः। पूर्वपर्यायगतत्वस्वीकारे चान्यूनविंशतिसहस्रवर्षाण्येतस्य कालः स्यादिति। किञ्च तदानीं पूर्वं सम्भवतामपरेषामपि वसन्तारम्भाणा दीक्षोपयोगित्वसम्भवेन तदनुल्लेखोऽसङ्गतः स्यात्। एवं फाल्गुनपूर्णमास्या दीक्षार्थं ग्रहणे तत्र वर्षादिता वसन्तसंपातादिरूपा यदि स्यात्तर्हि सपातार्थं सूर्यनक्षत्रं भाद्रपदा भवेत्। तत्र च संपात इदानी वर्तमानो ब्राह्मणे तस्य वर्णनमसंभवं स्याद्यतो ब्राह्मणस्यान्ततो न्यूनतो न्यूनसहस्रद्वयान्यूनसंवत्सरकालिकत्वेनैतत्पर्यायगतसंपातस्येदानी वर्तमानत्वस्य वक्तुमशक्यत्वेन पूर्वपर्यायगतं तद्वक्तव्यमित्यन्यूनविंशतिसहस्रवत्सरतः पूर्वभाविता वर्णनीया स्यात्। पूर्वपर्यायगतत्वे च ग्रपरेषां मध्यवर्तिसपातस्थानानुल्लेखस्यासमर्थनीयत्वापातः। एव चैत्रपूर्णमासस्यापि वसन्तादिमासत्वेन न वत्सरादिमासता, उक्तदोषतादवस्थ्यात्। एवं तर्हि ब्राह्मणोक्तोल्लेखस्य का गतिरिति चेत्। ग्रत्र ब्रूमः—नेमे निर्देशा विभिन्नवत्सरीयसंवत्सरारम्भबोधकाः किन्तु एकवत्सरीयविभिन्नकालिकवत्सरारम्भबोधकाः, तथाहि वत्सरारम्भो मेरुपर्वतस्य दक्षिणोत्तरदिग्वर्तिनो. सुमेरुकुमेरूरूपयोः शृङ्गयोर्दिनारम्भात्मकः। तत्रत्यं दिनं विषुववृत्तीयस्थानेषु तत्सविधवर्तिषु च स्थानेषु यत्र दिनरात्रभावः षष्टिघटिकाधिककालेन न भवति तेषु वत्सरशब्देन व्यवह्रियते। एवं चात्रत्यो वत्सरारम्भः सुमेरुकुमेर्वोर्दिनारम्भात्मकः। तत्रत्यं दिन च सुमेरौ देवयानशब्देन कुमेरौ च पितृयाणशब्देनोच्यते। तस्य देवयानादेरनेकरूपत्वं वेदे। यथा वत्सरे मकरसङ्क्रान्तिप्रारम्भे एकम्। उषःकालारम्भे द्वितीयं, सावित्रकालारम्भे तृतीयम्, ग्रादित्यमण्डलोदयतश्चतुर्थम्। सर्वाणीमानि देवयानान्येव। देवयानवत्पितृयाणस्यापि चातुर्विध्यं वेदे। तत्र कर्कसङ्क्रमणादौ प्रथममुष.-कालादौ च पूर्ववदवशिष्टानि। केवलं तेषां कालो भिन्नरूपः स्यात्। यत्तु ग्रादित्योदयकालिकमेव पूर्वतनं वैदिकमपरेषां पश्चात्कालिकत्वम् इति। तदयुक्तम्। ग्रपरेषामपि वेदे उपलम्भात्, ग्रत एव "पथिभिर्देवयानै"रिति बहुवचनोल्लेख उपपद्यते। देवयानानामनेकत्वे

पितृयाणस्यानेकत्वं सिद्धप्रायम् । किञ्च मन्त्रे एव चतुर्णां देवयानानामुल्लेखो "ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति" । इति । किञ्च सप्तमर्यादा इति मन्त्रे "पथां विसर्गे" इति बहुवचनोल्लेखो मर्यादानां सप्तत्वबोधनार्थश्चतुर्णां पथां विसर्ग इति पथचतुर्विध्येनैवोपपद्यत इति विस्तरेण प्रपञ्चितमन्यत्र । तथा सर्वस्यास्य ब्राह्मणस्योपपत्तिः । तथाहि संवत्सरसत्रार्थं दीक्षाग्रहणे प्रथमः काल एकाष्टकारूपः । तदुक्तं तत्र "संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्" इति । तत्रैकाष्टकाशब्द उषसं बोधयंस्तत्कालरूपां माघकृष्णाष्टमीं बोधयति । अत एव तस्याः संवत्सरपत्नीत्वेनोल्लेखः । व्यक्तो वेद उषस आदित्यपत्नीत्वेन व्यवहारो नैकस्थलेषु । तस्यामेतां रात्रिं वसतीति वर्णनेन संवत्सरस्य तत्र वासः परदिने पुनः प्रवृत्त्या वासरान्तररूपदिनान्तरारम्भः । उषःकालमारभ्य दिनान्तरारम्भस्य धार्मिकक्रियासु इदानीमपि प्रसिद्धिः । उषसश्च सुमेर्वादौ त्रिंशत्पर्यायपर्यन्तं प्रवृत्तिः । अत एव त्रिंशतं योजनानीत्याद्युल्लेख इति प्रपञ्चितं विस्तरात् । स चोषसःकालो भागत्रयेण विभक्तो रूपत्रयसम्बन्धात् । अन्तिमो भागोऽरुणवर्णः । यमभिप्रेत्योषसां अरुणप्सव इति विशेषणं सूक्तेषु । मध्यमो भागः श्वेतवर्णः । यमभिप्रेत्योषसां श्वेत्येति विशेषणमेवं प्रथमो भागः कृष्णवर्णः । तं कृष्णवर्णभागमभिप्रेत्योषसोऽत्र रात्रिशब्दसम्बन्धेन वचनम् । एवञ्चैकाष्टकाशब्देनोषःकालादिरूपस्य माघकृष्णाष्टमीरूपैकाष्टकाकालस्य ग्रहणे तत्र दीक्षणे परवर्तिवर्णनं सङ्गतम् । तथाहि—एकाष्टकायां दीक्षायां साक्षात्संवत्सरमारभ्य दीक्षोक्तिः सङ्गता उषःकालस्यापि दिनादित्वात्संवत्सरादित्वेन साक्षात् संवत्सरमारभ्य दीक्षोक्तिः । अत्र पक्षे दोषोक्तिरपि युक्ता । तथाहि एकाष्टकायां दीक्षणे पूर्वसंवत्सरस्यार्तिविनाशस्तमभिलक्ष्य दीक्षणं दोषः । तत्र संवत्सरस्य वासवर्णनेनावसानबोधनात् । किञ्चोषसि दिनव्यवहारेऽपि मुख्यं दिनमादित्योदयमारभ्यैव । तथा सति ततः प्रवर्तमानसंवत्सरस्य सावित्रकालान्ते विनाशस्तमभिलक्ष्येत्यर्थो वा । व्यस्तत्वं चात्रैव पूर्वसंवत्सरविनाशेन विपरीतता । एकाष्टका रात्रिः पूर्वसंवत्सरस्य दीक्षा चोत्तरसम्बद्धेति व्यस्तता । किञ्च ऋतूनामन्तनामत्ववचनमपि अत्र पक्षे युज्यते । तथाहि संवत्सरसत्रस्य सोमयागरूपत्वेन तत्र दीक्षोपसदामनुष्ठानं पूर्वमपेक्ष्यते । तत्र दीक्षार्थं द्वादशदिनानि उपसदर्थानि च द्वादश दिनानि । तावत्पर्यन्तं दीक्षणीयोपसदिष्टीनामनुष्ठानान्ते सवनरूपैकाहसोमयागरूपसंवत्सरावयवानुष्ठानप्रारम्भः । तच्चानुष्ठानं सुत्याशब्देनोच्यते । एवञ्च दीक्षोपसदर्थं चतुर्विंशतिदिनान्यतीत्य सुत्याप्रारम्भः । एकाष्टकादीक्षणपक्षे फाल्गुनकृष्णद्वितीयातः सुत्या प्रारम्भः स्यात् । तथाच तत आनुष्ठानिकमासकल्पने कृष्णपक्षादित्वं मासानां स्यात् तदिदमन्तनामत्वमृत्वोः । ऋतुशब्देन च मासग्रहणं; अत एव ऋतू इति द्विवचनोल्लेखः । किञ्चेदं यागानुष्ठानं दैविकं, दैविके कर्मणि शुक्लादित्वमपेक्ष्यत इति तद्विरुद्धकृष्णपक्षादित्वप्राप्त्याऽन्तनामत्वस्य दोषत्वम् । फाल्गुनकृष्णद्वितीयाया प्रारब्धं सांवत्सरिकसुत्यानुष्ठानं फाल्गुन एव समाप्तं स्यात्ततोऽवभृथगमनं तदानी शीतकालसत्त्वेनापामनभिनन्दनोक्तिः । तत्र दोषस्य निर्याशब्देन वचनादयं दोषो निष्क्रष्ययानरूपमुख्यसंवत्सराभिप्रायेण । मुख्यः संवत्सरश्च चित्रापूर्णमासे प्रारम्येतेति । अत एव तस्य चक्षुष्ट्वाभिधानम् । तदानीमादित्यमण्डलोदयेनादित्यमण्डलस्य चक्षुष्ट्वेन वेदे "चक्षुर्मित्रस्य वरुणस्याग्नेः" इति वचनेन संवत्सरे चित्रापूर्ण-

मासस्य चक्षुष्ट्वाभिधानम्। एवं सति फाल्गुने शैशिरमासत्वेन शैत्यसत्त्वम्। एवं सत्युक्त-विषदोषसम्भवेनैकाष्टकायां दिनरूपसंवत्सरादित्वेऽपि न दीक्षानुष्ठानप्रारम्भः। ततः सावित्रकालरूपदिनादिरूपसंवत्सरादित्वमभिप्रेत्य द्वितीयः काल उच्यते दीक्षणे, "फाल्गुनी-पूर्णमास" इत्यादिना। अयमप्येकवत्सरीयवत्सरारम्भ एवेति। अत्र पक्षे एकाष्टकावदन्त-नामत्वं मासानां न भवति शुक्लपक्षत एव सुत्याप्रारम्भात्। तथाहि फाल्गुनीपूर्णमासे दीक्षाप्रारम्भे द्वादश दीक्षार्थानि द्वादश उपसदर्थानि च दिनान्यतीत्य सुत्यारम्भः। स च चैत्रशुक्लनवम्यां तत आनुष्ठानिकमासप्रवृत्त्या शुक्लादित्वमेव मासानां स्यादिति नान्तनाम-त्वरूपो दोषः। एकाष्टकायामिव रात्रिसम्बन्धाभावेन परदिनमात्रसम्बन्धित्वेनार्तिव्यस्तत्व-रूपदोषाभावः। तदभिप्रेत्य ब्राह्मण उच्यते—तस्य एकैव निर्या यत्सांमेघ्ये विषुवान् भवतीति। एकैवेत्यनेनापरदोषाभावो व्यक्तः। अत्रापि निर्याशब्देन वचनान्निष्कृष्य यानरूपमुख्यदिना-रम्भाभिप्रायेणैको दोषः साम्मेघ्ये विषुवतः प्राप्तिः। मुख्यो दिनरूपवत्सरारम्भश्चित्रा-पूर्णमासे ततः षण्मासान्ते वर्षाकालसमाप्तिराश्विनपूर्णिमायां स्यात्। एवञ्च फाल्गुन-पूर्णमासे दीक्षणे सुत्याप्रारम्भश्चैत्रशुक्लनवम्यां स्यात्। ततो मामकॢप्तौ षण्मासान्ते विषुवदनुष्ठानमाश्विनशुक्लदशम्या स्यात् स च वर्षाकाल इति साम्मेघ्यं विषुवतः प्राप्तिरूपो दोष इत्युक्तम्। ततोऽपरः काल उक्तश्चित्रापूर्णमास इति, तत्र दीक्षणे ऋत्वोरन्तनामत्वा-प्राप्तिः शुक्लपक्षादित्वान्मासानाम्। कार्तिकशुक्लदशम्या विषुवतः प्राप्त्या सम्मेघे विषुवतः प्राप्तिरूपोऽपि दोषो नास्ति। अत एव तस्य न काचन निर्येत्युक्तिः, एवं सति चित्रापूर्णमासस्य निर्दोषत्वेपि न तत्र दीक्षण किन्तु पूर्णमास्याः पूर्वं चतुरहे दीक्षणमित्युक्तं ब्राह्मणे। तत्र पूर्णमास्या पूर्वश्चतुरहः कस्याः पूर्णमास्याः चैत्र्या वा फाल्गुन्या वा माघ्या वेति सन्देहे सान्निध्याच्चैत्र्या ग्रहणे प्राप्ते उच्यते माघ्या एव पूर्णमास्याः पूर्वश्चतुरहो ग्रहीतव्यः। तत्र हेतुगर्भं वचनमुच्यते, तथा सति दीक्षणे एकाष्टकायाः परित्यागो न स्यादिति। किञ्चैतरेय-ब्राह्मणे देवानामनुष्ठाने वासन्तिकादिमासैर्दीक्षाया अप्राप्तिः। किन्तु शैशिरमासाभ्यामेव दीक्षाप्राप्तिवचनात् माघफाल्गुनयोरेव शैशिरमासत्वात्तत्रैव दीक्षणमिति माघ्येव पौर्णमासी चतुरहेऽवधिरूपा मन्तव्येति, चैत्र्याः शैशिरत्वाभावात् फाल्गुन्या शैशिरत्वेऽपि सम्मेघे विषुवतः प्राप्तिदोषसत्त्वाच्छैशिरत्वात् माघ्येव ग्रहीतव्येति। एवञ्चेदं ब्राह्मणं न मृगशिरसि वसन्तसम्पातमाधकम्।

वस्तुतस्तु अग्रयणशब्दोऽग्रेऽयनावधित्वेन उत्तरस्या सुमेरावुदितपूर्णमण्डलादित्यपरः। तस्य पूर्णमण्डलोत्तरमेवायनस्य हायनस्य वा प्रवृत्तेः। इदं प्रथममुदितं पूर्णं मण्डलं नाग्रे सञ्जायमानायनान्तःपाति परस्तात् प्रवर्तमानहायनान्तःपाति वा। तस्य सम्पूर्णमण्डलोदयोत्तरं प्रवृत्तेः। यथैनस्य प्रथमोदितमण्डलस्य न हायनान्तःपातित्वमेवं ततः पूर्ववर्ति खण्डित-मुदीयमानमण्डलमपि हायनान्तःपाति न। सम्पूर्णमण्डलोदयोत्तरं हायनप्रवृत्तेरुक्तत्वात्। न चैवं परहायनानन्तःपातित्वेऽपि पूर्वहायनान्तःपातिना स्यादिति वाच्यम्। हायनावसानस्य गत्यवसानावधित्वाद्। गतेरवमानं च खण्डितमण्डलपूर्ववर्ति सम्पूर्णबिम्बपर्यन्तत्वात्। अतः पशुपुरोडाशार्थवादब्राह्मणं पञ्चविधरूपैरादित्यरूपपुरुषस्य पशुत्वकल्पनाप्रदर्शन यत्कि-ञ्चिद्रूपमुपादाय तस्य पशुत्वकल्पनं, तस्य रूपस्य विनाशे तं परित्यज्य रूपान्तरेण पशुत्व-

कल्पनं तद्भावापरेणेत्येवं कल्पनापरम्परायां गमनेन हेतुना तस्य पशुत्वेन ग्रहणे तदपि गमनप्रस्थकमं भूसंस्पर्शदशायां विनष्टमिति पशुत्वहेतोर्विनाशेन मेषविनाशास्तस्य परित्यागेन रूपान्तरमविरूपमुपादाय पशुत्वेन ग्रहणमुक्तम्। भूसंस्पर्शो हि अस्तावसरे क्षितिजसम्पर्कः। अत ऊर्ध्वं मण्डलं क्षितिजादधस्तादमच्छत्खण्डितरूपतां प्राप्नुयात्। एवञ्च तदानीं तस्य तत्र परस्ताद् गन्तव्यप्रदेशाभावेन गमनाभावः। तदिदं विस्तरेणान्यत्र प्रदर्शितम्। एवञ्चास्तगमनप्रारम्भावसरे पूर्णं मण्डलं गतिरहितं गतिराहित्यान्न तस्य पूर्वहायनान्तःपातिता। तदिदं त्रयाणामस्तप्रारम्भीयमण्डलस्य परस्ताद्यावदस्तमुदयं वा खण्डितमण्डलस्य परस्तात् सम्पूर्णोदितमण्डलस्येति दण्डनिपातन्यायेन त्रयाणां मण्डलानां पूर्वोत्तरसंवत्सरानन्तःपातित्वेन कल्पनमृभुवर्णनतो व्यक्तम्। ऋभवो हि किरणास्ते पूर्णमण्डलोदयोत्तरं तत्र मण्डले प्रविश्य प्रकाशनादिरूपं कार्यं कुर्वन्ति यावदस्तस्थलीयमन्तिमं पूर्णं मण्डलम्। तन्मण्डले तैस्तस्य परित्याग इति कल्पना। एतत् प्रकारान्तरेणापि तत्र प्रतिपादितं यदिमे ऋभव उक्तत्रिविधमण्डलावसरे ततो विनिर्गममकृत्वा तत्र स्वपन्तीवेति। तादृशस्वापोत्तरमृभूणामादित्येन संवादस्योपनिबन्धनमृभुमन्त्रे। स चायं मन्त्रः—"सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत्। श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत"॥ इति। कृतस्वापाः स्वापोत्थिता ऋभवोऽगोह्यास्माकमिदं बोधनं जागरणं केन कृतमित्यगोह्यमादित्य पृष्टवन्तः। तदानीं वस्तोऽजस्तद्रूप आदित्यस्तानब्रवीत् "श्वानं बस्तो बोधयितास्मि" इति। तेनादित्ये ऋभूणां स्वापस्तत उत्थानं च बोध्यते। यद्यपि अत्र तेषां केवलं स्वापवचनं न तु स्वापस्थाननिर्देशस्तथापि मन्त्रान्तरे तत्स्थानं स्वापस्य कालश्च निर्दिश्येते। तदुच्यते— "द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः" इति। अत्रागोह्यस्यादित्यस्य गृहे आदित्यरूपे गृहे द्वादशदिनपर्यन्तं ऋभूणां स्वाप उच्यते। तत्र द्वादशदिनरूपकालावधिनिर्देशस्येदं तात्पर्यं यत् सुमेर्वादिस्थले आदित्यबिम्बस्य पूर्णस्योदयार्थमस्तमयार्थं वा तस्य प्रदक्षिणाचतुष्टयमपेक्ष्यते। तत्रत्यैका प्रदक्षिणा दिनशब्देनोच्यते। दिनचतुष्टयेन पूर्णं बिम्बमुदेति। तदपि मन्त्रान्तरे उच्यते। तत्र दृश्यस्यादित्यमण्डलस्य व्यास एकांशात्मकः षष्टिकलात्मको वा। तस्यैकांशात्मकादित्यबिम्बस्य तत्र प्रदक्षिणारूपवृत्तमार्गे दण्डकलितन्यायेन माने साकल्येन संख्या भवत्यंशानां बिम्बानां वा षष्ट्यधिका त्रिशती। इयं च वृत्तभागसंख्या सर्वगाणितिकप्रसिद्धा। तत्र प्रतिवृत्तमेतत्संख्याकल्पनस्य बीजमपीदमेव क्षेत्रादिमानस्थले। अन्यथा वृत्तमाने सुलभसंगणनीयशतघातरूपसंख्याया अकल्पने एतादृशदशघातरूपसंख्याकल्पने बीजान्तराभावः स्यात्। तच्चैकांशात्मकमादित्यबिम्बं सुमेर्वादौ प्रदक्षिणचतुष्टयेन पूर्णमुदेतीति प्रतिप्रदक्षिणं प्रतिपर्यायं पञ्चदशकलं समुदेति। तेन प्रतिपार्श्वं दशयुगमितः प्रदेशः प्रकाशेन व्याप्यते। आदित्यस्य प्रतिपार्श्वं दशयुगमिता व्याप्तिः सवित्रुषोभिर्व्याप्तिरुच्यते। अथवा, तत्र सवितुः प्रकाश उषसः प्रकाश इति व्यवहार उदये चास्ते चोपलभ्यते। तत्रोदयावसरे मित्रशब्देन अस्तावसरे च सवितुर्वरुणशब्देन व्यवहारः। मैत्रावरुणसूक्ते युगपञ्चकनियम्यत्वमुच्यते—"मित्राय पञ्च येमिरे जना अभिष्टिशवसे" इति। मित्रन्यायो वरुणस्यापि। उषसस्त्रिंशद्योजनसम्बन्धितौषससूक्ते "अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परियन्ति सद्यः" इत्यादिनोच्यते। स च सुमेर्वादौ प्रदक्षिणानां योजनत्वं गृहीत्वोच्यते

षड्भिः पर्यायैर्युगं भवतीत्यन्यत्र विस्तरेण निरुपितम् । तथा सति युगपञ्चकमुषसो भवति युगपञ्चकञ्च सवितुरिति मिलित्वा दशयुगपर्यन्तं प्रतिपार्श्वमादित्येन प्रकाशेन व्याप्यते । प्रकाशस्य पाकशब्देन वचनमन्यत्र विस्तरेण निरुपितम् । तदिदं पचनं गृहीत्वा मन्त्रे उच्यते— "उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।" आदित्यरूपेन्द्रस्योक्तिर्वृषाकपिसूक्ते एषा । तत्र तेनोच्यते उक्षणः सेचकस्य प्रकाशकस्य । तेजसोऽपशब्देन वचनमन्यत्र विस्तरेणोक्तम्, तथा सति तेजोरूपाणामपां सेचनं प्रकाश इति उक्ष्णः प्रकाशस्येत्यर्थः । तादृशस्य मे मम पञ्चदश पञ्चदश भागाः कलारूपाः पूर्वोक्ताः प्रतिपर्यायमुदीयमानाः साकं युगपदेव विंशतिम्, उक्तरीत्यादित्येन प्रतिपार्श्वं प्रकाश्यं युगदशकं तद्द्वयं विंशतिस्तां विंशतिं तावत्संख्याकं प्रदेशं पचन्ति प्रकाशयन्तीत्यर्थः । पुरुषसूक्ते "तस्माद्विराळजायत विराजो अधि पुरुष" इत्यनेनाप्ययमर्थो बोध्यत इत्यन्यत्र निरूपितम् ।

एवञ्चात्र मन्त्रे पञ्चत्रिंशद्बलीवर्दपाकवचनम् । पञ्चत्रिंशत् संख्याया नक्षत्रग्रहसंख्याभिप्रायकताकल्पनमयुक्तम् । मन्त्रार्थस्य तत्र स्वारस्याभावात् । अन्त्ये ग्रहनक्षत्रसंख्याभिप्रायकत्वे तत्संख्याभिप्रायेण सप्त अष्टाविंशतिरूपसंख्यावयवनिर्देशोऽभविष्यदिति न किञ्चिदेतत् । एवञ्च पूर्वोक्ते सुमेर्वादावुदयास्तावसरीयमण्डलत्रयार्थं प्रदक्षिणा द्वादशापेक्षणीया । प्रदक्षिणाना च दिनशब्देन व्यवहार इत्युक्तम् । तथोक्तमण्डलीयद्वादशदिनपर्यन्तमृभूणामुक्तरीत्या मण्डले सत्तारूपावस्थितिः स्वापरूपेणोच्यते । एतावतैषां द्वादशदिनानां पूर्वोत्तरसंवत्सरानन्तःपातित्वेन तदुभयमध्यवर्तित्वेन तत्रोभययोजकत्वेन तत्र सेतुकल्पना पारसीकाना पुराणग्रन्थेषूच्यमाना संगता । पाश्चात्यदेशीयपुरातनग्रन्थेषु संवत्सरद्वयमध्यं द्वादशदिनेषु क्रीडाविशेषवर्णनादिकमपि सङ्गच्छते । इदञ्च प्रतिसंवत्सरमेवं भवतीति एतस्य चान्द्रसौरवर्षसामञ्जस्यकल्पनाबीजत्वमपि सम्भवतीति । प्रजापतिदुहित्रारोहकल्पनापि एतत्सम्बन्धेन प्रवर्तत इति अनुपद विचारयिष्यते । सर्वं चेद मृगशिरसि वसन्तसम्पातसाधकमित्युक्तिः, मृगशिरः सविधे ततः पूर्ववर्तिन्यां रोहिण्या सम्पातसाधकमित्यर्थिका चेत्तदा तस्या न विरोधित्व मृगशिरस्येव सम्पातसाधक चेत्तदा नैतेषां नादृशत्वं साधारण्यात् प्रत्युत वाक्यान्तरविरोधात् । नक्षत्रप्रजापातिप्रभृतिविरोधः प्रदर्शितो विस्तरेणान्यत्र ।

यत्तु विहिंसोतोरिति सूक्त मृगशिरसि सम्पातसाधक, तदपि न, तस्य रोहिण्या सम्पातसाधकत्वस्यापि सम्भवात्, साधारण्यात् । तद्धि सूक्तं वसन्तसम्पातस्थलीयां परिस्थितिं दृष्टिभेदेन वाकोवाक्यप्रदर्शनमुखेन प्रदर्शयति । यद्यपि सुमेरुकुमेर्वोः सम्पात एकत्रोदयोऽपरत्रास्तमय इति उभयोरेकत्र प्राप्तिर्भवतीति एकस्थलीयोदयपरिस्थितेरपरस्थलीयास्तमयसाधारण्यं भवति । एवञ्च वसन्तसम्पातस्थले सुमेर्वभिप्रायेणोदयः कुमेर्वभिप्रायेणास्तमयः । तत्रास्तमयमारभ्योदयं परिस्थितिरुक्तसूक्त उच्यते । ऋभूणां द्वादशदिनपर्यन्तावस्थितिसाधनार्थमुक्तरीत्या अस्तावसरीयं सर्वान्ते दृश्यं पूर्णं मण्डलं परस्तात् खण्डित मण्डलं परवर्ति चोदयावसरीय प्रथमतो दृश्यं पूर्णं मण्डलमिति त्रितयं गृहीत्वा दृष्टिभेदेनात्र सूक्ते विविधा वर्णना । तत्र सूक्ते प्रतिमन्त्रान्तं "विश्वस्मादिन्द्र उत्तरः" इत्यंशः सर्वसाधारणो न तु मन्त्रोपनिबद्धवक्तृविशेषांशः । अवशिष्टोंऽशो

वक्तृविशेषसम्बन्धी। तत्र प्रथममन्त्रे मत्सखेति पदप्रयोगाविन्द्रसखित्वस्य मन्त्रान्तरे "इन्द्रस्य युज्यः सखे" त्यादौ विष्णौ प्रयोगाद्वृषाकपिशब्देन हरविष्णू वृषाकपीति द्वयोर्ग्रहणाद्विष्ण्वभिप्रायकत्वस्यापि सम्भवेन मदित्ययमिन्द्राभिप्रायकः प्रयोग इति प्रथममन्त्रो वाक्यमिन्द्रस्येति युक्तम्। इन्द्राण्या वचनत्वकल्पने बीजं "विश्वस्मादिन्द्र उत्तरः" इत्यंशः। नहि इन्द्रेण स्वाभिप्रायेणैतद्वचनं सम्भवति तादृशत्वेन वचने निमित्ताभावश्चेति। परन्त्विदं सर्वमन्त्रसाधारणं वक्तृविशेषवाक्यासम्बद्धम्। इन्द्राण्या वृषाकपौ सखित्वस्याप्रसिद्धेः। परस्तादत्रैव सूक्ते "सख्युर्वृषाकपेर्ऋते" इत्यनेनेन्द्रसखित्वस्य वृषाकपौ वचनादिदं वृषाकपिविशेषणम्। किञ्च परस्मिन् मन्त्रे इन्द्रस्य विशेषण"मतिव्यथि"रिति। तत्र व्यथने बीजाभावो मा भूदित्यस्मिन् मन्त्रे "मत्सखे"ति इन्द्रवचनेन कुशकाशावलम्बनन्यायेन संगतत्वम्। इन्द्रस्य सखा पुष्टेष्वमदत्तस्य निमित्तभूतस्य सवनस्य परित्यागेन तद्वशतोऽभीष्टवस्त्वलाभेन दुःखसम्भवेन मित्रदुःखेन दुःखितत्वाभिप्रायेण व्यथने मित्रदुःखस्य निमित्तस्योक्तरीत्या वर्णयितुं शक्यत्वमिति नेदमिन्द्रविशेषणम्। तत्र सवनपरित्यागवचनेन तत्र वृषाकपिरूपेऽस्तावसरीयेऽन्तिमे सम्पूर्णमण्डलेऽस्तसम्बन्धो व्यज्यते। एवं सति रश्मीनां तस्मिन्नवसरे कार्यकरणतो विराम इति ऋभूणां स्वापे आतिथ्ये वेदं सूचकमिति। अयं चास्तः कुमेर्वभिप्रायक इति मद्धातुप्रयोगतो विज्ञायते। "यत्प्रातर्मध्यन्दिन सायञ्च तानि सवनानि" इति यजुर्ब्राह्मणे उक्तेरति पदस्य पूर्वमनुवर्तनेन सायमदनसम्प्राप्तिः। "सोतोर्ध्यसृक्षते"ति वचनेन सोमसम्बन्धप्राप्त्या सोमस्यादनीयत्वं धारारूपेणेति सोमधाराविषये सूक्ते "स्वादिष्ठया मदिष्ठया पवस्व सोमधारयेति" विशेषणद्वयवचनं स्वादिष्ठा मदिष्ठेति तद्व्याख्यानं ब्राह्मणे, "स्वादिष्ठा वै देवेषु पशवो मदिष्ठा असुरेष्वि"ति मदसम्बन्धस्यासुरेषु वचनादसुरसम्बन्धस्य "शरद्धेमन्तः शिशिरस्त आमुरा ऋतवोऽसुरेषु तर्हि भवती"ति ब्राह्मणे वचनेन तदृतुसम्बन्धस्य सुमेर्वभिप्रायेण कुमेरौ सत्त्वेन तस्यासुरसम्बन्धिता। मदसम्बन्धस्योक्तरीत्या असुरेषु। सवनविसर्गश्चास्तावसर इति कुमेरौ अस्तावसरीयोऽयं सवनविसर्ग इति ज्ञायते, एवं सति तदवसरीयस्यान्तिमसम्पूर्णदृश्यमण्डलस्य वृषाकपिबोध्यत्वमत्र विज्ञायते। अस्तस्यादित्यमरणरूपत्वकल्पनयेयं श्मशानभूमिरिति तत्र वर्तमानोऽसौ वृषाकपी रुद्ररूप इति भवति। वृषाकप्यर्थाभेदेनेन्द्रसखित्वम्। अत एव परमन्त्रे "अतिव्यथि"रिति इन्द्रविशेषणं संगच्छत इति। एवं सति'विहिसोतोरसृक्षत नेन्द्र देवममंसत'त्यंशोऽपि न कस्यापि वक्तुर्वचनांश· किन्तु साधारण एवेति। एवञ्चान्तिममपीदं पूर्णं मण्डलं तच्च पूर्वस्यां दिशि, पूर्वदिक्स्वामी चेन्द्रः। खण्डितञ्च तद्रूपम्। अत एव मन्त्रेषु तस्य आखण्डलशब्देन वचनम्। खण्डितत्वेन पूर्णत्वेनादृश्यत्वं गृहीत्वा इन्द्रस्य सत्त्वविषये सन्दिग्धता। अत एव तत्सत्त्वप्रतिपादनार्थं सजनीयं सूक्तमित्यन्यत्रोक्तम्। ततः परस्तादस्तारम्भ उदयारम्भश्च सहैव। एकत्र यथा यथास्तमयते तथा तथापरत्रोदयं प्राप्नोतीति। एवञ्च कुमेर्वभिप्रायेण खण्डितभावप्रारम्भदर्शनेन इन्द्रोऽपि तदनुगच्छतीति कल्पनयेन्द्रः परा धावन् अतिव्यथायुक्तः। अर्थादत्र पराधावने हेतुरुक्तः, सवनपरित्यागेन वृषाकपेरिष्टाप्राप्त्या दुःखितत्वमिव मित्रदुःखेनायमपि दुःखित इत्यतिव्यथित्वं तस्य। व्यथानिदानस्य मित्रदुःखस्यापनोदनाय पराधावनमिन्द्रस्य। एवं सतीन्द्रेण स्वीयं कर्म सोमपानं हित्वा पराधावनमतिव्यथित्ववशतः तदुक्तमन्यत्र। परावति देशे सोमपानाभाव उच्यते

अन्यत्र 'सोमपीतये नो अह नैव प्रविन्दसि लभसे', तत्र सोमपानं न लप्स्यस इति इन्द्रं प्रति वचनमर्थादिन्द्राण्या इत्यर्थः। अतिव्यथया मित्रमनुसरंस्तन्निवारणायेति मन्त्रे उच्यते। स्वीयं कर्म सोमपान हित्वान्यत्र गमनेन गमनस्यातिगुरुत्वं तच्च मित्रसाहाय्यादिरूपावश्यकरणीयत्ववशात इति गृहीत्वोच्यते अयं वृषाकपिः। अत्रायमिति विशेषणादपरोऽपि वृषाकपिर्भवतीति विज्ञायते। तस्यास्तत्प्राप्त्या कृष्णवर्णत्वं कृष्णवर्णवशतो हठाद्दृश्यत्वाभावेन मार्गणीयतया मृगरूपत्वमिति गृहीत्वोच्यते अयं हरितवर्णमृगरूपो वृषाकपिस्त्वां किमकरोत् तवैतेन किं प्रियमनुष्ठित यद्वशतः स्वीयं कर्म हित्वा साहाय्याय प्रवर्तसे। साहाय्यस्वरूपमुत्तरार्धेनोच्यते—यतस्त्व यस्मै अस्मै इरस्यसि। इरस्यसीत्ययं शब्द इराशब्दादन्नार्थादिच्छाया क्वचि लालसायां सुगागमे निष्पन्नः। अत्यन्तमुत्सुकत्वेनान्नमिच्छसि अयोर्वा पुष्टिमद्वस्विच्छसि। एवंरूपेण तद्दुःखनिवारणेन हे इन्द्र यमिमं प्रियं तव सखिभूत सम्मुखं यथाभवेदेव रक्षसि अस्य वृषाकपेः कर्णे वराहयुः श्वा जम्भिषदपि। अत्राकस्मात् कुतः पुनर्वराहयोः शुनः सम्प्राप्तिर्येनास्य वृषाकपेः कर्णे जम्भनोक्तिः। अथाक्षेपमात्रमिदं न वस्तुसत्। तर्हि शुना जम्भनवचनेनालन्त्वे शुनो वराहयुरिति विशेषणस्य का सार्थकता। अथ भक्ष्याक्रमणेनातित्वरोपेतधावनबोधनाय तदिति चेत्तदानी भक्ष्यविशेषवराहस्य वचने हेतोरसत्त्वं यस्य कस्यापि भक्ष्यस्य मृगादेरतित्वरया धावमानस्याक्रमणायातित्वरोपेतधावनलाभसम्भवात्।

अथ वृषाकपेर्मृगत्वोक्त्या सम्पातस्थलीयनक्षत्रे मृगाकृतिकल्पनया तस्य कल्पितमृगाकृतेस्तारकाविशेषस्य सविधे विद्यमानस्य कल्पितश्वाकृतेस्तारकसमूहस्य वशतः शुना जम्भनोक्तिः। तदपि न, सम्प्राप्तिमाजान्यान्नक्षत्रेष्वाकृतिकल्पन, तत्कल्पनाच्च सम्प्राप्तिरित्यन्योन्याश्रयात्। एव तत्र श्वाकृति. कल्प्यमानैव धावतः शुन. कल्प्यते। एवं सति तत्र वराहयुरिति विशेषणस्यासगति.। तत्रान्यत्र वराहत्वाकल्पनात्। तस्मादत्र श्वशब्देन न तत्र तारकासङ्घरूपस्य शुनो ग्रहण किन्तु श्वशब्देनात्र प्रतिप्रदक्षिणमावर्तमानरूपस्यादित्यस्यैव ग्रहण स च वायुरूप.। वायौ श्वशब्देन वचन मातरिश्वेत्यादौ दृष्टम्। वृषाकपित्वमादित्यस्य दक्षिणोत्तरागमने, वायुत्व पुनरावर्तने। तत्र पूर्वपश्चिमगतिरनुभूयते सा पञ्चदशकलाभिर्बिम्बस्य। एवं प्रतिप्रदक्षिणं वायरूपत्वं तस्य पञ्चदशकलामात्ररूपत्वेनाखण्डमण्डलरूपेणादर्शनाददृश्यत्वम्। तदुक्तमन्यत्र मन्त्रे "ध्राजिरेकस्य ददृशे न रूपम्"इति। एवञ्च दक्षिणोत्तरा गच्छतो वृषाकपेः सर्वासु दिक्षु प्रसृमरकिरणरूपकर्णसम्बन्धिनेति पूर्वपश्चिमदिशोरपि कर्णसम्बन्ध। तत्र वृषाकपेर्दक्षिणोत्तरगतिशालितया याम्योत्तरवृत्तसम्बन्धिता वायोश्च पूर्वपश्चिमगत्या स वृषाकपेरेकेन पार्श्वेनागत्यापरेण पार्श्वेन गतः स्यादिति। तेन वृषाकपेरेक एव कर्णस्तत्र सम्मुखत्वेन स्पृष्टः स्यात्। तदिदं कर्णसम्बन्धित्वं श्वशब्दश्लेषेण सारमेयेण जम्भनमित्युक्ति.। अयं च वृषाकपिर्मेरोर्दक्षिणे कुमेर्वाभ्यभ्युदङ्कोऽचिरादस्तमित इति तत्राप्यस्तवेलाया परिभ्रमन् एवास्तमियात्। तत्रास्तवेलावर्तिप्रदक्षिणात्मकभ्रमणे गतिमान् वायुरस्तस्थल प्राप्नुवन्भवेत्। कुमेरौ चास्तमारम्य वर्षाकाल इति तत्कालिकमेघमनुलक्ष्यैवासौ वायुरूपः श्वा गच्छतीति तस्य वराहयुशब्देन वचनम्। मेघनामसु वराहशब्दस्य निघण्टौ पाठात्तद्रूपवराहमनुलक्ष्य वायोर्गमनमेव श्लेषेण शुनोऽपि गमनमिति वराहयुना तस्य। उक्तरीत्या वृषाकपिकर्णसम्बन्धितया शुनो वराहयोः कर्णे जम्भनमिति वचनं

मन्त्रे। तत्रास्तोत्तरं भासमानेन तेजसा वस्तुजातप्रकाशनं प्रियवस्तुसंपादनपूर्वं प्रकाशनमिति गृहीत्वा प्रिया तष्टानीति प्रकाश्यवस्तुनिर्देशः। तत्प्रकाशनं व्यक्तशब्देनोच्यते। व्यक्तशब्दे विपूर्वस्याञ्जुधातोः क्तप्रत्ययः। अञ्जुधातोस्तु व्यक्तिबोधकता। व्यक्तिश्च स्पष्टं प्रकाशः। एतच्चास्तोत्तरं वर्तमानोषोरूपसान्ध्यप्रकाशरूपेन्द्राणीकृतम्। तच्च कुमेरावस्तोत्तरमिन्द्राणीप्रकाशितं वस्तुजातं तदानी प्रवर्तमानमेघैरावृतम्। अथवा सूर्यास्तोत्तरं रात्रिप्रवृत्त्या रात्र्याश्च दोषाशब्देन वचनं तच्च दोषकरणाद्दोषश्च तमोरूप इति इन्द्राण्याः प्रियवस्तुदोषोक्तिः। तदिदमावरणं वृषाकपिकृतमिति वृषाकपेरुपरि इन्द्राण्या रोषकल्पना। वृषाकपिरादित्यात्मेत्युक्तम्। तस्मिंश्चादित्ये शिरआदिरूपेण कल्पनेति प्रकृते वृषाकपिबिम्बरूपस्य वृषाकपेः शिरसोऽस्तमयेनादर्शनमिन्द्राण्या शिरसश्छेदेन संपादितमिति कल्पनम्। उक्तरीत्या प्रियविनाशकरत्वेन वृषाकपेर्दुष्कृतत्वमिति तस्य दुष्कर्मकारिणः कृष्णरूपमाप्तस्य गमनं तत् सुगमनं न भवति। स सुगमनाभावः प्रियवस्तुविनाशकुपितेन्द्राणीकृत इतीन्द्राणीवचनत्वेन मन्त्रे उपनिबद्धः। तदुक्तम्—"श्वान्वस्य जम्भिषदपि कर्णे वराहयुः, प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत्। शिरोन्वस्य राविष न सुगं दुष्कृते भुवमि"ति।

एतावता प्रबन्धेन कुमेरावस्तस्थलीयान्तिमपूर्णदृश्यमण्डलसम्बन्धिप्रतिपादनं सूक्ते। ततो मध्यस्थाने खण्डितदृश्यबिम्बाभिप्रायेण वर्णना परवर्तिमन्त्रैः। सर्वत्र वर्णने नुशब्दप्रयोगेण कल्पितत्वप्रतीतिः। मध्यवर्तिखण्डितबिम्बस्थले नानाविधा कल्पना। स्त्रीन्द्रियकल्पनापि पुमिन्द्रियकल्पनापि तद्योगकल्पनापि। उदयत आदित्यस्य भगशब्देन वचनम्। तदुक्तं निरुक्तकारेण "तस्य कालः प्रागुत्सर्पणात्" इति। उदयस्थानमध्यवर्तित्वमिन्द्रस्य। 'इन्द्रस्येन्द्रियेणे'त्यादौ तस्यावयवत्वेन निर्दिश्यमानमपीन्द्रियं तदभिन्नम्। तदुक्तं निरुक्ते "आत्मैवैषामायुध वाहनमात्मैवैषां सर्व देवस्य देवस्ये"त्यनेन। एवमिन्द्रियाभिन्न इन्द्र इति तत्र पुमिन्द्रियकल्पनापि। इन्द्रस्थानविशेषाभिप्रायेण तद्योग कल्पनापि तत्र। तदिदमश्वमेधे जायोपनिपातादिकल्पनादिव्यवहारेण व्यक्ततरम्। तेन रूपेणात्र मध्यवर्तिबिम्बवर्णना। तदुक्तमिन्द्राणीवचनत्वेन मन्त्रे "नयत्स्त्रीमुभसत्तरे"त्यादिना। अत एवात्र पूर्वापरसङ्गतिः सूक्ते। अन्यथा पूर्वं वृषाकपेरुपरि क्रोधेन तच्छिरश्छेदनोत्तरमकस्मादिन्द्राण्या स्वरूपवर्णनं मिथुनव्यापारस्तत्र योग्यायोग्यत्वादिकं वर्ण्यमानमसङ्गतं स्यात्। एवञ्चैतेन वर्णनेन मध्यवर्तिखण्डितबिम्बवर्णना। ततः परस्तादचिरोदितसंपूर्णदृश्यमण्डलोपवर्णना। तत्र संपूर्णदृश्यमण्डलस्यापि वृषाकपित्वेन वर्णना। अत एवात्र वृषाकपिवर्णने इदमेतच्छब्दाभ्या विशेषणम्। तत्रेन्द्राण्या वचने स्वरूपवर्णनं योगवर्णनादिकम्। इन्द्रवर्णने वृषाकपेरुपरि क्रोधकरणमयुक्तं देवतातोषकरत्वात्स्वस्य वृषाकपिना सख्येन तद्विनाऽवस्थानाशक्तिः स्वरूपवर्णनं च, इन्द्रेण स्वरूपवर्णने मध्यवर्तिस्थानसम्बद्धकलापञ्चदशसम्बन्धित्वं तावतोभयपार्श्ववर्तिविंशत्यंशस्थानपर्यन्तं तेजःसम्बन्धात्पाककल्पनोभयकुक्षिपूरणं तेजसेत्यादिवर्णनम्। ततः परवर्तिवृषाकपिवर्णने उच्यते "अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत्। असि सूनां नवं चरुमादेधस्यान आचितम्।" अयदिदानीं दिनप्रारम्भीयो वृषाकपिः परस्वन्तं परस्तात् विदूरे कुमेरुप्रदेशे विद्यमानं हतमिन्द्राण्या। अस्तेन कृष्णरूपतां गतमत एव मार्गणीयतया मृगरूपं तमविदत् प्राप्नोतु। एवञ्चैतद्वृषाकप्यपेक्षया हतस्य मृगरूपस्य भिन्नत्वेऽपि न स

मृगनक्षत्ररूपः। एवमुदयावसरीयकलामात्रस्यास्तावसरीयस्य चैककलावशेषबिम्बभागस्यासि-साजात्यादसित्वं स चासिः सूनारूपो हिंसक इत्यर्थः, उदितबिम्बस्य भोवनभाण्डरूप-नवचरुरूपता तं चरुं चरुभाण्डमात् अनन्तरमुषस उदयात् प्रागस्तोत्तरं च तिर्यक्प्रसारित्ते-जोरूपतया युगस्थाने बिम्बे ईषयोर्मीलनं पश्चाद्विसारि ईषारूपं तेजोयुतानःस्वरूपम्। तच्चैषनीयं मध्यवर्तितमोरूपैधोयुतम्। वृषाकपिरयं गृह्णातु। उषस्यनस्त्वकल्पना "एत-दस्या अनः शये सुसंपिष्टं विपाश्या" "अपोषा अनसः शरत्संपिष्टादह बिम्युषी" इत्यादौ। इन्द्रस्य मध्यवर्तितया तेनोच्यते पूर्ववर्तिनं दासं परवर्तिनमार्यं विविञ्चन् पाकसुत्वनो रात्रि-कालीनात् सोममुदयावसरे पिबामि। रात्रौ सञ्चितस्य तेजोरूपसोमस्य कलामात्रोदिते-नेन्द्रेण पानं क्रियत इति एकयेत्यादौ वर्णितम्। इन्द्रेणोभयसन्दर्शनमुक्तं तदेवोच्यते, अस्तंगतो वृषाकपिस्तमुद्दिश्योच्यते—वृषाकपे पुनरेहि त्वदीयागमने त्वमहं च सुविता शोभनं सवनं कल्पयावहा आवाम्। यश्च स्वप्ननंशन आदित्यस्तद्रूपस्त्वमस्तमेषि पथा पुनरिति। एवञ्चेदं सातत्येन प्रचलति। तद्बोधनाय द्वितीयः पुनःशब्दः। गमनागमनमार्गस्तु न बहुदूर इत्युक्तम्—"धन्व च यत्कृन्तत्रं च कतिस्वित्ता वियोजना" इत्यत्र। कृन्तत्रं कृत्तः प्रदेशः। अस्तावसरे प्रकाशितात्प्रदेशात्पृथक्कृतः। तत आरभ्य अर्थादस्तस्थानमारभ्य धन्व निरुदकः सर्वथा तमोमयः प्रदेशः। वेदेऽप्त्वेन तेजसा बोधनेन तद्रहितो निरुदक प्रदेशः। स तु न बहुदूर इत्युक्त कति-स्वित् स्वल्पानि योजनानि। अतः वृषाकपेर्नेदीयसः सविधवर्तिनो गृहान् स्थानानि प्रदेशान्। तेषु प्रदेशेष्वित्यर्थः। अस्तमेहि। ततः पुनरेहीत्युक्तम्। यदोदञ्च्युदक् स्थिद्वं गृह हे वृषाकपे इन्द्र युवामाजनन्तन तदानी स बह्वघयुतः। अघशब्देनात्र तम उच्यते। तमनोऽहःशब्दबोध्य-तायाः "सप्तमर्यादा" इत्यस्मिन्नुक्तत्वेन तत्समानार्थोऽघशब्दोऽपि तम एवाह। एवञ्च पुल्वघः पूर्वघः बहुतमाः स वृषाकपिरूपो मृगः क्व कुत्र गतो जनानां मोहकर्ता। एवञ्च अत्र मृगशब्दः प्रथमत उक्तो यो वृषाकपिस्तावसरीयस्तमाह। एवञ्चैतेन न मृगशिरसो बोध इति नैतन्मृग-शिरसि वसन्तसम्पातसाधकम्। यदि मृगशिरसि सामीप्यं सप्तमी गृहीत्वा मृगशिरोनक्षत्रसविधे रोहिण्या वसन्तसम्पातस्येद चिह्नमित्यर्थो विवक्ष्यते तदा न विरोध। नक्षत्रियप्रजापत्यादि-वचनान्यपि उपपन्नानि भवन्तीत्युक्तपूर्वमेव, एव चैतेन सूक्तेनास्तस्योदयस्य चावसरे पूर्वोक्त-त्रिविधमण्डलस्य वर्णनम्। तदेतत्त्रयस्य कालो न पूर्वस्मिन्नहनि वत्सरे वा अन्तःपतितो न चोत्तरस्मिन्निति एतत्त्रयसम्बन्धिनो द्वादशदिनात्मककालस्य ऋभुस्वापार्थत्वमुक्त सङ्गच्छते इति। ऋभूणां स्वापादिविषयो विचारः पूर्वमत्रोक्तोऽन्यत्रापि निरूपित इति।

एवं वेदे प्रयुज्यमानसङ्ख्यादीनां संख्येयामभिधाने तत्सन्निधाने वाऽर्थस्यानेकस्थले निर्णयो न भवति, तदर्थं मन्त्रान्तर उच्यमानतादृशव्यवहारस्यानुरूप्येण निर्णयार्थं प्रयासः। यथा आग्नेये सूक्ते 'त्रीणि शता त्रीणि सहस्रा त्रिंशच्च त्रयश्च देवा' इत्युक्तं, कुत एतावन्त एव देवा इति निर्णयापेक्षा। स चोपलक्षणतया न निर्णेतुं शक्यः। उपलक्षणत्वे कुत एतावत्संख्यापर्यन्तानुधावनं, प्राथमिकी काञ्चन सख्यामुद्दिश्यो-पलक्षणतया व्याख्यानस्य सम्भवात्। एतत्संख्याया उपलक्षकत्वाभावो विवक्षितार्थत्वं निर्विवर्णनवशतो ज्ञायते, वैश्वदेवीषु निवित्सु एषा संख्या षड्वारमुक्ता, तदुक्तं तत्र—"त्रयश्च त्री च शता त्रयश्च त्री च सहस्रा त्रयश्च त्रिंशच्च। तावन्त उदरणे, तावन्तो

निवेशने, तावतीर्ग्नाः, तावतीः पत्नीः, तावन्तो रातिषाचः, तावतोऽभिषाचः" इति। एतेन न केवलं सा संख्या विवक्षिता किन्तु तत्सम्बन्धवशतोऽपरापि काचन संख्या बोध्यते ते च देवा इति। अर्थाद्देवशब्देन एतावन्तो देवा विवक्षितास्ते च दिवारात्रसम्बन्धिन इति। दिवारात्रिसम्बन्धेनैकवृत्तसम्बन्धो भवतीति। एकस्मिन् वृत्ते देवसंज्ञका भागा एतावन्त इत्यपि ज्ञायते। एवं सति स्थलान्तरे निर्दिश्यमानया 'षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण दुष्पदा रथ्यावृणक्' इत्यत्रोच्यमानसंख्यया साकमस्या देवसंख्यायाः कश्चन सम्बन्धः प्रतीतो भवति, स च षष्टिमित्यत्रोक्तसंख्याश्रयेण देवसंज्ञकैकसंख्यासाम्यम्। अयमेवार्थो मन्त्रान्तर-साहित्येन स्पष्टं प्रतीयते। स्वनयदानस्तुतौ 'षष्टिं सहस्रमनु गव्यमागात्' इत्यनेन गवां षष्टि-सहस्राण्युक्त्वा परवर्तिमन्त्रे उच्यते 'पूर्वामनुप्रयतिमाददे वस्त्रीन्युक्तानष्टावरिधायसे गाः' इति। अत्र प्रयतिर्दानं पूर्वमुक्तं गवां षष्टिसहस्रात्मकं तदनु त्रीन् युक्तानष्टौ गा आददे इत्युच्यते, अत्र त्रीन् युक्तानष्टावित्यनेनैकादशसंख्याविवक्षणे साक्षात्तदवचनं निर्युक्तिकं स्यात्तस्मादत्र द्वाभ्यां संख्याभ्यां भिन्नं प्रमेयमुच्यते, एका गोरूपस्य संख्येयस्य बोधिका एका तत्समूहस्य बोधिका। समूहोऽपि कियद्भिरवयवैरित्यनिर्णीतं तथापि पूर्वोक्तषष्टिं सहस्रेत्यनुरोधेनात्र द्वादशभिरवयवैरेकः समूह इति ग्रहणं तच्च त्रीनित्यनेन समूहग्रहणेन वक्तव्यमुताष्टावित्यनेनेति निर्णयाभावे उक्तषष्टिमिति संख्यानुरूप्यमष्टावित्यत्र समूहग्रहणे भवतीति अष्टावित्यनेन द्वादशात्मका अष्टौ समूहा विवक्षिताः। तथा सति अष्टाभिः सङ्घैः षण्णवतिसंख्यका गावो लभ्यन्ते, त्रीनित्येतद्गृहीतास्त्रय इति संख्यामेलने षष्टिमिति मन्त्रोक्तसंख्या निष्पद्यते। सा च गवां संख्या दुष्पदरथ्याया वर्जनं उपयुक्तेति वर्णनतो गन्तव्यमार्गरूपवृत्तसम्बन्धिनीति द्वयोरपि-गोसंख्या ६००९९ संपद्यते। नवनवत्यधिकषट्सहस्ररूपायाः वैश्वदेवीनिविदनुसारेण लब्धदेव-संख्यया ३३३९ × ६ = २००३४ चतुस्त्रिंशदधिकविंशतिसहस्रात्मिकया उक्तनिविदनुसारेण वृत्तसम्बन्धिन्या परस्परं सम्बन्धकल्पने त्रिभिर्गोभिरेको देव इति ग्रहणे उपपद्यते। ६००९९ संख्याकानां गवां कति देवा इति जिज्ञासायां त्रिभिश्चेद्गोभिरेको देवो नवनवत्यधिकषष्टि-सहस्रैः कियन्त इत्यनुपातेनोक्तसंख्यालाभः ३ : ६००९९ :: १ = ६००९९ ÷ ३ = २००३३। एवं चैकेन देवेन यदि त्रयो गावः, उक्तचतुस्त्रिंशदधिकविंशतिसहस्रैः कति गाव इति अनुपातेन १ : २००३३ :: ३ = २००३३ × ३ = ६००९९ इति परस्परं सम्बन्धप्रतीतिः। एवं षड्-भिर्भागैश्च देवसंख्या २००३३ भवेदेकेन भागेन कियतीत्यनुपातेन ६ : १ :: २००३३ = २००३३ ÷ ६ = ३३३९ इतिसंख्या लभ्यते, सा चोपनिषद्संख्यासमा; त्रीणि शतेति मन्त्र-संख्यासमेत्यनयोः संख्ययोः विभिन्नमन्त्रादिषूच्यमानयोर्वशतः परस्परसम्बन्धेन परस्परं सम्बन्धे एवंरूपो निर्णीतो भवति त्रिभिर्गोभिरेको देवः, एकेन देवेन गोत्रितयलाभ इति। एकस्य देवस्य गोत्रितयसम्बन्धोऽपि ऋभुवर्णनवशतः प्रतीयते। ऋभवो हि त्रयो वर्ण्यन्ते ऋभुर्विभ्वा वाज इति। मन्त्रेषु वर्णनावसरे तेषां कार्यमुच्यते 'वाजो देवानामभवत् सुकर्मा इन्द्रस्य ऋभुक्षा वरुणस्य विभ्वे"ति। तत्रैकस्य देवसम्बन्धितापरस्य वरुणसम्बन्धितान्यस्येन्द्र-सम्बन्धितोच्यते। तत्र वरुणोऽस्तकालिक आदित्य इन्द्रश्च दिवाभागीयो देवाश्चोदयात्पूर्ववर्तिन इति त्रयाणां त्रिभिः सम्बन्धः। सोऽपि तत्सूक्ते उच्यते "श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम्। आनिम्रुचः शकृदेको अपाभरत् किंस्वित्पुत्रेभ्यः पितरावुपावतुः"।

इत्यत्रैकस्या निम्रुचोऽर्थादा अस्तमयं कार्यम् । अपरस्य शोणवर्णगोसम्बन्धितापरस्य सुनयाभृतमांससम्पादनमिति तत्रास्तोल्लेखात्तत्परवर्तिवरुणकालसम्बन्धिता "मांसमेक" इत्यनेन बोध्यते । अस्तोत्तरं वरुणकालेऽरुणवर्णमेघादिदर्शने मांसखण्डकल्पनायास्तत्र संभवः । एवं शोणा गौरपि उदयपूर्वकालिकी उषाः । उषसोऽरुणवर्णगोवाहनत्वं निघण्टौ "अरुण्यो गाव उषसाम्" इत्युच्यते । वाहनवाहनिनोरभेदो निरुक्त उच्यते "आत्मैवैषां वाहनम्" इत्यादिना । तथाचैक उषःकालसम्बद्धः परो वरुणकालसम्बद्धः, अन्यः सूर्यमण्डलसम्बद्धोऽर्थाद्दिनसम्बद्ध इति भवति । एवं चर्मणां रश्मिरूपत्वस्य निरुक्ते प्रतिपादनाद्रश्मीनां चादित्यमण्डलेन त्रिधा सम्बन्धः, अरनेमिभावेनारनाभिभावेन सम्मुखभावेन चेति तदुभयतः पार्श्वयोः सम्मुखं चेति वर्णनं वेदे याज्ञिकप्रक्रियामिद्धं चेति रश्मीनां गोशब्देन वचनं चेति त्रिभी रश्मिभिरेको देवो मण्डलं व्याप्यत इति, त्रिभिर्गोभिरेको देवस्ते च देवाः पूर्णे वृत्ते दिनरात्रात्मके त्रयस्त्रिशदधिकविंशतिसहस्रसङ्ख्याका इति प्रतीतं भवति । किं च देवाना विषये त्रय एकादशास इति एकादशत्रययोगिता, सापि लोकत्रयभेदेन । तदुक्त 'ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्व'मिति । तत्रोक्तरीत्या गवां सङ्ख्या लोकत्रयाभिप्रायेणैकैकस्मिन्लोके एतावती २००३३ स्यात् । तत्र विंशतिसहस्रस्य स्वत्वेन ग्रहणे अवशिष्टा गोसङ्ख्या त्रयस्त्रिशत्तस्या देवत्वसंपादने एकादश देवा भवन्ति प्रतिलोकमिति मन्त्रोक्तसङ्गतिः । इत्यादिकं विस्तरेण प्रतिपादितम् ।

एवं विष्णोश्चतुर्णवतिसंख्यायोगिता सधस्थद्वयसम्बन्धिता उत्तर दक्षिण चेति विचारोऽपि मन्त्रानुगुण्येन प्रदर्शितः । इन्द्रस्य शतक्रतुत्वं विष्णुसखत्वमपि विस्तरेण प्रदर्शितम् । चत्वारिंश्यां शरदि इन्द्रेण वृत्रस्य लाभ इत्यादिकं वर्णितम् । वृत्रः कस्तेन युद्धवर्णना कथम् । सोम. कः । तत्पानमिन्द्रेण कथ कृत्रेत्यादयोऽपि विशेषाः प्रतिस्वं विस्तरेण प्रतिपादिताः । मित्रावरुणयोः स्वरूपे अश्विनोश्च स्वरूपविषयं भूयान्विचारः प्रदर्शित । मित्रस्य पञ्चभिर्नियमनं "मित्राय पञ्च येमिरे" इत्यादिस्थं विचारितम् । पञ्चजनपदार्थ. परस्परमतविरोधोन्मूलनद्वारा प्रकाशितः । वेदे प्रश्नाः केचन पृच्छामि त्वेत्यादावुक्तास्तदुत्तराणि च केन प्रसङ्गेन कथं च सम्यग् भवन्तीत्यादिकं मन्त्रान्तरसाहित्येन प्रकाशितम् । "चत्वारि वाक्"इति मन्त्रे 'तुरीय वाचो मनुष्या वदन्ति'इत्यस्य मन्त्रान्तरसाहित्येन व्याख्यानान्तरविमर्शपूर्वमर्थः प्रदर्शितः । "सप्तमर्यादा" इत्यादिमन्त्रेषु टीकाकृतं व्याख्यानं यथा नोपपन्नं तस्य दिक् प्रदर्शिता । वेदे साजात्येन लौकिकसम्बन्धिव्यवहारस्य बीजं त्रिसुपर्णानुवाको विस्तरेण व्याख्ययोक्तः । आजिधावनादयो देवेषूच्यमानाः कथमुपपद्यन्त इति मन्त्रानुगुण्येन प्रदर्शितम् । वेदार्थनिर्णये पूर्वकालिकव्यवहाराणामस्मदादीनां च व्यवहाराणां भिन्नत्वेनासम्भवप्राप्तौ श्रौतव्यवहारेण तन्निर्णयविज्ञानेनार्थस्य सङ्गतिः प्रदर्शिता । ब्राह्मणेषु उच्यमानाना केषांचन व्यवहाराणां यथाकथंचनोपपत्त्यर्थमनेकेषामनेकधा विचारसरणिस्तत्रत्यकतिपयविशेषवशतो निर्णीय प्रदर्शिता । इन्द्रस्य पञ्चापराधस्वरूपनिर्णय., सर्वंचरुर्देवो वाज्यो वा पदार्थः, अनुमतिराकामिनीवालीकुह्वां पूर्वात्विपरात्वे विशिष्य विचारः, अनुष्ठाने सोमस्य शस्त्रयोर्विपर्यासोक्तिः । देवानां विकलाङ्गवर्णनम् । यगपदार्थ । अत्रीणां सूर्याचन्द्रमसोरुपरागविज्ञानम् । शतं जीवंति मन्त्रे ऋतुत्रयस्य

शतसङ्ख्यया वचनम् । वेदापौरुषेयत्ववचनम् । वेदनिर्माणे विशेषनिदानमित्यादयः प्रसङ्गोप-प्रसङ्गेनार्था मन्त्रोपन्यासपुरस्सरं निर्णीताः । सर्वथैतस्य वेदे आदित्यरूपस्यैवैकस्य स्तवे उपपादः । स च स्तवो वस्तुतो ब्रह्मण एवादित्यरूपमुपाधिं गृहीत्वेति वेदानामेकात्मपरत्वम् । एतेन वेदस्य कालनिर्णयो भाषासौसादृश्यवैसादृश्यवशतो व्यभिचरितः, ज्योतिर्वचनपरि-स्थितिवशतः संकल्प्यमानो वचनादीनामतथात्वे नक्षत्रियप्रजापत्यादिवशतः संपातस्या-न्दोलितगतिमत्त्वविज्ञानादैदम्पर्यानिर्णये मूलकालानिर्णय एव । नक्षत्रपञ्चकसम्बन्धित्वेना-न्दोलितगत्या रोहिणीमम्पातस्थलगतविशेषोपलम्भात्तस्य चास्मिन्पर्याये न्यूनतो न्यूनद्वादश-सहस्रतोऽर्वागसम्भवेन ततः प्राचीनता सिध्यति । स प्राचीनः कालः किम्मर्याद इति विज्ञाना-सम्भवः । मूलदेशकल्पनाऽपि न सुमेरुरूप एव देश इति निर्णेतुं शक्या कुमेरोरपि वर्णनस्य समुपलम्भेन तद्गतादित्यस्य चन्द्रमःशब्देन वर्णनेन केषांचन तदनुसरणबीज तत्सम्बद्धापरेषां पौराणिकविशेषवतां कुमेरुतोऽपि परम्परया तत्तद्देशसमागमनसूचनासम्भवेनेदमित्थंभावस्या-विज्ञानम् । नवीनविचारपद्धतिर्भूमेः परिणामादिविशेषकल्पनावशतो निर्णयस्तु केवल-प्राचीनग्रन्थमात्रदर्शनतोऽशक्य एवेति । सर्वथा काचन विचारसरणिरत्र प्रदर्शिता सुधीभि: परीक्षणीया । युक्तायुक्तत्वं च 'गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः । शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छती'ति न्यायेनात्र सारसत्त्वे विचारणीयमिति ।

याज्ञिकक्रियाणामादित्यपरत्वेन साकल्येन विज्ञानेऽपीतोऽप्यधिको विशेषो विज्ञातु शक्यः । तत्र शस्त्राणां स्वरूपाणि, तत्र मन्त्राणा पौर्वापर्यभावापोद्वापावित्यादिकं, स्तोत्रेषु सामानि तत्स्वरूपाणि तन्मन्त्रास्तेषु विष्टुत्यादिवशतः स्तोमादीनां वशतश्चेतोऽप्यधिकविशेष-विज्ञानसम्भवः । एवमादिकं बहुलं विचारणीयम्, विचारणीयश्च तैस्तैर्विचारकैरादित्यपरता-दृष्टिमवलम्ब्येति । सर्वथाऽयं विचारप्रकारोऽभिनवोऽपि प्राचीनो विचारकैः प्राचीनग्रन्थेषु च तदा तदाऽवलम्बितोऽपि नूतनवद्भासमान इति नवीनत्वेनोक्तः परीक्षणीयः सुधीभिरिति शम् ।

श्रीसीतारामशास्त्रिणः

ग्रन्थालोचितविषयाणां संक्षिप्तं सूचीपत्रम्

प्रथमो भागः

द्वितीयो भागः

तृतीयो भागः

समाप्ता विषयसूची।

वेदार्थविचारः

प्रथमो भागः

वेदो हि प्राचीनतमो ग्रन्थ इति प्रायः सम्मतं सर्वेषाम्। तस्यातिप्राचीनत्वेन तदर्थविज्ञानं सुदुष्करं विशेषतयेदानीन्तनानाम्। तदर्थं प्राचीनैर्बहुभिर्बहुविधाः प्रयत्नाः कृताः। नूतनैरपि तदर्थं बहुतरं प्रयतितं प्रयत्यते च। तत्र केचन नियमसम्पादनपूर्वं टीकाकृतः पाणिनिजैमिनियास्कप्रभृतयः। केचन तदीयान्नियमानवलम्ब्य तदनुरोधेन टीकाकृतः स्कन्दस्वामिसायणप्रमुखाः। सर्व इमे प्राच्याष्टीकाकृतः। अर्वाचीना अपि खण्डशस्तात्पर्यशो वा टीकाकर्तारो म्येक्स्मूलर-मूर-राथप्रभृतयः। सर्वैरेभिष्टीकाकृद्भिर्वेदार्थविवरणार्थं प्रयत्नाः कृताः। एषु प्रायः सर्वव्यापी प्रयत्नः सायणाचार्याणाम्। तेषां प्रयत्नमनुरुध्य पाश्चात्त्यैष्टीकाकृद्भिः स्वस्वानुकूलयुक्तियुक्ता नूतनाः प्रयत्ना विरचिताः। तावताऽपि वेदस्य न सम्यगर्थावधारणम्। लौकिकप्रयोगेष्वदृश्यरूपवशतोऽर्थविज्ञानकाठिन्यं पाणिनिना वैदिकरूपसम्पादकनियमसम्पादनद्वारेणांशतो दूरीकृतम्। परन्तु नियमानां साधारण्यात्, उत्पद्यमानसंशयानामनिराकरणेनार्थस्याविस्पष्टत्वेन न पूर्णता तत्प्रयत्नस्य। मीमांसकशिरोमणिजैमिनिना वेदभागरूपब्राह्मणभागस्य विविधभागकल्पनाद्वारेणार्थकरणाय बलवान् प्रयास आस्थितः। तत्र विधिभागस्य सार्थक्यमपूर्वार्थबोधनवशतः, अर्थवादभागस्य लक्षणया विध्यर्थापेक्षितार्थबोधनवशतः सार्थक्यमित्यादिरूपेण बहुलः स प्रयत्नो ब्राह्मणभागे, मन्त्रभागरूपे वेदभागे तु न तादृशस्तस्य प्रयत्न इति सोऽसम्पूर्ण एव। किञ्च ब्राह्मणभागेऽपि अर्थवादभागस्य लक्षणया विध्युपयुक्तत्वव्यवस्थापनेन सार्थक्येऽपि लक्षणार्थमुपादीयमानार्थवादभागे लोकशास्त्रविरुद्धार्थप्रतिपादनस्य न सम्यगुपपत्तिः। यद्यपि शबरप्रभृतिभिस्तदीयटीकाकृद्भिस्तादृशस्थलेषु नित्यं कञ्चन आकाशं वायुमादित्यं वार्थमुपादाय सार्थत्वं व्यवस्थापनीयमित्युक्तम्, उदाहरणरूपत्वेन टीकाकृता कुमारिलभट्टेन 'अहल्यायै जार' इत्यंशस्य 'अहनि लीयत इत्यहल्या रात्रिस्तस्या जरयिता जार आदित्य' इत्येवं व्याख्यानं प्रदर्शितम्, तावता सर्वस्थलेषु तादृशप्रयत्नाभावान्न स प्रयत्नः पूर्ण इति न्यूनतैव। मन्त्र-

भागे तु तादृशस्यापि प्रयत्नस्याभावेन स एकदेश प्रयत्न एव। यास्काचार्यैरपि कतिपयानां कठिनार्थानामप्रसिद्धार्थानां शब्दानां प्रदर्शनपूर्वं तदर्थप्रतिपादनद्वारा मन्त्रार्थव्याख्याने कृतोऽपि प्रयत्नः कतिपयतदुल्लिखितस्थलेष्वेव सम्यक् सन्देहानिवर्तकतयाऽसम्पूर्ण एव। तट्टीकाकृता दुर्गाचार्येण यास्कीयनिरुक्तगतानामांशिकानां पूर्णानां वा मन्त्राणां प्रतिपदं व्याख्यानं प्रदर्शितमपि न सर्वत्र सम्यगनुभवपथाधिरूढं केवलं कथञ्चन निरुक्तकारीयकल्पनाप्रदर्शकमेव। तावतापि तस्य न्यूनत्वमेव।

अर्वाचीनटीकाकृद्भिः प्राचीनटीकाकाराणा टीकागता दोषाः प्रदर्शिताः, किञ्चन स्वाभिमतं नवनवतरव्युत्पत्तिप्रतिपादनद्वारा प्रकटितं तदपि तेषामपि न निश्चितं विस्पष्टं स्थलान्तरे त्वविस्पष्टमेव। यथा "सदृशीरद्य सदृशी"रिति मन्त्रभाष्ये उषसस्त्रिंशद्योजनपरिगमनरूपमन्त्रगतार्थस्य विवरणाय 'एवं यत्रोषा गच्छति तत्स्थानतः पूर्ववर्तित्रिंशद्योजनभूभागस्थाना सोदिता दृश्यते' स चोषःकालः 'एकविंशतिघटिकाभिः षड्विंशतिपराभिश्च सम्मितः, एकविंशतिघटिकामारभ्य षड्विंशघटिकापर्यन्तम्', इति सायणाचार्यैरुक्तम्। तत्र पाश्चात्येन म्येक्स्मूलरमहोदयेन टीकाकारानुसारेण सूर्यस्य प्रत्यहं मेरुप्रादक्षिण्येन परिभ्रमः स्वल्पाधिकपञ्चसहस्रयोजनपरिमितः। तावता अहरात्मकघटीषष्टीनामुपयोगेन घटीषष्ट्याः कृते यदि स्थूलेन मानेन पञ्चसहस्रं योजनान्युपयुज्यन्ते तर्हि त्रिंशद्योजनकृते कियान् काल इति योग्यानुपातविचारणेन त्रिंशद्योजनोपयोग्युषःकालः सावशेष एकोनविंशतिनिमेषाः, स्थूलेन मानेन विंशतिनिमेषा भवन्ति। एवं सति विंशतिनिमेषात्मा उषःकालः सायणेन कथं घटीपञ्चकपरिमित उच्यत इति दोषमुद्भाव्य तत्समाधानाय भाष्यग्रन्थस्यान्यथाकरणं कृतम्। यथा भाष्ये—एकविंशतिघटिकाभिरित्यत्र घटिकाशब्दस्थाने पराशब्दं प्रयोज्य पराशब्दस्य पलसमानार्थतां व्यवस्थाप्य एकविंशतिघटिकाभिर्नाम एकविंशतिपराभिः। एकविंशतिपलैरित्यर्थः। एवं षड्विंशतिपराभिरित्यत्र परास्थाने तत्पराशब्दमुक्त्वा षड्विंशतिपराभिर्नाम षड्विंशतितत्पराभिः। तत्पराशब्दस्य विपलार्थत्वं व्यवस्थाप्य षड्विंशतिविपलैरित्यर्थः। एवं सति भाष्ये स चोषःकाल एकविंशतिपलैः षड्विंशतिविपलैः सम्मितो भाष्याभिप्रेतार्थ इति प्रतिपादितम्। एवञ्च सर्वथा भाष्यमिदमसङ्गतमित्युक्तम्। तावता मूलार्थस्याविस्पष्टत्वं तथैवावस्थितम्, न कोऽपि युक्तियुक्तो योग्योऽर्थस्तत्र तेन प्रतिपादित इति न्यूनतैव। एवं मन्त्रगतस्यांशस्याविस्पष्टार्थत्वं तदवस्थमेव। एवमेतादृशा अपरेऽपि। एवञ्च सर्वेषां प्रयत्नानां वेदव्याख्यायां सदोषत्वे वेदस्यार्थोऽविस्पष्ट एव।

न केवलं प्राचीनानामर्वाचीनानां वा टीकाकृतां टीका अकृतार्थाः किन्तु ब्राह्मणभागेऽपि व्याख्यानभागस्यापुष्टार्थत्वमसङ्गतार्थत्वञ्च। यथा ब्राह्मणे सप्तदशसंख्याविशिष्टार्थस्यार्थवाद उच्यते— "सप्तदश सामिधेन्यो भवन्ति। सप्तदशो वै प्रजापतिः प्रजापतिः संववत्सरो द्वादश मासाः पञ्चर्तवो हेमन्त-शिशिरयोः समासेन तावान् संवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभि-रेवाभीराध्नोति य एवं वेद" इति। अत्र सामिधेनीनां साप्तदश्यस्य पोषणायोच्यते, यतः प्रजापतिः सप्तदशः सप्तदशसंख्यायोगी, तत्सम्बद्धसंख्यायोगात् सामि-धेन्योऽत्र तावत्संख्याकाः प्रशस्ताः। प्रजापतेः साप्तदश्यं संवत्सराभेदात्। संवत्सरस्य साप्तदश्यं मासर्तुसंख्यायोगादित्येवमर्थतः प्रतिपाद्य मासर्तुसाप्तदश्यं सम्पादयितुमुक्तम्, "द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन" इति। ततो विज्ञायते संवत्सरे साप्तदश्यं न मुख्यं किन्तु तदवयवसंख्यानुरोधादारो-पितम्। अवयवानामपि साप्तदश्यं न तावत्संख्याकावयवसंख्यायोगात् किन्तु विशिष्टावयवसंख्यायोगात्। ते चात्रावयवा नैकजातीयास्तेषु तावत्संख्याया अप्रसिद्धेः, किन्तु भिन्नजातीया मासरूपा ऋतुरूपाश्च ग्राह्याः। तावताऽपि लशुनभक्षणन्यायानतिपातः, यतस्तेष्वपि अभिप्रेतसंख्याया अप्रसिद्धिः। तदर्थं पुनस्तत्र सम्पादनेन (येन केनापि प्रकारेण) सा संख्या वक्तव्या। सम्पादनञ्च ब्राह्मण एव "हेमन्तशिशिरयोः समासेन" इति प्रदर्शितम्।

अयं भावो यद्यप्यत्र मासरूपा ऋतुरूपाश्चावयवा गृह्यन्त उक्तसंख्या-योगार्थम्, परन्तु तेष्वपि सा सख्या न प्रसिद्धा, यतो मासा द्वादश संवत्सरे ऋतवश्च षडित्यष्टादशसंख्या उभयसख्यायोगाद् भवति, नाभिप्रेता सप्तदशसंख्येति तदर्थम-वयवेषु संख्या न्यूनीकर्तव्या, सापि न मासरूपावयवेषु किन्तु ऋतुरूपावयवेषु। ऋतुष्वपि संख्यान्यूनीकारो न यथाकथञ्चन किन्तु ऋतुद्वयस्यैकसंख्याकल्पनेन। ऋतुद्वयमपि न यथेच्छं किमप्यनियतं ग्राह्यं किन्तु हेमन्तशिशिररूपमेव। तावता तयोरेवर्त्वोर्द्वित्वसंख्यां प्रसिद्धां परित्यज्यैकसंख्यास्वीकारः कार्यः। एवं सति मासा द्वादश, ऋतवः पञ्चेति मिलित्वा सप्तदशसंख्यायोगः संवत्सरेऽवयव-द्वारेणेति। एवं संवत्सरस्य सप्तदशत्वे तदभिन्नः प्रजापतिरिति सोऽपि अवयवगतसंख्यायोगिसंवत्सराभिन्न इति संवत्सरावयवगतसंख्यया परम्परया संबद्ध इति सप्तदश इति। एवं परम्परया प्रजापतिसम्बन्धेन सप्तदशसंख्या प्रशस्ता, तद्योगात् सामिधेन्योऽप्यत्र प्रशस्ता इति। मूले तु "सप्तदशो वै प्रजापति"रित्यत्र प्रजापतेरेवेतरनिरपेक्षसाप्तदश्ययोगो वैशब्देन प्रसिद्धार्थकेन प्रतिपाद्यत इति, उक्तांशव्याख्यानमपुष्टं प्रतिपादितनानाविधविकल्पानिरा-

करणेनासङ्गतमिति। एवं बहुषु स्थलेषु। तदेतत् परस्तात् क्रमशः प्रतिपादयिष्यते।

मन्त्रा अपि केचनात्यन्तप्रसिद्धार्थपदयोगिनोऽपि कयाऽपि कल्पनया न विस्पष्टार्था भवन्ति।

तत्र बहुषु स्थलेषु केवलसंख्यापदानि क्वचन संख्येयार्थकपदसहितानि क्वचन संख्येयार्थबोधकपदरहितानि बोच्यन्ते तानि सम्यगुपक्लृप्तानि भवन्ति, तत्र यथाकथञ्चन टीकाकृद्भिर्व्याख्यातान्यपि तानि न विशदर्थानि समञ्जसानि भवन्ति। यथा—ऐन्द्रे सूक्त उच्यते। "जघान नवतीर्नव" इति वचनम्। अत्रानेका नवतयो विवक्षिता अथवा शब्दरूपव्यत्यासेनैकैव नवतिर्विवक्षितेति सन्देहः। सन्देहबीजन्तु—अयमेवैतदर्थक एव मन्त्रोऽविकलो वेदान्तरे पठ्यते, केवलं तत्रोच्यते—"जघान नवतिं नवे"ति।

एवं सत्यत्र टीकाकृद्भिर्न कोऽपि निर्णयः प्रतिपाद्यते। यदा वैका नवतिर्यदा वा अनेका नवतयो मन्त्रे विवक्षितास्तदा किस्वरूपत्वं तासामित्यपेक्ष्यते। अत्र सायणेन व्याख्याने वृत्रसम्बन्धित्वस्य मन्त्रे वचनात् प्रतिपाद्यते। वृत्रस्यासुरत्वादासुरी मायात्र गृह्यते, तस्याः प्रथमतः सत्त्वरजस्तमोरूपगुणत्रययोगात्त्रैविध्यम्। प्रत्येकं तत्रोत्तममध्यमाधमरूपतया त्रैविध्येन नवरूपत्वम्, तत्रापि प्रत्येकं प्रकारान्तरेण नवविधत्वं प्रकल्प्यैकाशीतिविधत्वं तत्रापि प्रत्येकं दशदिग्भेदेन भिन्नतया दशोत्तराष्टशतीपरतया तावत्संख्याकानामासुरीणां मायानां विनाश इन्द्रेण कृत इति।

क्लिष्टतरमिदं व्याख्यानमेकनवत्यर्थकत्वे ऽसङ्गतञ्च। ऐन्द्रेषु सूक्तेषु स्थलान्तरे सङ्ख्येयार्थकं पदसाहित्य प्रतिपाद्यते तत्र कुत्रचन पुर उच्यन्ते, कुत्रचन नद्य, कुत्रचन वस्त्वन्तरम्। सर्वञ्चेदं तत्र नवतिपदयोगि। तथा सति तद्वर्णनस्यानुपपत्तिः। क्वचन शम्बरसम्बन्धेनैकोत्तरशतसंख्यावचनमित्यादीना न स्पष्टार्थतेति।

एवमेतादृशाः संख्यापदयोगा अविस्पष्टार्था मन्त्रेषु।

औषधिसूक्ते—"या औषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च।" अयं मन्त्र उच्यते। अत्र पूर्वास्त्रियुगं पुराशब्दानां पौनरुक्त्यम्, त्रियुगशब्दस्य कालविशेषरूपत्वे मन्त्रस्य चतुर्थयुगीयताप्राप्त्याऽवरकालिकतयाऽपौरुषेयत्वसिद्धान्तभङ्गः। तत्रैव द्वितीयार्धे शतसप्तशब्दाभ्यां विवक्षितसंख्याया अनिर्णीतत्वम्। व्याख्यातृभिर्यास्कादिभिस्तत्र सप्तशत्यर्थकत्वेन व्याख्यानम्, तथा सति मन्त्रे तत्रार्धे चशब्दस्यासंलग्नकता। तस्मादेतन्मन्त्रार्थोऽविस्पष्टः।

आग्नेये सूक्ते—"त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्। औक्षन् घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त।" अयं मन्त्र उच्यते अत्र देवानां विशिष्टा संख्या निर्दिश्यते। तत्र के ते देवा एतत्-संख्याविशिष्टाः कुतस्तेषामेतत्संख्यावैशिष्टयम्। कुत एत एतावन्तोऽग्नेः सपर्याकर्तार इत्यादेरनिर्णयः। उपलक्षणमिदं सर्वेषां देवानामित्युक्तिरपि न समञ्जसा। पूर्ववर्तिनीनां संख्यानामप्युपलक्षकत्वसम्भवेन तत्परित्यागे एतत्-संख्याया उपलक्षणत्वेन ग्रहणे विनिगमनाविरहः।

एवमेतादृशान्यनेकानि स्थलानि मन्त्रेषु तत्र न सम्यङ् मन्त्रार्थ-प्रत्ययः।

ब्राह्मणेषु तु नानाविधाः कथा वर्ण्यन्ते। तासां वर्णनस्यार्थवादत्वेन मीमांसकैः सार्थक्यवर्णनेऽपि नित्यार्थग्रहणेन तेष्वलक्ष्यार्थव्याख्यानं तदपि न सम्यक्। ब्राह्मणे पशुपुरोडाशार्थवादे देवैः पुरुषाश्वगोऽव्यजानां यागे पशुत्वेनोप-योगरूपाः पञ्च पर्याया उक्ताः। तत्र क्रमेण प्रथमत एकस्य पशुत्वेन ग्रहणं ततस्तस्मान्मेधव्यपगमस्तस्य मेधस्य परवर्तिनि पश्वन्तरे प्रवृत्तिः, निवृत्तमेधस्य पूर्वस्य पशोः पशुत्वेन परित्यागो देवैः, तस्य च निवृत्तमेधस्य पशुत्वेन यागतः परित्यक्तस्य पश्वन्तररूपत्वम्। अन्ते निवृत्तस्याजात् पशोर्मेधस्य भूम्यां प्रवेशस्तत्र तस्य व्रीहियवरूपतेति तद्विकारपुरोडाशयागोऽनुष्ठेय इति प्रतिपादनम्। तत्र कुत इम एवक्रमेण पञ्चैव पर्याया ग्रहीतव्याः नाधिकाः, कुतोऽयमेव क्रमो न विपर्यस्त क्रम आदरणीयः, कुत इम एव पशव उपात्ता नान्ये, कुतस्तेषां मेधव्यपगमे पश्वन्तररूपत्वमित्यादयोऽनेके प्रश्ना उद्भवन्ति, तेषां न समर्पकमुत्तरं व्याख्यासु। इयमेव रीतिः प्रायो ब्राह्मणोक्तासु कथासु।

एवं देवतासु प्रसिद्धानां विशेषाणा न सम्यगुपपादनम्। यथा अन्धो भगः, अदन्तकः पूषा सविता हिरण्यपाणिरित्यादीनाम्। यद्यप्येतद्विषये भाष्यकृता एवं व्याख्यातम्। पूर्वं देवकर्तृकयागेषु भगादीनां ब्रह्मत्वमासीत्। यागे ब्रह्मणा ग्रहीतव्यो भागः प्राशित्रपात्रे संस्थाप्य तस्मै दीयते, तस्य भागस्य निरीक्षण-हस्तादानदन्तचर्वणानि निषिद्धानि तानि यथास्वं पूर्वोक्तैर्यथाक्रमं निरीक्षणहस्ता-दानदन्तचर्वणवशतस्तस्य तस्य तत्तदङ्गवैकल्यमिति तेषां तादृशविशेषप्रसिद्धि-रिति। तदपि न मनस्तोषावहम्। यतः पुरोडाशभागस्य निरीक्षणादिवशतस्तत्त-दङ्गवैकल्यस्य लोकविरोधात्।

एवं भृगोरर्चिष्युत्पत्तिरङ्गिरसामङ्गारतो विखननाद्वैखानसस्येत्यादेः सम्यगुपपत्त्यवचनम्।

एवं ग्रावस्तुत्यर्थवादे सर्वचरुर्देशो वाऽन्यरूपो वा अर्बुदेन मन्त्रमिश्रणम्। अर्बुदोदासर्पिणी प्रपदित्यादिविषये न विशदार्थता।

एवं स्तोत्रशस्त्रयोरानुपूर्व्ये आज्यप्रउगशस्त्रयोरानुपूर्व्यरूपक्रमविपर्यास-वचनं ब्राह्मणे। तत्र मौलिकक्रमस्य कीदृग्रूपत्वं कथं तस्य तत्त्वम्। विहरतीति मौलिके प्रयोगे विपर्यासार्थकत्वमुत सम्पत्त्यर्थकत्वं वेत्यादयोऽनेके विचार्यस्थल-विशेषाः। एतादृशस्थले टीकाकाराणां विशिष्य मौनमिति तत्र व्याख्यानापेक्षा।

किञ्च वेदानां यज्ञार्था प्रवृत्तिः। अत एव वेदाङ्गज्योतिषग्रन्थे वेदा हि यज्ञार्थमभिप्रवृत्ता इत्युक्तिः। ब्राह्मणे देवताभिः कृतमिति तदनुरूपं मनुष्यैः कर्तव्यमित्युक्त्या देवता यागाः प्रतीयन्ते तत्र कथं देवतायज्ञसम्पत्तिः। यज्ञेषु दारवपात्राणां प्रकृतिवृक्षनियमनम्, पात्राणामाकाराः, नामानि, उपयोक्तृणां होतृप्रभृतीनां नामानि, कार्यकरणदेशाः, कार्यानुष्ठानप्रकाराः, तत्र प्रयुज्य-मानमन्त्रा इत्यादीनां नियमस्य दर्शनात् किंहेतुकता नियमस्येत्यादयोऽनेके विषया ग्रन्थकृद्भिर्व्याख्यातृभिरविचारिताः। ग्रन्थेषु वचनात्तत्र तादृशा नियमा इत्युक्तिस्त्वपर्याप्ता। ग्रन्थेष्वेव तथावचनस्य को हेतुरस्यैवानुयोगविषयत्वात्।

एवञ्च वेदस्यार्थः सर्वथाऽस्पष्ट एव। नानाविधैर्विचारकैर्बहुशो विचारे-ऽपि न तत्र मनस्तोषावहा स्पष्टतेति।

अस्यां दशायामभिनवं पन्थानं समवलम्ब्य तदर्थस्य स्पष्टत्वाय प्रयासः। यद्यपि नानाविधैः क्षमैर्विचारकैर्विचारेऽप्यकृतकृत्यत्वे क्षुद्रमतेर्मम प्रयासः सफलः स्यादित्याशा दुराशैव, तथापि नभः पतन्त्यात्मसमं पतत्रिण इति न्यायेन कश्चन प्रयास आस्थीयते। अयञ्च प्रयासो न सर्वथा निर्मूलः कपोलकल्पितः किन्तु प्राचीनतमैर्ऋषिभिः सूत्ररूपेणोल्लिखितो नवीनैरपि विचारकैस्तदा तदा विद्यु-द्विद्योतनन्यायेन प्रकाशितोऽपि एवंप्रणाड्याऽवचनान्नवीनोऽपि समूलत्वात् सप्रमाण इति तदर्थं प्रयत्यते।

वेदे मुख्यः प्रतिपाद्यो विषयः क इति विचारे कर्मप्रवणैर्मीमांसकैरुच्यते, कर्मैव मुख्य प्रतिपाद्यं वेदस्य, अपरे देवादयोऽर्थाः कर्मोपकारकतयाऽप्रधानभूता इति।

अपरे पुनर्ब्रुवते—वेदप्रतिपाद्यानि कर्माणि देवताकर्मतया प्रतिपाद्यन्त इति देवतैव मुख्यतया वेदप्रतिपाद्या। देवताप्रतिपादने साधनभूतमेतत् कर्म-प्रतिपादनमिति गुणभूतानि कर्माणीति।

तत्र मुख्याया प्रतिपाद्याया देवतायाः किं स्वरूपमिति विचारे एकैव देवताऽऽत्मस्वरूपिणी वेदप्रतिपाद्या। तस्या एकस्या एवोपाधिभेदाद्भिन्नत्वम्, भिन्नताया नानाशब्दैराकारैर्वचनमित्यध्यात्मवादिनः।

सम्प्रतिपद्यान्ये ब्रुवते—सत्यमेकैव देवता प्रतिपाद्यते, सत्यमेव चैकस्यास्तस्या उपाधिभेदेन भिन्नत्वम्, तत्प्रतिपादनार्थमपेक्षितोपाधेराश्रयणे शब्दद्वारक एव सर्वत्र वाङ्मयेऽर्थे प्रत्यय इति प्रथमोपस्थितं शब्दमेवोपाधितयाऽऽश्रित्य तद्भेदेन देवताया भिन्नत्वम्। अत एवेन्द्रचन्द्रादीनां नानाशब्दानामुपाधित्वेन नानादेवता वेदे प्रतिपाद्यन्ते। अत एव शब्दानां नित्यतया तदुपाधिकदेवानामपि नित्यत्वेन नित्यार्थप्रतिपादको वेद इति भवति। परिच्छिन्नार्थोपाधिग्रहणे सम्भवतां दोषाणामत्र कल्पेऽप्राप्तिः। न हि एकोऽर्थविशेषरूप इन्द्ररूपो देवो युगपन्नानादेशेष्वनुष्ठीयमानेषु समानेषु यागेषु युगपद्देवत्वेन सम्बन्धुमर्हति। माहात्म्यात्तत्कल्पनापेक्षया नित्यस्य विभोः शब्दस्यैवोपाधित्वेनाश्रयणे नित्यस्य विभोरपि शब्दस्य शैवालत्रोटनन्यायेनाभिव्यञ्जककण्ठताल्वाद्यभिघातरूपप्रयत्नस्य तत्र तत्र भिन्नतया तद्वशतोऽभिव्यज्यमानस्य नित्यस्य विभोः शब्दस्य तद्रूपिण्या देवतायाश्च युगपत्सर्वदेशसम्बन्धे न किञ्चिद्बाधकमिति मीमांसकाः।

अर्थबोधे प्राथम्येन शब्दप्राप्तावपि बोधरूपफलेऽर्थस्यैव सन्निकृष्टत्वं बोधकशब्दस्य त्वर्थद्वारेत्यर्थस्यैवोपाधित्वं ग्रहीतुमुचितम्। एवञ्चार्थरूपमुपाधिं गृहीत्वा देवतातत्त्वनिश्चयः। अर्थश्च नित्यो लोकरूपः। लोकिनस्तु तत्र सम्बध्यन्ते इति लोकस्यैवाधाररूपस्योपाधित्वेन ग्रहणम्। यद्यपि लोकोऽपि अविशेषभावेन ब्रह्माण्डात्मैक एव तथापि तत्र सविधवर्तित्व-विदूरवर्तित्ववशतो भेदकल्पनम्। ते च लोकास्त्रिविधा भूलोकान्तरिक्षलोकद्योलोकरूपतः। तदुपाधिवशतो वेदप्रतिपाद्या देवतास्त्रिविधा इति नैरुक्ताः। तदुक्तं यास्केन—तिस्रो देवता इति नैरुक्ता इति। ताश्चेमा अग्निवाय्वादित्यशब्दैरुच्यन्ते देवताः। एवं सति प्रतिपाद्यानां देवतानां भूलोकसम्बन्धित्वेऽग्नित्वम्, अन्तरिक्षलोकसम्बन्धित्वे वायुत्वम्, द्योलोकसम्बन्धित्वे आदित्यत्वमिति तत्प्रतिपादनं वेदे।

ऋग्वेदीयानुक्रमणिकाकारेण शौनकेन तु पूर्वोक्तान् पक्षान् प्रदर्श्य पूर्वाचार्याणामभिमतः पक्षः प्रदर्श्यते। तत्र सत्यमेवाध्यात्मवाद एव वेदे। आत्मैव च वेदप्रतिपाद्यः। आत्मनश्चैक्येन भेदराहित्येन प्रतिपादनस्याशक्यतयोपाध्याश्रयणे विश्वजिन्न्यायेन सर्वसम्मतः प्राथमिकदृश्यविकाररूप आदित्य एवोपाधित्वेन ग्रहीतव्यः। तदुपाधित्वेनैव वेदे आत्मनः प्रतिपादनम्। अध्यात्मवाद एवासौ। तत्र शरीरस्थानीयमादित्यरूपमुपाधिं गृहीत्वा वेदे प्रतिपादनमिति आदित्यरूपिण एवात्मनो वेदे प्रतिपादनम्। तदुक्तं तेन—"एक एव वा महानात्मा वेदे स्तूयते, स सूर्य इत्याचक्षते। सूर्य आत्मा जगतस्तस्थुषश्चेत्यपि निगमो भवती" ति।

अत्र आचक्षत इति वचनादिदं न ममैव मतम्, किन्तु पूर्वषां सर्वेषामाचार्याणामिति तेन कर्त्रनुद्देशः। वैदिकमिदं मतं वेदसमकालं पुरातनमिति प्रतिपादनाय "सूर्य आत्मे"ति निगमोल्लेखनं तेन। तदुक्तनिगमवशतश्चराचरात्मकस्य जगत आत्मरूपत्वेन सर्वप्रथमः सूर्य एवात्मरूपो वेदप्रतिपाद्यो मुख्यो देवः। तस्यैवोपाधिवशतो नानाविधा वर्णना वेदे। यथैकस्य देवदत्तात्मनः शरीररूपमुपाधिं गृहीत्वा वर्णने तदीयगुणक्रियाद्युपाधिभेदतो भिन्नत्वेन तत्प्रतिपादनं तद्वत्।

चराचरात्मत्वेन प्राथम्यं सर्वापेक्षयेत्युक्तमेव। एवं सृष्टावाकाशादिक्रमेणोत्पत्तौ दृश्येषु त्रिषु भूतेषु तेजसः प्राथम्यम्। तदुक्तं तत्तेजोऽसृजतेति। तेजसश्च स्पष्टमुपलम्भ आदित्य इति तस्यैदात्मोपाधित्वेन ग्रहणेन वेदे प्रतिपादनम्। एवं च सर्ववर्णनं वेदे आदित्यपरं यथा तथैव व्याख्यानमुचितम्। इदमेवंप्रकारं व्याख्यानमेव प्राचीनम्। तस्य व्याख्यातृभिरपि तदा तदा अनुसरणम्। तस्यैतस्य व्याख्यानस्य समाश्रयणे न पूर्वोक्ता व्याख्यानदोषा प्राप्नुवन्ति सर्वं च समञ्जस भवति।

तदेतत्क्रमशः प्रतिपादयिष्यते।

आदित्य एवैको देवो वेदे प्रतिपाद्यत इति वचने इन्द्रवरुणमित्रप्रभृतयो भिन्नैर्नामभिः प्रतिपाद्या अपि निमित्तविशेषवशत आदित्याभिन्नाः। आदित्यस्यैव तानि नामान्तराणि। आदित्य एवेन्द्रादिशब्दैः प्रतिपाद्यत इति भावः। वेदो मन्त्रब्राह्मणोभयात्मक इति मन्त्रभाग इव ब्राह्मणभागेऽपि आदित्यस्य प्रतिपादनम्। एवं सति ब्राह्मणगतानि कर्माणि आदित्यस्यैव अर्थवादा अपि तत्प्रतिपादका एव। एवं सति अर्थवादविषये "नित्यं कञ्चनार्थं गृहीत्वोपपत्तिर्वक्तव्ये"ति शबरवचनमप्युपपद्यते। आदित्यकर्मानुकारेण मनुष्यैरनुष्ठीयमानानि कर्माणि भवन्ति। एवं सति देवताकृतिमनु मनुष्यैः कर्मानुष्ठानमिति ब्राह्मणे तत्र तत्र प्रतिपाद्यमानमुपपद्यते। प्रपञ्चयिष्यतेऽयमर्थः परस्तात्सविस्तरम्।

तस्य चादित्यस्यैकस्य सत उपाधिभेदेन नानादेवतारूपत्वमित्युक्तं प्राक्। इदं मन्त्रेणाप्युच्यते तथाहि मन्त्रः—इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुरिति।

तत्र लोकोपाधिनाग्न्यादित्वं तस्य। एवं सति निरुक्तमतमप्येतन्मतमध्येऽन्तःपततीति न तेनास्य मतस्य विरोधः।

लोकाश्च त्रिविधा भूरन्तरिक्षं द्यौरिति रूपेण। तेषामेषां लोकानां विषये नानाविधाः कल्पना वेदे। यथा प्रथमतो अत्यन्तप्रसिद्धा लोककल्पना—इयं

भूर्भूलोकः, भुवमारभ्य आ-आदित्यमण्डलमन्तरिक्षलोकः, आदित्यमण्डलमारभ्यो-परिष्टात्सर्वो द्योलोक इति। अपरविधा लोककल्पना शतपथब्राह्मणे प्रतिपाद्यते। तत्रोच्यते "वसन्तो ग्रीष्मो वर्षास्ते दैवा ऋतवो देवेषु तर्ह्यसौ भवति देवांस्तर्ह्यभिगोपायती"ति। अत्रर्तुत्रये देवेषु भवतीति वर्णनेन यत्रासावुक्तर्तुत्रयेऽनस्तमितो दृश्यते स देवनिवासः स्वर्गो लोको द्योलोको वा। अस्य च भुव उत्तरस्मिन्पार्श्वे सर्वोच्चस्थाने स्थितिः। यत्र स्थानेऽवस्थितेन पुरुषेण ध्रुवनक्षत्रं स्वस्वस्विके (स्वमस्तकोपरि) उपरिष्टाद्दृश्येत स भागो द्योलोकः। स चोर्ध्व इति तस्य शिखरत्वेन कल्पना। मेरौ देवानां निवास इति प्रसिध्या तन्मेरुशिखरम्। तच्च सुमेर्वाख्यम्। तत्र देवानां निवासवर्णनात्। एवं च भुव उत्तरस्मिन्पार्श्वे सर्वोच्चभागस्य देवनिवाससुमेरुत्वे। तस्यैव द्योलोकता चेति। तद्विपरीतदिशि अर्थाद्दक्षिणस्या दिशि भुवः पार्श्वीयसर्वोच्चभागः कुमेर्वाख्यं मेरोर्दक्षिणं शृङ्गम्। एतल्लोकान्लोकशब्देनापि व्यवह्रियते। अस्य भूलोकत्वम्। तत्रादित्यस्य वामत्वेन वर्णना। सुमेरौ यावदादित्यो भवति तावत्पर्यन्तं कुमेरुस्थैः स न दृश्यते। यदा च कुमेरुस्थानां दृश्यो भवेत्तदानीं सुमेरुस्थानामदृश्यः। तत्र शतपथब्राह्मणे वसन्तादिऋतुत्रयं देवेषु स्थित्या तत्र तावत्कालं तत्रत्यानां दिनं स च कालो माससंस्का रवासितात्मनामभिप्रायेण षण्मासा भवेयुः। एवं च तत्र षाण्मासिकं दिनमिति भवति। यथेदं भुव उत्तरपार्श्वे एवं भुवो दक्षिणपार्श्वेऽपि स्यात्। तत्र शरदादिऋतुत्रयमादित्यस्थितेः शतपथे वर्णनात्। तदुक्तं "शरद्धेमन्तः शिशिर इति असुरा ऋतवोऽसुरेष्वसावेतर्हि भवत्यसुरांस्तर्ह्यभिगोपायति" इति। एवं चात्रापि कुमेरावृतुत्रयमादित्यस्थित्या षाण्मासिकं दिनम्। यदा सुमेरौ दिनं तदानीं कुमेरावादित्यादर्शनाद्रात्रिः। साऽपि षाण्मासिकी तत्र। यदा च कुमेरावादित्यदर्शनं तदानीं तत्र दिनं सुमेरौ च तावत्कालमादित्यादर्शनाद्रात्रिरिति। एवं सुमेरौ कुमेरौ च षाण्मासिकं दिनं तावती रात्रिश्चेति।

आदित्यस्यास्तगमनेऽग्नौ प्रवेशस्तस्येति ब्राह्मण उच्यते। तदुक्तम्—"आदित्यो वा अस्तं यन्नग्निमनुप्रविशती"ति। एवं तस्योदयोऽप्यग्निसकाशात इति। अत एवोच्यते "अग्नेर्वा एष प्रातरुदेती"ति। एवं चादित्यस्यास्तमारभ्योदयपर्यन्तमग्नेः सत्त्वमिति भवति। एवं च सुमेरावस्तमितः कुमेरावुदेतीति कुमेरोर्भूत्वम्। भूलोकसम्बन्धिन आदित्यस्याग्नित्वोक्तेः। एवं च सुमेरुर्द्योलोकः कुमेरुर्भूलोकः, मध्यवर्तिभागश्च उभयोरन्तर्मध्ये क्षियति तिष्ठतीति तस्यान्तरिक्षलोकता। एवं चात्र कल्पे इमे त्रयोऽपि लोका भुवि वर्तमाना इति भवति। एषां

त्रयाणामपि लोकानां प्रत्येकं लोकत्रयरूपत्वम्। तथाहि ब्राह्मण उच्यते "एषां वै लोकानां रोहेण सवनानां रोह" इति।

अयं भावः—यथेमे लोका आदित्येन प्रत्यहं कर्मणोर्ध्वोर्ध्वमाक्रम्यन्त आरुह्यन्त इति वा तदनुसारी सवनानामपि सोमयागीयानां क्रम इति। यथादित्येन दिने प्रथमं प्रथमलोकोऽर्थाद्भूलोक आरुह्यत एवं प्रथमेऽवसरे प्रथमं सवनं तस्य कालविशेषाभिप्रायेण कालबोधकः शब्दः सवनशब्देन सह प्रयुज्यते 'प्रात'रिति। प्रथमं सवनं प्रातःसवनं तच्च प्रातःकाले भवति। एवं च प्रातःकाले प्रथमं सवनं प्रातःसवनाख्यमेवं प्रातःकाले प्रथमो लोको भूलोक इति। अत एवादित्यस्य प्रातरुदयेन उदयश्च वह्नेः सकाशतः, वह्निश्च भूस्थान इति संगच्छते। यथा प्रातःकाले भूलोकः प्रातःसवनं च एवं मध्यमलोको मध्यमं सवनं च समानकालं द्वयम्। तस्य च सवनस्य मध्यन्दिनमिति विशेषणान्मध्यन्दिनकालिकता, एवं लोकस्यापि मध्यमस्यार्थादन्तरिक्षलोकस्य मध्यन्दिनकालिकता। एवं तृतीयसवनं द्युलोकश्च समकालाविति। एवं च सुमेरौ दिनप्रारम्भे भूलोको दिनमध्येऽन्तरिक्षलोकः परस्ताद् द्युलोक इति लोकत्रयं भवति। यथा सुमेरौ लोकत्रययोग एवं कुमेरावपि लोकत्रययोगः समानन्यायेन। सुमेरुकुमेर्वोर्द्युत्वं भूत्वमिति प्रागुक्तमेव। तदेतद् गृहीत्वा मन्त्रे उच्यते तिस्रो भूमयः त्रयो द्युलोका इति। तदुक्तम्—तिस्रो भूमीर्धारयन्त्रीँरुत द्यूनिति। यथा सुमेरुकुमेर्वोर्भूरादिलोकत्रययोगिता समानन्यायेन मध्यवर्तिन्यन्तरिक्षलोकेऽपि लोकत्रययोगः। तत्रापि आदित्यस्य उदयादिसत्त्वात्। तदेतदभिप्रेत्य ब्राह्मण उच्यते "त्रयो वा इमे त्रिवृतो लोकाः" इति। उक्तरीत्या त्रयाणां लोकानां लोकत्रययोगे लोकसङ्ख्या साकल्येन नवरूपा भवति। यथोक्तरीत्या लोका नवविधा उक्ता, एवं कल्पनान्तरेण लोकानां त्रिषष्टिसंख्याकत्वम्। तदुक्तं ब्राह्मणे "अनुष्टुभौ स्वर्गकामः कुर्वीत" इति द्वयोरनुष्टुभोः स्तुतिप्रसङ्गे "द्वयोर्वा अनुष्टुभोश्चतुःषष्टचक्षराणि" इत्युक्त्वोच्यते "त्रयो वा इम एकविंशा लोका"स्तेष्वेकैकेनाक्षरेणारुह्य चतुःषष्टितमेनोर्ध्ववर्तिन्यादित्ये प्रतितिष्ठतीत्युक्तम्।

एवं चैषां त्रयाणां लोकानामुक्तरीत्या सुमेरुकुमेरुमध्यवर्तिनां प्रत्येकमेकविंशतिविधत्वम्। अत एव प्रत्येकं एकविंशा इति विशेषणं सङ्गच्छते।

तच्चैकविंशतिविधत्वं यथा—

भुव उत्तरदक्षिणपार्श्वगते नवतितमांशरूपे प्रतिपार्श्वमुच्चस्थले सुमेरुकुमेरुरूपे षाण्मासिकी रात्रिः षाण्मासिकं च दिनं भवतीत्युक्तं प्राक्। तत्र षाण्मासिक्यां रात्रौ केवलतमोमयानि दिनानि नवनवतिर्भवन्ति। दिनभेदेन

तमोभेदं मत्वा तानि वृत्राख्यान्धकारस्य पुराणि। तेषामिन्द्रेणादित्येन विनाशनं क्रियत इति इन्द्रसूक्तेषूच्यते "जघान नवतीर्नव" "जघान नवतिं नव" "नव यदस्य नवतिं च भोगान् त्साकं वज्रेण मघवा विवृश्च"दित्यादिना। यथा उक्त-स्थाने केवलतमोमयानि दिनानि भवन्ति एवं तस्मात्स्थानादवरोहे स्वल्पन्यूनांश-स्थले दिनरात्रिमानयोर्विषमता भवति। सा च विषमता अन्तिमनवत्यंशस्थानतः सप्तांशन्यूनपर्यन्तमेव भवति ततः परस्ताद्दिनरात्र्योर्मानमेकदिनापेक्षयाऽधिकं न भवति। इति तस्य विशिष्य वचनाभावो वेदे। तदेतद्विषमावधित्वं राज्या एकादशदिनावधि भवति। तच्च विषमं रात्रिमानमथर्ववेदे रात्रिसूक्ते उच्यते। यथा—ये ते रात्रि नृचक्षसो द्रष्टारो नवतिर्नव। अशीतिः सन्त्वष्टावुतो ते सप्त-सप्ततीः। षष्टिश्च षट् च रेवति पञ्चाशत्पञ्च सुम्नयि। चत्वारश्च चत्वारिंशच्च त्रयश्च त्रिंशच्च वाजिनि। द्वौ च ते विंशतिश्च ते राज्येकादशावमाः। इति। अत्र स्थानभेदेन राज्या अवधिभेदा निर्दिष्टाः। ते चांशसप्तकस्थानपर्यन्तमेव भवन्ति।

एवं चैतेषु स्थानेषु प्रतिस्थानं भिन्नत्वं गृहीत्वा सुमेरौ द्योलोकसप्तकम्। सुमेरुवत्कुमेरावपि अंशसप्तकपर्यन्तं दिनरात्र्योर्विषमावधित्वमिति तत्रापि सप्त-विधत्वं तच्च भुवः। यथा सुमेरुकुमेर्वोः सप्तविधत्वं लोकगतमेवमन्तरिक्षलोकेऽपि वैषम्यनिबन्धनं लोकसप्तकमिति। त्रयाणामेषां सप्तविधानां लोकानां प्रतिस्व-मुदयमारभ्यास्तमयपर्यन्तं पूर्वोक्तरीत्या लोकत्रयकल्पने भूरादिलोकानां प्रत्येक-मेकविंशतिविधत्वं भवति। तदेतद् गृहीत्वा ब्राह्मण उक्तं "त्रयो वा इम एकविंशा लोका" इति।

एवं सति लोके कल्पनाभेदेन त्रित्वं नवत्वं एकषष्टिविधत्वमिति भवति। तेषु भूरादिविभागेनाग्न्यादिरूपत्वमादित्यस्य भवति।

तत्र कुमेरुरूपभूलोकस्योदयादिवशतो लोकत्रयमभिप्रेत्य तत्रापि देवता-त्रयं भवति। तस्याग्निभ्रातृत्वेन व्यवहारः। तेषां च पूर्वशब्देन व्यवहारः। तद्वि-षये परस्ताद्विवेचनं करिष्यते। ते चेमे "अग्नेः पूर्वे त्रयो भ्रातरो मृता" इति कृष्णयजुर्वेदे उच्यते। ऋग्वेदेऽपि उच्यते—"अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः"। इति।

अत्र मन्त्रे भ्रातर इति बहुवचनमात्रमुच्यते न तु संख्याविशेषस्तथापि कपिञ्जलन्यायेन पूर्वोक्तकृष्णयजुर्वशतश्च ते त्रय इत्येव विवक्षितम्। अर्थशब्देन गन्तव्यस्थानसमाप्तिरूपोऽवधिरुच्यते। अवधिप्राप्त्या समाप्तिरुपलक्ष्यते। तया मरणकल्पनयोच्यते अग्नेः पूर्वे भ्रातर एतमर्थमन्वावरीवुः अनुक्रमेण वृतवन्तः।

अर्थवरणं मरणमिति पूर्वमुक्तमेव। एवं च तेऽग्नेस्त्रयो भ्रातरो मृता इति कृष्णयजुर्वेदोक्त एवार्थोऽनेन ऋङ्मन्त्रेण प्रतिपाद्यत इति भवति। एतस्याग्नि-भ्रातृत्रयस्य "अस्य वामस्ये"ति सूक्ते स्पष्टमुल्लेखः। अयं हि तत्रत्यो मन्त्रः—अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम्। इति।

अत्र वामशब्देन कुमेरुगत आदित्योऽग्निरूपो बोध्यते। अयं भावः—सुमेरु-कुमेर्वोः षाण्मासिकदिनरात्रिसाम्येऽपि सप्तविधत्वादिकतिपयप्रकारसाम्येऽपि केचन विषमाः प्रकाराः प्रतिस्वं भवन्ति।

सुमेरावादित्यस्य विशेष एवंरूपो भवति यत् तस्य तत्र पूर्वस्यां दिश्युदयः क्रमेण कुलालचक्रगतिवत्प्रदक्षिणावर्ता गतिः। तया क्षितिजतःक्रमेण मासत्रय-पर्यन्तमूर्ध्वायां दिशि गमनमम्बरतले। तच्च तस्य तत्रारोहणं क्षितिजतश्चतुर्विंश-त्यंशपर्यन्तम्। पुनरारोहक्रमेण ततस्तथैव गत्या प्रदक्षिणावर्तया मासत्रयपर्यन्त-मवरोहः। स चारोहक्रमेणेत्युक्तम्। तत्रारोहक्रमवैपरीत्येनावरोहः। यथा सोपा-नारोहणे यः क्रमो गृह्यते तदनुसार्येवावरोहे क्रम आस्थीयते वैपरीत्येन। न हि आरोहे क्रमः १-२-३-४ सोपानानां तस्य अवरोहेऽपि १-२-३-४ इत्येवमेव क्रमः संभवति, नवा ४-२-१-३ इत्यादिरूपोऽपि संभवति किन्तु आरोहक्रमस्य १-२-३-४ वैपरी-त्येन ४-३-२-१ एवं क्रमेणावरुह्यते, तद्वदादित्योऽपि सुमेरौ क्षितिजतश्चतुर्विंशत्यंश-पर्यन्तमारूढो मासत्रयेण कुलालचक्रगत्या क्रमेणावरोहति। प्रतीच्यां दिशि चास्त-मेति प्रतीच्यामस्तमित. सुमेरौ कुमेरौ तत्रैवोदेति। एवं सति कुमेरावादित्यस्य प्रतीच्यामुदय इति भवति। तत्र प्रतीच्यामुदितः क्रमेण कुलालचक्रगत्या वामा-वर्तया तत्रत्यमम्बरतलमारोहति क्षितिजतश्चतुर्विंशत्यंशपर्यन्तं मासत्रयेण। ततः पुनर्मासत्रयेण तयैव गत्या क्षितिजपर्यन्तमवरोहति। मासत्रयान्ते तत्र पूर्वस्या-मस्तमेति। ततः सुमेरौ पूर्वस्यामुदेतीति क्रमः। एवं सति सुमेरुगता विशेषाः पूर्वस्यामुदयः प्रदक्षिणावर्ता गतिः कुलालचक्रवत्, पश्चिमायामस्तमयः।

कुमेरुगता विशेषा. पश्चिमायामुदयो वामावर्ता गतिः कुलालचक्रवत्, पूर्वस्यामस्तमय इति। एतेषां विशेषाणामभिप्रायेण सूक्तेषु वर्णनावसरे आदित्यस्य विभिन्ननामभिर्वर्णना। यथा सुमेर्वभिप्रायेण तस्य दक्षदक्षिणशब्देन प्रदक्षिण-भ्रमाभिप्रायेण, पूर्वस्यामुदेत्य पश्चिमायामस्तार्थं गमनमभिप्रेत्य प्रत्यङ्शब्देन व्यवहारः। आदित्यव्यवहारवदुषआदीनामपि व्यवहारा इति तेषामपि दक्षिणा-प्रतीच्यादिशब्दैर्व्यवहारो वेदे। एवं कुमेर्वभिप्रायेण तद्गतविशेषाभिप्रायेण सुमेरुविरुद्धभावेन व्यवहारः। यथा वामावर्तपरिभ्रमाभिप्रायेण दक्षिणविरुद्ध-

वामशब्देनादित्यव्यवहारः। एवं तत्र प्रतीच्यामुदेत्य क्रमेणास्तार्थं पूर्वां दिशमभिप्रेत्य गमनाभिप्रायेण प्राङ्शब्देन पूर्वप्रथमादिशब्दैश्च व्यवहारस्तत्र तत्र सूक्तादिषु। आदित्यव्यवहारवदुषआदीनामपि वामाप्रतीचीपूर्वाप्रथमा इत्यादिशब्दैर्व्यवहारः सूक्तेषु। एवं सति उपरितनमन्त्रे कुमेर्वभिप्रायको वामावर्तगत्यभिप्रायेण वामशब्देन व्यवहारस्तस्य।

एवं चोक्तमन्त्रेऽस्य भूलोकसम्बन्धिनो वामस्य वामावर्तस्यादित्यस्य तद्रूपस्याग्नेर्भ्रातरः क्रमेण तन्मन्त्रे उच्यन्ते। प्राङादिशब्दवत्पूर्वादिशब्दैरपि व्यवहारः कुमेरुसम्बन्धाभिप्रायः प्रसिद्धो बहुलं वेदे। यथा—अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति। इति मन्त्रे। तत्र पूर्वादिशब्दा उभयार्थका लोके प्रसिद्धा, दिग्वाचकाः कालवाचकाश्च। प्रयोगेषु योग्यतानुसारेण ते तत्र निर्णीयन्ते। प्रकृते मन्त्रे सन्दिग्धावस्थाकः पूर्वशब्दः परवर्तिनूतनशब्दवशतो व्याख्यातृभिर्निर्णीयतेऽत्रायं शब्दः कालवाचक इति। नूतनशब्दस्य सन्निहितकालबोधकत्वं प्रसिद्धतरमिति तत्प्रतिद्वन्द्वितया निर्दिश्यमानः पूर्वशब्दोऽत्र कालवाचकः। स च विप्रकृष्टो भूतः कालो वर्णनानुसारेण गृह्यते। अत एव पूर्वेभिरित्यस्य व्याख्यानं पूर्वकालिका ये भृग्वङ्गिरःप्रभृतयस्तैरिति व्याख्यातृणाम्। परं तु पूर्वशब्दस्योभयार्थत्वमिव नूतनशब्दस्यापि उभयार्थत्वमिति न नूतनशब्दवशतः कालवाचकत्वं पूर्वशब्दे निर्णेतुं शक्यम्। किञ्च अग्निर्ऋषिभिः स्तुत्य इत्येतावद्वर्णनमात्रेणापि पूर्वनूतनशब्दग्रहणं विनापि तदुक्तार्थप्रतीत्या तच्छब्दोपादानं तत्र मन्त्रे निरर्थकं स्यात्। वेदेऽर्थाम्रेडनं न दोषायेति त्वगतिकगतिः। संभवति अनाम्रेडनेन वाक्यार्थबोधे तदाश्रयणस्यायुक्तत्वात्। किञ्चैतयोः शब्दयोः प्रतिद्वन्द्विभूतार्थबोधकत्वाद्विशिष्टशब्दसाहचर्यं लोकप्रसिद्धम्। यथा पूर्वशब्दस्य परशब्देनैवं नूतनशब्दस्य पुराणशब्देन साहित्यं प्रसिद्धम्। प्रकृते च मन्त्रे उभयोरपि प्रसिद्धं साहित्यमननुसृतम्। प्राथमकल्पिकसाहित्यस्यासत्वे द्वितीयकल्पिकसाहित्याश्रयणम्। यथा पूर्वशब्दः दिशं देशं वा बोधयति प्राथम्येन न तादृशः नूतनशब्दः प्राथम्येन तद्बोधकः, किंतु प्रयुज्यमानपूर्वशब्देन देशादिनिर्णये तत्र साहित्येन प्रयुज्यमानः नूतनशब्दोऽपि देशवाचकः संपद्यते इति तस्य द्वितीयकल्पीयता पूर्वशब्देन साहित्ये। एवं नूतनशब्दस्य प्राथमकल्पिकसाहित्ये प्रतिद्वन्द्विभूतः पुराणशब्दो न पूर्वशब्दस्तथा। स तु नूतनशब्देन द्वितीयकल्पिकसाहित्ये प्रतिद्वन्द्विभूतः। एवं सति पूर्वशब्दस्य नूतनशब्दस्य च प्रकृते मन्त्रे द्वितीयकल्पसम्बन्धिसाहित्ये प्रतिद्वन्द्विभूतत्वमिति न पूर्वशब्देन नूतनशब्दार्थनिर्णयो नापि नूतन-

शब्देन पूर्वपदार्थनिर्णयः। उभयोरपि समत्वात्। तस्मादत्र निमित्तान्तर-वशतोऽर्थनिर्णयः कर्तव्यः। एवं सति अणुरपि विशेषोऽध्यवसायकर इति न्यायेन प्रथमोपस्थिते मन्त्रगते पूर्वशब्दे प्रसिद्धतरविभक्तिवैशिष्ट्यविपरीततया दर्शनात्प्राप्तविरुद्धार्थकत्वं कल्प्यते। प्रकृते च मन्त्रे नूतनपदसाहित्येन अस्य द्वितीय-कल्पसाहित्यप्रतिद्वन्द्विताया. प्राप्ताया विरुद्धत्वेनात्रास्य प्राथमकल्पिकसाहित्य-प्रतिद्वन्द्विता विज्ञायते। तेनास्यात्रदिग्वाचकत्वस्याश्रयणम्। तथा च पूर्वशब्दः पूर्वदिग्द्वारा पूर्वाञ्चनवशात आदित्यस्येव पूर्वदिक्सम्बन्धत्वेन पूर्वार्थको न तु कालवाचकः। एवं सति अत्र पूर्वशब्देन न पूर्वकालिकानां ग्रहणं किन्तु पूर्वाञ्चनानां ग्रहणमिति नूतनशब्दोऽपि न कालिकार्थः किन्तु पूर्वाञ्चनवैपरीत्येन प्रत्यगञ्चना-र्थकः। एवं पूर्वाः पूर्वाञ्चना ऋषयोऽग्निं स्तुवन्ति। एवं नूतनाः पूर्वाञ्चना-वसाने प्रत्यगञ्चनप्रवृत्या प्रत्यगञ्चना अपि अग्निं स्तुवन्ति। अत्र पूर्व-शब्दस्य ऋषिविशेषणत्वेन मन्त्रे वचनात् तत्रोक्तऋषिभिरित्यस्य तेन सह यथा विशेष्यविशेषणभावसम्बन्धः, एवं तत्रैव विशेष्यबोधकपदरहितनूतनशब्दस्यापि उपस्थितऋषिभिरित्यनेन विशेष्यविशेषणभावः सम्बन्ध इति भवति प्रतीतिः। परन्तु पूर्वोक्तरीत्या नूतन इत्यस्य प्रत्यगञ्चनपरतानिर्णये प्रत्यगञ्चनपरताया ऋषिष्वसम्भवान्नात्र ऋषिभिरित्यस्य विशेष्यतया सम्भव इति नात्र नूतना ऋषय इत्यर्थः, किन्तु ये प्रत्यगञ्चनास्त इति अनुक्तविशेष्यकत्वेनैव ग्रहणम्।

अयं भावः—कुमेरोर्भूत्वात्तत्सम्बन्धित्वमृषीणाम्। ऋषिशब्देन किरणा आदित्यस्य गृह्यन्ते। ते आदित्यस्य कुमेरौ पूर्वाञ्चनत्वेन आदित्यसमान-न्यायतायास्तत्रत्यायामुषसीव किरणेष्वपि दर्शनात्तेऽपि पूर्वाञ्चनाः कुमेरु-सम्बन्धा ऋषिशब्दबोध्याः। एवं सति पूर्वे किरणा आदित्यं स्तुवन्ति एवं नूतना अर्थात्प्रत्यगञ्चनाः सुमेरुस्थाः किरणा आदित्यं स्तुवन्ति, ते च सुमेरुसम्बन्धाः किरणा देवशब्दबोध्याः। अत एवात्र नूतनैरुतेत्यत्र देवैरिति विशेष्यसम्बन्ध इति भवति।

ऋषीणां रश्मिपरत्वस्य निरुक्ते प्रतिपादनम्, एवं देवानामपि रश्मि-रूपत्वमिति शतपथे वचनं तदुपरिष्टाद् व्याख्यास्यते। रश्मय आदित्यमण्डलस्या-समन्ताद्वर्तन्ते यथा रथनाभ्या आसमन्तादराः। रश्मिष्वरत्वेन कल्पने आदित्य-मण्डले नाभित्वेन कल्पना। तदेतद् गृहीत्वा वेदे प्रोच्यते 'रथना-भाविवारा' इति। अरत्वेन कल्पनायां रथचक्रे कल्पनाद्वयं सम्भवति यदिमेऽरा नेमितो निर्गत्य नाभ्या प्रविशन्ति अथवा नाभितो निर्गत्य नेम्यां तेषां प्रवेश इति। उभयविधाऽपि कल्पना रश्मिषु वेदे कल्पिता। तत्र मण्डलतो

निर्गता रश्मय आकाशे पृथिव्यादिषु पतन्ति। पृथिव्यादिभिराकाशे प्रतिबन्धा-द्रश्मिगमनस्य तस्मिन्पृथिव्यादौ प्रतिबन्धके तेजसः पुञ्जीभावेनौष्ण्योत्पत्त्या तत्राग्निरूपता रश्मीनां संपद्यते। अग्निरूपतापन्नानां रश्मीनां पुनर्मण्डलानु-कूलगत्या मण्डले प्रवेशः। तत्राद्यप्रकाराभिप्रायेण मन्त्रे प्रोच्यते 'अग्ने नेमि-ररॉं इव देवांस्त्वं परिभूरसि' इति। देवा आदित्यरश्मयस्तेषां गमनप्रति-बन्धस्थानमराणां नेमिरिवाग्निरिति तस्य देवानामासमन्ताद्भवनमभिप्रेत्योक्तं अरान् नेमिरिव त्वं परिभवसि इति। सोऽयमराणां नेम्यां प्रवेशाभिप्रायेणा-रनेमिभाव इत्युच्यते, नाभिगमनाभिप्रायेण तु अरनाभिभाव इति। सोऽपि रश्मिषु 'रथनाभाविवारा' इति पूर्वोक्तेनाभिव्यज्यते। तत्रारनाभिभावमभि-प्रेत्योच्यते—यदिमे रश्मयोऽन्यतः समागत्य मण्डले सन्निविशन्तीति। तद्विषये ब्राह्मणे मन्त्रेषु च वर्णना। आदित्यमण्डलस्योदयात्पूर्वं दृश्या रश्मयो मण्डल-सविधं गत्वा तत् स्तुवन्ति तत उदयो जायते। एवमस्तोत्तरं दृश्या रश्मयो मण्डलपृष्ठभावेन गत्वा तत् स्तुवन्तीति। एतत् पृष्ठभावेन गत्वा स्तवनं नमन-शब्देनोच्यते। अग्रभागेनागत्य स्तवनं स्तवनेऽडनशब्देनोच्यते। एतेषां पृष्ठ-भागेनाग्रभागेन वा गच्छतां रश्मीनां मण्डले तिर्यक्त्वेन सम्बन्धः। सम्मुखीन-भावेन मण्डले प्रविशन्तस्ते तदाह्वयन्तीवेति। एवं त्रिविधभावमभिप्रेत्य त्रिविधानि विशेषणानि वेदे प्रदिपाद्यन्ते। यथा वह्निस्तावके सूक्ते उच्यते 'आजुह्वान ईड्यो वन्द्यश्चे'ति। तदत्र देवतासूदयन्नादित्यो भुवि वर्तमानैः किरणैः पूर्वाञ्चनात्पूर्वैर्भूसम्बन्धादृषिरूपैरादित्यः स्तूयत इत्यभिप्रायेण मन्त्रे अग्निः पूर्वेभिर्ऋषिभिरीड्य इत्युक्तिः।

एवं देवेषूदयात्प्राक्कालीना रश्मय उदयन्मण्डलाग्रभागेनागच्छन्त अत एवमे नवीना अर्थादपरा. प्रत्यगञ्चना इति देवरूपास्तमग्निं स्तुवन्तीति वचनम्। एवं सम्मुखीनोऽसावग्निरादित्यो देवान् सम्मुखीनान् रश्मीन् इहोदयदेशे आवक्ष्यति आनेष्यतीति। अनेनारनेमिभाव उक्तः। पूर्वप्रकारद्वये तु अरनाभिभाव इति। एतावता मन्त्रे देवानामानयनोक्त्या तदानयनस्य उदयकालिकत्वेनात्रा-दित्यस्योदयो भवत्विति प्रार्थना। एवं चास्मिन्मन्त्रे पूर्वशब्दस्य कालवाचित्वा-भावेन टीकाकृतां व्याख्यानस्यात्राप्रवृत्तिरिति वेदस्यापौरुषेयत्वभङ्गरूपसिद्धान्त-हान्या अप्राप्तिः। टीकाकृद्रीत्या व्याख्याने तस्या उद्धारः क्लेशसाध्य इति। एवं चात्र मन्त्रे पूर्वशब्दः पूर्वाञ्चनाभिप्रायक इति भवति।

एवञ्चास्यवामस्यमन्त्रे वामावर्त आदित्यो वामशब्देनोच्यते। तस्य भ्राता मध्यमोऽश्नशब्देनोच्यते। अश्नः सर्वतो गच्छन्वायुरिव व्यापकः सोऽश्ने-

वामावर्तादित्यस्य मध्यमो भ्राता। तृतीयो भ्राता घृतपृष्ठोऽस्याग्नेरित्यादि तन्मन्त्रे उच्यते। एवं च कुमेरौ सुमेराविव लोकत्रयसम्बन्धिनस्ते परस्परं भ्रातृभूतास्तेषां कुमेरावस्तमये सुमेरावुदये कार्यकालस्यावसानादर्थप्राप्तिर्मरणं वेत्यभिप्रेत्य यजुर्वेदे 'अग्नेः पूर्वे त्रयो भ्रातरो मृता' इत्युक्तिः। ऋग्वेदे उपरितने मन्त्रेऽर्थ प्राप्ता इति वचनम्। तदेतत् कुमेरुगतं वैशिष्टयं पश्चिमायामुदयः प्राच्यामस्तमयः, तच्छान्दोग्योपनिषदि प्रोच्यते। तत्रोक्तं 'स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत् पश्चादुदेता पुरस्तादस्तमेते'ति। तत्र दक्षिणस्यामुदय उत्तरस्यामस्तमये पश्चात् पश्चिमायामुदयः पुरस्तात् पूर्वस्यामस्तमय इति वर्णनम्। तत् कुमेरावेव सम्भवतीति।

एवञ्च वेदे आदित्यस्यैवैकस्य स्तव इति मन्त्रेषु प्रोच्यमानसंख्यानां विस्पष्टार्थत्वं भवति।

तत्र प्रथमत ऐन्द्रे सूक्त उच्यमानसंख्याविषय एव विचार.।

पूर्वोदाहृतः संख्याविशेषो 'जघान नवतिं नव' इत्यत्र नवाधिका नवतिः। किमनया संख्यया विवक्ष्यते। कुत एतावानेव सोऽर्थः। कथञ्च तस्य विनाश इन्द्रेणेति।

तत्रेन्द्रो हि आदित्यस्तस्य द्विविधा गतिरेका दक्षिणोत्तरायणरूपिणी दक्षिणोत्तरसम्बन्धेन, अपरा सांपातिकगतिः पूर्वपश्चिमसम्बन्धेन।

तत्र दक्षिणोत्तरायणगतिर्वेदे देवयानपितृयानशब्दाभ्यां प्रोच्यते।

देवयानशब्देन देवेषु यानं गमनम्। देवाञ्च उत्तरस्यां सुमेरौ निवसन्तीति पूर्वमुक्तम्। देवयानप्रारम्भस्थलतो देवयानप्रवृत्तिः। तत्प्रारम्भस्थलानि चत्वारि वेदे निगदितानि।

तत्र दक्षिणायनावसानस्थल यत् पितृयाणावसानरूपम्, तत्प्रथमम्। यस्य मकरसङ्क्रमणादिरूपत्वम्।

अथवा दैव्या रात्र्या मध्यः, तत.। दैवी रात्रिश्च देवेष्वादित्यस्यास्तमयतः प्रवर्तते। तत्रादित्यस्यास्तमयः शरदृतुप्रारम्भे। अत एव शतपथब्राह्मण उच्यते 'वसन्तो ग्रीष्मो वर्षास्ते दैवा ऋतवः, देवेषु तर्ह्यसौ भवति' इति। एतदृतुत्रयं यावत् देवेष्वादित्यस्य सत्त्ववचनेन परस्मिन्नृतुत्रये देवेषु तस्यासत्त्वं प्रतीयते। तच्चास्तोत्तरमिति शरदृतुप्रारम्भे देवेष्वादित्यस्यास्तमयेन रात्रिप्रवृत्तिः। सा च परवर्तिऋतुत्रय यावत्। एवञ्च परवर्ति मासषट्कं दैवी रात्रिः। तस्या मध्यश्च हेमन्तर्तोरेकमासावसाने। यतो देवेष्वस्तमित आदित्योऽसुरेषु पितृषु वोदेति। स चोदयः कुमेराविति तत उदितस्य वामावर्तगत्या

क्षितिजत उपरिष्टाच्चतुर्विंशत्यंशपर्यन्तः समारोहो मासत्रयेण। तत्र तृतीय-मासान्ते तस्य तत्रोर्ध्वारोहस्यावधिश्चतुर्विंशांशस्थलरूपावधिप्राप्तिः। ततः स पुनरारोहक्रमेण मासत्रयेणावरोहन् भवेत्। एवं च शरदि उदितस्य तस्य शरदृतु-मासद्वयं हेमन्तस्यैको मासोऽतीतः स्यादिति। हेमन्तस्य मार्गशीर्षपौषरूपं मास-द्वयम्। तत्र मार्गशीर्षमासस्यान्ते मकर आदित्यस्य संक्रमणे मकरादिः कालस्तत आरम्भो देवयानस्य अर्थादुत्तरायणस्य प्रवृत्त्या स एको देवयानस्य प्रारम्भ इति। ततः आरभ्य स उत्तरस्यां गन्तुं प्रवर्तते।

उषःकालारम्भोऽपि देवयानारम्भकालस्तत आरभ्य देवयानं प्रवर्ततेऽत एव स उत्तरायणारम्भकालः। स द्वितीय उत्तरायणप्रारम्भः। तथाहि—तत्र सुमेरुकुमेर्वोर्यत्र षाण्मासिकं दिनं तावती रात्रिश्च तत्रास्तोत्तरं मासद्वयपर्यन्तं सायंकालिकं सान्ध्यं तेजो भवति। तत्र प्रथममासपर्यन्तं भास्वरं तेजस्ततः परवर्तिनि मासे च न्यूनभास्वरं तेजः, ततः परवर्तिमासद्वयं तमोमयम्, ततः परवर्तिनि मासद्वये च प्रातःकालिकसान्ध्यतेजोयुक्तता भवति। तत्र प्रथमो मास औषसः। द्वितीयो मासः सावित्रः। तत्र औषसो मासस्त्रिंशद्दिनपर्यन्त इति उषसस्त्रिंशद्योजनपर्यन्तं ऋतुः कार्यं तमोनिरासपूर्वं विश्वप्रकाशनं तासां भवति। तदयमर्थः 'सदृशीरद्य'ेति मन्त्रे प्रतिपादितः। तथाहि स मन्त्रः—

सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम।
अनवद्यास्त्रिंशतं योजनान्येकैका ऋतुं परियन्ति सद्यः। इति।

तत्र त्रिंशतं योजनानि त्रिंशद्दिनानि, अर्थाद्दिनानि तावन्ति एको मासस्तावत् पर्यन्तमुषसः सत्त्वम्। तत्र सुमेरुकुमेर्वोर्दिनरात्र्योः षाण्मासिकतोक्ता। तत्र तावत्पर्यविकले दिने वा रात्र्यां वा कथमृतुमासदिनव्यवहारः। सातत्येन दिनस्य वा रात्र्या वा प्रवृत्तौ तत्र कथमृतुमासादिनाम कालमानं स्यात्। कथञ्चोषसस्त्रिंश-द्दिनरूपकालमानेन वचनमिति चेत्, सत्यं, दिने वा रात्र्यां वा अवान्तरदिनादी-नामभावाद्दिनादिभिर्व्यवहारो न सम्भवति। अत एव पूर्वोक्तं शतपथब्राह्मणम् 'वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतव' इत्यादिकमनुपपद्यते। दिनादिव्यवहाराभावे मासव्यवहाराभावेन ऋतुव्यवहारासम्भवात्। तथापि तत्र सुमेर्वादौ सातत्येन प्रवर्तमाने दिने वा रात्र्यां वा अवान्तरकालपरिच्छेदकं किञ्चिदुपलभ्यते। तस्यैव मासर्तुसंस्कारवासितान्तःकरणैर्दिनादित्वेन व्यवहारं कृत्वा मासर्त्वादीनां तत्र व्यवहारः क्रियते। तथाहि पूर्वमुक्तं सुमेरौ कुमेरौ वा आदित्यस्य कुलालचक्रवद् गतिरिति। एतावान् परं विशेषो यत् सुमेरौ सा दक्षिणावर्ता कुमेरौ वामावर्तेति। कुलालचक्रं भ्रमद् वृत्ताकारेण भ्रमति, एवमत्रादित्यो

भ्रमन् वृत्ताकारं परिभ्रमति। सैषा आदित्यस्य दैनन्दिनी गतिस्तृतीया। पूर्वं गतिद्वयमुक्तम्,सा च तस्य दैनन्दिनी गतिस्तत्र कुलालचक्रवद्भ्रमो वृत्ताकारभ्रमणेन भवति। तत्र यो वृत्ताकारः परिभ्रमस्तस्य कियत्या कालकलया पूर्णता भवति। ततो द्वितीयो भ्रमस्ततस्तृतीय इत्यादिक्रमेणाविरतं भ्रमन्नादित्य ऊर्ध्वमारोहति अवरोहति सातत्येन चानस्तमितो दृश्यते। तस्यादर्शने च स परिभ्रमस्तत्र ग्रहनक्षत्रताराभिस्तत्र भ्रमद्भिः स भ्रमोऽनुभूयते। एवं सति स आदित्यस्य भ्रम इति कथमुक्तिरिति चेत् सत्यं, तत्रादित्यस्य भ्रमणमनुभूयमानं न वस्तुतस्तत्तस्य वास्तवं, किन्तु आरोपितम्। वास्तवं तु तद्भ्रमणं पृथिव्या एव। पृथिव्या एव स्वासमन्ताद्भ्रमन्त्या वशतस्तदारूढैः पृथिव्या गतिमनवबुध्य तामादित्य आरोप्यादित्य एव गतिमान् भवतीत्युच्यते तर्यारूढानां तीरगमनवत्। पृथिव्याः स्वासमन्ताद्भ्रमणेन दैनन्दिनगतिः आदित्यस्यासमन्ताद्भ्रमन्त्या एव परिभ्रमणेन वार्षिकी गतिस्तत्र स्वल्पपरिवर्तनवशत उत्तरायणादिगतिः। तथा सांपातिकगतिः पृथिव्या एव। आपातप्रतिपत्तिन्यायेनादित्ये तां गतिमारोप्य आदित्यस्य दैनन्दिनी दक्षिणोत्तरायणरूपा वार्षिकी सम्पातचलनवशतः सम्पद्यमाना सांपातिकी गतिरिति। तदेतदैतरेयब्राह्मण उच्यते—

"स वा एष न कदाचनास्तमेति नोदेति। तं यदस्तमेतीति मन्यन्तेऽह्न एव तदन्तमित्वाऽथात्मानं विपर्यस्यते रात्रीमेवावस्तात् कुरुतेऽहः परस्तात्। अथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव तदन्तमित्वाऽथात्मानं विपर्यस्यतेऽहरेवावस्तात्कुरुते रात्रिं परस्तात् स वा एष न कदाचन निम्रोचति" इति।

एवञ्च सर्वत्रादित्यस्य गतिवचनमापातप्रतिपत्तिन्यायेन वक्तव्यमिति।

एवञ्च सुमेरुकुमेर्वो रात्रिकाले ग्रहनक्षत्रतारादीनां भ्रमणेन गतिरनुभूयते। सापि कल्पितैव। तत्रादित्यस्य कुलालचक्रवद्भ्रमन्यायेनैकवृत्तपरिभ्रम एकः पर्याय इति पर्यायशब्देन वारशब्देन प्रदक्षिणाशब्देन वा सा गतिर्व्यवह्रियते तत्र। ये च सुमेरुकुमेर्वोः पर्याया एत एवाक्षपातस्थले विषुववृत्तादिषु दिनत्वेन व्यवह्रियन्ते। एवं सति दिनसंख्याग्रहणवशतस्तत्र मासादिव्यवहारः।

एवं चैषा सुमेर्वादिस्थोषास्त्रिंशत्पर्यायपर्यन्तं प्रकाशमाना भवति। एतदेव गृहीत्वा पर्यायाणां योजनशब्देन ग्रहणं कृत्वोक्तमन्त्रे त्रिंशतं योजनानीत्युक्तिः। एवञ्च तत्रत्य रात्रिकाले तमोमयमासद्वयादूर्ध्वं प्रथमो मास उषस इति भवति। यथा सुमेरौ षाण्मासिकरात्र्यभिप्रायेणोक्तमन्त्रे पर्यायाणां योजनशब्देन ग्रहणमेवं विषुववृत्ताद्यक्षपातदेशे दिनरात्र्योर्मानमविशेषेण षष्टिघटिकात्मकम्, तत्र दिनार्धानां त्रिंशद्घटिकानां परित्यागे त्रिंशद्घट्य एव रात्रिमानं

स्यात्। रात्रिमाने च घटीदशकमस्तोत्तरं तेजस्सम्बन्धि। तत्रास्ताव्यवहितोत्तरं घटीपञ्चकं भास्वरतेजोयुक्तं परवर्तिघटीपञ्चकं चाभास्वरतेजोयुतम्। ततः परवर्तिघटीदशकं तमोमयं, ततः परवर्तिघटीदशकं परदिनीयसान्ध्यतेजोयुतं, तत्र प्रथमं घटीपञ्चकमभास्वरतेजोयुतमौषसं, परवर्तिघटीपञ्चकं भास्वरतेजोयुतं सावित्रं, ततः परस्तादादित्यस्योदयः। एतदेवाभिप्रेत्य सायणभाष्ये भाष्यकारेणोक्तं 'स चोषः काल एकविंशतिघटिकाभिः षड्विंशतिपराभिश्च सम्मित' इति। रात्रिप्रारम्भत उक्तरीत्याऽस्तोत्तरवर्ति तेजस्सम्बन्धि घटीदशकं परवर्ति तमोमयं घटीदशकं मिलित्वा विंशतिघटिकास्वतीतासु परवर्त्येकविंशीं घटिकामारभ्य षड्विंशघटीपर्यन्तं घटीपञ्चकपरिमित उषसः कालः। स एव च भाष्यकारेणोक्तः। तं भाष्यकारीयमभिप्रायमविदित्वा व्यर्थ एव पाश्चात्येन मेक्समूलरमहोदयेनास्थाने एव कोलाहलः कृतः। तत्र भाष्यकृता त्रिंशद्योजनशब्दस्य व्याख्यानं कृतं तदपि योजनशब्दस्य क्रोशचतुष्टयात्मकं मानं गृहीत्वा न कृतम्। किन्तु सूर्यस्य प्रतिदिनं वृत्ताकारगतिमभिप्रेत्य, वृत्ते च षष्ट्यधिकत्रिशतभागानामंशशब्दितानां सत्त्वेन तैश्च दिनरात्र्योः षष्टिघटिकानामतिक्रमणेन तत्र दिनार्थानामशीत्यूर्ध्वशतांशानामूर्ध्वं रात्र्यर्थेषु तावदंशेषु पूर्वोक्तरीत्या विंशतिघटिकार्थेषु विंशत्यधिकशतांशेषु अतीतेषु रात्रिशेषार्थानां षष्ट्यंशानां मध्ये सावित्राणां त्रिंशदंशानां परित्यागे त्रिंशदंशा उषोऽर्था अवशिष्यन्ते। तेषामंशानां योजनशब्देन ग्रहणं कृत्वा मन्त्रे त्रिंशद्योजनानि कार्यं कुर्वती गच्छतीत्युक्तम्। उषसामुक्तविधत्रिंशत्सम्बन्धेन तैत्तिरीये उच्यमानं त्रिंशदुषस्तावकं सूक्तमुपपद्यते।

एवं भाष्याभिप्रायमज्ञात्वा योजनशब्देन क्रोशचतुष्टयं गृहीत्वा तदनुसारेण पृथिव्या विषुववृत्तीयक्षेत्रमानार्थानां नवीनरीत्या मानानां 'माइल्'संज्ञकानां किञ्चिन्न्यूनपञ्चविंशतिसहस्राणां षष्टिघटिकाभिरत्यये त्रिंशद्योजनार्थाना क्रोशानां विंशत्यधिकशतपरिमितानां माइल्-संज्ञकमानेन परिवर्तनं कृत्वा सार्धद्विशत माइल्-इत्यस्यातिक्रमे कियान् काल इति अनुपातप्रदर्शनद्वारा यो निर्णय उक्तः स तु सर्वथा भाष्याशयाविज्ञानमूल इति।

एवञ्चोषःकालमारभ्य देवयानस्योत्तरायणस्य वा प्रारम्भः। एतद्द्वितीयं देवयानम्। अत एवौषससूक्तेषूच्यते "स्वसा स्वस्रे ज्यायस्यै योनिमारैगि"ति। स्वसा रात्रिरूपा ज्यायस्यै स्वस्रे ज्येष्ठभगिनी उषास्तस्याः कृते योनिं स्थानम् आरैक् रेचितवती। रात्रिरपगता दिनं प्रवृत्तमिति तदर्थः। तत औषसकालतो दिनान्तरारम्भेण देवयानारम्भ इति व्यक्तम्। मन्त्रान्तरेणाप्ययमर्थ उच्यते

"आरैगु कृष्णा सदनान्यस्याः" इति। तत्र कृष्णा रात्रिरस्या उषसः सदनानि स्थानानि आरैक् रेचितवतीति। आश्विनसूक्तेऽश्विनौ प्रत्युच्यते "प्रातर्याविभिरागत"मिति। प्रातर्यावाणो देवाश्च ऐतरेयब्राह्मण उच्यन्ते। तथा च ब्राह्मणम् "इमे वै देवाः प्रातर्यावाणो यदग्निरुषा अश्विनावि"ति। तेनोषसः प्रातःसम्बन्धो व्यज्यते। प्रातर्दिनारम्भ इति प्रसिद्धम्। दिनारम्भे प्रवृत्ता उषास्तस्याः प्रथमप्रवृत्तत्वाज्ज्येष्ठत्वं पश्चात्प्रवर्तमाना रात्रिरिति तस्याः कनिष्ठत्वम्। एवमुषसो ज्येष्ठत्ववर्णनादप्युषस्सकाशतो दिनारम्भ इति व्यक्तम्। ऋतशब्दस्य दिनबोधकत्वादुषस 'ऋतावरी'ति ऋतवतीत्यर्थकं नामापि ततो दिनारम्भं बोधयतीति दिक्।

सावित्रकालमारभ्य दिनान्तरप्रवृत्त्या सुमेरुस्थले तद्गतस्योषःकालोत्तरस्य सावित्रकालस्य दिनान्तरप्रारम्भकतया ततः प्रवर्तमानं तृतीयं देवयानम्। तत्रादित्योदये दैवदिनप्रारम्भेणेदं चतुर्थं देवयानम्।

ते चेमे चत्वारो देवयानाः पन्थानो भवन्ति। देवयानानां चातुर्विध्ये तद्विरुद्धाः पितृयाणा अपि पन्थानश्चतुर्विधा भवन्ति। तदुक्तं "ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति। तेषामज्यानिमजीतिमावहात् तस्मै नो देवाः परिदत्तेह सर्वे" इति।

पितृयाणस्य देवयानभिन्नत्वाभिप्रायेण यमसूक्ते यमं प्रति उच्यते "यस्ते स्व इतरो देवयानाद्" इति। एवं च देवयानपितृयाणयोरेव दक्षिणोत्तरायणरूपत्वम्।

तत्र दक्षिणोत्तरा गच्छन्नादित्यो याम्योत्तरवृत्ते विषुववृत्तत उभयपार्श्वयोश्चतुर्विंशत्यंशपर्यन्तं गच्छति। उत्तरायणे प्रवृत्त आदित्यो विषुववृत्ततो याम्योत्तरवृत्तगतदक्षिणदिक्कचतुर्विंशत्यंशावसानस्थलत उत्तरां गन्तुं प्रवर्तते। क्रमेण च तद्वृत्तीयाँस्तावत्संख्याकानंशानतीत्य विषुववृत्तं प्राप्य तत उत्तरदिक्कचतुर्विंशत्यंशपर्यन्तं गच्छति। तावता स्थूलेन मानेनाष्टाचत्वारिंशदंशा उपयुक्ता भवन्ति। तावता मासषट्कञ्च वत्सरस्यातीतं स्यात्। वत्सरपूर्त्यर्थं तेषामेवांशानां विपरीतगत्याऽऽक्रमणं कर्तव्यं भवति। तावता वत्सरः पूर्णो भवति। एवं चैतेषामंशानां गमागमाभ्यामुपयोगेऽष्टाचत्वारिंशद्द्वैगुण्यं स्यात्। ततश्चोक्तांशानां संख्या षण्णवतिरूपा स्यात्। इदञ्च स्थूलमानेन। सूक्ष्ममाने तु विषुववृत्ततः प्रतिदिशं सार्धत्रयोविंशत्यंशानामेवोपयोगे तद्द्वैगुण्ये सप्तचत्वारिंशत्संख्या सकृदाक्रमणे स्यात्, द्विराक्रमणे तु उक्तसंख्याद्वैगुण्ये चतुर्णवतिरंशानां दक्षिणोत्तरायणे उपयोक्तव्याना संख्या भवति। तावतामंशानां दक्षिणोत्तराक्रमणेन

वत्सरः पूरितो भवति। एते दक्षिणोत्तरागमन उपयुक्ता अंशा वैष्णवे सूक्ते उच्यन्ते। तथाहि वैष्णवसूक्तीये मन्त्रे—

"चतुर्भिः साकं नवतिञ्च नामभिश्चक्रश्नवृत्तं व्यतीँरवीविपत्" इत्युच्यते।

अत्र चतुर्भिः साकं नवतिं नामभिः वृत्तचक्रवदनुकूलभावेन वेपनमुच्यते। तत्र व्यतीनिति द्वितीयान्तेन प्रतिकूलभावो वेपनीयेषु प्रतिपाद्यते। द्वितीयान्तेनात्र वेपनकर्म प्रतिपाद्यते। साधनं तत्रोच्यते नामभिरिति तृतीयया नामरूपम्। नामशब्देन गमनमुच्यते। एवञ्च गमनेन व्यतीनां वेपनं वृत्तचक्रदृष्टान्तेनानुकूलभावोऽपि वेपितव्यानां प्राप्तः। तेषां वेपनीयानां चतुर्भिः साकं नवतिमिति संख्या प्रोच्यते। एवं च चतुर्णवतेर्वृत्तचक्रवदनुकूलप्रतिकूलभावेन वेपनं विष्णुकर्तृकमत्र प्रतिपाद्यते। अनुकूलप्रतिकूलभावे तेषामेव येषामनुकूलप्रतिकूलभावो विवक्षितः द्विःसम्बन्धिता भवति। द्विःसम्बन्धने वेदे सधस्थशब्देन व्यवहारः। तस्य सधस्थस्य वैष्णवे सूक्ते उत्तरमिति विशेषणादिदमुत्तरदक्षिणसम्बन्धीति विज्ञायते। तदुच्यते तत्र "उत्तरं सधस्थ"मिति। एवं च दक्षिणोत्तरसम्बन्धि सहस्थानं तत्र गन्तव्यांशेषु भवतीति उक्तया संख्यया दक्षिणोत्तरायणयोरुपयोक्तव्यानामंशानामेषा संख्या बोधिता भवति। आदित्यस्य विष्णुरूपतोक्ता। एवं सत्यादित्येन दक्षिणोत्तरायणयोर्याम्योत्तरवृत्ते विषुववृत्ततः प्रतिपार्श्वं दक्षिणोत्तरा गन्तव्यानामंशानां सार्धत्रयोविंशतिरूपाणां पार्श्वद्वययोगे सम्पन्नानां सप्तचत्वारिंशदंशानां द्विरुपयोगेन सम्पद्यमाना चतुर्णवतिसंख्यास्याः प्रतिपादनं भवति।

यत्त्वत्र चतुर्भिः साकं नवतिमित्यत्र आदित्येन गन्तव्यवृत्ते साकल्येन सम्पद्यमानानामंशानां संख्या षष्ट्युत्तरत्रिशतरूपा नवतिचतुष्टयात्मिका चतुर्भिः साकं नवतिमित्यनेन बोध्यते इति वचनम्। तन्न सम्यक्। तथा सति नवतिपदस्य बहुवचनान्तता प्राप्नुयात्। किञ्च व्यतीनिति विपरीतभावबोधकस्य सम्यक्सम्बन्धो न स्यात्। एवं सधस्थग्रहणस्य तत्रोत्तरमिति विशेषणस्य सम्यक्त्वं न स्यात्। तस्मादनेन वचनेन दक्षिणोत्तरायणयोरुपयोक्तव्यानां याम्योत्तरवृत्तगतांशानामेव चतुर्णवतिरूपा संख्या प्रोच्यत इति। यद्यपि विष्णुसूक्ते उपरितनमन्त्रे चतुर्णवत्यंशा उच्यन्ते के चेमेंऽशा इति विचारे विष्णुना वेप्यमानत्वाद्विष्णुना त्रिभिर्गमनैर्दीर्घं सधस्थं विमीयत इत्युक्त्या विमेयसधस्थस्य चोत्तरं सधस्थमित्युत्तरशब्देन तत्रैव विशेषणादुत्तरं सधस्थं सहस्थानरूपमर्थाद्दक्षिणेनेति प्राप्त्या दक्षिणोत्तरसधस्थस्य त्रिभिर्गमनैर्विमानमिति भवति।

ते च दक्षिणोत्तरसम्बद्धविमेयभेदा अंशैर्विमीयन्त इति उक्तसंख्याका दक्षिणोत्तरायणसम्बन्धिनोंऽशा भवन्ति। ते च तत्र तावन्तः। यतो भूमध्यवृत्तं विषुवाख्यं ततो दक्षिणस्यामुत्तरस्यां च याम्योत्तरवृत्ते आदित्येन गन्तव्या अंशाः प्रतिपार्श्वं सार्धत्रयोविंशतिः। पूर्वं स्थूलेन मानेन चतुर्विंशतिरित्युक्तम्। तयोरुभयपार्श्वयोरंशानां मेलनेन सप्तचत्वारिंशत्संख्या भवति। तावद्भिरंशैस्तेनैकमेवायनं सम्वत्सरार्धरूपमुपयुक्तं स्यात्। अतोऽयनान्तरसंग्रहार्थं संवत्सरपूर्त्यर्थं तेषां विपरीतभावेन पुनरुपयोगेन सप्तचत्वारिंशत्संख्याया द्विगुणत्वेन मन्त्रोक्ता चतुर्णवतिसंख्या लभ्यते। तेषामंशानां गमनागमनयोरुपयोगेन सधस्थता अनुकूलप्रतिकूलभावश्चेति।

विष्णुश्च सूक्तेषु "इन्द्रस्य युज्यः सखे"त्युच्यते। युज्यो योगयुक्तः, सखेत्यनेन समानरूपत्वं बोध्यते। विष्णुश्चादित्य इन्द्रोऽपि आदित्यः। तत्रेन्द्रस्यात्रापि सम्बन्धग्रहणे विष्णुरिन्द्रस्य युज्यः सखेति भवति। तयोरिन्द्राविष्ण्वोः सुतपावत्वं रक्षकत्वं वृत्रविनाशकत्वं च सूक्ते प्रोच्यते।

एवं चेमेंऽशा इन्द्रसम्बन्धिनोऽपि भवन्तीति। एषामनावृत्तानां ग्रहणे संख्या सप्तचत्वारिंशद् भवति। प्रतिपार्श्वं सार्धत्रयोविंशतिरित्युक्तं प्राक्। तत्र पूर्णांशसंख्यामात्रग्रहणे त्रयोविंशतिः प्रतिपार्श्वमिति पार्श्वद्वयमेलनेन संख्या षट्चत्वारिंशद् भवति। सा चैषांशानां संख्या दक्षिणोत्तरगतिसम्बन्धिनाम् आदित्यस्येति।

यथा दक्षिणोत्तरा गतिरादित्यस्य दक्षिणोत्तरायणगतिरूपिणी, एवं पूर्वपश्चिमगतिरप्यादित्यस्य भवति। सा च सम्पातगतिरित्युच्यते। तस्या एवापरोक्षभावेन ज्यौतिषिकग्रन्थेषु अयनगतिरिति वर्णना। अयनगतिरित्यत्र नायनरूपा गतिः। किन्तु अयनस्य अयनस्थानस्य गतिश्चलनमिति यावत्। वृत्ते एकस्य बिन्दोः स्वस्थानतश्चलने वृत्तगताः सर्वे बिन्दवः स्वस्थानतश्चलिता भवन्ति इति सम्पातबिन्दुरपि स्वस्थानतश्चलितो भवति इति सम्पातगतिरपि तेनोक्तप्राया। सम्पातो नाम वत्सरमध्यकाले याम्योत्तरवृत्ते आदित्यगन्तव्यमार्गरूपक्रान्तिवृत्तस्य भुवो मध्यवृत्तरूपविषुववृत्तस्यैकत्र सम्प्राप्तिः। स च सम्पातः क्रान्तिवृत्ते यस्मिन् बिन्दौ एकस्मिन् वत्सरे जातो वत्सरान्तरे तदपेक्षया विभिन्नबिन्दौ भवति। स्वल्पा चैतस्य वात्सरिकी गतिर्बहुना कालेन दर्शनयोग्यदेशभेदवशतः प्रतीयते। तस्याश्च पूर्वपश्चिमभावेन प्रतीत्यैषा पूर्वपश्चिमगतिरादित्यस्य सम्पातगतिशब्देनोच्यते। तत्र क्रान्तिवृत्तस्य यो मध्यमो बिन्दुर्मेषादिर्मीनान्तबिन्दुस्थलीयो वत्सरमध्ये याम्योत्तरवृत्ते विषुव-

वृत्तेन सम्पतितः सोऽवधिबिन्दुस्ततः पूर्वस्यां पश्चिमायां वा चलत्वम्। तच्च चलनं न सर्ववृत्तव्यापि किन्तु प्रतिपार्श्वं कियदंशपर्यन्तम्। ते चांशास्तत्रावधिबिन्दुतः पूर्वपश्चिमयोः प्रतिपार्श्वं सप्तविंशतिर्भवन्ति स्थूलमानेन।

सा च पातांशसंख्या ओषधिसूक्ततोऽभिव्यक्ता भवति। तथाहि ओषधसूक्ते मन्त्रः—

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामहं शतं धामानि सप्त च॥ इति।

एतन्मन्त्रस्य निरुक्तकारेणोल्लेखपूर्वं संक्षिप्तं व्याख्यानमुक्तम्। 'या ओषधयः पूर्वा जाता देवेभ्यस्त्रीणि युगानि पुरा, मन्ये नु बभ्रूणां बभ्रुवर्णानां हरणानां भरणानामिति वा शतं धामानि सप्त च। धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति। जन्मान्यत्राभिप्रेतानि। सप्तशतं पुरुषस्य मर्मणां तेष्वेना आदधतीति वेति'।

अत्रार्थस्यास्पष्टत्वम्। पूर्वाशब्दस्य दिग्बोधकत्वं कालबोधकत्वं वेति सन्दिग्धम्। त्रीणि युगानि पुरेत्यस्यार्थो न विस्पष्टः। पूर्वं युगत्रयं जाता इति वर्णने मन्त्रस्य चतुर्थयुगसम्बन्धिता प्राप्नोति। देवेभ्य इत्यस्य विशेषेणोल्लेखस्य प्रयोजनं न स्पष्टम्। बभ्रुशब्दस्य नानार्थत्वसंपादनेन न कोऽपि गुणः। प्रकृते तावता निर्णयाभावः। शतं धामानि सप्त चेत्यंशस्यार्थोऽत्यन्तमविस्पष्टः। धामशब्दस्यात्र जन्मार्थकत्वेन तावन्ति जन्मान्योषधीनामित्यनेन किमभिप्रेयते, किं तावत्य एवौषधयः, उत तावतीरेवाहं जाने इति। को गुण एतावतीनामेवौषधीनां सत्त्वे विज्ञाने वा। शतं सप्तेति पदयोर्गुणनेन सम्बन्धे सप्तशतीत्यर्थं उत सप्ताधिकं शतमिति संकलनमात्रमिति वा। सप्तशतं पुरुषस्य मर्मणामित्युल्लेखेन प्रथमकल्पप्रतीतिस्तदानीं समुच्चयार्थकचकारस्योपादानं व्यर्थं स्यादिति।

निरुक्तव्याख्याकर्त्रा दुर्गादासेन तु पूर्वा इत्यस्य प्रथमा इत्यर्थकरणेन कालिकतास्य शब्दस्य मन्यत इव। त्रियुगं पुरेति पदयोस्त्रियुगेभ्यः पूर्वमादिकल्पे इति वर्णने त्रियुगमित्यत्र विभक्ति-विपरिणामोऽपि मन्तव्यः।। तावता देवेभ्य इत्यस्य पुनः सम्यक् प्रयोजनाभावः। मन्त्रस्य चतुर्थयुगसम्बन्धिताप्राप्तिदोषस्तदवस्थ एव। देवेभ्योऽपि पुरेति वर्णनेन देवानामपि जन्मस्वीकारेणामरता तेषां न स्यात्। शतं सप्त चेत्यस्य सप्ताधिकं शतमित्यर्थमुक्त्वा तावतीरहं जाने इत्यर्थेन तावतीनामोषधीनां विज्ञाने तदुल्लेखे च प्रयोजनाविज्ञानम्। एवं सति व्याख्यानद्वयेनापि मन्त्रस्यार्थो न विस्पष्टः। इयमेव रीतिः स्वल्पविभेदेन सायणभाष्यस्य। एवं च सरलार्थपदयुतस्यैतस्य मन्त्रस्य न स्पष्टार्थता।

अथात्रैवं व्याख्यानं चेत्—यदत्रौषधिशब्देन न लोकप्रसिद्धा ओषधयो गृह्यन्ते किन्तु ओषो दाहात्मकं तेजस्तद्धीयते आधीयते यत्रेति व्युत्पत्त्या सौरतेजःप्रकाश्यानि नक्षत्राण्यभिप्रेयन्ते। अत एव ब्राह्मणे "देवा वा ओषधीषु पक्वास्वाजिमयुः" "देवा वै नक्षत्रेष्वाजिमयु"रिति वर्णनस्य समानरूपता भवति। एवं पूर्वाशब्दो नात्र कालवाचकः किन्तु दिग्वाचकः। तथा सति पूर्वाः पूर्वदिक्का इत्यर्थः। त्रियुगं शब्दोऽपि न त्रयाणां युगानां समाहारबोधकः। तथा सति त्रियुगीत्यपि प्राप्नुयात्। किन्तु युगशब्दस्य द्वित्वसङ्ख्याबोधकत्वेन त्रयो युगं द्वयं चेति सङ्ख्ययोः सङ्कलनार्थकः। एवं सति मन्त्रपूर्वार्धस्यैवमर्थो भवति या ओषधयो यानि नक्षत्राणि तत्संख्या त्रियुगशब्देनोच्यते त्रीणि युगं द्वयं च। पञ्चेत्यर्थः। अर्थाद्यानि पञ्च नक्षत्राणि पुरा पूर्वस्मिन् काले देवेभ्यः देवानां कृते अर्थाद्द्युलोके पूर्वा पूर्वाणि पूर्वदिक्कानि अर्थादादित्योदयस्थानि सञ्जातानि।

अयं भावः—देवानां निवासः सुमेरुस्तत्रादित्योदयस्थानं पूर्वरीत्या वामन्तिकसंपातस्थानं तत्स्थत्व नक्षत्राणा पञ्चानां पूर्वमासीत् इत्युक्त्या स सम्पातो नक्षत्रपञ्चकसम्बद्ध इति भवति। तत्र नक्षत्रपञ्चकग्रहणेन संपातस्य न सर्वनक्षत्रपरिभ्रमः किन्तु नक्षत्रपञ्चक एवावस्थितिरिति संपातस्यासर्ववृत्तपरिभ्रम इति भवति। अन्यथा पूर्ववर्तिनां सर्वेषां नक्षत्राणां संपातसम्बन्धित्वे नक्षत्रपञ्चकग्रहणस्यासम्बद्धता प्राप्नुयात्। किञ्च स्थलान्तरे पठ्यमानमन्त्रानुसारेणैतन्मन्त्रस्य सांपातिककृत्तिकानक्षत्रकालिकतयान्ततः पूर्ववर्तिनक्षत्रपञ्चकस्य सांपातिकत्वेनात्र ग्रहणं प्राप्नुयात्। कृत्तिकापूर्ववर्तीनि सापातिकानि नक्षत्राणि रोहिणीमृगशिरआर्द्रापुनर्वसुपुष्यरूपाणि गृहीतानि भवेयुः। तेषां सांपातिकत्वेन ग्रहणे यजुर्वेदीयनक्षत्रियप्रजापतिवर्णनविरोधः स्यात्। स चोपरिष्टात्प्रतिपादयिष्यते। किञ्चैतेषां नक्षत्राणां ग्रहणे एतन्मन्त्रोत्तरार्धोक्तसङ्ख्यावचनविरोधः स्यात्। न हि रोहिणीतः पुष्यनक्षत्रपर्यन्तमन्तरं सप्तशती अंशानां भवेत् अथवा सप्तोत्तरशतांशपरिमितमन्तरं भवति। यद्यप्यत्र नक्षत्रपञ्चकमेवोच्यते मन्त्रे न विशिष्टं किञ्चन नक्षत्रपञ्चकं, विशेषानुक्तेस्तथापि येषां पञ्चानां नक्षत्राणामन्तरं गमागमाभ्यां मन्त्रोत्तरार्धोक्तांशसंख्यासमं स्यात् तादृशं नक्षत्रपञ्चकमेवात्र विवक्षणीयम्। तादृशं नक्षत्रपञ्चकं हस्तनक्षत्रमारभ्य चित्रास्वातीविशाखाऽनुराधारूपनक्षत्रपञ्चकेऽनुराधापर्यन्तमन्तरं चतुष्पञ्चाशदंशा इति ज्यौतिषिके प्रतिपादनेन तस्य द्वैगुण्येऽत्र मन्त्रोत्तरार्धोक्ता सङ्ख्या सप्तोत्तरशतरूपिणी समा भवतीति तन्नक्षत्रपञ्चकस्यात्र ग्रहणप्रसक्तिः। तस्य देवतासम्बन्धित्वेनोक्तनक्षत्रपञ्चकस्य

ग्रहण इमानि वसन्तसाम्पातिकानि नक्षत्राणि प्राप्नुयुस्तथा सात इदानीन्तन-वसन्तसम्पातसम्बन्धिनक्षत्रापेक्षया तेषां नक्षत्राणां वसन्तसंपातनक्षत्रत्वेन प्राप्त्यै बहुपूर्वः कालो वक्तव्यः स्यात्। किञ्चैतेषां नक्षत्राणां वसन्तसंपातस्थाने प्राप्त्यै इदानींतनवसन्तसंपातनक्षत्रानुसारेण तेषां वसन्तसंपातस्थत्वप्राप्तिपर्यन्तं मध्य-वर्तीनि यानि तादृशानि नक्षत्राणि तेष्वपि उक्तसंपातसिद्धया संपातस्य सर्व-वृत्तभ्रमप्राप्तिः स्यात्तथा सति उक्तनक्षत्रपञ्चके नक्षत्रियप्रजापतिवर्णनस्या-युक्तत्वं स्यात्। को विशेष एतेषामेव पञ्चानां नक्षत्राणां नक्षत्रियप्रजापतित्व-वर्णने। अथ मन्त्रोक्तसङ्ख्यासाम्यसम्पादकत्वमेवैषां नक्षत्रियप्रजापतित्वकल्पने विशेष इति। तदपि न सम्यक्। तथा सति एतत्सङ्ख्यावर्णनस्य निष्प्रयो-जनत्वं स्यात्। एतन्नक्षत्रपञ्चकगतसङ्ख्याग्रहणे विज्ञाने वा न किञ्चन फल-मस्ति। तस्मादत्रोक्तनक्षत्रपञ्चकं न वसन्तसंपातनक्षत्रत्वेन ग्रहीतुं शक्यम्। तथा सति अत्र मन्त्रोत्तरार्धगतसंख्याया ग्रहणार्थमुक्तनक्षत्रपञ्चकस्य सांपाति-कत्वं वक्तव्यं तच्च वसन्तसंपातसम्बन्धि न भवतीति कृत्वा तस्य शारद-संपातस्थता वक्तव्या। तथा सति शारदसंपातस्योक्तरीत्या नक्षत्रपञ्चकावस्थाने वसन्तसंपातस्यापि तत्सारूप्येण नक्षत्रपञ्चकगतत्वं वक्तव्यं तानि चोक्तशारदीय-सम्पातनक्षत्रपञ्चकानुसारेण रेवतीमारभ्य अश्विनीभरणीकृत्तिकारोहिणीरूप-नक्षत्रपञ्चकमेवात्र वसन्तसंपातसम्बन्धित्वेन ग्रहीतव्यं, तथा सति तस्येदानीमपि सत्त्वेनोक्तरीत्या शारदसंपातन्यायेन मन्त्रोत्तरार्धगतसंख्यासम्बन्धित्वेन ग्रहण-मुचितम्। तथा सति नक्षत्रियप्रजापतित्वकल्पनानुसारेण नक्षत्रपञ्चक एव संपातभ्रम आन्दोलनन्यायेनेति संपातस्यासर्ववृत्तभ्रमो नक्षत्रियप्रजापतिवचनेन अत्र मन्त्रे उत्तरार्धे विशिष्टसंख्यावचनेन च सिध्यति।

एवं चात्र मन्त्रे उत्तरार्धे सप्ताधिकं शतमित्येव सप्त च शतमित्यस्यार्थ-त्वेन वक्तव्यं न तु सप्तशती निरुक्तकाराद्यभिमता। चशब्दग्रहणमप्यत्रोक्तार्थ-सूचकम्। उत्तरार्धस्य मन्त्रगतस्यायमर्थो यदुक्तनक्षत्रपञ्चकस्य शतं सप्त सप्ता-धिकं शतं धामानि अंशरूपाणि धामानि स्थानानि सौरतेजोयोगाद् बभ्रुवर्णानि अरुणवर्णानीति यावत्। मनै स्तुवे मानयामि वेति। तेषामंशानां रात्रिविनाशोत्तरं प्रवृत्त्या आदित्योदयेन सर्वेष्टप्रदातृत्वमिति प्रशंसितत्वम्। उक्तसंख्याकांश-योगितया रेवतीप्रभृतिरोहिणीपर्यन्तस्य वसन्तसांपातिकनक्षत्रपञ्चकस्यात्राभि-प्रेतत्वमिति।

तेषां रेवतीप्रभृतीनां रोहिणीपर्यन्तानां तावत्संख्याकांशयोगस्तैत्तिरीय-ब्राह्मणवशतो विज्ञायते। तथाहि तत्र ब्राह्मणे नक्षत्रियप्रजापतेर्वर्णनमुच्यत एवम्।

"हस्त एवास्य हस्तश्चित्रा शिरः, स्वाती हृदयम्, ऊरू विशाखे अनुराधा प्रतिष्ठा। एष वै नक्षत्रियः प्रजापतिः। यो वै नक्षत्रियं प्रजापति वेद। उभयोरेनं लोकयोर्विदुः" इति।

अत्र कुत एषां नक्षत्राणां प्रजापतिरूपता किमिति नान्येषामिति विचारे प्रकारान्तराभावात्संपातसम्बन्धितैव तेषां प्रजापतिरूपत्वे हेतुः। तच्च संपातसम्बन्धित्वमेषामेव यदि भवेत्तदैषां वैशिष्टयम्। यदि संपातो नक्षत्रान्तरसम्बन्ध्यपि भवेत्तर्हि उक्तनक्षत्रपञ्चके प्रजापतिरूपत्ववर्णनं निर्हेतुकं स्यात्। एतन्मात्रसम्बन्धित्वे तु एतान्येव नक्षत्राण्युक्तसंपातस्थानि तद्वशतयाऽदित्यस्थितिप्रज्ञापकानि तद्वारा संवत्सरज्ञापकानीति कृत्वा प्रजापतिरूपाणीति। संवत्सरस्य प्रजापतिरूपत्वं ब्राह्मणेषु संवत्सरो वै प्रजापतिरित्यादिना स्पष्टमुच्यते।

शारदसंपाततो वासन्तिकसंपातस्याशीतिशतांशविप्रकृष्टत्वेन हस्तादौ शारदसम्पातत्वे ततस्तावदंशविप्रकृष्टनक्षत्रपञ्चक एव वासन्तिकः संपातः। तत्र पञ्चैव नक्षत्राणि भवेयुरिति तद्बोधनाभिप्रायेण त्रियुगमिति निर्देशः। सर्वथा अत्र वासन्तिकानां पञ्चनक्षत्राणां सम्बन्धिनः सप्तोत्तरशतमंशाः स्तूयन्ते। एवं सम्पातस्थनक्षत्रपञ्चकस्य सम्बन्धो गमागमाभ्यां द्विःसम्बन्धेनेति। द्विःसम्बन्धाभावे सकृत्सम्बन्धे तत्रांशाः सार्घत्रिपञ्चाशत्। त इमे सम्पातसम्बन्धिनः पूर्वापरदिक्सम्बन्धिनः। तत्रापूर्णांशपरित्यागेन पूर्णांशमात्रग्रहणेऽपि पञ्चाशत्संख्या भवति, एवं सति साम्पातिकास्त्रिपञ्चाशत् दक्षिणोत्तरायणीयाश्च षट्चत्वारिंशन्मिलित्वा ४६+५३=९९ नवनवतिः सम्पद्यते। एतेषु स्थलेषु आदित्येन तद्रुपेणेन्द्रेण स्वयं गम्यत इति तत्रत्यस्यादित्ययोगाभावे विद्यमानस्यान्धकाररूपस्य वृत्रस्य विनाश इन्द्रेण। इन्द्रभिन्नेन दुर्लङ्घ्यत्वाद्दुर्गत्वमवस्थानात् पुरत्वमित्यादिकं तत्र कल्पितम्। तानि तावत्सङ्ख्याकानि पुराणि दुर्गाणि वेति विशेष्यविशेषेऽनादरात् केवलं नवतिं नवेत्युक्तं मन्त्रे। दक्षिणोत्तरायणीयेष्वंशेषु विष्णोः सम्बन्धात्तस्येन्द्रं प्रति युज्यत्ववचनम्।

एवं चेन्द्रसूक्ते नवनवतिवर्णनवशत उत्तरायणाद्यभिप्रायेण विष्णोः सूक्ते चतुर्भिरित्यादिसङ्ख्या, ओषधिसूक्तगता च सङ्ख्योपपद्यत इति सिध्यति। एवं सति ऋग्वेदीयमन्त्रे नवतीरिति विपरिणामेन नवतिमित्यर्थकं, वेदान्तरानुरोधात्। एवमादित्यपरत्वे उभयो "जंघान नवतिं नव" "या ओषधी" रित्यनयोर्विस्पष्टार्थता।

सम्पातसम्बन्धिनोंऽशाः स्थूलमानेन चतुष्पञ्चाशत् अयमंशो लौकिक-धार्मिकव्यहारतोऽपि स्पष्टः। तथाहि धार्मिककृत्येषु जपस्थले साधनत्वेन मालोपयुज्यते, सा च जप्यसङ्ख्यागणनोपयोगिनी, जप्यसंख्या तु तत्तत्स्थले शतधातरूपिणी। शतं द्विशतं सहस्रं लक्षमयुतं प्रयुतमिति परार्धान्ता। तस्याः संख्यायाः सङ्ख्यानार्थमुपयुज्यमाना मालाऽपि तत्संख्याने यथा सौकर्यं स्यात्तादृशी उपयोक्तव्या। परन्त्वत्र तद्वैषम्यम्। शतधातरूपिणी सङ्ख्या सङ्ख्यातव्या, माला तु अष्टोत्तरशतमणिभिः प्रोता। कथमनया मालया सङ्ख्याने सौकर्यं भवेत्। एकशतसंख्याके जपे मालायाः सकृदुपयोगे जपसंख्याऽष्टाधिकशतरूपा संपद्यत इति वैषम्यम्। एवमेव परसंख्यास्थले।

अथ यदि जपसङ्ख्यास्थले जपदशांशेन तर्पणम्, तद्दशांशेन ब्राह्मण-भोजनमिति साङ्गत्वार्थं शतापेक्षयाऽऽधिक्येन तर्पणाद्यर्थत्वेन सङ्ख्यानाभि-प्रायेण तदुपपत्तिरित्युच्येत, तदानीं मणीनां सङ्ख्या न्यूना भवेत्। शतदशांशत्वं दशसु दशदशांशत्वं सर्वन्यूने एकस्मिन्निति तर्पणार्था दशमणयो ब्राह्मण-भोजनार्थश्चैको मणिरिति मालायां मणीनां संख्या एकादशाधिकोत्तरशतसंख्याऽपेक्षणीया। तावता द्विशतादिसङ्ख्याने पुनर्वैषम्यस्य दुर्वारत्वम्। मालाया मणिसंख्याविषये स्मृतावुच्यमानविकल्पा अपि वैषम्यस्य दुर्वारत्वेन नोपपद्यन्ते। यथा प्रजापतिस्मृतौ मालामणिविषये उच्यते—

> अष्टोत्तरशतं कुर्याच्चतुःपञ्चाशदेव तु।
> सप्तविंशतिकं वापि ततो नैवाधिका वरा।। इति।

एतत् कथमपि नोपपद्यते।

स्मृतीनां श्रुतिमूलत्वे तन्मुलश्रुतेरुक्तस्मृतेर्वादित्यपरत्वेनोपपादने सम्य-गुपपत्तिः। यथा पूर्वोक्ता आदित्यस्य सम्पातगतिस्तस्याः पूर्वपश्चिमभावेन प्रवृत्त्या तदुपयोगिनोंऽशाश्चतुष्पञ्चाशदिति पूर्वं निर्णीतम्। तावतां ग्रहणेन सम्पातमालायाः पूर्णत्वमिति तत्पूर्णत्वाय तावतामंशानां द्विरुपयोगो गमा-गमाभ्यामादित्यस्य सम्पातगतौ सांऽशसङ्ख्या द्विरुपयुज्यमानाऽष्टोत्तरशत-रूपत्वेन सम्पद्यते। अयं च सम्पातस्थलीयादित्यबिम्बानुकारेण मणिभि-र्दण्डनिपातन्यायेन सम्पातमालानुकारेणाभिव्यज्यते प्रकारः, बिम्बं ह्यादित्य-स्यैकांशव्यासमापातदर्शनात्। तस्य बिम्बस्य सम्पातस्थानेषु दण्डनिपातन्या-येनावर्तने चतुष्पञ्चाशत्संख्या चतुष्पञ्चाशद्वारमावर्तनेन, द्विस्तथाऽऽवर्तने-ऽष्टोत्तरशतसंख्या निष्पद्यते। बिम्बानुकारो मणिभिर्मालायां, तेषां परस्पर-

भावेन प्रवयणेन बिम्बेन माने यो दण्डनिपातन्यायः सोऽनुक्रियते। तत्र केवलं गमनानुकारस्तदा तदनुकूला चतुष्पञ्चाशद्रूपा मणीनां संख्या मालायां स्यात्। गमनेऽपि मूलावधिमनुसृत्यैकपार्श्वगमनमात्रानुकारस्तदा सप्तविंशतिः सङ्ख्या मणीनां स्यात्।

एवं चैकपार्श्वगमनानुकारे सप्तविंशतिः, पार्श्वद्वयस्य सकृद् गमनानुकारे चतुष्पञ्चाशत्, पार्श्वद्वयस्य गमागमानुसारेण द्विरुपयोगे द्विर्गमनानुकारेऽष्टोत्तरशतमिति मालामणीनां सङ्ख्या स्यान्न प्रकारान्तरेणेति तदभिप्रेत्योक्तस्मृतौ त्रिविधैव मणीनां संख्या मालायामित्युक्तं सङ्गच्छते। हित्वेमं प्रकारं मालामणिसङ्ख्योपपादनमशक्यमेव। एवञ्च स्मृतावुच्यमाना धार्मिककृत्येषूपयुज्यमाना माला तन्मणीनां सङ्ख्या सम्पातस्य तावदंशकत्वमसर्ववृत्तभ्रमं च साधयतीति।

एवं रङ्गवल्यादिलेखने धार्मिकचिह्नविशेषविलेखनमपीदमपि सम्पातस्यासर्वगतिमादित्यसम्बन्धितामभिव्यनक्ति। तथाहि तच्चिह्नं स्वस्तिकनामकं तस्य देशभेदेन भेदोऽपि उक्तरीत्यैव सुसङ्गतो भवति। तथाहि तस्य विलेखः परस्परपरिच्छिन्नरेखाद्वयात्मकः। स च परिच्छेदो मध्यसम्पर्केण भवति ✚ एवम्। अत्र प्रतिदिशं प्रतिलेखान्तं मर्यादारेखापि विलिख्यते 卐 एवम्। तत्रोर्ध्वाधोरेखया दक्षिणोत्तरायणगत्यर्थस्थानानुकार आदित्यस्य प्रत्यन्तं मर्यादारेखाविलेखनेन, तत्र स्वल्पभागपर्यन्ततैव तस्या गतेर्भवति गमागमाभ्यां तत्रावृत्तिरिति द्योत्यते। मर्यादारेखालेखोऽपि गतिस्थानानुकाररेखाया अन्ते न समानरूपो विलिख्यते, किन्तु एकस्मिन् रेखान्तस्थाने तद्रेखाया एकपार्श्वसम्बन्धेनैव। परस्मिन् प्रान्ते च पूर्वपार्श्वविरुद्धदिक्सम्बन्धेन विलिख्यते ⌠ एवम्। तत्रोक्तविधमर्यादारेखाद्वयस्य विशेषरूपेण विलेखनेन तत्र गमागमौ प्रत्याय्येते। एवं वामपार्श्वतः समारभ्य पूर्वोक्तरेखां मध्यतश्छित्वा दक्षिणपार्श्वे कियद्दूरं काचन रेखा विलिख्यते पूर्वरेखापेक्षया स्वल्पमानाधिक्यवती 卐 एवम्। अत्रापि पूर्वरेखावदेव प्रतिपार्श्वं रेखान्ते मर्यादारेखाद्वयं विलिख्यते 卐 एवम्। सा च रेखा सम्पातगतिस्थानानुकारिणी आदित्यस्य। सापि गतिर्न सर्ववृत्तव्यापिनीति बोधयितुं तत्र मर्यादारेखालेखः। प्रतिपार्श्वं भिन्नपार्श्वसम्बन्धितल्लेखो गमागमाभ्यां तदुपयोगं ध्वनयति। अत्र लेखे सर्वसाधारणलेखता उल्लिखितरूपा। कैश्चन तत्र सर्वं विलिख्य प्रतिपार्श्वं सर्वरेखान्ते स्वल्पोऽर्धवृत्ताकारो विलिख्यते 卐 एवम्, तेन तत्र आदित्यसम्बन्धः स्पष्टं प्रतिपाद्यते। तत्राप्यन्ते आदित्यार्धबिम्बपर्यन्तत्वं तदर्धवृत्तलेखनेनाभिव्यज्यते। विदेशीयैरपीदं चिह्नं विलिख्यते

स्वल्पविभेदम्, विभेदश्च मर्यादारेखालेखाभावमात्रेण+, स च तैः 'क्रास' शब्देन व्यवह्रियते, तत्राप्येष एवाभिप्रायः।

यत्तु तत्र मर्यादारेखालेखाभावो गतेर्मर्यादाऽभावं द्योतयन् सम्पातस्य सर्ववृत्तपरिभ्रमं सूचयतीति, तदसत्। ऊर्ध्वाधोवर्तिन्या दक्षिणोत्तरायणानुकारिण्याः स्थलेऽपि मर्यादाऽभावं प्राप्नुयात्तथा सति। एवञ्चात्र मर्यादारेखालेखाभावमात्रमेव न तु तेन सर्ववृत्तपरिभ्रमादिसूचनम्।

आदित्यस्योक्तस्थानेषु परपरवर्तितया गत्या दण्डनिपातन्यायेन तत्र सम्बन्धेन तदनुकारो विदेशीयेषु उक्तविधरेखालेखमूलभूते तत्र सर्वत्र कीलनकल्पना। आदित्यस्य सर्वत्र दण्डनिपातन्यायेन सम्बन्धे सर्वत्र परपरवर्तिसर्वबिम्बवैशिष्टयेन ००8०० निरन्तरप्रोतकीलाकारता भवति। आदित्ये च कीलाकारता तत्र तत्र 'शंकवोऽर्पिताःषष्टि'रित्यादिना वेदे प्रोच्यत इति। सर्वथाऽस्य चिह्नस्यादित्यगतिप्रतिरूपकत्वमेवेति।

एतावतेन्द्रस्यादित्याभिन्नता, तत्त्वे तन्निहन्तव्या असुरा अपि तेजोनिवर्त्यान्धकाररूपतमोरूपिणस्तदीयपुरादीनां त्सङ्ख्या आदित्यस्य दक्षिणोत्तरा पूर्वपश्चिमा च गतिः परिच्छिन्ना, परिच्छेदेऽपि सङ्ख्यानियमनं, सङ्ख्या च विशिष्टैवाभिमतेत्यादयो विशेषाञ्च ऊर्ध्वोक्तरीत्या सिध्यन्तीति।

इन्द्रो हि उदयन्नादित्यस्तत्सम्बन्धितया च सूक्तेषु ब्राह्मणेषु च नानाविधाः कल्पना वेदे। तत्र सामान्यत इन्द्रसम्बन्धिनी द्विविधैव वर्णना तदीयकृतित्वेनोच्यते सोमपानं बलकृतिश्चेति। तत्र सोमपानविषय उच्यते इन्द्रः सोमं पीत्वा तज्जनितेन हर्षेण वृत्रहननादिकं करोति। तदुक्तं निविदध्याये "अस्य मदे जरितरिन्द्रो वृत्रमहन्" इत्यादिना तस्य नानाविधानि कर्माणि तत्रोक्तानि। किञ्च सूक्तेष्वपि "इन्द्रस्य नु वीर्याणि प्रवोचम्" इत्यादिना द्विविधानि कर्माणि प्रोच्यन्ते। लवसूक्ते लवरूप इन्द्रः सोमपाने तज्जनिते हर्षे स्वस्यावस्थाविशेषं वर्णयति "इति वा इति मे मनो गामश्वं सनुयामिति। कुवित्सोमस्यापामि"त्यादिना। तदिदं सर्वं कथमुपपद्यते यदीन्द्र आदित्यस्तर्हि कथं सोमस्य पानं तेन, कथं तस्य मदः, कथं तेन वृत्रवधादिकं क्रियते। सोमश्च वल्लीरूपः, न हि वल्या रसस्य वा पानमादित्येन क्रियत इति। वृत्रादिवधादिवर्णनानामप्यनुपपत्तिः। तस्मादत्र सोमपानादीनां रूपानि भिन्नानि वक्तव्यानि।

तत्र वृषाकपिसूक्त उच्यते "विहिसोतो रसृक्षत नेन्द्रं देवममंसते"ति। आदित्यस्यास्तमयकालीनैषा वर्णना। तत्रोच्यते आदित्यरूपे इन्द्रेऽस्तमिते देवाः किरणाः पूर्वमर्थादस्तमयात् तद्वशवर्तिनस्तदीयादेशपालनकर्तारः पूर्वं तेषां निय-

मितं कार्यं सवनं विश्वप्रकाशनरूपं व्यसृक्षत परित्यक्तवन्तः। इन्द्रनियमा-परिपालनेनेन्द्रं देवं नियन्तारं नामंसतेति। अयं भावः—अस्तमयात् पूर्वमादित्येन देवानां जगत्प्रकाशनरूपं कार्यं तद्रूपञ्च सवनं कर्तव्यतया नियमितमासीत्। अस्तमिते चादित्ये देवैस्तद्विसृष्टम्। पूर्वं देवानां किरणानां भुवं प्रति प्राप्त्या तदीयपदार्थप्रकाशनं तैः क्रियते। अस्तमिते चादित्ये तदीयकिरणानां भुवा सम्पर्कराहित्येनोर्ध्वगामिता सञ्जाता। तत्रोच्यते देवैर्ज्ञात्वैव भूसम्बन्धिपदार्थ-प्रकाशनरूपं सवनं तैः परित्यक्तमिति। तावता विज्ञायते सवनं प्रकाशनमिति। एवञ्च सोमः प्रकाशस्तदात्मकं तेज इति यावत्। तस्यैव तेजोरूपस्य सोमस्येन्द्रेण पानं क्रियते। पानमत्र स्वीकारः। अयंभावः—आदित्योऽस्तं यन्नग्नौ स्वीयं तेजो निदधाति तावता स रात्रौ तेजोरहितो भवतीति कल्पना। अत एव स रात्रौ कृष्णवर्णात्मा न प्रकाशते। वस्तुत एकत्र देशेऽस्तमितस्तद्विरुद्धदेशे तस्य सत्त्वे प्रकाशमानत्वेऽपि पूर्वदेशानुसारेणासौ तेजोरहितः कृष्णवर्णः सञ्जात इति कल्पना। यश्च विरुद्धदेशे प्रकाशमानः स तु भिन्न एव पूर्वस्मादिति देशभेदात्तस्य भेदकल्पना। एवञ्च तेन भिन्नेनादित्येन यत्रासावुदितस्तत्र प्रकाशनं क्रियते तदानीमेव यत्र देशेऽसावस्तमितस्तद्देशस्थानां तारकादीनामपि प्रकाशनं क्रियते। एवञ्च तद्रात्रौ दीयमानं तेजः सवनं तत्रत्यस्य प्रकाशन सर्वा रात्रिं यावद्भवति। तस्य रात्रौ दीयमानस्य प्रकाशस्य सर्वा रात्रिं यावत् सञ्चितस्य उदये आदित्येन पानं क्रियते तस्य स्वीकारः क्रियते। आदित्ये तद्रात्रिकालिकं तेजो विलीनं भवति। अयं विलय एव तेन सोमस्योक्तरीत्या तेजसः पानमिति। उदये प्रकाशेऽन्धकारस्य तद्रूपतमसो नाशो वृत्रस्य नाश इन्द्रकृतः रूपकेण वर्णना। तदेतन्मत्रे प्रोच्यते। स चायं मन्त्रः—'एकया प्रतिघापिबत्साक सरासि त्रिंशतम्। इन्द्रः सोमस्य काणुका'॥

अयं मन्त्रो निरुक्तकारेण अनवबुद्धार्थस्य काणुकाशब्दस्यार्थनिर्णयायोप-क्षिप्तो व्याख्यातश्च। तदीयं व्याख्यानमेवम्—

'एकेन प्रतिधानेनापिबत्साकं सहेत्यर्थः, इन्द्रः सोमस्य काणुका। कान्त-कानीति वा क्रान्तकानीति वा कृतकानीति वा। इन्द्रः सोमस्य कान्त इति वा कणे हत इति वा कणेहतः कान्तिहत' इति। अत्रैकेनैव प्रतिधानेन युगपत्सोमस्य त्रिंशत्सरांसि पीतानि। तत्र काणुकाशब्दः सोमस्य विशेषणं सम्भवति इन्द्रस्य वा। आद्ये पक्षे उच्यते कान्तकानि प्रियाणि क्रान्तकानि आक्रान्तानि कृतकानि संपादि-तानि वेति। द्वितीये पक्षे काणुका इन्द्रः कान्त इच्छावान् कणेघातः कणेहतः। अतिशयितं सोममिच्छन् भवति। त्रिंशत्सरांसि सोमस्य कानीति विचारे

याज्ञिकरुच्यते उक्थ्यस्य सोमसंस्थाया माध्यन्दिने सवने त्रयः पर्याया दश दश चमसास्ते सर्वे ऐन्द्रा इति तत्रत्य चमसपात्रेषु त्रिंशत्सङ्ख्याकेष्वास्थितसोमयुक्तत्वात्तान्यत्र सरांस्युच्यन्ते। तानीन्द्रेण पीयन्ते। तत्स्थः सोमः पीयत इत्यर्थः। तदुक्तं तेन "तत्रैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवताकानि" इति। तत्र हि माध्यन्दिने सवने उक्थपर्यायास्त्रयस्त्रयोऽप्यैन्द्रा एव भवन्ति। त्रिष्वप्येतेषु दश दश चमसाः। तदभिप्रायेण त्रिंशत्सरांसीत्युक्तं मन्त्रे। यानि उक्थसम्बद्धानि सोमपात्राणि तान्येकेन प्रतिधानेन पीयन्ते। तान्यत्र सरांस्युच्यन्त इति याज्ञिकाभिप्रायः।

निरुक्ताभिमतं मतं मूले उच्यते, त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः। तद्या या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्तीति। टीकाकृता तदर्थ उच्यते, तत्तत्रैवं सति या एताश्चान्द्रमस्यश्चन्द्रमःसम्बन्धिन्यश्चन्द्रमसि भवा आगामिन्यः प्रतिपद्द्वितीयादितिथिषु आगच्छन्ति आपः रश्मयस्ता अपरपक्षे पिबन्तीति।

अत्र याज्ञिकपक्षे त्रिंशदुक्थपात्रस्थसोमे हूयमाने पीयमानेऽपि साकंशब्दस्यासंलग्नकता। न हि तावतां युगपद्धोमः पानं वा, क्रमिकं तत्।

तथाचैतस्मिन् पक्षे देवतात्रयवादे सोमपानस्यायुक्तत्वं च। अत एवास्वरसान्निरुक्तकारमतमुक्तं मूलकारेण। टीकाकृता तद्व्याख्याय तस्मिन्नपि मते दोष उद्घाट्यते। आह—एकया प्रतिधापिबदिति मन्त्रे साकं सरांसि त्रिंशतमिन्द्रः पिबतीत्युक्तम्। नैरुक्तपक्षेण तद्या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्तीति। तदेतद्रश्मिषु पातृषु चन्द्रमसि पीयमाने सर्वमेतदसम्बद्धं भवति, एकया प्रतिधापिबदिति मन्त्रस्यैन्द्रत्वादिति। अयं दोषष्टीकाकृता परिह्रियते, इतरस्मिन् मन्त्रे 'यमक्षितिमक्षितयः पिबन्ती'त्यत्र रश्मीनां पानसम्बन्धादादित्य उच्यते। आदित्योऽपि हि इन्द्रशब्देनोच्यते "असावादित्य एवेन्द्र इति ह विज्ञायते"। तदवयवभूताश्च रश्मयः समासव्यासस्तुतिभाजः। सरःशब्दः खल्वपि उदके वर्तते। तत्रैवं सति यानि तान्युदकानि सरांसि पञ्चदशाहःसम्भृतानि साकमवस्थितानि भवन्ति चन्द्रमसि तानि सूर्य इन्द्रो रश्मिभिरपरपक्षे पिबतीति। एवमेतत् सर्वमुपपद्यते नैरुक्तपक्ष इति। एवं चैतस्मिन् मन्त्रे याज्ञिकपक्षे साकं पानस्यानुपपत्तिः। नैरुक्तपक्षे मन्त्रे इन्द्रेण त्रिंशतं सरांसि साकं एकया प्रतिधया पीयन्ते इत्युच्यते नैरुक्तैश्चन्द्रमसि संभृतानामपां पानं रश्मिभिः क्रियत इत्युच्यत इति इन्द्रपानमुच्यते। रश्मिपानेन समाधीयत इत्यसम्बद्धता। अतष्टीकाकृता इन्द्रस्यादित्याभेदेनादित्यत्वं गृहीत्वा रश्मीनां चादित्याभिन्नत्वेन

रश्मिकर्तृकं पानमादित्यकर्तृकमेवेति मन्त्रार्थस्य व्याख्यायाश्च सङ्गतार्थत्व-मित्युक्तम् ।

परन्तु अत्र पाने साकंशब्देन साहित्यं वा यौगपद्यं वोक्तं मन्त्रे तस्या-वस्थितिसम्बद्धतावर्णनं वा मन्त्रस्यार्थवर्णनम् । अवस्थितिबोधकस्य शब्दस्य मन्त्रेऽभावात् । तस्मादयं मन्त्रोऽस्पष्टार्थः । टीकाकारेणादित्यपरत्वेन व्याख्यानेऽपि न विस्पष्टार्थता । काणुकाशब्दस्येन्द्रविशेषणता सोमविशेषणता वेत्यत्रानिर्णयः । तद्व्युत्पादनेऽपि अनेकरूपत्वप्रतिपादनेन तदर्थोऽप्यनिर्णीतः । तस्मादस्य प्रकारान्त-रेणादित्यपरं व्याख्यानम् ।

तत्र प्रथमं काणुकाशब्द इन्द्रविशेषणमेव । तत्र व्युत्पत्तिश्च अणुशब्दात्कुत्सितार्थे कन् तस्य पुनः कुत्सितार्थककिंशब्देन समासः किमः कोष्णमित्यादाविव कादेशः । अर्थश्च अणुः स्वल्पा मात्रा । स्त्रीत्वादत्र मात्रा-ग्रहणम् । तस्याः कना बोध्यं कुत्सितत्वम् तथा चाणुका अतिशयितस्वल्पा मात्रा । किमा समासितकाणुकाशब्दे अत्यतिस्वल्पा मात्रा बोध्यते । तथा च अतिस्वल्पमात्र इन्द्रः स्वल्पकलारूप इन्द्रः एकया प्रतिधा प्रथमयैव प्रति-विरुद्धधानेन प्रतिधा, सोमस्य त्रिंशत्सरांसि युगपदपिवत् । अयं भावः—आदित्योदयस्थलीयैषा वर्णना । आदित्योदयात्पूर्वं राज्यास्त्रिंशद्दण्डपर्यन्तं, किंवा सावित्रकाले त्रिंशदशसबन्धेन घटीपञ्चकरूपे संभृतं बहुलीभूतं तेजः पृथक्त्वेन भासमान सर्वमादित्ये कलामात्रोदिते तत्रैव लीनं भवति पृथक्त्वेन नावभासते । तदसौ तेजसो विलयः स्वल्पकलामात्रोदित आदित्ये युगपद्भवति । अयमेवेन्द्रस्य सोमपानमित्युच्यते । एवं सति तेजस एव सोमरूपता तस्य विलयस्त्वादित्ये स्वल्प-कलारूपे युगपत्कालविलम्बमकृत्वा यस्तत्सोमस्य पानमिमेऽर्था एवं व्याख्यानेन स्पष्टा भवन्ति, मन्त्रस्यार्थोऽपि विस्पष्टः । पूर्वमुदयादादित्यस्यान्यत्र सत्त्वेन तदपेक्षया प्रतिविरुद्धमुदयनीदेशे धानं स्थापनं प्राप्तिरिति यावत् । तस्यैकशब्देन स्वल्पत्वं बोध्यते । अस्तदेशापेक्षोदयदेशे स्वल्पं प्राप्तः कलामात्र इन्द्रः पूर्वं त्रिशद्घटीषु राज्याः सावित्रत्रिंशदंशेषु वा संभृतं भास्वरतमं तेज उदयमात्रेणात्मनि गृह्णाति । बहुलीभूतमपि तत्तेजः पृथक् न भासत इति । आदित्योदयात्पूर्वं पृथक्-तयाऽवभासमानस्य तेजस उदिते आदित्ये पृथगनवभासोऽनुभवसिद्धः ।

अन्यत्रापि प्रकारान्तरेणायमर्थो वेदे वर्ण्यते । उदयात्पूर्वकालपर्यन्तं मण्डलतः पृथग्भासमानं तेज उषा इति गृहीत्वा सोषा उदयपर्यन्तं मण्डलतः पृथग्भास-मानोदिते आदित्ये तत्र विलीना भवति । न ततः पृथगवभासते । स तस्या-स्तत्रैकीभावो विलयात्मा तं गृहीत्वा तस्य विवाहरूपेण कल्पनम् । उषाश्च

सूर्योदयसन्निकटा सूर्याशब्दिता तस्या आदित्येन विवाहकल्पनां गृहीत्वा सूर्याविवाहसूक्तं वेदे वर्णितम्। आदित्यपत्नीत्वेनोषसो व्यवहारोऽपीममर्थं स्पष्टयति। यथा पत्नी विवाहात्पूर्वं पृथग्रूपा विवाहोत्तरं पत्यौ विलीयते तत्साजात्यादुषस आदित्यपत्नीत्वेन व्यवहारो बहुलं वेदे। प्रजापतेः कनामबोध्यत्वकथापीममेवार्थं बोधयतीत्युपरिष्टाद्वर्णयिष्यते। एवं चात्रार्थे प्रतिधासरःकाणुकाशब्दानां स्पष्टार्थत्वम्। एवं च सोमस्तेजोरूपस्तत्पानं च तदादानरूपमिति भवति।

अयमेवार्थः प्रकारान्तरेण सूक्तान्तरे बोध्यते। तत्रोच्यते—"अयमिन्द्रस्त्रिकद्रुकेष्वपिबत्सुतस्य" इति। त्रिकद्रुकशब्दस्यार्थं आश्वलायनेन श्रौतसूत्रे उच्यते —"अभिप्लवषळहस्य पूर्वं त्रिकं त्रिकद्रुक इत्याचक्षते" इति। तच्च त्रिकं ज्योतिर्गौरायुरिति यागत्रयरूपम्। एवञ्चोक्तयागत्रये सुतस्य सोमस्य पानमकरोदिन्द्रः। तत्रेन्द्रेण सर्वेषु सोमयागेषु सोमः पीयते तथा सति को वा विशेषो यत्तेन त्रिकद्रुकेषु सोमपानवर्णनस्य। नैरुक्तमते इन्द्रो यदा मध्यमस्थानवासिनी देवता तदानीं कथमुक्तयागत्रये सोमपानं तस्य। किञ्च सूर्यस्यैवैकस्य देवत्वं तस्यैव वेदे स्तव इत्यनुक्रमणिकोल्लिखितमतानुसारेण कथं सूर्यस्योक्तयागत्रये सोमपानमिति। तत्रोच्यते इदमपि सर्वं सोमस्य तेजोरूपत्वे तत्पानस्य तदादानरूपत्वे एवोपपद्यत इति। इदं त्रिकद्रुकनामतोऽपि व्यज्यते। तन्नाम रूचेर्घञि रुक इति रूपम्। तस्य किमा समासे किमः स्थाने "कद्रथ" इत्यादिवत्कदादेशे कद्रुक इति, तस्य त्रिशब्देन समासे त्रिकद्रुक इति शब्दः। रुच् धातोर्दीप्तिरर्थः। किमा कुत्सितार्थे वर्तमानेन दीप्तौ कुत्सितत्व बोध्यते। दीप्तेः कुत्सितत्वमसंपूर्णतया। एवं च कद्रुकोऽसंपूर्णदीप्तिः। तस्य त्रित्वं त्रिशब्देन बोध्यते। एवञ्चासंपूर्णदीप्तियुक्तास्त्रयस्तच्छब्देन बोध्यन्ते। पूर्णा दीप्तिश्च आदित्यस्य दर्शने तददर्शने चासंपूर्णा। सा च रात्रावेव संभवेत्। रात्रौ हि प्रथमतोऽधिका दीप्तिः प्रारम्भे, ततः क्रमशो हीयमाना पुनरुदयाभिप्राये क्रमशो विवर्धमाना दीप्तिः। तत्रोदयाभिप्रायदीप्त्यभिप्रायेण स शब्दः। तत्र विषुववृत्तादिस्थदेशेषु उदयात्पूर्वं घटीपञ्चकं सावित्रः कालः प्रकृष्टप्रकाशः। सावित्रकालतः पूर्वं पञ्चघटच उषःकालः पूर्वसावित्रापेक्षया स्वल्पप्रकाशः। उषःकालतः पूर्ववर्ती दिनान्तराभिप्रायो रात्र्या भागोऽस्त्यल्पप्रकाश.। सुमेरुस्थले तु सावित्रः काल एकमासपर्यन्तः। एवमुषःकालोऽपि तावान्। पूर्ववर्तिरात्रिकालोऽपि दिनान्तरसम्बन्धाभिप्रायस्तावानेव। तदेतत्सदृशीरद्येति मन्त्रे भाष्ये च प्रतिपाद्यत इति तत्सर्वं पूर्वं विस्तरेण निरूपितम्। एवं चैषां त्रयाणां कालानां दीप्तियोगेऽपि आदित्यदर्शनकालीनापेक्षया स्वल्पतेजस्त्वात्कद्रुकत्वम्।

त्रिकद्रुकशब्दतो यथा पूर्वोक्तार्थलाभ एवं तच्छब्देन गृह्यमाणयागत्रय-बोधकशब्दतोऽपि स एवार्थो लभ्यते। त्रिकद्रुकशब्देनाभिप्लवषळहस्याद्यं यागत्रयं गृह्यत इति पूर्वमुक्तम्। तन्नामानि ज्योतिर्गौरायुरित्यपि पूर्वं प्रतिपादितम्। ततोऽपि उक्तार्थलाभः। तथाहि ज्योतिःशब्देन केवलप्रकाशमयः त्रिकद्रुकशब्द-विशेषणतया न्यूनदीप्तिः सावित्रः कालो बोध्यते। गौरित्यनेन उषःकालबोधः। उषसां गोवाहनत्वेन गोशब्देन बोधात्। निरुक्तकारेणोच्यते "आत्मैवैषामायुधं वाहनं सर्वं देवस्य देवस्ये"ति। एवं गोवाहनमुषसामिति गवामुषोऽभिन्नत्वम्। गावश्च किरणा इति। एवमायुःशब्देन रात्र्याः पूर्वोक्तस्वल्पतेजोयुतो दिनान्तरीय-भागो गृह्यते। आयुःशब्दस्य हि आङ्पूर्वाद्युधातुतो निष्पत्तिः। आङ् ईषदर्थक-त्वम्। युधातोश्च मिश्रणममिश्रणमर्थः। तत्र प्रकृते तेजसा ईषन्मिश्रणं तेन बोध्यते। एवं सति तच्छब्दतो रात्रिसम्बन्धित्वम्। उक्तरीत्या स्वल्पतेजस्कभाग-त्रयग्रहणम्। तत्र विद्यमानस्य तेजसस्तद्रूपस्य सोमस्य पानमिन्द्रेण क्रियत इति पूर्वोक्तार्थ एवानेन बोध्यते। एवं च तेजः सोमस्तत्पानमादानं स्वस्मिन् विलयस्वरूपमिन्द्रेण क्रियते इति। अत एव सोमपानविषये स्पष्टं वर्णनं क्रियते वेदे मन्त्रे।

"सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिम्।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन॥

ओषधिं पिष्ट्वा पानकर्ता 'सोमो मया पीत' इति मनुते। परन्तु ब्रह्माणो ब्राह्मणा मन्त्रा वा वैदिका देवतावर्णनस्थले यं सोममिति विदुस्तस्य न केनापि भक्षणं क्रियते। देवतादिवर्णनस्थल इत्यवश्यं पूरणीयम्। अन्यथा सोमयाग-प्रक्रियया सोमवल्लीरसनिष्कासनपूर्वं पानपर्यन्तं प्रक्रियाया वेदे एव प्रतिपादनात्तेन विरोधः स्यात्।

यत्तु निरुक्तकारेणात्र वृथासुतोऽर्थाद्यज्ञं विना सुतः सोमोऽसोमः सोमो न भवति, पाता च तस्य न सोमपा भवति योऽयज्वेत्यर्थं उक्तः स तु यथाकथंचन प्रसिद्धवल्लीरूपं सोममभिप्रेत्य योजितो न तु वेदमन्त्रस्वारस्योपेतः। किञ्च तेनापि वृथा सुतोऽयज्वेत्यादिपदानामत्राध्याहारादिना योजनीयता भवति, तावता न कोऽपि सूक्ते प्रकृतोपयोगः स्यादिति। उक्तरीत्येन्द्रकर्तृकसोमपानवर्णनस्य न सम्यगुपपादनं स्यादिति।

एवं बलकृतिरिन्द्रस्य पराक्रमवर्णनेन, पराक्रमश्च वृत्राद्यसुराणां निरसनेन, तच्च बहुधा वर्ण्यते वेदे युद्धवर्णनपुरस्सरम्।

वस्तुत इन्द्रस्य न केनापि युद्धम्। युद्धवर्णना तु उपमार्थेन। तदुक्तं निरुक्तकारेण "उपमार्थेन युद्धवर्णना भवन्ति" इति। मन्त्रेऽप्युच्यते—

'मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुर्न नु पुरा विवित्से'॥ इति।

आदित्येन वास्तवं तु न केनापि युद्धं सम्भवति। आदित्यस्य तमसा वृत्रादिशब्देनोच्यमानेन विरोधो न सम्भवत्येव। आदित्यदृष्ट्या तमसोऽभावात्। केवलं तेजसि सति तमसोऽदर्शनं तत्रेति तेजस्तमसोरसामानाधिकरण्यदर्शनाद्विरोधं प्रकल्प्य विरोधस्य परा काष्ठा युद्धकल्पनं तत्रेति। एवं चोक्तरीत्या तेजोवशतो विनाश्यो वृत्रादिरसुरोऽपि तेजोवशतो विनाश्यान्धकाररूप एव। निघण्टौ मेघबोधकेषु नामसु वृत्राहिशम्बरशब्दानां पाठेन तेषामभिन्नार्थत्वेन शम्बरादयोऽपि तमोरूपा एव। तेन च वृत्रेण निरुद्धा आपोऽपीदानीं तमसस्सत्तादशायां तेजसोऽसत्त्वं दृष्ट्वा तमोरूपेण वृत्रेण तासां निरोधः कृत इति कल्पनया तेजोरूपिण्य एव। ताश्च वृत्रविनाशेनेन्द्रेण मोच्यन्ते इति कल्पना। अत एवेन्द्रो वृष्टिप्रदातेति वर्णनम्। वृष्टिश्चोक्तरीत्या तेजोरूपाणामपां निरोधकस्य वृत्रस्य विनाशनेन। एवं चाब्निरोधकत्वाद् वृत्रो मेघरूपः। अत एव मेघबोधकेषु नामसु वृत्रशब्दपाठः। तच्चाब्रूपत्वमव्यक्ततेजस एव। अत एव पूर्वमुक्तस्यायुःशब्दस्य त्रिकद्रुकत्वम्।

एवं च सोमपानं तेजःस्वीकारः सोमश्च तेजोरूप इति पूर्वोक्तं सिद्धम्। अत एव तस्य सोमस्य रश्मिरूपत्वेन वर्णनं मन्त्रे क्रियमाणं संगच्छते। तथाहि मन्त्रः—

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्॥ इति।

अत्र षष्ठ्यन्तानां पदानामर्थानां मध्ये प्रथमान्तपदार्थरूपः सोम इत्युच्यते। निरुक्तपरिशिष्टे तेन तेन प्रवृत्तिनिमित्तेन षष्ठ्यन्तपदार्था रश्मिरूपा उच्यन्ते।

तत्र देवानां देवनाना प्रकाशमानानामादित्यरश्मीनां मध्ये सोमो ब्रह्मा महान्। अयंभावः—आदित्यमण्डलं वृत्ताकारं तस्याः समन्तात्सर्वासु दिक्षु ततो रश्मयो विनिर्गच्छन्ति इति। तन्मध्ये केचन रश्मयो द्रष्टुः सविधं प्राप्ताः केचनोर्ध्वदेशगामिनः केचन तिर्यग्गामिनः। तेषामभिप्रायेणोच्यते द्रष्टुः सविधं प्रकाशयितुं प्राप्तानां प्रकाशयितॄणामत एव देवनानामादित्यरश्मीनां मध्ये ब्रह्मा साक्षात्प्रकाशकोऽत एव महान् यो रश्मिस्तत्स्वरूपः सोम इति। प्रचलच्चक्रन्यायेन केचन प्रकाशनार्थं प्रकाश्येन सम्बद्धा भवेयुः केचन निवृत्ततत्कार्याः केचनागामिप्रकाशनकार्याः। यथा प्रचलतश्चक्रस्याराणां मध्ये कश्चनारो भुवा सम्बद्धः

कश्चनातीततत्सम्बन्धः कश्चनागामितत्सम्बन्धः। एवं त्रयाणामेवाराणां भुवोक्तरूपसम्बन्धिता। तद्व्यपगमे च केवलं प्रसरद्रूपत्वं तत्तद्दिगभिप्रायेण। एवमादित्यरश्मीनामपि मध्ये क्रमिकं त्रिरूपत्वं भवति प्रत्येकम्। कश्चन यदा प्रकाश्यं किञ्चन प्रकाशयितु प्रवर्तते तदानी तत्पूर्ववर्तिनस्तत्कार्यमतीतं भवति परवर्तिनश्च तत्कार्यं भविष्यद्भवेत्।

एवं च प्रकाशकसविधवर्तिनोः प्रकाशकयोः प्रकाशकस्य च प्रकाश्येन साक्षात्सम्बन्धः कालद्वारा अपरेषां पारम्परिकः स इति। वर्तमानकार्य एकः अतीतकार्यकालानन्तरितातीतकार्यः, एवं भविष्यत्कार्यकालानन्तरितभविष्यत्कार्यश्चेति द्वाविति त्रय एव प्रकाश्येन साक्षात्सम्बद्धा भवन्ति। तत्परवर्तिनां च तादृशेनापरेण व्यवधानमिति न ते साक्षात्प्रकाश्यसम्बन्धिनः। चक्रस्य प्रचलनदृष्टान्तेनैतेषां चक्राकारवृत्तादित्यबिम्बसम्बन्धिनां किरणानामपि प्रत्येकं क्रमेण त्रिरूपत्वं भवति। तत्र त्रयः प्रकाशका देवता आदित्यरश्मयस्तन्मध्ये साक्षाद्वर्तमानप्रकाशनकार्यो ब्रह्मा महान् तद्रूपः सोम इत्युक्तं ब्रह्मा देवानामित्यंशेन मन्त्रगतेन।

एतेषां त्रयाणां किरणानामृभुरूपत्वेन वर्णना वेदे। तदुक्तं निरुक्तकारेण—आदित्यरश्मयोऽप्यृभव उच्यन्ते इति। ते च ऋभवस्त्रयः 'ऋभुर्विभ्वावाज' इति। तत्र ऋभुनाम्ना बहुवचनेन सर्वेषां ग्रहणं बहुषु स्थलेषु। वाजशब्देनापि बहुत्वेन ऋभवो निर्दिश्यन्ते। ऋभुशब्दस्य निर्वचनं निरुक्तकारेणोच्यते—ऋभवः उरु भान्ति इति वा ऋतेन भान्तीति वा ऋतेन भवन्तीति वा इति।

आर्भवसूक्ते तेषां कर्माणि पृथगुच्यन्ते 'वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा' इति। तत्र देवाः प्रातःकालीना रश्मयस्तेषां वाजः सुकर्मा भवति सुकर्मा शोभनकर्मा। यतः प्रातःकालीनानां प्रातःकाले शोभनं कर्म च देवानां प्रकाशमानानामादित्यरश्मीनां शोभनप्रकाशरूपम्। प्रातःकाले प्रवृत्तस्य प्रकाशस्य क्रमेण विवर्धमानत्वाच्छोभनत्वम्। सायंकाले यद्यपि प्रकाशः प्रकाशनं करोति तावता न स शोभनः। तस्य प्रवृत्तस्य प्रकाशस्य क्रमेण अवहीयमानत्वात् विनाशोन्मुखत्वेन न शोभनतेत्युक्तं "वाजो देवानामभवत्सुकर्मे"ति। इन्द्रस्य आदित्यस्योदितस्यास्तमयपर्यन्तं प्रकाशनरूपं कर्म तद्विषये ऋभुः सुकर्मा भवति। ऋभुरेव ऋभुक्षाशब्देनोच्यते। तदुक्तं "इन्द्रस्य ऋभुक्षा" इति। सुकर्मा इत्यस्यानुषङ्गः। एवं सायंकाले प्रकाशमानानामादित्यरश्मीनां मध्ये विभ्वनामको रश्मिर्वरुणस्य सुकर्मा। वरुणस्य कर्म जगदावरणार्थं प्राप्तस्य तमसो वारणम्। तत्कर्म विभ्वा सम्यक्करोतीति सुकर्मा भवति। अत्रापि सुकर्मेत्यनु-

षङ्गः। तदुक्तं "वरुणस्य बिम्बा" इति। एतेषामेतत्कार्यं मन्त्रान्तरे स्पष्टमुच्यते ऋभुसूक्ते—

"शोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनया भृतम्।
आनिम्रुचः शकृदेको अपाभरत्किस्वित्पुत्रेभ्यः पितरावुपावतुरिति।"

एतद्विषयको विचारः परस्तात्करिष्यते।

एवं सति प्रकाशनार्थं ये रश्मयः प्राप्तास्तेषां मध्ये सोमो महान् भवति। तदुक्तं "ब्रह्मा देवानामि"ति। यतः पूर्वोक्तरीत्या प्रकाशकानां मध्ये सम्मुखप्राप्त्या प्रकाशनार्थं कस्यचन प्राप्तिरिति तादृशः सोम इति स ब्रह्मेति। ये तु तिर्यक्त्वेन प्राप्तास्तेषां संमुखरश्म्यपेक्षया न्यूनतेजस्कतया न महत्वम्, न्यूनत्वं प्रकाशनेन तमसो निवारणेन च कल्प्यते। संमुखीनो रश्मिर्यथा सर्वाङ्गीणं तमो निवारयति प्रकृष्टं प्रकाशते न तथा तिर्यग्रश्मय इति। "पदवीः कवीनामि"ति। पदं वेतीति पदवीः। पदमादित्यमण्डलं तद्वेति गच्छति इति पदवीः। कवीनां मध्ये पदवीः सोमः। अयं भावः—ब्राह्मणे उच्यते "ये वै नः पूर्वे ऋषयः प्रेतास्ते कवय" इति। पूर्वाञ्चना ये ऋषयः प्रेता विनष्टाः प्रकर्षेणापुनरागमनाय गतास्ते कवय इति। रश्मीनामुभयविधा गतिर्वेदे वर्ण्यते। तत्रारनेमिगतिररनाभिगतिरिति उभयविधा गतिः पूर्वं प्रतिपादिता। तत्रारनाभिगतिमभिप्रेत्य सर्वं यज्ञानुष्ठानं प्रवर्तते। अत्र गतौ आदित्यसकाशतो निर्गतस्य तेजसः पुनरादित्यप्राप्तिर्भवति। सा लोकतो विज्ञायते। यथा आदित्यसकाशतो विनिर्गतं तेजो भुवा तत्प्रभृतिभिराकाशवर्तिभिः प्रतिबद्धं सदग्निभावमापद्यते। अग्नेश्चोर्ध्वज्वलनेनोर्ध्वं गच्छत्तत्तेज आदित्यं प्राप्नोति आदित्ये प्रविशतीत्यर्थः।

वैदिकयज्ञस्थले एषैव कल्पना यज्ञानुष्ठानप्रकारतो विज्ञायते। यज्ञानुष्ठाने मुख्यं पात्रद्वयम् स्रुवः जुहूरिति। तत्र स्रुवस्याकारो मस्तके सच्छिद्रग्रन्थ्याकारो वर्तुलः पश्चान्निर्ग्रन्थिदण्डयुतः। तत्र दण्डो हि तेजसो रश्मिभावमापन्नस्य प्रतीकम्। तच्च तेजो ग्रन्थिसदृक्ष आदित्यमण्डले प्राप्नोति। एवञ्चात्र स्रुवस्य मूर्धा आदित्यप्रतीकम्। तत्र आगतं तेजः कुत आगतमित्यस्पष्टम्। अत एव स्रुवस्य दण्डमूले ग्रन्थ्यादिराहित्यम्। स्रुवस्य होम उपयोगावसरे तन्मूलं न विवरणीयं विवरणे यजमाननाश इति वचनम्। अत एव स्रुवोपयोगावसरे याज्ञिकैर्हस्ते गृहीतस्य स्रुवस्य दण्डो वस्त्रादिनाऽऽच्छाद्यते। एवं सति यतः कुतो वा प्राप्नोतु तदादित्यगतं तेजः। तदादित्यस्यैवेति गृहीत्वा तस्य स्रुवस्थस्य तेजःप्रतीकस्याज्यादेः जुहूपात्रे प्राप्तिः। सा च आदित्यतो निर्गतस्य तेजसः भूलोकसदृक्षे तेजसः प्रतिबन्धके तस्य पुञ्जीभावं प्रतिपादयति। प्रकृते जुहूपात्रेण भुवि

तेजसः पुञ्जीभावो बोध्यते। तथाहि जुहूपात्रं मस्तकेऽर्धगोलसदृक्षं वृत्ताकारं मूले ग्रन्थियुतदण्डयुतम्। मस्तकेऽर्धगोलसदृक्षवृत्ताकाराग्रे त्र्यस्रनालीमार्गयुतम्। तत्र मूलगतो ग्रन्थिरादित्यप्रतीकम्। दण्डस्ततोनिर्गच्छद्रश्मिरूपतेजःप्रतीकम्। तस्य मूर्धरूपो भागो भुवः प्रतीकम्। आदित्येनार्धभागो भुवः प्रकाशित इति अर्धवृत्ताकारस्तस्य प्रतीकम्। तत्र सगर्तभावो भुवि पुञ्जीभूततेजसो ग्रहण-स्थलाभिप्रायकः। तत्र पुञ्जीभूतस्य तस्य तेजसो भुवोऽपरपार्श्वेन विनिर्गममार्गो नालीरूपः। स च मूर्धसविधे आपेक्षिकपरिणाही अग्रभागे आपेक्षिकन्यूनतां गतः। स च रात्रावन्धकारस्थितिदेशाभिप्रायेण त्र्यस्रः। अयं भावः—भुवो मण्डलेना-दित्यतो विनिर्गतस्य तेजसः प्रतिबन्धेन तदपरपार्श्वे तेजोराहित्यं भवति। तच्च तेजोराहित्यं भूसन्निकटे स्थले बहुलं, तस्यां दिशि परवर्तिन्याकाशभागे भुवः पार्श्वद्वयेन गच्छतस्तेजसो वशतः क्रमेण न्यूनीभावमापद्यमानं भुव उभयपार्श्वभागेन गच्छतस्तेजसः परस्तात्योगे तत्र तेजसि तस्य विलयः। एवं सति तेजसो यावति भागे राहित्यं तस्य भागस्य गर्तरूपेण व्यवहारः। यथा भुवो गर्ते पांस्वादीनाम-भावेन केवलाकाशरूपता एवमत्र भुवा व्यवधाने भुवोऽपरपार्श्वे तेजसोऽभावेन गर्तरूपता। स च तेजोराहित्यरूपो गर्तो भुवा तेजसो व्यवधानेन भुवोऽपरपार्श्वे भूसंलग्नदेशमारभ्याकाशे कियद्दूरपर्यन्त आदित्यविरुद्धदेशस्य भूपार्श्वस्थले भवति। तत्रादित्यस्यासत्त्वेन रात्र्याः सत्त्वम्। तस्य रात्र्या गर्तरूपत्वेन वेदे व्यवहारः। यथा मित्रावरुणसूक्त उच्यते "दानुमत्या बृहन्तं गर्तमाशाथे" इति। दानुमती रात्रिस्तस्यास्तेजसोऽभावेन गर्तरूपता। स च तेजोऽभावेन तद्रहितदेश-गतो महति आकाशे वर्तमान इति महान् इति। तत्र गर्ते मित्रावरुणयोः स्थितिरनेन बोध्यते। तदेतदग्रे स्पष्टमुच्येत। स च भूव्यवधानेन सम्पन्नो गर्तो भूसन्निकटदेशे परिणाही परस्तात्तनुतां गत एवं त्र्यस्रतामापद्यते। तस्य त्र्यस्रत्वाभिप्रायेणैन्द्र-सूक्ते वृत्रविषये उच्यते "अपादहस्तो अपृतन्यदिन्द्र"मिति।

अयंभावः—पूर्वोक्तरीत्या वृत्रोऽन्धकारस्तेजोरूपेणेन्द्रेणासामानाधिकर-ण्याद्विरुद्धेन युद्धं करोति। तेजस्तमसोरेकत्र स्थित्यभावेन विरोधकल्पना ततो युद्धकल्पनेति पूर्वमुक्तम्। स च वृत्ररूपोऽन्धकारः पादहस्तरहितः। यथा मानुष-के शरीरे पादहस्तराहित्ये केवलं स्कन्धदेशमारभ्यानाभिभागः स्कन्धदेशे विशालो नाभिदेशे च क्रमेण तनुरेवं स वृत्रोऽपि पादहस्तरहितस्त्र्यस्रः। तस्योपरि वर्तमाना भूरूपा माता तामपहायेन्द्रेण वृत्रस्कन्धे वज्रेण ताडनेन तद्वधः कृत इति ऐन्द्रे "इन्द्रस्य नु वीर्याणि प्रवोच" मिति सूक्ते स्पष्टं प्रतिपादितम्।

एवं च भूसम्बन्धवशतः संपन्नस्य तमसो मस्तकभागे भुवो भागः।

परस्तात्भुवः परिणाहानुरोधेन परिणाहि तमः क्रमेण तनुतामापन्नमग्रे इति तस्य भ्यस्नत्वं तत्प्रतिकृतिरूपत्वेन जुहूपात्रे नालीमार्गः। स च काकपुच्छसदृक्षो वा हंसतुण्डसदृक्षो वा हस्त्योष्ठसदृक्षो वेति श्रौतसूत्रे विशेषः। तावता तस्य मूले विस्तारोऽग्रे तनुत्वमिति भवति। एवं चैतेन जुहूपात्रेण आदित्यसकाशतो भुवं प्रति प्राप्तस्य तेजसो भुवि सञ्चितस्य क्रमेण नाडीमार्गेण गमनं बोध्यते। तच्च जुहूस्थं घृतरूपं तेज आहवनीये तन्नामकेऽग्नौ यज्ञे हूयते। आहवनीयस्य चाग्नेरादित्यरूपत्वं शतपथे उच्यते "असौ वा आदित्य आहवनीयो रश्मयो विश्वे देवा" इति। एवं चादित्यतो विनिर्गतस्य तेजसः पुनरादित्यप्राप्तिर्होमेन बोध्यते। एवञ्चेमानि याज्ञिककर्माणि आदित्यसम्बद्धकर्मबोधकानीत्यग्रे निरूपयिष्यते विस्तरेण।

आदित्यसकाशतो विनिर्गतं व्यक्तमव्यक्तं वा सर्वं तेजः पुनरादित्ये प्रविशति तदिदमिन्द्रस्य वज्रमिति। वज्रमिन्द्रस्यायुधम्। निरुक्तकारेणोच्यते "आत्मैवैषामायुधं वाहनं सर्वं देवस्य देवस्य" इति। एवं च वज्ररूप एवेन्द्रः। स चादित्यरूप इति आदित्यतो विनिस्सृतं तेज पुनरादित्ये प्रविशतीत्ययमर्थो मन्त्रेणाप्युच्यते। तथाहि मन्त्रः—

दिवस्पृथिव्योः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः।
अपामोज्मानं परिगोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज इति॥

अत्र दिवस्पृथिव्योः द्यावापृथिव्योर्यत्तेजः आदित्यसकाशतो गतं तत्सर्वं परितः समन्तात् उद्भृतम् उद्धृत्य परिगृहीतम्, वनस्पतिभ्यो रात्रौ प्रकाशमानेभ्यस्तारकादिभ्यस्तमसो नाशकं यत्सहस्तेजस्तत्सर्वं परित आ समन्तादाहृतम्, अपामव्यक्तानां तेजसां गोभिः किरणैः सहितानामोज्मा ओजोरूपमिति यावत्। रश्मिसहितमव्यक्तं तेजस्तत्सर्वं मिलितमिन्द्रस्य तद्वज्रं स एव रथस्तं यजेति।

दिवाभागे आदित्येन द्यावापृथिव्योर्दत्तं रात्रिकाले तस्यासत्त्वेन तारकादिभ्यः प्रकाशमानेभ्यो यल्लब्धम्, उभयाभावे यदव्यक्तं तेजः तदतिरिक्तं रश्मिरूपं तेजस्तत्सर्वं मिलितमिन्द्रस्य वज्रमिति वर्णनेन तत्सर्वमिन्द्राभिन्न आदित्ये प्रविष्टमिति भवतीति। एवं चानेनारनाभिभावो रश्मिगतेरुक्तः। एवं च पदे पदस्थानीय आदित्ये ये गच्छन्ति किरणास्ते पदव्यः। तेषां किरणानामरसादृश्यान्न ते नाभिसदृक्षे आदित्ये युगपदेकस्थाने सम्बद्धा भवन्ति किन्तु क्रमेण। एवं सति यो रश्मिः पदेन साक्षात्सम्बद्धः स पदवीस्तद्रूपः सोमः, कवीनां मध्ये ये पूर्वे प्रेता रश्मयस्ते कवयः। अयं भावः—आदित्यादीनां विषये दर्शनमुत्पत्तिरदर्शनं मरणमिति ब्राह्मणे प्रतिपादितम्। तदनुसारेण ये पूर्वे पूर्वाञ्चना

रश्मयः अतीतदर्शना अत एव ते प्रेतास्तेषां मध्ये पदवीः पदं प्रविशन् यो रश्मिः स सोम इति। ऋषिर्विप्राणाम्। विशेषेण पूरकाणां विविधं पूरकाणां वा तेजः-प्रदानेन प्रकाशका ये तेषां मध्ये सम्मुखसम्बन्धो य आदित्यस्य रश्मिस्तद्रूपः सोम इति। महिषो मृगाणाम्। मृगाणां मार्गणानामादित्यरश्मीनां मध्ये महिषो महान्। आदित्यस्यास्तगमनेऽदर्शने मृगशब्देन मार्गणीयत्वेन वचनवदादित्य-रश्मीनामदर्शनेन मार्गणीयानां मध्ये महिषो महान् सोम इति। लोकेऽपि मृगाणां पशूनां मध्ये महिषः प्राणी महान् भवतीत्ययमर्थोऽपि सूचितः। श्येनो गृध्राणाम्। गृध्धातोरतिशयेनाकाङ्क्षाबोधकत्वेन ततो निष्पन्नस्य गृध्रशब्दस्य भक्ष्यविषयेऽत्यन्तलालसस्य आकाशे बहुदूरमुड्डीयमानस्य पक्षिणो ग्रहणम्। स यथा द्रुततरं गच्छति तद्वद् ये द्रुतगत्या बहुदूरं गच्छन्ति तादृशानां किरणानां मध्येऽसौ सोमः श्येनरूपः। श्येनो हि सर्वेषां पक्षिणां मध्ये बहुदूरं गच्छतीति प्रसिद्धं तत्सदृशः द्रुततरं गत्वादित्ये प्रविशन् सोम इति। स्वधितिर्वनानाम्। वनशब्देन वननीया आदित्यरश्मय इति निरुक्तपरिशिष्टे उक्तम्। वननीया एषणीयाः रात्रौ तेषामसौ परशुरिव सोम इति। एतादृशः सोमः पवित्रमादित्य-मण्डलमेति महान्तमाकाशभागमतिक्रम्येति।

एवं सति सोम आदित्यतो विनिर्गततेजोरूपः, तस्येन्द्रेण पानं पुनस्तं प्रति प्राप्तिरिति। सोमोऽस्माकं ब्राह्मणानां राजेति ब्राह्मणवाक्यमपि ब्राह्मणानां ब्रह्मादित्यस्तत्सम्बन्धिनामस्माकं रश्मीनां मध्येऽत्यन्तं भास्वर इत्यर्थत्वेन प्रवृत्तम्। सुदूरगामी आदित्यस्य यः किरणस्तस्य सुषुम्णशब्देन व्यवहारः सुषुम्ण आदित्य-श्चन्द्रमा गन्धर्वस्तमभिदीपयतीति स्पष्टः। एतावता सोमस्तेजोरूपस्तत्पानं स्वस्मिं-स्तस्य विलयः, ततो वृत्रादिना युद्धमित्यादिकं साजात्यात्कल्पनमिति दिक्।

एवमृग्वेदे आग्नेये सूक्तेऽग्निपूजकानां देवानां सङ्ख्योच्यते—

"त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्"। इति।

अत्र क एते देवाः कुत एषामेतावती सङ्ख्या इति विचारे सायणेनोच्यते—उपलक्षणमिदं सर्वे देवा वह्नेः पूजका इति। तत्रोक्तरीत्या यदि मन्त्रोक्त-सङ्ख्याया उपलक्षणत्वं तर्हि सा सङ्ख्याऽविवक्षिता भवति। सा च सङ्ख्या भिन्नर्षिदृष्टसूक्ते एवमेवाविशेषेणोच्यमानाऽसङ्गता स्यात्। अथ ऋषिष्वपि पौर्वापर्यकल्पनैकेन पूर्वेणोक्तापरेण तद्दृष्ट्वा मन्त्रान्तरवचनं न विरुद्ध्यत इति चेदत्रापि उपलक्षणत्वमितः पूर्ववर्तिनीनामपि सङ्ख्यानां सम्भवति तत्परित्यागो निर्हेतुकः। किञ्चोपलक्षणत्वे अत्रैवोच्यमानानामनेकासां सङ्ख्यानामेकयैवा-पेक्षितार्थोपलक्षणेऽपरासां ग्रहणमयुक्तं स्यात्। किञ्च विभिन्नसङ्ख्योल्लेखेन

सकलसङ्कलनेन सम्भवन्ती सङ्ख्या एकोनचत्वारिंशदधिकशतत्रयाधिकसहस्र-त्रयरूपा सङ्ख्या अवयवशोऽत्र निर्दिष्टा। तत्रापरेषामवयवानामुक्तसंख्यायाः सत्त्वे एषामेवावयवानां ग्रहणस्य निर्युक्तिकत्वं स्यात्। किञ्चैषेव सङ्ख्योक्ता-वयवोपेता वैश्वदेवीषु निवित्सु पठ्यते। तद्वचनं विरुद्धं स्यात्। एवं हि वैश्व-देवनिविद्गतानि निविदध्यायोक्तानि वाक्यानि—"त्रयश्च त्री च शता। त्रयश्च त्री च सहस्रा। त्रयश्च त्रिंशच्च" इति।

उपलक्षणत्वे मन्त्रोक्तसङ्ख्याया एतद्वचनं विरुद्धं स्यात्। किञ्चोपनिष-त्स्वपि "कति देवा याज्ञवल्क्ये" ति प्रश्नपूर्वं सैव सङ्ख्योत्तररूपेण निबध्यते तदनु-पपत्तिः स्यादुपलक्षणत्वे। तस्मादेषा सङ्ख्या मन्त्रोक्ता नोपलक्षणं संभवति। एवं सति पूर्वोक्तसंशयानामनिरासेन मन्त्रस्यास्पष्टार्थत्वम्। वैश्वदेवनिवि-दनुसारेण नास्याः सङ्ख्याया उपलक्षणार्थत्वं प्रत्युत विवक्षितत्वं प्रतीयते। न केवलं विवक्षित्वमेव किन्तु आदित्यगतिसम्बद्धत्वमपि प्रतीयते। एवं हि तत्रत्यानि वाक्यानि।

"त्रयश्च त्री च शता। त्रयश्च त्री च सहस्रा। त्रयश्च त्रिंशच्च। तावन्त उदरणे। तावन्तो निवेशने। तावतीर्ग्नाः। तावतीः पत्नीः। तावन्तोऽभिषाचः। तावन्तो रातिषाचः"। इति। अत्रोत्तरवाक्येषु तावच्छब्दप्रयोगा-दत्रत्यप्रथमवाक्यत्रयोक्ता नवाधिकत्रिंशदधिकशतत्रयाधिकसहस्रत्रयरूपा सङ्ख्या विवक्षितेति प्रतीतिः। सा वैश्वदेवनिवित्सम्बन्धाद्देवानां सङ्ख्येति प्रतीयते। तामेव सङ्ख्यां गृहीत्वा तस्याः स्थानादिसम्बन्ध उत्तरवाक्यैर्बोध्यते। यथा वाक्यम्—"तावन्त उदरणे" इति। अत्र तावन्तस्तावत्सङ्ख्याका इत्यर्थः। अर्थादेते देवा अत्र विवक्षिताः। वैश्वदेवनिवित्सम्बन्धात्। उदरणे। उदरणं नामोर्ध्वगमनं तत्र। तच्चोदरणं कस्येति नात्रोच्यते परन्तु परवर्तिवाक्यार्थ-विचारेणेदमादित्यस्येति प्रतीयते। एवं सति उदरणमुर्ध्वगमनमादित्यस्य तच्चो-दयरूपमिति उदरण आदित्योदये इत्यर्थो भवति। तथा परवर्तिवाक्यम्-"तावन्तो निवेशने।" निवेशनं गृहम्। तत्सम्बन्धिताऽनेन वाक्येनोच्यते। तच्चादित्यस्यास्त-ग्रहणेनात्र तत्सम्बन्धरूपत्वम्। आदित्यस्यादर्शनमस्तमयशब्देनोच्यते। तत्रास्त-शब्दस्य गृहार्थत्वम्। निघण्टौ गृहबोधकेषु नामसु अस्तशब्दस्य पाठात्। अस्त-मयो गृहगमनं तच्चादित्यस्येति निवेशनमादित्यस्यास्तमयस्तत्सम्बन्धिनस्तावन्त-स्तावत्सङ्ख्याका देवा इत्यर्थः। परवर्तिवाक्यम्—'तावतीर्ग्नाः' इति। अत्र सान्निकट्यादस्तोत्तरवर्तिसन्ध्याकालस्यात्र ग्नाशब्देन ग्रहणम्। तासां ग्नानां सम्बन्धित्वं तस्याः सङ्ख्यायास्तेन वाक्येन प्रतिपाद्यते। तावतीः तावत्य-

स्तावत्सङ्ख्याकाः ग्नाः। ग्नाशब्देन स्त्रीणां ग्रहणम्। निघण्टौ तच्छब्दस्य स्त्रीबोधकत्वनिर्णयो निरुक्तकारेण। स्त्रियश्चार्थाद्देवानाम्। ताश्च देवाभिन्ना एव। एवं सत्यत्र ग्ना शब्देन देवा एव विवक्षितास्ते च तत्कालसम्बन्धिनस्तावन्त इत्यर्थः। एवं परवर्तिवाक्यम्—तावतीः पत्नीः। तावत्यः पत्न्यः। अर्थाद्देवानाम्। ताश्चास्तोत्तराः पूर्वं प्रतिपादिता इति अनेन वाक्येनोदयपूर्ववर्तिन्यो गृह्यन्ते। उदयपूर्ववर्तिसन्ध्याकालस्योषःकालत्वेन वर्णनादत्र पत्नीशब्देनोषसो ग्रहणम्। उषसः पत्नीत्वेन व्यवहारः सूक्तेषु। निरुक्तकारेणोच्यते "एषैवाभिसृष्टकालतमा सूर्या"। सूर्या सूर्यस्य पत्नी इति। एवं चोषसः सूर्यात्वमादित्यपत्नीत्वमभिप्रेत्य सूर्याविवाहसूक्तमपि सङ्गच्छते। उषस एकत्वेनानेकत्वेन व्यवहारो वेद औषससूक्तेषु। एवं च पत्नीशब्देनात्रोषसं गृहीत्वा तस्यास्तावतीरित्यनेनाभिप्रेतः सङ्ख्याविशेषबोध उपाधिवशात्। उपाधिश्च परस्तात्प्रतिपादयिष्यते। यथा प्रातःकालिक सान्ध्यं तेज उषःशब्देनोच्यते एवं सायंकालिकस्यापि तस्य तत्त्वेन वचनम्। एवं सति ग्ना अप्युषसः। तासामप्यनेकत्वमुपाधिवशात एव। एवं "तावन्तोऽभिपाचः"। अभिपाच इत्यनेनाभि अभितः सम्मुखसम्बन्धस्तेन सचन्ते सेवन्ते युक्ता भवन्ति तेऽभिषाचो देवास्तावत्सङ्ख्याका इत्यर्थः। एवं "तावन्तो रातिपाचः" इति। रातिर्दानं तेन तद्वतो लक्षणया रात्रिः। रात्रिशब्देऽपि स एवार्थः। तत्र सचन्ते सेवन्ते युक्ता भवन्ति तादृशा रातिषाचो देवास्तावन्तस्तावत्संख्याका इत्यर्थः।

तत्रोक्तरीत्या षण्णामेव वाक्यानामुक्तविधसङ्ख्याबोधकत्वेन तावत्याः सङ्ख्यायाः षड्गुणितत्वं बोध्यते। उदरणमित्यनेनोर्ध्वगमनम्। तच्चादित्यस्योदयमारभ्योर्ध्वमम्बरतले आरोहादादित्यस्य गमनमत्र गृह्यते। अहोरात्रेण सञ्जायमानादित्यस्य गतिर्वृत्ताकारा। वृत्ते च तत्रोर्ध्वमर्धं वृत्तस्य दिनार्धमपरं रात्र्यर्धम्। वृत्तार्धे दिनगतेऽर्धो भाग आरोहार्थः। अपरश्चार्धो भागो वृत्तस्यावरोहार्थः। अवरोहसमाप्तिश्चास्तमये। एवं सति आरोहावरोहयोर्वृत्तचतुर्थभागनवत्यंशपर्यन्तं प्रतिस्वं प्राप्तौ 'ग्नाः पत्नीः रातिषाचः'पदसम्बन्धवशात आरोहावरोहयोर्वृत्तार्धत्रिभागभागिता भवति। तृतीयो भागश्च वृत्तार्धे षष्टयंशात्मा। तथाहि उक्तपदत्रयमध्ये रातिशब्देन दानसम्बन्धेन रात्र्या अखिलाया अस्तमयमारभ्योदयपर्यन्ताया वृत्तार्धसम्बन्धितया ग्रहणे प्राप्ते ग्नापत्न्योस्तदन्तर्गतयोरपि पृथगुल्लेखेन रातिशब्देन ग्नापत्न्योर्मध्यवर्तिस्थानसम्बन्धिन्या एव ग्रहणं विज्ञायते। तत्र प्रकृते विशेषावचनाद्ग्नापत्नीरात्रीणां समो विभागः प्रतीयते।

स च राज्यर्थे वृत्तार्धे। वृत्तार्धस्य भागा अशीत्यूर्ध्वं शतं, तेषां तृतीयो भागः षष्ठ्यंशात्मा प्रत्येकं भवति। एवं सति स्थलान्तरे राज्यास्त्रिभागरूपत्वोक्तेरनुगुणत्वेन रातिषाच इत्यनेन गृह्यमाणो भागो मध्यवर्तिषष्ठ्यंशात्मा भवति। पत्न्यर्थोऽपि तावान्। एवं ग्नार्थोऽपि तावानेव। एवं राज्या यथा त्रयो विभागा एवं दिनेऽपि उदरणनिवेशनयोः पृथग्वचनादभिषाच इत्येनेनापि दिनमध्यवर्तिभागोऽभिप्रेयते, स चोक्तरीत्या दिनार्थवृत्तार्धस्येति। स च तृतीयो भागो वृत्तार्धस्य षष्ट्यंशात्मा। एवमुदरणनिवेशनयोरपि प्रतिस्वं वृत्तार्धस्य षष्ठ्यंशात्मा भागः। एवं चात्राहोराज्ययोः षष्ठो भागः प्रत्येकं बोध्यत इति फलितम्। प्रतिषष्ठभागं च वृत्रस्य तावत्याः सङ्ख्याया ग्रहणे साकल्येन वृत्तार्था सङ्ख्या ३३३६×६ षड्गुणिता = चतुस्त्रिंशदधिकविंशतिसहस्ररूपिणी भवति। वैश्वदेवीषु निवित्सु प्रतिपादनादिमे एतावन्तो देवा इति भवति। ते चादित्येन गन्तव्ये दैनन्दिनवृत्ते उक्ता इति तस्य वृत्तस्यैतावन्तो भागा देवसञ्ज्ञका इति तद्भागोपाधित्वेन तावती देवानां सङ्ख्येति भवति। अहोरात्रार्थवृत्तषष्ठभागश्च घटीदशकात्मा भवति। दिनभागत्रयरूपत्रिंशद्घट्यो दिनार्था भवन्ति। एवं राज्यर्थभागत्रयरूपत्रिंशद्घटीनां मध्ये रात्रिप्रारम्भीयाया ग्नाया राज्यवसानीयाया पत्न्याश्च भागद्वयं विंशतिघटिकात्मकं परित्यज्य मध्यवर्तिघटीदशकात्मा भागः केवलो राज्यर्थो वा केवलतमोऽर्थो भवति। केवलं तमोदशायामेव वह्निसम्बन्धिता। दिवा आदित्येन सन्धिकाले राज्याः पार्श्वद्वये सान्ध्येन उष-आदिशब्दाभिलप्येन तेजसा प्रकाशनादवशिष्टो राज्या मध्यवर्ती तमोमयो भाग एव वह्निप्रकाश्यो भवतीति वह्निसम्बन्धित्वं तस्य। स च भाग उक्तरीत्या घटीदशकात्मकाहोरात्रस्य षष्ठो भागः केवलराज्यर्थः। रातिषाचश्च तत्र देवा एकोनचत्वारिंशदधिकशतत्रयाधिकसहस्रत्रयमिता वह्निसम्बन्धिन इति वह्निपूजका इत्युच्यते पूर्वोक्ते आग्नेये मन्त्रे। एवं सति न सा मन्त्रोक्ता सङ्ख्योपलक्षणार्था भवतीति। तथा सति मन्त्रे उक्तसङ्ख्यावशतोऽस्पष्टार्थत्वमपि न भवतीति वैश्वदेवनिविद्वशतो मन्त्रस्योक्तरूप एवार्थ इति।

उक्तरीत्या अहोरात्रार्थाया देवानां सङ्ख्यायाः स्वीकारे मन्त्रान्तरीयो व्यवहारोऽपि सम्यगुपपन्नो भवतीति। तथाहि—

"त्वमेताञ्जनराज्ञो द्विर्दशा बन्धुना सुश्रवसोपजग्मुषः"॥

"षष्टिं सहस्रा नवतिं नव श्रुतो निचक्रेण दुष्पदा रथ्यावृणक्"॥

अत्र दुष्पदाया रथ्यायाः सम्बन्धिनो नवनवत्यधिकषष्टिसहस्राणि चक्रेण निर्वर्जितवान्। अतिक्रान्तवांस्त्वमित्यर्थः। अत्र क इम उक्तसङ्ख्याका

निवर्जनीयाया रथ्यायाः सम्बन्धिनः। कुत एतावन्त इति विचारे न विस्पष्टता भवति यदीयं सङ्ख्या राज्ञां विशेषणम्। एतत्सङ्ख्याकानां राज्ञां निवारणं कृतवानिति। तदानीं राज्ञामेतत्सङ्ख्याविशेषग्रहणस्य किं तात्पर्यम्। यदि रथ्यासम्बन्धिनोऽर्था एतावन्त इति तदानीं तद्विशेषज्ञानाभाव इत्यस्पष्टार्थत्वम्।

तत्र यदि स्वनयदानस्तुतौ दिनप्रारम्भे उक्त सङ्ख्यायुतगोसमूहस्य निर्देशात्तावत्सङ्ख्याका गावोऽत्रापि गृह्यन्त इति मन्यते। तथाहि तत्रत्यो मन्त्रः—

"षष्टिः सहस्रमनुगव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम्।" इति।

अत्र अह्नामभिपित्वे समीपे गव्यं षष्टियुतं सहस्रं कक्षीवान् सनत् स्वीकृतवानित्युक्तम्। यद्यपि पूर्वोक्तमन्त्रे नवनवत्यधिका षष्टिसहस्रसंख्या निर्दिश्यते अत्र तु षष्टिसहस्ररूपैवेति वैषम्यम्। तथापि अत्रत्यपरमन्त्रे अवशिष्टायाः सङ्ख्यायाः प्रकारान्तरेण वचनात् वैषम्याभावः। तत्र परस्तादुच्यते—

"पूर्वामनुप्रयतिमाददे वस्त्रीन्युक्ताँ अष्टावरिधायसे गाः"। इति।

अत्र प्रयतिर्दानम्। पूर्वं दानमनु अहं त्रीन् युक्तानष्टौ गा आददे इत्युक्तिः। अत्र भाष्यकृता 'त्रीन् युक्ताँ अष्टा'वित्यत्र अष्टत्रिसङ्ख्ययोः समानार्थकत्वं संकलनन्यायेन योगं मत्वोक्तस्थले एकादशसङ्ख्या अभिप्रेयते इत्युच्यते। सा च सङ्ख्या रथगता। यद्यपि तत्रैव मन्त्रे गा इति पदमुच्यते तथापि तद्रथपरमिति न विरोधः।

एवं चैकादश रथानहं गृहीतवानिति कक्षीवत उक्तिः। यद्यपि पूर्वं रथानां सङ्ख्या दशरूपिण्युक्ता "वधूमन्तो दश रथासो अस्थुः" इति। अत्र देयद्रव्ये निर्देशः। एवं च न केवलं दशानां रथानां स्थितिमात्रमुक्तं किन्तु देयानां रथानां सङ्ख्योक्ता तथापि तत्र वधूमन्त इति विशेषणात्ते दश एकादशस्तु धनकनकपूर्णत्वेनाधिको विवक्षित इति मन्तव्यमित्युच्यते। तत्रैकादशेति रथगतैवैषा सङ्ख्या इति बलवत्तरप्रमाणेन यदा निर्णीयेत तदानीमुक्तविधो विवेकः सम्भवेत्। न च तथा प्रकृते। अत्र प्रथमत उक्तत्र्यष्टसङ्ख्ययोः समानार्थत्वमित्यनिर्णयः। गाः पदोक्त्या गोपरत्वं प्राप्नोति तस्येत्यनुपपन्ना सोक्तिः। किञ्च समानार्थत्वे किमिति एकादशेत्यनुक्त्वा सङ्ख्याद्वयनिर्देशः। अथ यदि अवयवशो निर्देशः स इति तर्हि एकादशसङ्ख्याया अनेकावयवयोगितया अवयवान्तराभिप्रायेणान्या सङ्ख्या कुतो नोक्तेति कुत एषैवावयवसङ्ख्या गृहीतेति विनिगमनाविरहः। अथ यदि अशोकवनिकान्यायेन तस्या वचनमिति, संभवति प्रकारान्तरेण सार्थक्ये नैरर्थक्यनिर्णायकोक्तन्यायानाश्रयणस्य शिष्टसम्मतत्वात्, कथं तर्हि तत्सार्थक्यम्। तत्रोच्यते। अत्र त्रीनित्यनेन गावो निर्दिश्यन्तेऽर्थात्त्रि-

सङ्ख्या गोगता। अष्टाविति पदं गोसमुदायाष्टकबोधकम्। समुदायश्च द्वादशानां गवाम्। तत्र समुदायग्रहणे द्वादशानामेव समुदायाश्रयणे त्रीन्युक्तौ अष्टाविति विचित्रनिर्देश एव मानम्। तथासत्येव मन्त्रान्तरानुगुण्यमिति।

एवं च द्वादशगवीनामष्टानां समुदायानां ग्रहणे गावो भवेयुष्षण्णवतिः गोत्रितयं तु साक्षादेव निर्दिष्टमिति साकल्येन सङ्ख्या नवनवत्यात्मिका भवति गवामिति। तत्र पूर्वां प्रयतिमनु इति मन्त्रे निर्देशेन साकल्येन षष्टिसहस्राणि नव नवतिश्च गवां सङ्ख्या संपद्यते। एवं सति दानस्तुतौ तावत्याः सङ्ख्याया गोसम्बन्धित्वनिर्णयेन पूर्वमन्त्रेऽपि उक्तसङ्ख्या गोगतैव गृह्यते। एवं सति तत्र मन्त्रे तावत्संख्याका गाव एव गृह्यन्ते इति निर्णीयते। उभयत्र समसङ्ख्यानिर्देशात्। चक्रेणेति अतिक्रमे साधनस्य चक्रस्य निर्देशात् रथ्यायाश्च दुष्पदत्वविशेषणात्। गावश्च किरणा अत्र विवक्षिताः। दुष्पदाया रथ्यायास्तावतीभिर्गोभिरतिक्रमणबोधनात्तासामादित्येन प्रत्यहं गन्तव्याहोरात्ररूपवृत्तसम्बन्धिता बोध्यते। एवं चैकवृत्तसम्बन्धिता देवानां गवां चावारिता भवति। तथा च गवां देवानामपि परस्परं सम्बन्धः प्राप्नोति स च सम्भवादेकस्य देवस्य गोत्रितयेन सम्बन्ध इति। एवं च पूर्वोक्तवैश्वदेवनिविदनुसारेण वृत्ते देवसङ्ख्या तस्या गोसंख्यारूपसंपादनार्थ सा त्रिभिश्चेद् गुणिता भवति तदा फलमुक्तमन्त्रगतगोसङ्ख्यासमं भवतीति उक्तरीत्या वृत्ते देवसङ्ख्या पूर्वोक्ता २००३४ चतुस्त्रिंशदधिकविंशतिसहस्रात्मिका' अत्र गोसङ्ख्या वृत्तगता नवनवत्यधिकषष्टिसहस्रात्मिका ६००९९। अत्रैतस्या गोसङ्ख्यायास्त्रिभिर्विभाजने देवसङ्ख्या भवति यथा ६००९९ ÷ ३ = २००३३ इति। तावन्त एवाहोरात्रसंबन्धिनो देवाः। पूर्वोक्ताग्नेयसूक्ते वह्नेः पूजकदेवतासङ्ख्याविज्ञानार्थमेतस्या वृत्तगतदेवसङ्ख्यायाः षड्भिर्विभाजने २००३३ ÷ ६ = ३३३८ ½। अत्रार्धाधिकशेषेण तदर्थ पूर्णसङ्ख्याग्रहणे ३३३९ इति वह्निकालसम्बन्धिनां सङ्ख्या भवति सा च तत्कालसम्बन्धाद्वह्नेः पूजकदेवसङ्ख्येति पूर्वमन्त्रस्य स्पष्टार्थत्वं भवति इति। एवञ्चाग्नेयसूक्ते देवसङ्ख्या नोपलक्षणार्था इति।

अत्र यद्यपि वैश्वदेवनिविदनुसारिणी देवसङ्ख्या संपूर्णवृत्तगता २००३४, वृत्तगतगोसङ्ख्यातस्त्रिभिर्विभाजने वृत्तगता देवसङ्ख्या २००३३, अनयोरेकसङ्ख्यया वैषम्यं दृश्यते तथापि वैश्वदेवीषु निवित्सु या प्रथमतो देवसङ्ख्या प्रोक्ता वृत्तषष्ठभागीयदेवस्वरूपिणी तस्यामेकस्य षष्ठ ½ भागस्याधिकस्य योजनात्संपूर्णवृत्तीयदेवसङ्ख्या विज्ञानायोक्तवैश्वदेवीयनिविद्गता षट्भागानां षट्सङ्ख्यासु प्रतिस्वं षष्ठभागस्याधिक्येन साकल्येनैकसङ्ख्याया अधिकायास्तत्र प्रवेश-

वशतस्तत्र वृत्तगतदेवसङ्ख्याया आधिक्यं प्रतीयत इति मन्त्रानुसारिसङ्ख्यानुसारेण देवसङ्ख्याया वृत्तगताया २००३३ अस्या न वैषम्यम्। एवमपरापरे ये साक्षात् षष्टिसहस्रनिर्देशा मन्त्रेष्वेतेष्वपि उक्तरीत्या गोसङ्ख्यादेवसङ्ख्यादिकं मन्तव्यम्। यथा "षष्टिं सहस्रमनुनिर्मजामज" इत्यादिषु। एवं चात्र वृत्ते गवां सङ्ख्या दानसूक्ते तावतीनां गवां दिनप्रारम्भे स्वीकारवर्णनेनादित्येन प्रत्यहं गन्तव्यवृत्तगता सा सङ्ख्या गवामिति विज्ञायते। तदनुसारेण देवसङ्ख्याऽपि तद्वृत्तगता। तच्च वृत्तमादित्येन षष्टिघटिकाभिरतीयते तत्र षष्ठो भागो वह्नेः पूर्वं प्रदर्शितरीत्येति तत्र भागे उक्तरीत्या संपद्यमाना देवसङ्ख्या ३३३९ एकोनचत्वारिंशदधिकत्रिशताधिकसहस्रत्रयात्मिकोक्ताग्नेये मन्त्रे उच्यत तस्या उपलक्षणत्वेनार्थकरणं न योग्यम्। एवं चोक्तरीत्या मन्त्रस्य विस्पष्टार्थत्वमिति पूर्वमुक्तमेवेति।

आदित्येन प्रत्यहं गन्तव्येऽहोरात्ररूपवृत्तमार्गे लोकत्रयसम्बन्धिता भवति। अत एव "एषां वै लोकानां रोहेण सवनानां रोह" आम्नात इति निरुक्तवशत एकस्मिन्नहनि सवनानि त्रीणि प्रातर्मध्यन्दिनतृतीयसवनानि। तत्र प्रातर्मध्यन्दिनेति विशेषणवशतो योगेन लोकानां रोहोऽपि समानन्यायेनैकदिनसम्बन्धी वक्तव्यः। तथा सति आदित्येन प्रत्येहं भ्रमता लोकत्रयं सम्बन्धनीयं भूम्यन्तरिक्षद्यावात्मकमिति प्रतिलोकं गोसङ्ख्याभिप्रायेण वृत्तगोसङ्ख्या त्रिविभाजनीया सा च वृत्तगतदेवसङ्ख्यासमाना प्रतिलोकं गोसङ्ख्या स्यात् २००३३ रूपिणी। तत्र सहस्रतोऽधिकोर्वरिता त्रयस्त्रिंशत्संङ्ख्या देवसङ्ख्यारूपतां नीता एकादश व्यवतिष्ठते। एवं प्रतिलोकं देवसंङ्ख्याया एकादशत्वेन निवित्सु "त्रय एकादशासः" इति वचनं स्पष्टार्थं भवति। किञ्च मन्त्रेष्वपि "ये देवा दिव्येकादशस्थ पृथिव्यामध्येका दशस्थ" अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वमित्यादिषु लोकत्रयाभिप्रायेण देवानामेकादशसंख्यावर्णनं प्रतिलोकमुपपद्यते। सा चकादशसङ्ख्या देवाना प्रतिलोकं तथा सति लोकत्रयाभिप्रायेण साकल्येन देवसङ्ख्या त्रयस्त्रिंशद्रूपिणी भवति।

यत्तु ब्राह्मणे "त्रयस्त्रिंशद्वै देवा" देवानां त्रयस्त्रिंशत्सङ्ख्याकत्वमुक्त्वा तदुपपत्तये "अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्चे"ति देवसङ्ख्या विभज्य प्रतिपादिता सा मन्त्रोक्तदेवसङ्ख्यानुसारेण निविद्गतदेवसङ्ख्यानुसारेण नोपपद्यते तस्य भिन्नाभिप्रायकत्वात्। मन्त्रेषु निवित्सु "त्रय एकादशासः" प्रतिलोकमेकादशसङ्ख्यायोगितोच्यते, ब्राह्मणोक्तविभागे वसवोऽष्टावुच्यन्ते तेषां प्रातःसवनसम्बन्धितया भूलोकसम्बन्धित्वेन भूलोक-

सम्बन्धिनी सङ्ख्या अष्टाविति भवति न तु एकादशरूपिणी। सर्वलोकसम्बन्धिनोः प्रजापतिवषट्कारयोः सङ्ख्याया अत्र भूलोकीयदेवतासङ्ख्यायां योजनेऽपि सा दशसंख्या स्यात् न तु एकादश। एवमादित्यानां तृतीयसवनयोगितया तृतीयसवनसमरूपद्योलोके द्वादश देवानां सङ्ख्या न तु एकादशेति विरोधात्। तस्माद् ब्राह्मणोक्ता संख्या भिन्नाभिप्रायेति।

एवं चोक्तरीत्या निविदुपनिषन्मन्त्रानुसारेण लोकत्रयसम्बन्धी देवानामेकादशत्रयविभागः पूर्वोक्तषष्टिसहस्त्रादिसंख्याया गोरूपत्वस्य तस्याहोरात्ररूपवृत्तसम्बन्धित्वस्य त्रिभिर्गोभिरेको देव इति परिमाणस्य च ज्ञापक इति स्पष्टम्। एवञ्चोक्ताग्नेयसूक्तगतमन्त्रसंख्योपपत्त्या मन्त्रार्थस्य स्पष्टत्वमिति पूर्वमुक्तमेवेति।

ऐन्द्रेषु सूक्तेषूच्यमाना वृत्रनमुचिशम्बरप्रभृतय इन्द्रविनाश्या असुरा अपि तमोरूपाः। इन्द्रस्यादित्यत्वेन तेन विनाश्यत्वं तमस एव भवतीति। तेजस्तमसोस्तु वास्तवविरोधाभावेन सामानाधिकरण्याभावेन विरोधकल्पना तन्मूला युद्धकल्पना। तन्मूलञ्चायुधाद्युपयोगवर्णनप्रकारः। तन्मूल एव सन्धानादिप्रकारः। यथा नमुचिना युद्धे इन्द्रनमुच्योः सन्धिः, इन्द्रेण नमुचेरार्द्रेण शुष्केण वस्तुना दिवा रात्रौ च वधो न कर्तव्य इति। इन्द्रेणापि तत् परिपाल्योषःकाले नमुचेर्वधः कृतः। उषाश्च न दिवा न रात्रिः। तत्रत्यस्याव्यक्तस्य तेजसः अपां फेनत्वकल्पना। अत एव नमुचिसन्धानविरोधो न, यतः फेनो नार्द्रं वस्तु न शुष्कमिति। तदुक्तं ब्राह्मणे मन्त्रे च। मन्त्रः—"अपा फेनेन नमुचेः शिर इन्द्रो दवर्तय" इति। अपां फेनो न शुष्कं नार्द्रमिति ब्राह्मणे प्रतिपादितम्। अप्त्वमव्यक्ततेजस इति पूर्वमुक्तमेव। शम्बरस्य शतपुरीविनाशो वृत्रस्य नवनवतिपुरीविनाशेन व्याख्यातः।

चत्वारिंश्यां शरदि लाभवर्णना "चत्वारिंश्यां शरद्यन्वविन्दद्" इति मन्त्रोक्ता तमःपरत्वेन सुलग्ना। सुमेरौ वसन्तग्रीष्मवर्षर्तुपर्यन्तमादित्यस्योदितस्यानस्तमितस्य सत्त्वेन षाण्मासिकं दिनं तत्र ततः परस्ताच्छरदि रात्रिप्रवृत्तिः। शरदृतुश्च मासद्वयव्यापी। तत्र प्रथमो मासो वारुणस्तदभिन्नसवितुः। तत्रास्तोत्तरवर्तिप्रकृष्टप्रकाशः क्रमेण न्यूनीभवन् भवति। तत्र न तमः। परवर्तिनि मासे च रात्रिकालिकी सन्ध्योषःपदबोध्या। उषसश्च रूपत्रययोगिता मन्त्रेषु प्रोच्यते, तदुक्तं—"त्र्यरुषीणां चतुःशत"मित्यत्र। तद्व्याख्यावसरे भाष्यकारः सायण आह—त्र्यरुषीणां त्रिभागारुणानामिति। "त्र्यरुणप्सव" इति उषसां स्थलान्तरे मन्त्रगतं विशेषणमपि त्रिभागारुणत्वं बोधयति। एवञ्चोषस एको

भागो अरुणरूपः। उषसां नामसु निघण्टौ "श्वेत्ये"ति नामतः श्वेतवर्णोऽपि तासां त्रिभागः। अवशिष्टश्च भागस्तमोरूपत्वेन कृष्णवर्णः। एवं सति अस्तोत्तरवर्ति-मासरूपास्त्रिंशत्पर्यायिरूपाहोरूपास्त्रिंशच्छरदः। शरदृतोस्त्रिंशद्दिवसा इत्यर्थः। ततः परवर्तिसायंसन्ध्यारूपोषसः प्रथमो भागोऽरुणवर्णः दशपर्यायात्मकदिवस-दशकयुतः। मिलित्वा चत्वारिंशत्पर्याया दिनानि वा शरदृतावतीतानि भवन्ति। ततः परवर्तिनि उषसो द्वितीयभागे तमस उपलब्धिस्तां गृहीत्वा चत्वारिंश्यां शरदि असौ लब्ध इति "चत्वारिंस्यां शरद्यन्वविन्ददि"त्यस्य न विरुद्धताऽस्पष्टता वा। स्वनयदानस्तुतौ प्रातःकालीनोषसः सावित्रकालसाहित्येन चत्वारिंशत्पर्याय-पर्यन्तं शोणवर्णत्वं वर्ण्यमानमुपपद्यते "चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणीं नयन्ती"ति।

अत्र सहस्रं सहस्रसंख्याकरश्मियुतमादित्यमण्डलम्। आदित्यस्याग्रेऽ-र्थात् तस्योदयात्पूर्वमित्यर्थः। दशरथस्य दशघट्यात्मककालस्य। सुमेरु-व्यतिरिक्तस्थले। सुमेरौ दशघटीस्थानिनां षष्टिपर्यायाणां ग्रहणम्। दैनन्दिन-गतौ दशघटीष्वपि दैनन्दिनवृत्तगतदशघटीकालोपयोगिवृत्तषष्ट्यशानां मध्ये वा चत्वारिशच्छोणाः शोणवर्णा अश्वा वा गावो वा श्रेणिं नयति श्रेणि-रूपेण दृश्यन्ते। तावत्कालपर्यन्तमरुणिम्नो भासान्। पुर्वोक्तसावित्रः काल उदयपूर्ववर्ती पञ्चघट्यात्मा ततः पूर्ववर्तिपञ्चघटीपरिमित उषसः इति दशघट्य उदयपूर्वकालिकास्तासां चत्वारिंशदंशा उदयसमनन्तग इत्युक्तम्। एवञ्च रथशब्दोऽत्र घटीबोधकः। दशघटीपर्यन्तमुषसः सत्वेन तेषां दशानां रथाना स्वनयदानस्तुतौ वर्णनं—"वधूमन्तो दशरथासो अस्थु"रिति। उषसो वधूत्वेन ग्रहणात्तेषां रथानां 'वधूमन्त' इति विशेषणम्।

पुरुषसूक्ते चोक्तदशकस्योदयात् पूर्वकाले अस्तोत्तरकाले च वर्तमानस्याभि-प्रायेणोच्यते "तस्माद्विराळजायत विराजो अधि पुरुष" इति, विराड् दशाक्षरेति दशत्वसाम्येन उक्तदशरथेषूदयात् प्राग्वर्तिषु अस्तोत्तरवर्तिषु च विराट्त्वं प्रकल्प्योक्तं "तस्माद्विराळजायत विराजो अधि पुरुष" इति। सूर्योषसोः क्रमिक-प्रवृत्तिमभिप्रेत्य उषसः सकाशात आदित्यस्योत्पत्तिवर्णना। उषसो मातृत्वं सूर्यस्य पुत्रत्वम् प्रातः। सायं च सूर्यः पूर्व उषाः परवर्तिनीति गृहीत्वा सूर्य-सकाशात उषस उत्पत्तिवर्णना। उषसो जन्यत्वं सूर्यस्य जनकत्वमिति वर्णना। एतदेव गृहीत्वोषसो दिवो दुहितृशब्देन वर्णना वेदे। उषसोऽदितित्वम्। तदुक्तं निरुक्ते अदितिशब्दस्य अर्थवर्णनप्रसङ्गे—"अदितिरदीना देवमाता" इति। देवस्य सूर्यस्य माताऽदितिः। उषाश्च सूर्यस्योत्पादयित्रीत्युक्तमेव। तस्या

अदितेः सम्बन्धित्वेन मन्त्रे उच्यते—"अदितेर्दक्षो अजायत दक्षाद्वदितिः परि" इति। तदपि उक्तरीत्यैवोपपद्यते। आदित्योषसोर्दर्शनमुत्पत्तिरदर्शनं मरणमिति ऐतरेयब्राह्मणानुसारेण मन्त्रेषूच्यते।

ऐतरेयब्राह्मणे "अथातो ब्रह्मणः परिमर" इत्यस्मिन् खण्डे "एताः पञ्च-देवता परिम्रियन्ते विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निरिति" तासां क्रमेण तत्र दर्शनेनोत्पत्तिरदर्शनेन मरणं प्रतिपादितम्। आदित्यस्येवोषसोऽपि दर्शनमुत्-पत्तिरदर्शनं मरणमिति गृहीत्वा मन्त्रे "एकः सुपर्णः स समुद्रमाविशत्स इदं विश्वं भुवनं विभर्ति। तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेळिह स उ रेळिह मातरम्" इति। रेळिह विनाशयति। परस्परविनाशकृत्त्वमुच्यमानं सङ्गच्छते। एवञ्चो-दयात् पूर्वमस्तमयादुत्तरं चादित्यस्य दशघटीपर्यन्तः सवित्रुषसोः कालः। तत्रोषसोऽपि स एव काल इति कदाचन व्यवह्रियते। उषसश्च सूर्यपत्नीत्व-वर्णनात्तस्मिन् घटीदशकात्मको दशरथव्यवहारः। तत्र दशरथे स्वनयदान-स्तुतौ वधूमन्त इति विशेषणं संगच्छते इति दिक्।

एवं—चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति॥

एतन्मन्त्रव्याख्यानेऽसामञ्जस्यं व्याख्यातॄणाम्। तथाहि—अत्र व्याकरणभाष्य-कारा एतन्मन्त्रव्याख्याने आहुः, 'चत्वारि वाक्परिमितानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च तानि विदुर्ब्राह्मणा ये मनीषिणः। मनस ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति। गुहायां त्रीणि निहितानि नेङ्गयन्ते न निमिषन्तीत्यर्थः, तुरीयं वाचो मनुष्या वदन्ति। तुरीयं वा एतद् वाचो यन्मनुष्येषु वर्तते तच्चतुर्थमित्यर्थः'।

अत्र मन्त्रे 'पद'पदं पदजातिपरम्। नामाख्यातोपसर्गनिपातरूपपद-जातिचतुष्टयं वाचः। मनीषिभिर्यानि विज्ञायन्ते ब्राह्मणैः। तत्र त्रीणि गुहायां निहितानि गुप्तानि सर्वेषाम्। वाचश्चतुर्थं तुरीयं पदं मनुष्या वदन्ति। अत्र तुरीयमित्युक्त्या पूर्वोक्तपदचतुष्टसङ्ख्यापूरकं तत्। तदपि पदमेव। तच्च मनुष्यैरुच्यते। कथमिदं सम्भवति। पूर्वोक्तपदचतुष्टयस्यापि मनुष्यैः प्रयोगात्। एवञ्च सति मन्त्रार्थोऽविस्पष्टः। तुरीयपदस्य सम्यग्विज्ञानाभावात्।

अतः कैयटेन पदचतुष्टये प्रत्येकं चतुर्थभागं मनुष्या वदन्तीति व्याख्यातम्। तत्र मूले केवलं पदचतुष्टस्योक्त्या प्रत्येकं भागचतुष्टयकल्पनाऽप्रामाणिकी कल्पनीया। तुरीयपदस्य मूलगतस्य पदचतुष्टयसङ्ख्यापूरकत्वेन प्राप्तस्य कल्पित-प्रत्येकपदगतप्रकारसम्बन्धिसङ्ख्यापूरकत्वेन कल्पनस्याञ्जस्येन मूलतोऽप्रतीतेः।

उद्योतकाराः भाष्यगतपदजातानीति पदस्यार्थं ब्रुवते परापश्यन्तीमध्यमावैखर्यः नामादीनि च। एवञ्च मूलगतस्य चत्वारि पदानीत्यस्य परादिचतुष्टयं नामादिचतुष्टयं चार्थं इत्यर्थः। तत्र मूले सकृदुक्तस्य चत्वारि पदानीति पदद्वयस्यैकविधपदचतुष्टयबोधकस्योभयविधपदचतुष्टयबोधकत्वकल्पनस्य मूलस्वरसतोऽप्राप्तिः। तथोक्तद्विविधपदचतुष्टयमध्ये नामादिरूपं पदचतुष्टयं प्रत्येकं चतुष्पादं चतुष्प्रकारमित्यर्थः। तत्प्रकारगतसङ्ख्यापूरकत्वं मूलगततुरीयशब्दस्य। एवं सति असङ्ख्यानि नामादीनि तन्मध्ये स्वल्पान्येव पदानि मनुष्यैरुच्यन्ते। सकलपदवेदने शास्त्रदृष्ट्या वैयाकरणा एव प्रभव इति तस्यार्थः। तदुक्तं कैयटेन—तत्र चतुर्णां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा वदन्तीति।

एवं सति प्रथमतः पदचतुष्टयद्वयं प्रकल्प्य तन्मध्ये एकस्यैव चतुष्प्रकारता नापरस्येति तन्मध्ये स्वल्पपदानां चतुर्थभागत्वकल्पनेति बहुविधमलौकिकं कल्पनीयं भवति। नामादीनामसङ्ख्यतया प्रयुज्यमानकतिपयनामादीनां चतुर्थभागत्वकल्पनाया असम्भवात्। तस्मादल्पप्रयोगपरत्वं तस्य वक्तव्यमिति न समञ्जसैषा कल्पना।

एतदर्थं छायाकारेणोद्योतस्थस्य नामादिमध्ये एकैकं चतुष्पादमित्यस्य व्याख्या क्रियते, चतुष्पाद परादिभिरेवेत्यर्थ इति। तत्रासंख्यनामादिमध्ये कतिपयपरत्वं न तुरीयशब्दस्य किन्तु नामादीनां प्रत्येक परादयो ये भेदास्तत्रान्तिमभेदो यो वैखर्याख्यस्तत्परत्वं तुरीयशब्दस्येति। तत्रापि पक्षे सकृदुक्तस्य चत्वारि पदानीत्यस्यानेकार्थपरत्वदोषतोऽनिस्तारः। तस्मान्न वैयाकरणरीत्या मन्त्रार्थः समञ्जसः।

निरुक्तपरिशिष्टे तु पदचतुष्टयं नानाप्रकार मतभेदेन प्रदर्शितम्। कतमानि तानि पदजातानि? (१) ओंकारो महाव्याहृतयश्चेत्यार्षम्, (२) नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः। (३) मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः। (४) ऋचो यजूषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः। (५) सर्पाणां वाग् वयसां क्षुद्रसरीसृपस्य चतुर्थी व्यावहारिकीत्येके। (६) पशुषु तूणवेषु मृगेषु आत्मनि चेत्यात्मप्रवादाः। तत्र ब्राह्मणमपि प्रदर्श्यते, अथापि ब्राह्मणं भवति "सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्यां साग्नौ सा रथन्तरे यान्तरीक्षे सा वायौ सा वामदेव्ये या दिवि सादित्ये या बृहति सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या देवानां या च मनुष्याणामिति"।

एतेषामपि प्रकाराणामाञ्जस्येन मन्त्रार्थप्रतिपादनेऽनुपयोगः। प्रथमपक्षे मनुष्यैस्तुरीयवचनस्यानुपपत्तिः। ओंकारादीनामपि मनुष्यैः प्रयोगात्। वैयाकरणानां मतं पूर्वं परीक्षितमेव। तृतीये कल्पे कल्पशब्दो वैदिकभागपरो वा श्रौतसूत्रादिग्रन्थपरो वेति सन्दिग्धम्। आद्ये गाथादीनामसंग्रहोऽकस्माच्चतुर्थीत्वेन व्यावहारिक्या ग्रहणे बीजाभावः। चतुर्थपक्षे वेदत्रयमुक्त्वा आथर्वणस्य चतुर्थस्य वेदस्याभिप्रायेण ग्रहणे प्राप्ते तं परित्यज्य तुरीयमिति मन्त्रांशानुगुण्याय व्यावहारिकीति हठाद् ग्रहणस्यायुक्तत्वम्। अथ ऋगादिभिरेवाथर्वणोऽपि सङ्गृहीत इति व्यावहारिक्याश्चतुर्थ्या ग्रहणे न दोष इति। तदपि न। सृष्टेरुत्पत्तिमारभ्याप्रलयं व्यवहारकालस्तत्र वाण्या मनुष्यैरिव पशुभिरप्युपयोगेन मनुष्या वदन्तीत्यंशस्य मन्त्रगतस्यासंलग्नकता। पञ्चमकल्पोऽपि न युक्तः। सर्पशब्देन क्षुद्राणां महतां च सर्पाणां ग्रहणसम्भवने पुनः क्षुद्रसरीसृपग्रहणमयुक्तम्। किञ्च पश्वादिग्रहणाभावेन न्यूनतापि। उक्तरीत्या मन्त्रांशयोजनाय व्यावहारिकीत्यस्य ग्रहणस्य दुष्टत्वं पूर्वमुक्तमेव। षष्ठकल्पे पशूनां मृगाणामप्यात्मत्वेन चातुर्विध्यस्यैव तत्रासंगतिः। ब्राह्मणोल्लेखस्तु उक्तमन्त्रार्थानुपयोगित्वेन तदुल्लेखस्यानवसरप्राप्तत्वमिति।

एतद्व्याख्यायां दुर्गाचार्येणोच्यते—नामाख्यातोपसर्गनिपातरूपपदचतुष्टये तुरीयं चतुर्थं भागमर्थज्ञानाय मनुष्या वदन्ति वेदयन्ते। तत्राप्रसिद्धार्थत्वादाख्यातोपसर्गनिपातपदानि अर्थं न वेदयन्ते। नामानि तु प्रसिद्धार्थत्वाद् गवादीन् वेदयन्त्यर्थानिति। तस्य प्रसिद्धतरार्थत्वादर्थज्ञानायेत्यध्याहार इत्यर्थः। अत्रापि अध्याहारः कर्तव्यः। तुरीयमित्युपदेशक्रमेण चतुर्थमित्यर्थः। उपदेशक्रमश्च प्रसिद्धत्वान्नामाख्यातोपसर्गनिपाता इति। तत्र चतुर्थं निपातपदमेव न नामपदमित्यभिमतार्थसम्बन्धो न स्यादिति।

एवं चास्मिन् मन्त्रे पदशब्दार्थस्यानिर्णयेन मन्त्रार्थोऽविस्पष्ट इति प्राप्ते सूर्यैकदेवता वेदे स्तूयत इति मतानुसारेण तत्स्पष्टत्वार्थं प्रयत्यते। तथाहि—तत्र मन्त्रे वाक्परिमितानीत्यस्य वाचा वाक्त्वेन परिमितानि पदानि स्थानानि चत्वारीत्यर्थः।

अयं भावः—वेदे सर्वत्रादित्यस्तवः। स च आदित्य उपाधिभेदवशतो विभिन्नैर्नामभिः स्तूयते। यथा प्राग्दिशमुपाधिं कृत्वा स इन्द्र इत्युच्यते। उदयन्नसौ भगः, सरणात् सूर्य इत्येवं मण्डलस्यासत्ताकालमुपाधिं कृत्वा स वागित्युच्यते। आदित्यमण्डलस्यासत्ता नाम दर्शनाभावः स चास्तमयमारभ्या-पुनरुदयं भवति। तदानीं स वागित्युच्यते। अथवा वाचः सत्त्वं मण्डलस्या-

सत्ताया अर्थाददर्शनस्य काले भवति। तच्च मन्त्रेणोच्यते। तथा हि मन्त्रः—

तिस्रो मातृस्त्रीन् पितॄन् बिभ्रदेक
ऊर्ध्वस्तस्थौ नेममवग्लापयन्ति।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे
विश्वविदं वाचमविश्वमिन्वाम् ।। इति ।।

अत्र मातरो भूलोकास्ते च त्रयः। पितरो द्योलोकास्तेऽपि त्रयः। तान्बिभ्रदसावूर्ध्वस्तिष्ठति। ते धृताः षड्लोका इममादित्यं धर्तारं नावग्लापयन्ति, ग्लानं न कुर्वन्ति। अनायासत इमाल्लोकानसौ धारयतीत्यर्थः। अमुष्य दिव आदित्यस्य पृष्ठेऽसत्ताकालेऽदर्शनकाले विश्वविदं पदार्थजातं बोधयन्ती प्रकाशयन्तीमिति वा अविश्वमिन्वामसर्वव्यापिनीम्। आदित्यमण्डलस्य तया अव्यापनादविश्वमिन्वासौ। एतादृशी वाचं मन्त्रयन्ते। मन्त्रैः प्रकाशयन्ति मन्त्रैर्वेदयन्ति कवयः। 'मन्त्रयन्ते'-पदं न मत्रि गुप्तपरिभाषण इत्यस्माद्धातोर्निष्पन्नं किन्तु मन्त्रशब्दात् प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चेत्यनेन णौ सम्पन्नम्। मन्त्रैः प्रतिपादयन्ति प्रकाशयन्ति मन्त्रयन्ते इति। सायणाचार्यैः पूर्वां व्युत्पत्तिं गृहीत्वा व्याख्यायते। एतावता वाण्याः स्थितिरादित्यस्यासत्ताकाले इति भवति। तदसत्ताकालश्च तस्यास्तमयमारभ्यातदुदयमिति पूर्वमुक्तम्। आदित्यस्यासत्ताकाले वाण्याः सत्त्वमयमर्थश्च प्रश्नपूर्वं मन्त्रेण प्रतिपाद्यते। तथाहि मन्त्रः—

पृच्छामि त्वा परमन्तं पृथिव्याः
पृच्छामि यत्र भुवनस्य नाभिः।
पृच्छामि त्वा वृष्णोरश्वस्य रेतः
पृच्छामि वाचः परमं व्योम ।। इति।

तत्र वाचो व्योम वाचोऽसत्तायुक्तं स्थानं तद्विषयिणी मन्त्रेण पृच्छा। तच्च स्थानं परम न तु अवमं पृच्छ्यते। इति।

अयं भावः—आदित्यस्योदयात्मरूपं सन्दर्शनं स्थानभेदेन भिन्नरूपम्। भुवो दक्षिणपार्श्वे यदादित्य उदेति तदानी भुवोऽपरेऽर्थादुत्तरे पार्श्वे सोऽस्तमेति। यदा च भुव उत्तरे पार्श्वे उदेति तदानी भुवो दक्षिणे पार्श्वे सोऽस्तमेति। इदं षाण्मासिकमुदयनमस्तमयनं सुमेरुकुमेर्वोर्भवति। भुवो मध्यदेशे तु प्रत्यहं कियत्-कालं च तस्य दर्शनमदर्शनं च। तदपि यदा एकत्र देशे तस्य दर्शनं व्यक्तं तदानीं तद्विरुद्धदेशे तस्यादर्शनमिति विभिन्नरूपता तस्य। तत्र कुमेरुर्भुवो दक्षिण-पार्श्वे सुमेरुश्च भुव उत्तरपार्श्वे। तत्र दक्षिणपार्श्वो दक्षिणदिग्गतः। दक्षिणस्या

दिशश्चावाक्त्वमधोवर्तित्वम्। अत एव तस्या अवाचीशब्देन व्यवहारो वेदेऽपि। लोकेऽपि सैव दिगवाचीशब्देनोच्यते। यथा अमरकोशे उच्यते—प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमा इति। अवाची अवस्तादञ्चति अधोगमनादवाची। अधोवर्तिनीति यावत्। तद्विरुद्धा दिगुत्तरा। तस्या उत्तरात्वमूर्ध्वत्वात्। एवं सत्युत्तरस्या ऊर्ध्वत्वे दक्षिणस्या अधोवर्तित्वं भवति। उत्तरदिग्गतानामूर्ध्वत्वेन परमत्वेन व्यवहारो वेदे। यथा वैष्णवसूक्ते विष्णोः पदविषय उच्यते—"परमं पदमवभाति भूरि"। "विष्णोः पदे परमे मध्वउत्सः" इति। एवं च दक्षिणस्यां दिशि कुमेरावादित्यस्यासत्ताकालेऽर्थाद्रात्रौ वर्तमाना वाक् तस्यास्तत्रादित्योदयेऽसत्ता। तदेव च तस्या वाचो व्योम। यथा कुमेरावेवं सुमेरावादित्यस्यासत्ताकाले वर्तमाना वाक् तत्र तदुदये तस्यास्तत्रासत्वरूपं व्योम। तत्र दक्षिणदिग्गतं व्योम अवममधोवर्ति। उत्तरदिग्गतं च व्योम परममूर्ध्वदिग्वर्ति। तस्य परमस्य व्योम्नो मन्त्रे पृच्छा—पृच्छामि वाचः परमं व्योमेति। तत्रोक्तमन्त्रगतप्रश्नानामुत्तराणि परवर्तिना मन्त्रेणोच्यन्ते। यथा—

इयं वेदिः परो अन्तः पृथिव्याः
अयं यज्ञो भुवनस्य नाभिः॥
अयं सोमो वृष्णो अश्वस्य रेतः
ब्रह्मायं वाचः परमं व्योम॥ इति।

ब्रह्मा उत्तरदिग्गत आदित्यः। स तु वाच उत्तरदिग्गतायाः परमं व्योम तद्रूप इति। एवं च वाक् रात्रौ वर्तमाना इति भवति। एवं सति मन्त्रे मन्त्रयन्ते इत्यस्य मन्त्रेण प्रतिपादयन्तीत्येवार्थ उचितो न तु मन्त्रणां कुर्वत इति। एवं सति सायणादीनां मन्त्रि गुप्तपरिभाषण इत्यस्मात् प्रकृते तत्पदव्युत्पादनमयुक्तम्। अस्मिन्नर्थेऽयं मन्त्र एव प्रमाणमित्यर्थः।

एवं च वाग् रात्रौ वर्तमाना भवति। रात्र्याश्च यामचतुष्टयेन विभक्तता। तत्र यामोपाधितया रात्र्याः, वाच इमानि चत्वारि स्थानानि भवन्ति। तानि वाचा मीयन्ते इति वाक्परिमितानि। तानि ब्राह्मणा विदुर्मनीषिणः। तत्र प्रथमयामत्रयस्य गुहायां वर्तमानत्वम्। अन्धकारो गुहा तत्र वर्तमानत्वम्, तमोमयत्वमिति यावत्। गुहायां वर्तमानत्वान्नेङ्गयन्ति न प्रकाशितानि भवन्ति। तानि यामत्रयरूपाणि वाचस्त्रीणि पदानि। वाचस्तुरीयं पदं रात्र्याश्चतुर्थयामरूपं स्थानं, मनुष्या इति मनुष्यावासस्थानं भूलोक इति वदन्ति। एवं सति मन्त्रे 'मनुष्या' इति पदं प्रथमान्तं न वदनक्रियाकर्तुरभिप्रायेण किन्तु अध्याहृतेतिपदवशत उक्तकर्मकारकविभक्तिरूपप्रथमान्तं कर्मकारकबोधकम्। अर्थाद्वाचश्चतुर्थं पदं मनुष्यलोक इति भवति।

अयं भावः—सोमयागे सवनानां क्रम आदित्येन लोकारोहक्रमवत्। सवनानि च प्रतिदिनमिति लोकारोहक्रमोऽपि प्रतिदिनमिति भवति। लोकाश्च त्रयो भूलोकान्तरिक्षलोकद्योलोकभेदेनेति। आदित्येन प्रत्यहं त्रयो लोका आरुह्यन्ते। तत्रोक्तक्रमविषये ब्राह्मणम् "एषां वै लोकानां रोहेण सवनानां रोह" इति। तदर्थस्तूक्त एव। प्रतिदिनं प्रातर्भूलोकः प्रातःसवनं च। ततोऽन्तरिक्षलोको मध्येऽह्नो माध्यन्दिनसवनञ्च, ततो द्योलोकस्तृतीयसवनं च। एवं सति उक्तक्रमेणादित्यस्त्रीन् लोकानारुह्यारोहविपरीतक्रमेणावरोहति प्रतिदिनम्। तत्र प्रथमदिन उक्तरीत्या त्रीन् लोकानारुह्य विपरीतक्रमेणावरुह्य द्वितीयदिने लोकान् पूर्वदिनवदारोहति। तत्र रात्रावरोहक्रमे कुत आरभ्य मनुष्यलोकमवारोढुमसौ प्रवर्ततेऽर्थान्मनुष्यलोकारम्भः कुत इति प्रश्नस्योत्तरं मन्त्रे—तुरीयं वाचो मनुष्या वदन्तीति। वाचस्तुरीयं पदं रात्र्याश्चतुर्थं याममारभ्य भूलोकस्य प्रवृत्तिरिति। वाचस्तुरीयं पदं मनुष्या मनुष्यलोक इति यावत्। एवमुत्तरमुक्तमन्त्रेणोच्यते। अयमर्थः प्रकारान्तरेण मन्त्रान्तरेणोच्यते। तथाहि पूर्वोक्तप्रश्नप्रतिपादके मन्त्रे प्रथमः प्रश्नः—"पृच्छामि त्वा परमन्तं पृथिव्या" इति। तस्यायमर्थः—रात्रौ लोकानामवरोहे अन्तरिक्षलोकस्यावसानं भूलोकप्रारम्भश्च, ततः पुनरारोहे दिनान्तरे भूलोकस्यावसानमन्तरिक्षलोकस्य प्रारम्भश्च स्याताम्। उभयोः प्रारम्भावसानयोर्मर्यादारूपत्वं प्रतिलोकम्। तत्रोदयसविधवर्ती भूलोकस्यावसानरूपोऽन्तः सविधवर्ती दिनसम्बन्धित्वात्। यश्च रात्रौ भूलोकारम्भरूपोऽन्तः स विदूरवर्ती रात्रिसम्बन्धात्। स भुवः परोऽन्तस्तद्विषयिणी पृच्छा मन्त्रे क्रियते—पृच्छामि त्वा परमन्तं पृथिव्या इति। तस्योत्तरमुच्यते परवर्तिना मन्त्रेण—"इयं वेदिः परो अन्तः पृथिव्या" इति। तत्र वेदिप्रारम्भ एव पृथिवीलोकप्रारम्भ इति तत्रोत्तरम्। तस्यायं भावः—वेदिप्रारम्भ एव भूलोकस्य रात्रावादित्येनावारुह्यमानस्य परो विदूरवर्ती अत्र प्रारम्भरूपोऽन्त इति। एवं सति वेदिप्रारम्भतो भूलोकः प्रवर्तत इति तदर्थः। वेदिप्रारम्भश्च कुत इति विज्ञेयम्। वेदिश्च सवितुः कालमारभ्य प्रवर्तते। तथाहि वेदिर्यज्ञेऽग्नित्रयमध्यवर्तिनी भूमिरिति प्रसिद्धम्। तत्र पूर्वस्यां दिश्याहवनीयोऽग्निः। दक्षिणस्यां दक्षिणाग्निः पश्चिमायां गार्हपत्योऽग्नि., इति त्रयोऽग्नयस्तेषां स्थानानि। तत्राग्नित्रयमध्ये विद्यमानवेद्या वामांसस्थाने अध्वर्योः स्थानम्। वामश्रोण्यां होतुः स्थानम्। होतुः स्थानमारभ्य वेदिः प्रवर्तते। होतुः स्थानमेव वेदिप्रारम्भदेश इति। अध्वर्योः स्थानं च पूर्वस्यां वेद्यन्तभागे, तच्च वेद्या वामांस इति पूर्वमुक्तमेव। तत्र

होत्रध्वर्युभ्यामादित्यस्य गत्यनुकारः कर्मणा मन्त्रेण च क्रियते प्रतिपाद्यते। तत्र होत्रा प्रयुज्यमानो मन्त्रो दर्शपूर्णमासयागे आश्वलायनेन श्रौतसूत्रे दर्शितः।

"षष्टिश्चाध्वर्यो नवतिश्च पाशा अग्निं होतारमन्तरा विचृत्ताः।

सिनन्ति पाकतिधीर एती"ति। अनेन मन्त्रेण स्वस्थानतो होतोत्थाय ऋतस्य पन्थामन्वेमि होतेत्यभिव्रम्याऽध्वर्युमन्वारभेतेति।

अत्रादित्यं स्वस्थानं प्राप्तमनुकुर्वन्नसौ होता स्वस्थानमुपर्युक्तमन्त्रेण प्रतिपाद्य ततः स्वस्यादित्यरूपत्वं मत्वादित्यवाक्यत्वेन ब्रवीति "ऋतस्य पन्थामन्वेमि होता" इति मन्त्रम्। ऋतस्य यज्ञस्य पन्थां पन्थानमनु अनुसृत्येमि गच्छामि होता होतृरूप इत्यर्थस्तस्य मन्त्रस्य। तं मन्त्रमुच्चार्य तत्स्थानतोऽध्वर्युस्थानं करेण स्प्रष्टुमिच्छन्नसौ होता स्वस्य तावद्दूरपर्यन्तं करस्य लम्बमानत्वाभावेन किञ्चिदग्रतो गत्वा करस्पर्शयोग्यं स्थानमादित्यमनुकुर्वंस्तत्स्थानतोऽध्वर्युमंसेऽन्वारभते स्पृशति पाणिना। पाणिश्च यथाध्वर्योः पार्श्वं स्पृशेदेवम्। तथा सति अध्वर्युस्पर्शनेनोभाभ्यां होत्रध्वर्युभ्यां मन्त्रः प्रोच्यते इति तत्र सूत्रे प्रतिपादितम्।

तत्र होतृस्थानसूचको होत्रा पठ्यमानो मन्त्रः पूर्वं प्रतिपादितः। तत्राध्वर्युं सम्बोध्योच्यते—"षष्टिश्चाध्वर्यो! नवतिश्च पाशा अग्निं होतारमन्तरा विचृत्ता" इति। तत्र के ते पाशाः कुत एतावन्त इति विचारे आदित्यपरतयोभयं समाहितं भवति। तथा सति पाशानां वर्णनेन वेदे पाशा वरुणस्येति प्रसिद्ध्या वारुणाः पाशा गृह्यन्ते। वरुणश्च पश्चिमदिक्सम्बन्धी देव इति पश्चिमदिक्सम्बन्ध आदित्यस्याभिव्यक्तो भवति। पश्चिमां दिशं प्राप्तोऽस्तमितो भवतीत्यादित्यस्यास्तप्राप्तिर्ज्ञायते। अस्तमितोऽसौ वरुणेन पाशैर्बध्यतेऽतस्ते पाशा अस्ततः प्रवर्तन्ते। बद्धानां पाशानामेकैकशश्छेदनं कृत्वासावादित्योऽग्रतो गच्छति। एवं गच्छतस्तस्य तत्स्थानप्राप्तिर्यद्धोतुःस्थानमिति भवति। अथवा यत्र स्थाने प्राप्त आदित्यो होतेति व्यवह्रियते। तत्स्थानप्राप्तिपर्यन्तमादित्येन क्रमशश्छिन्नानां पाशानां संख्या मन्त्रे प्रोच्यते षष्टिश्च नवतिश्चेति। अर्थादुभययोगेन सार्धपञ्चाशत्पाशाश्छिन्नाः। ते च अग्निं होतारमन्तरेति। अस्तं यन्नादित्योऽग्निमनुप्रविशतीति वेदे वर्णनादसावग्निः पश्चिमदिक्स्थो गार्हपत्यसंज्ञितो भवति। तत आरभ्य होतृस्थानपर्यन्तं मध्ये इत्यर्थः। आदित्येन दैनन्दिनगत्या वृत्ताकारः परिभ्रमः क्रियते। तत्र दिनार्थानां वृत्तभागानामंशसंज्ञितानामशीत्युर्ध्वं शतमतीतं रात्र्यर्थानामंशानां मध्ये एतावन्तोंऽशा अतीताः। अंशानामुपाधितया स्वीकारं कृत्वा तावन्तः पाशाश्छिन्ना इत्युक्तम्। तावतामंशानां तेनातिक्रमः कृत इति। तावतासौ होतृस्थानं

प्राप्तः। यतो मन्त्र उक्तमग्नि होतारमन्तरा च्छेदस्तावतां पाशानामिति। एवञ्च होतृस्थानतो राश्यवसानपर्यन्तं राश्यर्थानां वृत्तगतानामंशानां मध्ये त्रिंशदंशा अतिक्रान्तव्या अवशिष्यन्ते। राश्यवसानस्थानमध्वर्योः। होतृस्थानं गतस्यादित्यस्य किरणा अध्वर्युस्थानं स्पृशन्ति इति। अध्वर्युस्पर्शस्तत्र होत्रा कर्तव्य उक्तः। एतावता होतृस्थानतस्त्रिंशदंशास्तावद्भिरंशैः पञ्च घट्यो भवन्ति, स च सावित्रः कालः सावित्रकालप्रारम्भो होतृस्थानतः। वेदिश्च दर्शपूर्णमासयोर्होतृस्थानतः प्रारब्धा भवति। अत एव होतुः स्थानं वेद्या वामश्रोण्यां भवतीति। वेद्या अन्तश्चाध्वर्युस्थान इति तत्स्थानं वेद्या वामांसे इति। एतावता वेदिः सावित्रकाले भवतीति सिद्धम्। स च राश्याश्चतुर्थो यामः। वाचस्तुरीयं पदमिति तत्र भूलोक इत्यभिप्रायेण प्रश्नोत्तरमन्त्रे उच्यत--इयं वेदिः परो अन्तः पृथिव्या इति। तत्र पृथिव्या अन्तस्य परत्वेन विशेषणादसौ विदूरवर्ती रात्रिगतोऽन्त इति भवति। अर्थादेतत्स्थानतो भूलोकः प्रवर्तते इति भवति। एवं सति पूर्वोक्ते वाक्स्तावके मन्त्रे "तुरीयं वाचो मनुष्या वदन्ती"त्यस्य न वाचस्तुरीयं पदं मनुष्या वदन्ति मनुष्यानां वदने कर्तृत्वस्य प्रतिपादकं, किन्तु उक्तरीत्या तत्पदं मनुष्या इति मनुष्यलोक इति भूलोक इति वा इतिपदयोगेन मनुष्यलोकबोधकमिति वेदविज्ञाः कवयो वदन्तीत्यर्थ एवेति स्पष्टम्।

अत एव मन्त्रान्तरे "यद्वाग्वदन्त्यविचेतनानि" इति, "तां विश्वरूपाः पशवो वदन्ति" इत्यस्य न विरोधः। अन्यथा तत्रापि अविचेतनानाम्, चेतना मनुष्या, विचेतनाः काष्ठलोष्टादयः, अविचेतनाः पशुपक्ष्यादयः। तत्र "तुरीयं वाचो मनुष्या वदन्ति" इत्यत्रेवात्रापि पशुपक्ष्यादयस्ता वाच वदन्ति इत्यर्थः कर्तव्यः स्यात्। एवं ता पशवो वदन्तीत्यपि। तथा सति पूर्वमन्त्रे मनुष्या वदन्तीत्यनेन विरोधः स्यात्।

एवं च सवितृकालतो वेदिः प्रवर्तत इति स परोऽन्त. पृथिव्याः पृथिवीलोकस्य। ततस्तस्य प्रारम्भ इति यावत्। सवितृकालस्य राश्याश्चतुर्थयामे प्रवृत्तिर्गिति स चतुर्थयामो वाचस्तुरीय पदं तदेव मनुष्या इतीत्यनेन भूलोकरूपमिति। एवं सति पूर्वोक्तस्य चत्वारीति मन्त्रस्य स्पष्टार्थत्वमिति।

एवं 'तदद्य वाच' इति मन्त्रे प्रयुज्यमानपञ्चजनशब्दस्यार्थविषये व्याख्यातॄणां नानाविधं व्याख्यानमिति तद्वशतस्तस्य मन्त्रस्यार्थो न विस्पष्टः। तथाहि स मन्त्रः—

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम।
ऊर्जाद उत यज्ञियासः पञ्चजना मम होत्रं जुषध्वम्॥ इति।

अयं मन्त्रो निरुक्तकृता व्याख्यायते। यथा—

तदद्य वाचः परमं मंसीय येनासुरानभिभवेम देवाः। असुरा असुरताः स्थानेष्वस्ताः स्थानेभ्य इति वा। अपि वा असुः प्राणनामास्तः शरीरे भवति तेन तद्वन्तः। सोर्देवानसृजत तत् सुराणां सुरत्वम्। असोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते। ऊर्जाद उत यज्ञियासः। अन्नादाश्च यज्ञियाश्च। ऊर्गित्यन्ननामोर्जयतीति सतः। पक्वं सुप्रवृक्णमिति वा। पञ्चजना मम होत्रं जुषध्वम्। गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके। चत्वारो वर्णा निषादश्च पञ्चम इत्यौपमन्यवः। निषादः कस्मान्निषदनो भवति, निषण्णमस्मिन् पापकमिति नैरुक्ताः। यत्पाञ्चजन्यया विशा। पञ्चजनीनया विशा। पञ्च पृक्ता सङ्ख्या स्त्रीपुंनपुंसकेष्वविशिष्टेति।

दुर्गाचार्येणास्य व्याख्या क्रियते—सौचीकस्याग्नेरार्षम्। तस्य विश्वैर्देवैः संवादः। तत्रेयं होतृजपे विनियुक्ता।

तद् वीर्यं वाचः परममुत्कृष्टमहमद्य मंसीय मन्ये, जाने इत्यर्थः। तेन वीर्येण किम् इति। येनासुरान् अभिभवेम वयम्। हे देवाः? ऊर्जादः, अन्नभक्षयितारः। अपि च हे यज्ञियासः यज्ञसम्पादिनः देवा यूयम्। अपि च हे पञ्चजना मनुष्या निषादपञ्चमा वर्णाः। मम इदं होत्रं जुषध्वम् अनुगृह्णीध्वमिति समस्तार्थ इति।

अत्र निरुक्तकारेण तच्छब्दस्यार्थो विस्पष्टतया नोक्तः। दुर्गाचार्येण तस्य वीर्यपरत्वं मन्यते, यतोऽत्र मन्त्रेऽसुराभिभवे तस्य साधनत्वमुच्यते येनेति वचनेन। भाष्यकारस्यायमेवाभिप्रायः प्रतीयते। अत्र सन्देहास्पदपञ्चजनशब्दार्थविषये मतद्वयं निरुक्तभाष्यकृता प्रदर्शितं यथा 'गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येक' इत्येकीयं मतम्। 'चत्वारो वर्णा निषादः पञ्चम' इत्यौपमन्यवमतमपरम्। अत्र निषादशब्दविषये दुर्गाचार्येण मतद्वयं प्रतिपाद्यते। निषादः प्राणिवधजीवन इत्येकम्। निषादः सौधन्वन इत्येके इत्येकीयं मतमपरम्।

ऐतरेयब्राह्मणे वैश्वदेवशस्त्रप्रशंसावसरे उच्यते—"सर्वेषां वा एतत् पञ्चजनानामुक्थं यद्वैश्वदेवम्, देवमनुष्याणां गन्धर्वाप्सरसां नागानां च पितृणां च" इति। अत्र पञ्चजना इत्युच्यते निर्दिश्यन्ते चत्वारः, देवमनुष्याः (१) गन्धर्वाप्सरसः (२) नागाः (३) पितरः (४) इति। कथमिदं संगतं स्यादित्यभिप्रायेण सायणभाष्यकारेण तदीयभाष्य उच्यते—अत्र देवा इत्येको राशिः मनुष्या इत्यपर इति उक्तरीत्या पञ्चजना इति। तत्र देवाः मनुष्याः गन्धर्वाप्सरसः नागाः पितर इति पञ्चजना मन्यन्ते। एवं सति निरुक्तकारोल्लिखितपञ्चजना गन्धर्वाः

पितरो देवा असुरा रक्षांसि इत्यनेन विरोधः, अत्र मनुष्याणां नागानां चाग्रहणात्। असुराणां रक्षसाञ्चातिरिक्तानां ग्रहणम्। तेषामपि पञ्चजनत्वमिष्टमिति तु न वक्तुं शक्यम्। ब्राह्मणे सर्वे पञ्चजना एत इत्युक्त्वा देवमनुष्या गन्धर्वाप्सरसो नागाः पितर इति निर्देशात्, एत एव पञ्चजना नापरे इति विज्ञानम्। एवं निषादपञ्चमाना चतुर्णा ग्रहणमित्यपि उक्तब्राह्मणविरुद्धम्। किञ्च तत्र निषाद-शब्दार्थविषयेऽपि मतभेदस्य दुर्गाचार्येणोक्तेः। एवं सति पञ्चजनशब्दार्थस्या-विज्ञानान्मन्त्रार्थोऽविस्पष्टः।

अत्र वस्तुतस्तच्छब्देन व्योम्नो ग्रहणमुचितम्। तच्च वाचो व्योम आदित्य.। "पृच्छामि वाचः परमं व्योम" "ब्रह्मायं वाचः परमं व्योम" इति प्रश्नप्रतिवचनाभ्याम्। तत्र व्योम्नः परममिति विशेषणादपरविधतायाः प्रतीतेः। सा चापरा विधा अस्मिन् मन्त्रे प्रथममिति शब्देनोच्यते। प्रथमशब्दस्य पूर्वशब्द-समानार्थता। पूर्वशब्दश्च प्रायेण वेदे पूर्वाञ्चनवशतोऽर्थं बोधयति। तच्चादित्या-दीनामिति ते पूर्वादिशब्दैर्बोधिता भवन्तीति पूर्वं प्रतिपादितम्। एवं सत्यत्रापि प्रथमशब्देन पूर्वं पूर्वाञ्चनं तद् व्योम वाच आदित्यरूपमिति। आदित्यग्रहणेन देवानामसुराभिभवे साधनत्वं मन्त्रे उच्यमानं सम्यक् संगतं भवति।

यद्यपि ब्राह्मणे देवासुराणां संघर्षेऽसुरैः शब्दप्रयोगेण जयपराजययोर्निर्णयो देवान् प्रति उक्त। तत्र प्रयोगविषयेऽसुरैरुक्तमस्माभिरेकविधः शब्दः प्रयोक्तव्य एकेन परेण तत्समानार्थः समानरूपस्त्रीलिङ्गो भिन्नः शब्दः प्रयोक्तव्यः। एवं प्रयोगे येन तादृशो भिन्न. शब्दः प्रयोक्तुं न शक्येत तस्य पराजय इति सन्धिः। देवैस्तं सन्धिं प्रतिपद्योक्तम्, भवद्भिरेव प्रथमं शब्दः प्रयोक्तव्य इति। असुरै-रुक्तं भवद्भिरेव प्रथमं शब्द प्रयोक्तव्यः। तदानी देवैः शब्द उक्तः 'एकः' इति। असुरैरुक्तम् 'एका' इति। पुनर्देवैरुक्तम् 'द्वौ' इति। असुरैरुक्तम् 'द्वे' इति। देवैः 'त्रयः' इत्युक्तम्। असुरैः 'तिस्र' इत्युक्तम्। पुनर्देवैः 'चतुरः' इत्युक्तं, असुरैः 'चतस्र' इत्युक्तम्। तदानी देवैः 'पञ्च' इत्युक्तम्। असुराणां पञ्चशब्दसरूपस्य स्त्रीलिङ्गस्य भिन्नशब्दस्य प्रयोगेऽशक्तिः, तावता पराजयः सञ्जात इति कथोक्ता। एवं सति वाचो वीर्येणापि पराभवस्य वचनाद्वीर्य-परत्ववचनेऽपि अभिभवसाधनत्वं न विरुध्येतेति चेत् तथापि सर्वत्रादित्यरूपस्यैवे-न्द्रस्यासुराभिभवकर्तृत्वोक्त्या यावती वलकृतिरित्यस्यैव सेत्यनेन विरोधात्। वाण्याः पृथक्सत्वाभावस्य पञ्चमे पदे सूचनात्पञ्चमं पदमुक्तरीत्याऽऽदित्यरूप-मिति आदित्यरूपव्योमपरताया एव तच्छब्दस्य युक्तत्वात्। तच्छब्देनोक्तरीत्या व्योमग्रहणेनैव सङ्गतार्थत्वमिति।

एवमूर्जाद उत यज्ञियासः इत्यत्र यज्ञियवचनेनान्नात्त्वस्य लब्ध्योर्जात्त्वेन पृथक्ग्रहणस्य विशेषष्टीकाकृद्भिर्नोच्यते। मन्त्रे उतशब्देन तत्र विशेषस्य प्रतीतेः। किञ्च यज्ञशब्देन इष्टिपशुसोमहोमरूपसर्वविषयज्ञोक्त्योर्जादानामपि ग्रहणस्य यज्ञियग्रहणेनैव प्राप्तेः। किञ्च यज्ञियास इत्यस्य यज्ञसंपादिन इत्यर्थं उच्यते। तच्च किं देवत्वेनाभिनिष्पादनाद्यज्ञस्य। तथा सति यज्ञियग्रहणेनैव प्राप्त्या पृथग् 'ऊर्जाद' इति ग्रहणस्य विशेषावचनाद्दोषः। अथ यदि यज्ञकर्तृत्वेन यज्ञसंपादकता तर्हि तेषां देवत्वलाभाभावेन परवर्ति पञ्चजना इत्येतेन गतार्थत्वमिति तद्ग्रहणस्य मन्त्रे निरर्थकत्वमिति। ऊर्जात्त्वं यज्ञियत्वं च देवानां संभवतीति ततस्तल्लाभ इति न वाच्यम्। उभयस्य पञ्चजनविशेषणत्वात्। पञ्चजनस्य कथमुभयं विशेषणमिति चेत्। अत्रोच्यते। पञ्चजनाः गन्धर्वाः पितरो देवा असुरा रक्षांसि। तेषां मध्ये आद्यानां त्रयाणां गन्धर्वपितृदेवानां यज्ञियत्वम्। अन्त्यद्वयस्य तु तमोरूपत्वेन सर्वविषपदार्थावरकत्वेनान्नादत्वम्। अत एव पुरुषसूक्ते पुरुषस्यान्नेन विवर्धमानतोक्ता। अन्नं च पुरुषेणादित्यात्मनाऽदनीयं यत्तेजस्तत्तस्यात्तृत्वं विनाशकरत्वमसुररक्षसाम्। असुरा रक्षांसीति पृथङ्निर्देशो देशभेदात्। अत एव वेदे लोकभेदाभिप्रायेण "देवा मनुष्याः पितर एकतः, असुरा रक्षांसि पिशाचा अन्यत" इत्युक्तम्, तत्र द्योलोकाभिप्रायेण तेजोरूपाणां देवत्वं तमोरूपाणामसुरत्वम्। अन्तरिक्षलोकाभिप्रायेण पितृत्वं तद्विरोधेन रक्षस्त्वम्। एवं भूलोकाभिप्रायेण मनुष्यत्वं तद्विरोधिनां पिशाचत्वमिति। किञ्चासुररक्षोविनाशकरत्वं देवानामुच्यते देवाश्च किरणरूपाः। अत एव शतपथब्राह्मणे "रश्मयो विश्वेदेवा" इत्युक्तम्। तेषां तेजोरूपतया तद्विनाश्यत्वं तमोमयत्व एव संभवतीति। पिशाचा अपि तमोरूपा एव। अत एवेन्द्रं प्रति पिशाचनाशः प्रार्थ्यते "पिशङ्गभृष्टिमम्मृणं पिशाचिमिन्द्र सम्मृण। सर्वं रक्षो निबर्हये"ति। इन्द्रश्चादित्यात्मा तेन विनाश्यत्वं तमोरूपत्वे एव संभवतीति पिशाचा अपि तमोरूपा एव। तत्रासुररक्षसामुभयविधानामपि पञ्चजनत्वमुपरिष्टादुक्तम्।

ननु पञ्चजना इत्यस्य निघन्टुसु मनुष्यनामसु पाठात्कथं देवादीनां पञ्चजनत्वमिति चेत् तदर्थं पञ्चजनशब्दो विचारणीयः किमसौ समस्त एव मनुष्यनामोत जनशब्दस्य तत्त्वं पञ्चशब्दस्तु सह प्रयुज्यते केवलमिति। तत्र नाद्यः। पञ्चजनसमानार्थतया प्रयुज्यमाना वेदे शब्दाः पञ्चक्षितयः पञ्चकृष्टयः पञ्चचर्षणयः पञ्चव्राताः। तेषां वशतः पञ्चजनशब्दे पञ्चशब्दस्य सङ्ख्याबोधकत्वेन साहित्येन प्रयोगप्रतीतेर्विशिष्टस्य मनुष्यनामत्वाभावात्। अत एव ये वा जनेषु पञ्चस्विति व्यस्तः प्रयोगः संगच्छते। अन्त्यश्चेत्सत्यं, परन्तु तावता

जनशब्दस्य न केवलमनुष्यबोधकता किन्तु तन्निवासमनुष्यलोकबोधकत्वम्। तन्निवासस्य भूलोकस्यानेकविधत्वमिति पूर्वमुक्तम्। ननु तर्हि कथं देवादीनां पञ्चजनत्वप्राप्तिरिति चेन्न। अभिप्रायविशेषेण तेषामपि पञ्चजनत्वात्।

अयं भावः—पूर्वं लोकानामनेकविधत्ववर्णनावसरे भूलोकस्यानेकविधत्वमुपवर्णितम्। भूलोकीयो भूलोकः। अन्तरिक्षलोकीयो भूलोकः, द्योलोकीयो भूलोक इत्यादिना। स च भूलोकस्तत्र तत्रादित्योदयात् पूर्वं प्रवर्तते। 'पृच्छामि त्वे'त्यादिमन्त्रद्वयेन प्रश्नोत्तररूपेणोच्यत इति पूर्वं निवेदितम्। स चोदयात्पूर्ववर्ती सावित्रःकालो वेदिरूपो भूलोक इति विस्तरेण पूर्वं निवेदितम्। तस्य च सावित्रकालस्य पञ्चघटीरूपपञ्चविभागयुक्तत्वम्। ते च पञ्च विभागाः कुत्रचन घटीदण्डप्रभृतिशब्देन उच्यन्ते, कुत्रचन षडहशब्देनोच्यन्ते, तत्र षडहपञ्चकरूपपञ्चजनविभागो ध्रुवप्रदेशे दक्षिण उत्तरे च। अर्थात्सुमेरुकुमेर्वो। विषुववृत्तसविधस्थले घट्यादिपञ्चकरूपः। तेषामभिप्रायेण सावित्रकालरूपवेदिरूपभूलोकरूपमर्त्यस्थानपञ्चकाभिप्रायेण पञ्चजना इति पद तत्समानार्थकपञ्चक्षितय इत्यादि निर्देशा अपि तथैव। एतेषां पञ्चाना सावित्रकालनियामकत्वाभिप्रायेण सूक्ते 'मित्राय पञ्च येमिरे जना अभिष्टिशवसे' इति उच्यते। मित्रश्च सवित्रभिन्न इति पूर्वमुक्तम्। तस्य पञ्चजना पञ्चकालावयवरूपभूलोका नियामका इति। अभिष्टिशवा नाम यज्ञानुकूलगतिमान्। उदयानुकूलतेजोयुतो वा। तदेव तेजोऽभीष्टं भवति इति। तत्र अभिष्टिशब्दे इकारस्य दीर्घाभावश्छान्दसः। यज्ञश्चादित्यरूपः। उदयपूर्वकालिकता तस्य प्रतीयते। अत एतत्कालिकभूलोकाभिप्रायेण ऐतरेयब्राह्मणे वैश्वदेवशस्त्रविधिप्रशंसावसरे उच्यते "सर्वेषां वा एतत्पञ्चजनानामुक्थ यद्वैश्वदेवं देवमनुष्याणां गन्धर्वाप्सरसा नागानां च पितृणां चे"ति। तत्र सुमेर्वभिप्रायेण तत्रत्योदयप्राक्कालिकभूलोकाभिप्रायेण देवमनुष्याणामित्युक्तिः। (द्योलोकीयभूलोकगतानामिति तदर्थः)। एवमन्तरिक्षलोकीयोदयप्राग्वर्ति भूलोकानामभिप्रायेण गन्धर्वाप्सरसामित्युक्तिः। यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षमिति वचनतस्तेषामन्तरिक्षलोकनिवासात्। तत्र पञ्चजनत्वेन तद्वर्णनात् तल्लोकीयभूलोकाभिप्रायकतोक्तप्राया। कुमेरुरूपभूलोकगतोदयात्प्राग्वर्तिभूलोकाभिप्रायेण पितृणामित्युक्तिः। दक्षिणे भुवः पार्श्वे विषुववृत्ततो दक्षिणभागरूपान्तरिक्षलोके आदित्यादीनां भुवां संसृष्टत्वेन गमनाभिप्रायेण सर्पणवद्गतिमभिप्रेत्य नागानामर्थात्सर्पाणामित्युक्तिः। ते च भुवो दक्षिणपार्श्वीयान्तरिक्षलोकगतभूलोकस्था इति तेषां सर्पणवद्भूसंसृष्टगत्यभिप्रायेण तेषां सर्पत्वोक्तिरिति। एतेषामपेक्षयाऽपरेषां पञ्चजनानामसत्त्वाभि-

प्रायेण ब्राह्मणे सर्वेषां पञ्चजनानामित्युक्तिः। तदेवमादित्योदयस्थलविशेषाभिप्रायेण पञ्चजना अनेकविधाः। तेषां सामान्यतो ग्रहणमभिप्रेत्य गन्धर्वा इति वर्णना पञ्चजनत्वेन। सुमेर्वभिप्रायेण सामान्यतो देवा इति, कुमेर्वभिप्रायेण सामान्यतः पितर इति, अन्तरिक्षलोकाभिप्रायेण सामान्यतो वर्णना गन्धर्वा इत्युक्तम्। इमे च देवा इति पदसाहचर्येण तेजोरूपाः। सावित्रे काले बहुलतेजोयुक्तत्वेऽपि तमसोऽपि तदानीं सत्त्वेन तदभिप्रायेणासुरा रक्षांसीत्युक्तम्। एतत्पञ्चजनद्वयमयज्ञीयं केवलमन्नाद्रूपं पूर्वं देवादित्रयं यज्ञियमिति मन्त्रे ऊर्जाद उत यज्ञियास इति पञ्चजनानां विशेषणम्। एवं च ब्राह्मणोक्तिः सङ्गच्छते। निरुक्तोक्तमेकीयमतमपि सङ्गतम्। निषादपञ्चमा इत्यौपमन्यवमतमपि न विरुध्यते। तथा हि तदुक्तवर्णकल्पनाया अत्रापि सम्भवात्। तथा हि उदयन्नादित्यो ब्राह्मणस्तस्याहवनीयरूपत्वं मुखत्वं च। "असौ वा आदित्य आहवनीय" इति ब्राह्मणोक्त्या आहवनीयत्वम्। "ब्राह्मणोऽस्य मुखमासी"दिति मुखरूपत्वं मन्त्रोक्त्या विज्ञायते ब्राह्मणरूपत्वं चेति। तस्यादित्यस्योदयात्पूर्वमस्तोत्तरं च प्रवर्तमानमौषसं तेजस्तस्योत्तरस्यां दिशि बाहुरूपता। बाह्वोश्च राजन्यरूपत्वं पुरुषसूक्ते वर्ण्यतेऽतस्तस्य क्षत्रियत्वम्। तदिदं सुमेर्वभिप्रायेणेति उत्तरस्यामिति स्पष्टम्। कुमेर्वभिप्रायेण आदित्यस्योदयात्प्राग्वर्ति, अस्तोत्तरवर्ति च यदौषसं तेजस्तस्योरुरूपत्वम्। अत एव तत्रत्याया उषसो नामोर्वशीति वेदे वर्ण्यते। उर्वशी शब्दस्य निरुक्तकारेण व्युत्पत्तिः प्रदर्श्यते "ऊरुभ्यामश्नोती"-त्यादि। ऊर्वोश्च वैश्यरूपत्वं पुरुषसूक्ते उच्यते। भूवो दक्षिणोत्तरपार्श्वयोरर्थात्सुमेरुकुमेर्वोरुदितादित्यस्य शिरोरूपेण कल्पनवत्पदत्वेनापि कल्पनस्य वेदे प्रसिद्धया स्थानभेदेन तस्य भिन्नत्वेन द्विवचनेन उच्यते "पद्भ्यां शूद्रो अजायत" इति पुरुषसूक्ते। सर्वं चेदमुदयसविधवर्तिकाले इति चत्वारो वर्णाः। निषादशब्देन तमो गृह्यते तस्मिन्सर्वस्य पाप्मनो विद्यमानत्वात् तमसस्सर्वपदार्थविरकत्वेन तत्र शोभनानामिवाशोभनानामपि तेनावरणात्तत्र सर्वपाप्मसत्तोक्ता। एवं सति निषादपञ्चमाश्चत्वारो वर्णाः। पञ्चजना इति वर्णनमपि न विरुद्धम्। केवलं ते लौकिकमनुष्यरूपा नाभिप्रेयन्ते इत्येव। मन्त्रे "ऊर्जादः, यज्ञियास" इत्युक्त्या देवत्वोक्त्या होत्रसेवनस्योक्त्या च नात्र लौकिकमनुष्याणामवसरः। उक्तरीत्या मनुष्यादयश्चात्र पञ्चजनरूपा इत्युक्तमेव। तदेवं पञ्चजना आदित्योदयात्प्राक्कालिकसावित्रकालरूपवेदिरूपपृथिवीरूपजनपञ्चकाभिप्रायेण ते पञ्चजना इत्युक्तिः।

तत्राग्निर्होता होमसम्पादकः। सा च होतृक्रिया शस्त्रशंसनादिरूपा सप्तविधा। अत एव सप्तहोतृत्वेन वेदे प्रयोगाः। मन्त्रोऽपि सप्तहोतृशब्दे-

नोच्यते। अत एव ब्राह्मणे होतृक्रियाया अनेकविधत्वाभिप्रायेण सर्वचरौ देवताभिर्यागकरणेऽपि एकस्या होतृक्रियाया अनिष्पादेन पाप्मनोऽविनाशस्तत्रार्बुदेनागत्य सा क्रिया निष्पादितेति तेषां सर्वपाप्मविनाश इत्युक्तिः। तदेतदुपरिष्टाद् विवेचयिष्यते। तत्र ब्राह्मणे "एका वै वो होत्राऽकृता" इति वर्णनेन होतृक्रियाया अनेकविधत्वं स्पष्टमेव।

एवं च प्रकृतमन्त्रे हे पञ्चजना उक्तरूपा मम होत्र होतृकर्म जुषध्वं सेवध्वमिति। इदं च स्तवनमुदयकालिकमिति स्तोत्रशस्त्रसम्बन्धेनोच्यते। एवं च पञ्चजना इति न लौकिकमनुष्यपञ्चकाभिप्रायेणोच्यते किन्तूक्तरीत्योदयप्राक्कालिकसावित्रकालाभिन्नवेदिरूपपृथिवीजनपञ्चकाभिप्रायेणेति।

एवं "देवानां माने" इति मन्त्रे त्रिद्विशब्दयोरर्थस्य सम्यक् प्रकाशनाभावादस्पष्टार्थता। तथाहि मन्त्रः—

देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन्।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम्।। इति।

निरुक्तकारेणायं मन्त्रो व्याख्यायते। "देवानां निर्माणे प्रथमा अतिष्ठन्। माध्यमिका देवगणाः। प्रथम इति मुख्यनाम प्रतमो भवतीति। कृन्तत्रमन्तरिक्षम्। विकर्तनं मेघानां विकर्तनेन मेघानामुदकं जायते। त्रयस्तपन्ति पृथिवीमनुपाः। पर्जन्यो वायुरादित्यः। शीतोष्णवर्षैरोषधीः पाचयन्ति। अनूपा अनुवपन्ति लोकान् स्वेन कर्मणा। अयमपीतरोऽनूप एतस्मादेवानूप्यत उदकेन। अपि वान्वाविति स्यात्। यथा प्रागिति तस्यानूप इति यथा स्याद्यथा प्राचीनमिति। द्वा बृबूकं वहतः पुरीषम्। वाय्वादित्या उदकम्। बृबूकमित्युदकनाम ब्रवीतेर्वा शब्दकर्मणो भ्रंशतेर्वा। पुरीषं पृणातेः पूरयतेर्वा।" इति।

दुर्गाचार्येणैतस्य व्याख्या क्रियते। यथा "देवानां मान" इति। वसुक्रस्येन्द्रपुत्रस्यार्षम्। त्रिष्टुप्। महाव्रतीये मरुत्वतीये शस्यते। देवानां दानादिगुणयुक्तानां माने विमाने निर्माणे। यदा देवाः सृष्टाः प्रजापतिना तदैत एव माध्यमिका देवगणाः प्रथमा अतिष्ठन्। एतेऽपि हि दानादियोगाद्देवा उच्यन्ते। प्रथमाः प्रतमाः। प्रकृष्टतमा, मुख्या इत्यर्थः। तस्मादेत एव प्रकृष्टतमा आसन्। अतिष्ठन्। अवस्थितवन्तः। सृष्टौ हि सर्वदेवानामग्रे सृष्टा इत्यभिप्रायः। किञ्च कृन्तत्रात्। उत्कृन्तात् प्रदेशाद् एषां मेघानामिन्द्रेण उपरा आप उदायन्। आगतवत्यः। उपरशब्देनात्र उदकमुक्तम्। तात्स्थ्यात्तच्छब्दो मञ्चाः क्रोशन्तीतिवत्। उपरेषु मेघेषु या आपस्ता उपचारादुपरा उच्यन्ते। किञ्च यदा ताभिरुपराभिरद्भिरोषधयः प्रोहिता भवन्ति अस्य तदा त्रयस्तपन्ति त्रयः

पर्जन्यादयस्तपन्ति पृथिवीं पृथिवीलोकम्। अनूपास्ते हि अनुवपन्ति लोकान् स्वेन स्वेन कर्मणा। यथाकालमनुगृह्णन्ति। एतदनुवपनं लोकानां यद्वर्षादिभिः पर्जन्यादयो यथार्थमोषधीः पाचयन्ति। किञ्च। द्वा बृबूकं वहतः पुरीषम्। द्वौ वाय्वादित्यौ वहत आक्षिपत इतः पृथिवीलोकात् बृबूकमुदकम्। किं लक्षणम्। पुरीषं प्रीणयितृ पूरयितृ वा सत इति।

अत्र निरूक्तकारेणोपरशब्दस्य मेघपरस्यायं निगम उच्यते, व्याख्याने चोपरशब्दस्योदकपरत्वेन व्याख्यानं क्रियते। तथा त्रयःशब्देन पर्जन्यवाय्वादित्यानां ग्रहणेन तपन्तिपदेनान्वय उच्यते। तपधातोरुष्णीकरणमर्थः, स च आदित्यस्यैव भवति। तत्सम्बन्धाद्वायोरपि न तु पर्जन्यस्येति नैकरूपेण तपन्तिपदेन त्रय इत्यस्य सम्यगन्वयः। पृथिवीमित्यस्य लोकपरस्यौषधिपरत्वं लक्षणया। तपन्तीत्यस्य पाचयन्तीत्यर्थकरणम्। तथा द्वावित्यनेन पूर्वोक्तत्रयगतस्यैव द्वितयस्य ग्रहणं नान्यरूपस्येत्यत्र विनिगमनाविरहः। किञ्च सर्वमिदं व्याख्यानं प्रथमशब्देन माध्यमिकदेवानां ग्रहणे निर्णायकं किञ्चित्प्रमाणं स्यात् तदा। अथ विकर्तनेन मेघानामपामुद्भवो लोकप्रसिद्ध इति लोकप्रसिद्धया प्रथमशब्देन माध्यमिकदेवगणा गृह्यन्त इति। तदपि उपरशब्दस्य मेघपरस्याप्यपरत्वे संभवेत्। उपरशब्दस्तु मेघनामसु निघण्टौ पठ्यते। तन्निगमनायैवैतस्य मन्त्रस्योपन्यास इति तस्योदकपरत्वाभावात्। लक्षणयोदकपरत्वं प्रथमशब्दार्थवशात इति। अन्योन्याश्रयात्। उपरशब्दस्योदकपरत्वे मेघानां कृन्तत्रेणोदकलाभ इति प्रसिद्धिवशतः प्रथमशब्देन माध्यमकदेवगणलाभः। तद्वशतश्चोपरशब्दस्योदकार्थे लक्षणा इति। दुर्गाचार्यव्याख्याने नाधिकं किञ्चित्। केवलमादिसृष्टौ माध्यमका देवगणा दानादिवशतः प्रतमा मुख्या आसन्निति प्रतिपाद्यते। निरुक्तस्यैव प्रदर्शनमन्यत्र। तस्मादत्रार्थो न स्पष्टः।

मन्त्रान्तरमवादाच्चान्योऽर्थ उच्यते। तथाहि—अनेन मन्त्रेण कुमेरुगता वर्णना क्रियते। तत्र प्रथमाः पदेन 'तदद्य वाचः प्रथमं मसीये'त्यत्र प्रथमपदेनेवात्रापि पूर्वाञ्चनानां ग्रहणम्। पूर्वाञ्चनाः कुमेरौ भवन्तीत्युक्तमेव। ते प्रथमाः पूर्वे देवानां माने निर्माणे अतिष्ठन्। अयं भावः—पूर्वोक्तलोककल्पनानुसारेण कुमेरावपि आदित्येन प्रत्यहं लोकत्रयमारुह्येत। लोकत्रयं च क्रमिकम्। भूलोकः प्रथमं ततोऽन्तरिक्षलोकस्ततः क्रमिको द्योलोक इति। तत्रान्तरिक्षलोकावसाने द्योलोकप्रवृत्तिस्तदभिप्रायेण प्रथमा देवानां द्युलोकस्थानां निर्माणे प्रवृत्ता आसन्, द्योलोकस्तत्र प्रवृत्त आसीत्। द्योलोकश्चादित्यस्यास्तमयात्पूर्वं प्रवर्तमानोऽस्तोत्तरमप्यनुवर्तमानो भवतीति पूर्वमुक्तमेव। दिवा यान्ति मरुत इत्यनेन द्युसम्बन्धिता मरुताम्।

असामि धूतयः। असाम्योजो बिभृथा सुदानव इति वर्णनतस्तेषामसम्पूर्णतेजस्कता प्रतीयते। असम्पूर्णञ्च तेज आदित्यस्यास्तमयोत्तरमिति वर्णनतो मरुतो रात्रिकालिका द्योलोकवासिन इति द्योलोकस्यास्तोत्तरमपि प्रवृत्तिरिति। एवं सति प्रकृते मन्त्रे कृन्तत्रादेषामुपरा उदायन् इत्यनेन एषां प्रथमानां कृन्तत्रात्। कृन्तत्रशब्देन कृन्तनबोधनद्वारा प्रकृते दिनकृन्तनबोधनेनास्तमयकालो बोध्यते। तथा चादित्यास्तमयकालत उपरा मेघा उदायन् ऊर्ध्वमागताः। अस्तमयमारभ्यैव मेघोन्नतिः प्रवृत्ता वर्षाकालः प्रवृत्त इति यावत्। अय भावः—उत्तरे मेरुप्रदेशे सुमेर्वादौ क्रमिककार्यबोधका वसन्ताद्या ऋतवो भवन्ति। तेषां नामानि वसन्तो ग्रीष्मो वर्षा इति शरद्धेमन्तः शिशिर इति। तदनुसारेण सुमेरौ कार्याणि, आदौ दिनस्य वसन्तकार्याणि पत्रशातनादीनि परस्तात् ग्रीष्मकार्यमौष्ण्यवृद्धिस्ततो वर्षाकार्यं वृष्टिर्वर्षाकालस्तदन्तेऽस्तमय आदित्यस्य। तदुक्तं शतपथब्राह्मणे "वसन्तो ग्रीष्मो वर्षा स्ते दैवा ऋतवः। देवेषु तर्ह्यसौ भवति। देवांस्तर्ह्यभिगोपायती"ति। अत्रोक्तर्तुत्रये आदित्यस्य देवेषु सत्ताबोधनात्तदानीममौ द्योलोके उत्तरस्या सुमेरौ भवति। सुमेरौ देवाना निवासात्। अर्थात्तदानी देवानां तत्र दिनम् षाण्मासिकम्। परस्तात्तत्र रात्रिः सा च ऋतुत्रयपर्यन्ता। यदा च देवानां रात्रिस्तदानी कुमेरावादित्यस्योदयाद्दिनं. तदपि तत्र षाण्मासिकं तदानी तेषां कुमेरुस्थानां न दिनप्रारम्भीयो वसन्तर्तुः भवति। एवं सति तत्र ऋतुचक्रं कथं भवति तदनेन मन्त्रेण प्रतिपाद्यते। तत्रोच्यते—तेषां प्रथमानामर्थात्कुमेरुस्थानां कृन्तत्राद्दिनकर्तनस्थानादर्थादादित्यास्तमयकालात् उपरा मेघा उदायन् उदिता भवन्ति। अर्थात्तदानीं तत्र वर्षाकालः प्रवर्तते। रात्रौ वर्षाकालवर्णनाद्दिने तदभाव इति विज्ञायते। वर्षाभावे आदित्यप्रकाशनवशतस्ताप औष्ण्यं भवति दिने। दिनं च षाण्मासिकं तत्रेति तावद्भिर्मासैर्ऋतुत्रयं तदुक्तं त्रयः तपन्ति प्रकाशन्ते आदित्यतेजसा सन्तापयन्ति पृथिवी भूलोकं कुमेरुमिति यावत्। एवं रात्रावपि संजायमाना वृष्टिः समग्रा रात्रिं यावत्, अर्थान्मासषट्कं यावत् प्रवर्तते। तत्र चर्तुद्वयकल्पना। तदभिप्रेत्य तत्रोच्यते—द्वौ द्वावृतू बृबूकमुदकं पुरीषं सर्वव्यापकं सर्वपूरयितृ वहतः। तदानी तावत्कालपर्यन्तं वर्षाः सञ्जायन्ते। एवं सति तत्र ऋतुपञ्चकव्यवहारः। दिनगतास्त्रयो रात्रिगतौ द्वाविति। अयमर्थोऽस्य वामस्ये'ति सूक्ते—

> "पञ्चपादं पितरं द्वादशाकृति दिव आहुः
> परे अर्धे पुरीषिणम्।
> अथेमे अन्य उपरे विचक्षणं सप्तचक्रे
> षळर आहुरर्पित"मिति मन्त्रे।

अत्र पूर्वमर्धं कुमेर्वभिप्रायम्। अतएव तत्रोच्यते पिता संवत्सरः स तु पञ्चपात् ऋतुसंज्ञकपञ्चपादोपेतः। वसन्तादिसंज्ञा ऋतुप्रभृतयः संज्ञाः सर्वाः सुमेर्वभिप्रायाः। अतएवर्तुचक्रे वसन्तादित्वमुच्यते। सुमेराविदं सम्भवति। तत्र संवत्सरारम्भतो वसन्तादीनामृतूनां प्रवृत्तेः। अतएव तत्र वसन्तादीनां कार्याणि पत्रशातनादीनि सङ्गतानि भवन्ति। कुमेरौ तु तेषामसम्भवात्। न हि तत्र वत्सरारम्भो वसन्तेन संभवति। अतएव शतपथब्राह्मणे वसन्तादित्रये देवेष्वादित्यस्थितिरुक्ता। एवं सति देवेषु वसन्ते उदितस्यादित्यस्य ऋतुत्रयं यावत्तत्र स्थितस्य ऋतुत्रयान्तेऽस्तं गन्तुं प्रवृत्तस्य कुमेरावुदयो न हि वसन्ते भवितुमर्हति। यत्तु ब्राह्मणे शरदि पितृषूदयस्तदादिऋतुत्रयपर्यन्तं तत्रादित्यस्य सत्त्वमित्यादिकं ब्राह्मणवचनं तत्तु सुमेरुस्थर्तुसंज्ञावासितमतेरभिप्रायेण। न तु तत्र शरदादीनामपि तन्नामभिर्व्यवहारे किमपि प्रमाणमुपलभ्यते। न च वसन्तादीनां व्यवहारस्य कुमेरुगतर्तुचक्रेऽभावेऽपि मधुमाधवादिशब्दैर्व्यवहारस्तत्र स्यादिति कल्पनं, तदपि न सम्यक्। तन्नामविषये "मधुश्च माधवश्च वासन्तिकावृतू" इति व्यवहारेण तस्यापि व्यवहारस्य कुमेरुगतर्तुचक्रेऽभावात्।

अतएवैतरेयब्राह्मणे प्रजापतेः सप्तदशत्वसम्पत्त्यर्थं संवत्सरस्य सप्तदशत्वसम्पत्त्यर्थं ऋत्वोः समास उक्तः "हेमन्त-शिशिरयोः समासेनेति"। सोऽपि कुमेर्वभिप्रायः। तत्र ऋत्वोः समासाय तस्यर्तुद्वयस्य रात्रिकालिकत्वमपेक्षणीयम्। न हि पूर्वोक्तर्तुद्वयसत्ताकाले तत्र रात्रिरस्ति। अस्माकमर्थात्सुमेर्वभिप्रायेण रात्रिकालिकता शरदादिऋतुत्रयस्य, तदानीं सुमेरौ रात्रेः सत्त्वात्। परन्तु कुमेरौ तदानीं दिनमेव भवति न तु रात्रिः। एवं सति समासवचनं सुमेर्वभिप्रायेण। षड्तुवासनावासितमते ऋतुपञ्चकव्यवहारस्य न सम्यक्त्वं किन्तु सम्पादनेन साधनीयत्वमित्यभिप्रायेण तत्साधनं ब्राह्मणे प्रतिपादितं, तदपि स्वकल्पनाभिप्रायेणैव प्रतिपाद्यते। रात्रिकालिकशरदादिऋतुत्रयस्य मध्येऽन्तिमर्तुद्वये समासः प्रदर्शितो ब्राह्मणे— "हेमन्तशिशिरयोः समासेनेति"। एवं सति न वास्तवो हेमन्तशिशिरयोः समासः किन्तु ऋतुषट्त्वकल्पने यथान्तिमर्तुद्वये एकत्वकल्पनया ऋतुपञ्चकसम्पत्तिरेवं कुमेरौ यत्र वास्तवं ऋतुपञ्चकमेव तत्र उक्तरीत्या समासकल्पनेति। कुमेरौ ऋतूनां नामान्येव न भवन्ति। व्यवहारार्थं तत्र सङ्ख्यया व्यवहारः। स एवात्र मन्त्रे द्वित्रिशब्दाभ्यां प्रतिपाद्यते। तदेव गृहीत्वोक्तास्यवामीयसूक्तगते पञ्चपादमित्येतस्मिन्मन्त्रे उक्तं पञ्चपात् पितेति। एवं सति पञ्चपादमुक्तरीत्या पञ्चावयवाः पादरूपा यस्यैवं द्वादशावयवा आकृतयो यस्य तादृशं पञ्चपादं द्वादशाकृति पितरं संवत्सररूपं षाण्मासिकार्धद्वयेन विभक्तं तत्र परे परस्मिन् द्वितीयेऽर्धे

रात्रिरूपे पुरीषिणं वृष्ट्युदकवन्तम्, वृष्टिमन्तमाहुः। एवं सति देवानां माने इति मन्त्रोक्त एवार्थोऽनेन मन्त्रपूर्वार्धेनोक्तः। तस्मिन् मन्त्रे दिवा त्रयस्तापयुक्ता रात्रौ द्वयं वृष्टियुक्तमित्यर्थः पूर्वं वर्णित एव। सुमेर्वभिप्रायेण पञ्चपादमन्त्रस्य द्वितीयार्धे उच्यते—अथ पक्षान्तरे इमे सविषर्वर्तिनः। सविषर्वर्तित्वं च सुमेर्वभिप्रायेण। अन्ये पूर्वापेक्षयाभिन्नाः सुमेरुवर्तिन आहुः। उपरे विचक्षणम्, उपरशब्देन तद्युक्तो वर्षर्तुरुच्यते, वर्षर्तौ विचक्षणं दृश्यमिममादित्यं सप्तचक्रे षळरे अर्पितमाहुरिति। एवं सति एतन्मन्त्रवशतो 'देवानां मान' इत्यस्य पूर्वोक्त एवार्थो मन्तव्य इति।

सायणेनायं मन्त्रोऽस्यवामस्यसूक्तीयः पञ्चपादमिति एवं व्याख्यायते। तथा हि तदीयं व्याख्यारूपं, पञ्चपादं पञ्चर्त्वात्मकपादोपेतम्। हेमन्तशिशिरयोः समासेनैकत्वाभिप्रायेण। पितरं प्रीणयितारं, द्वादशाकृतिं द्वादशमासा एवाकृतयो यस्य तादृशम्। पुरीषिणं वृष्ट्युदकेन तद्वन्तं प्रीणयितारं वा। पुरीषमित्युदकनाम। उक्तलक्षणं संवत्सरचक्रं दिवो द्युलोकस्य परेऽर्धे, तास्थ्यात्ताच्छब्द्यम्। परस्मिन्नर्धे अन्तरिक्षलक्षणेऽवस्थितआदित्ये इत्यर्थः। तस्मिन्नर्पितमाहुः। एतदुपरिस्थितमत्रानुषज्यते। यद्यत्रार्पितं तत्तदधीनमतः संवत्सरं परायत्तमाहुरित्यर्थः। अथेमे अपि चान्ये वेदवादिन एवमाहुः। किमिति। उपरे, उपरमन्तेऽस्मिन् उपरताः प्राणिनोऽत्रेति वा उपरः संवत्सरः, तस्मिन्। कीदृशे सप्तचक्रे। सप्तादित्यरश्मयस्तद्द्वारेण चक्रस्थानीया यस्यासौ तथोक्तः। यद्वा। अयनर्तुमासपक्षाहोरात्रमुहूर्तानि सप्त। सप्तचक्राणि पुनःपुनः क्रममाणानि यस्य तादृशे षळरे। षड्तव एवारा नाभौ प्रत्यृताः सम्बद्धा यस्य तथोक्तलक्षणे संवत्सरे रथे, विचक्षणं विविधदर्शनकरमादित्यमर्पितमाहुः। एतदुक्तं भवति। अमुमादित्यं दक्षिणोत्तररूपभिन्नगतेस्तीव्रमन्दभावस्य च कालाधीनत्वात्तदधीनमाहुः। अन्ये तु संवत्सरात्मकस्य कालस्य सूर्यगमनसाध्यत्वात्तदायत्तमाहुरिति।

अत्रोर्ध्वोक्तस्यार्पितमाहुरित्यस्यानुषङ्गः, तास्थ्यात्ताच्छब्दमिति न्यायेनार्धशब्दस्यार्धस्थे लक्षणा कर्तव्या। दिवोऽर्धमित्यनेनान्तरिक्षरूपं ग्रहितव्यमिति क्लिष्टा कल्पना। सप्तचक्रेति पदे सप्तशब्दस्य रश्मिद्वारादित्यसम्बन्धो वक्तव्यः, अथवा कालावयवानामयनादिमुहूर्तपर्यन्तानामेव ग्रहणमिति विनिगमनाभावः। सप्तसङ्ख्यार्थमन्येषामपि ग्रहणेन उपपादनसंभवः। पञ्चपादत्वस्य मन्त्रान्तरसंवादेन द्वयोर्ऋत्वोरैक्यकल्पनां विना सम्भवतोऽन्यथाकल्पनमित्यादयः प्रकाराः स्वीकार्यास्तदपेक्षयाऽस्मदुक्तव्याख्यानेन मन्त्रान्तरसंवादात्तैनैव मन्त्रार्थस्य स्पष्टार्थत्वम्। दिवः परेऽर्धे द्योलोकस्यापरार्धे पुरीषिणमित्यनेन रात्रौ वृष्टियुतत्वं

बोध्यते लक्षणां विना। तदुक्तपूर्वं देवानां माने इत्यस्य व्याख्याने द्वा बृबूकं बहुतः पुरीषमित्यनेन सम्बादोऽस्य वर्णनस्य। किञ्च पञ्चर्तुत्ववर्णनं कुमेरुसम्बन्धित्वेन। तथा सति तस्य ऋतुद्वयसमासेन तस्य च कुमेरुसम्बन्धित्वेनासम्भवः। यतः समासो हेमन्तशिशिरयोरेव तत्र, तस्मिन् देशे दिनस्य तदानीं सत्त्वेनासम्भवश्चेति विविधा दोषाः सम्भवन्तीति मन्त्रान्तरसंवादेन पूर्वोक्तव्याख्यानमेवास्य स्वीकर्तव्यं प्रदर्शितं च तद् पूर्वमेव। एवं सति देवानामिति त्रिशब्दस्य पर्जन्यवाय्वादित्य-परत्वेन वर्णनाऽपि न युक्ता। द्वावित्यस्यापि व्याख्यादित्यपरत्वेन वर्णनस्याप्य-युक्तत्वं तच्च सर्वं प्रदर्शितमिति तन्मन्त्रोक्तसङ्ख्यार्थविज्ञानद्वारा तस्य मन्त्रस्य विस्पष्टार्थत्वमिति प्रदर्शितम्। अन्यद्बहुलं वक्तव्यं पूर्वमुक्तमेवेति।

एवं च देवानां माने इतिमन्त्रोक्तस्य पञ्चर्तुयुक्तत्वस्य, रात्रौ द्वयोः पुरीषित्वं चात्र पञ्चपादं दिवः परेऽर्धे पुरीषिणमित्यस्य पूर्वार्धेन वचनम्। सुमेरौ दिने वृष्टियुक्तता षड्तूपेतत्वं च द्वितीयेनार्धेनोच्यते, अथ पक्षान्तरे इमे सविधवर्तिनः, सुमेरुवर्तिनो दीर्घतमस ऋषेस्तत्रत्यानामेव सविधवर्तित्वात् इमे इत्यनेन सुमेरुवर्तिनो गृह्यन्ते। अन्ये पूर्वापेक्षया भिन्नास्तत्रत्याः प्राणिनो वेद-वादिनो वा उपरे मेघे मेघकाले इत्यर्थः। विचक्षणं दृश्यं दर्शनोपेतमादित्यं सप्तचक्रे दिवाभागीयसप्तमासोपेते षळरे ऋतुषट्कयुते संवत्सरे अर्पितमाहुः। एवं सति अत्र संवत्सरः षळरः षड्तूपेतः। उपरे मेघकाले दृश्यत्वमादित्यस्येति वचनाद्वर्षाकालो दिवैवेति विशेषाः। सुमेराविदं भवतीति। एवं सति पञ्चपाद-मित्येषा वर्णना देवानां विरुद्धदेशेऽर्थात्कुमेराविति भवति। तत्र समग्रां रात्रिं यावद्वृष्टिसत्त्वेन तत्र रात्रिकालिके मासषट्के रात्रिपूर्वार्धरूप एको रात्रि-द्वितीयार्धरूपोऽपरर्तुरिति ऋतुद्वयोपेतत्वं रात्रेः। दिवा च ऋतुत्रयोपेतत्वमिति ऋतुपञ्चकोपेतत्वम्। तत्र ऋतूनां वसन्तादिनामभिर्व्यवहाराभावेन केवलं सङ्ख्ययैव। "त्रयो द्वौ" इति ऋतुनिर्देशः। एवं चर्तुपञ्चकत्वस्योपपत्तये ब्राह्मणे ऋतुषट्कसंस्कारानुरोधेन दृष्टान्तरूपेण वचनं हेमन्तशिशिरयोः समासेनेति।

अयं भावः—यैर्ऋतुपञ्चकव्यवहारः क्रियते कुमेरुस्थैस्तैरपि दिवा न ऋतु-त्रयकल्पनम्, किन्तु रात्रौ। तच्च सुमेरुवर्तिनामृतुषट्कव्यवहारिणां दिवा वसन्तादि-ऋतुत्रयं, रात्रौ शरदादिऋतुत्रयं, तत्र हेमन्तशिशिरयोः समासवर्णना कल्प्यते—एवं कुमेरावपि समासवर्णनेन ऋतुपञ्चकव्यवहारो विज्ञेय इति। कुमेरौ रात्रि-कालिकत्वेन हेमन्तशिशिरयोरभावात्। प्रत्युत तदृतुत्रयं शरद्धेमन्तशिशिररूपं तत्र दिने एव प्रवृत्तं न तु रात्राविति, तदुक्तं शतपथे "शरद्धेमन्तः शिशिर इति त आसुरा ऋतवः। असुरेषु तर्ह्यसौ भवति असुरांस्तर्ह्यभिगोपायती"ति। देवविरुद्धदेशसम्ब-

न्धिताऽसुराणां, देवाश्चोत्तरस्मिन्सुमेरुरूपे मेरोः शिखरे निवसन्तीति तद्विरुद्धे कुमेरुरूपे दक्षिणदिक्के मेरोः शिखरे असुरा निवसन्ति तत्रादित्यस्थितेरुक्तेस्तत्र च दिनप्रवृत्त्या समसनाभावो हेमन्तशिशिरयोः। एवं च तत्र नोक्तरूपः समास ऋतुपञ्चकव्यवहारोपयोगीति ब्राह्मणोक्तस्य समासस्य दृष्टान्तरूपेणोपादानम्। अथवा नायं कुमेरुस्थानामभिप्रेतःसमासस्तै रात्रौ ऋतुद्वयस्यैव स्वीकारात्। तच्चर्तुद्वयं विनिगमनाभावेन समरूपम्। समरूपता चोक्तरीत्या रात्रिकालस्य पूर्वपरार्धवशत इति। तत्र रात्रिकालिक एकैकऋतुस्त्रैमासिक इति। एवं सति ब्राह्मणोक्ता समसनकल्पनाऽन्यार्था। सा तु शतंजीवेति मन्त्रोपपत्यर्था इति।

एवं शतंजीवेति मन्त्रव्याख्यापि न विस्पष्टा। तथाहि स मन्त्रः।

शतं जीव शरदो वर्धमानः
शतं हेमन्ताच्छतमु वसन्तान्।
शतमिन्द्राग्नी सविता बृहस्पतिः
शतायुषा हविषेमं पुनर्दुः॥ इति।

अत्र मन्त्रे शतसङ्ख्याकोल्लेखस्यैवाविस्पष्टत्वम्, अपरोऽशंस्तु सरलः प्रायेण। अत्र शतमिति विशेषणाच्छरदो वत्सरार्थत्वं तेन शतं शरदः शतवर्षपर्यन्तं जीवेत्यर्थः, तत्र शतपर्यन्तस्यायुषोऽवधेर्निर्देशाय केवलमेकेन शरद्वसन्तहेमन्तानां शतविशेषणत्वेन ग्रहणेनोक्तार्थलाभे परेषां ग्रहणं निष्प्रयोजनं स्यात्। भवति शतं शरद इति वा शतं वसन्तानिति वा शतं हेमन्तानिति वा एकेन शब्देन शतशब्द-सहितेन शतवत्सरबोधनेन अवशिष्टनिर्देशस्य वैयर्थ्यम्। तत्र निरुक्तपरिशिष्टे इमं मन्त्रं गृहीत्वार्थविषये तत्र युक्तत्वायुक्तत्वविषये किमपि नोक्तं, भाष्यकृता वत्सर-लाक्षणिकत्वमुक्तमेतावता उपर्युक्तदोषोऽनिवारित इति भवति विचारणा किमि-त्येकेनैव ग्रहणेनोपपत्तावशिष्टग्रहणमिति। तत्रापि पुनः किमिति एतदृतुत्रयमेव निर्दिष्ट नान्ये ऋतवो गृहीताः। ऋतुत्रयग्रहणे प्रसिद्धक्रमेण वसन्तान् शरदः हेमन्तानितिक्रमे ग्रहीतव्ये किमिति तद्व्युदास इत्यादयः संशयाः प्रादुर्भवन्ति कथमिमे परिहरणीया इति।

तत्र वत्सरपरत्वस्यासंभवे शतशब्दस्य दिनसंख्याबोधकत्वं, तत्र सम्बन्धितया शरद इत्यादिग्रहणमिति तदपि न। यतः शरद ऋतुत्वं, ऋतुश्च मासद्वयात्मा, प्रतिमासं दिनानि च त्रिंशदिति साकल्येनैकस्मिन्नृतौ दिनानां षष्टिसङ्ख्यैव प्राप्नोतीति न तदभिप्रायकः तस्य प्रयोगस्य सम्भव इति चेत्, सत्यम्। अतएव च ऋतुशब्दस्य ऋतुद्वयग्रहणोपचारः। एवं सति शरद ऋत्वन्तरस्य चोपचारा-च्छरच्छब्देन ग्रहणं कृत्वा शतं शरदः शरदःशतसङ्ख्याकानि दिनानीत्यर्थ-

इति। तत्रोपचारग्रहणे शरदा सविधवर्तिनः ऋतोर्लक्षणे स पूर्वो वा परो-वोपलक्षणीय इत्यनियमे प्राप्ते ऐतरेयब्राह्मण उपचारप्रकारः प्रदर्शितः। हेमन्तशिशिरयोः समासेनेति। एवं च स ब्राह्मणे प्रजापतेः सप्तदशत्वादि प्रतिपादनाय प्रतिपादितः। तत्र प्रजापतेः सप्तदशत्वं संवत्सराभेदादुक्त्वा संवत्सरस्य साप्तदश्यं मासर्त्वोः सङ्ख्यां गृहीत्वा वक्तुं तत्र मासानां द्वादशसङ्ख्यामृतूनां पञ्चत्ववचनार्थं पञ्चमषष्ठयोर्ऋत्वोरेकत्वेन ग्रहणं कृत्वा सप्तदशत्वसङ्ख्या-संपादनेन प्रतिपादितः, हेमन्तशिशिरयोः समासेनेति। एवं च समासरूप एवात्रोपचारः स हेमन्तस्य परवर्तिना शिशिरेणेति ब्राह्मणानुगुण्याद्वक्तव्य इति सिध्यति। समासोऽपि द्वयोर्ऋत्वोरिति प्राप्तम्। तथा चैतरेयादिषु वचनाद्धेमन्तशिशिरयोः समासे गृहीते तस्य च हेमन्तत्वेन व्यवहारेऽनुमतेऽपि शतं जीवेति मन्त्रे शरद्धेमन्तवसन्तानां त्रयाणामेव शतसङ्ख्याकत्वमुच्यमानमनुपपन्नमेवावशिष्यते। कुतो वेम एवर्तवः शतसम्बन्धितयोच्यन्त इति। कदाचन वसन्तस्य तदुत्तरवर्तिना ग्रीष्मेण समासो वसन्तशब्देन, वर्षायास्तदुत्तरवर्तिन्या शरदा साकं शरच्छब्देन, हेमन्तशिशिरयोश्च हेमन्तशब्देन ग्रहणेनापरेषां सर्वेषां ग्रहणस्य प्राप्त्योक्तमन्त्रे त्रयाणां शतसङ्ख्याकत्वमुच्यमानं न विरुद्धमिति सर्वेषामृतूनां शतसम्बन्धिताप्राप्तेः। तत्रापि पुनः सन्देहस्यावसरः, समस्यमानर्त्वोर्मध्येऽन्यतरनाम्ना समासव्यवहारे कथं वसन्तादिशब्दैरेव व्यवहारो न ग्रीष्मादिशब्दैः। तत्रापि समस्यमानर्तुनाम्ना व्यवहारे समस्यमानादिमर्तुनाम्ना समासव्यवहारो वसन्तहेमन्तयोरिव वर्षाशरदृत्वोरपि वर्षात्वेनैव व्यवहारेऽपेक्षणीये कुतस्तत्र शरत्त्वेन व्यवहार इति सन्देहस्तदवस्थ एव। एवमृतुप्रसिद्धचनुसारेण यथाक्रमं प्रथमं वसन्तस्य ततः शरदस्ततो हेमन्तस्येति ग्रहणापेक्षणे कुतः शरद एव प्राथम्येन ग्रहणम्, व्युत्क्रमाभिप्रायकत्वे हेमन्तस्य कुतो न प्रथममुक्तिरिति सन्देहस्यानपाकरणमेव। तदर्थं समासोऽपि उपचारत एव ग्रहीतव्यः, तेनोक्तसंशयापाकरणस्य संभवात्।

तथाहि तत्र द्वयोर्मासयोर्ऋतुव्यवहारस्य मुख्यत्वमेकस्मिन्नुपचारतः प्रवृत्तिः। तथा च हेमन्तशिशिरमासानामुपचारतो हेमन्तत्वग्रहणेन ग्रहणे पुनस्तत्राप्रविष्टानामृतूनां प्रवेशने प्रविष्टस्य न्यूनीकरणे तत्राप्रविष्टनूतनप्रविष्टर्तुनाम्ना तद्व्यवहारः कर्तव्यः। यथा हेमन्तशिशिरयोः समासे शिशिरं निष्कास्य शरदः प्रवेशने शरद्धेमन्तयोः समासस्य नूतनप्रविष्टशरदृतुनाम्ना व्यवहारः। यथा वा हेमन्तं निष्कास्य वसन्तस्य प्रवेशने शिशिरवसन्तयोर्नूतनवसन्तर्तुनाम्ना व्यवहारः। एवं सति मन्त्रोक्तत्रिविधव्यवहारस्योपपत्तिरिति तु न वक्तव्यम्। उक्तरीत्या ऋतुप्रवेशनिर्गमार्थं द्वयोर्द्वयोर्मासयोः प्रवेशनिर्गमौ

वक्तव्यौ, ऋतुव्यवहारस्य मासद्वये मुख्यत्वात्। तथापि प्रवेशनिर्गमयोः क्रमिकत्वाय प्रथममेकैकमासप्रवेशनिर्गमयोर्वक्तव्यत्वम्। तथाचाप्रविष्टनूतनैकमासप्रवेशे प्रविष्टस्य निष्कासने व्यवहारार्थं किञ्चन नाम देयं, तत्र प्रदेयनाम्नैव मन्त्रगतव्यवहारस्योपपत्तौ प्रकारान्तरेण तद्ग्रहणस्य निरर्थकत्वात्। तथाहि ब्राह्मणानुसारेण प्रसिद्धर्तुक्रमानुसारेण प्रसिद्धर्तुमासग्रहणे मार्गशीर्षपौषयोर्हेमन्तत्वं माघफाल्गुनयोः शिशिरत्वं समासायोभयोर्ऋत्वोर्ग्रहणे मार्गशीर्षपौषमाघफाल्गुनमासाः समासार्था भवेयुः। एतैर्मासैः समासेनैकर्तुनाम्ना समासे प्रथमप्रवृत्तहेमन्तर्तुनाम्ना समासव्यवहारः, स च ब्राह्मणे प्रदर्शितः। अत्र समासे ऋत्वन्तरस्य प्रवेशे निर्गमे चापेक्षितैकमासनिर्गमप्रवेशौ वक्तव्यौ। तथा सति प्रथमं मासं मार्गशीर्षाख्यमपोह्य नूतनः परवर्ती मासश्चैत्ररूपो योजनीयः। तथा सत्यत्र समासमासाः पौषमाघफाल्गुनचैत्रमासा भवेयुः, एवमन्तिमं पूर्वसमासमासानां फाल्गुनं निरस्य पूर्वसमासपूर्वस्य कार्तिकस्य तत्र योजने समासमासाः कार्तिकमार्गशीर्षपौषमाघमासा भवेयुः। अनयोरेकमासनिर्गमप्रवेशयोरनुसारेण संपद्यमानयोः प्रकारयोः केन नाम्ना व्यवहारः स्यात्। तत्र कार्त्तिकमार्गशीर्षपौषमाघमासानां हेमन्तत्वेन व्यवहारो न सम्भवति, ब्राह्मणोक्तप्राथमिकसमासेन सांकर्यप्रसङ्गात्। अथ माघःशिशिरमासस्तदनुरोधेन शिशिरव्यवहारः, सोऽपि न युज्यते, द्वयोः शिशिरमासयोः प्रवेशदशायामपि शिशिरनामत्वेनाव्यवहारेणैकमासप्रवेशदशायां तन्नाम्ना व्यवहारस्यायुक्तत्वात्। तस्मादुक्तचतुर्मासानां कार्तिकमार्गशीर्षपौषमाघानां मासद्वयाभिप्रायेण हेमन्तव्यवहारस्य सांकर्यदोषान्निरासे द्वयोर्मासयोः प्रवेशदशायां तन्नाम्नाऽव्यवहृतस्यैकनामप्रवेशे तन्नाम्ना व्यवहारस्यायुक्तत्वाच्छैशिरस्य नाम्नो निरासे पारिशेष्यात्कार्तिकमासप्रवेशानुसारेण तदीयर्तुनाम्ना स समासो व्यवहर्तव्यः। आश्विनकार्तिकमासयोः शरदृतुत्वं, तच्च मासद्वये शरच्छब्देन व्यवहारस्तत्र मुख्यम्। इदानीमेकमासे तच्छब्दव्यवहारोऽमुख्यो गौणः। तेन नाम्नैवात्र व्यवहारः प्रकारान्तरासंभवात्।

एवञ्चात्र द्वयोर्ऋत्वोरैकैकमास एकस्य द्वौ मासाविति ऋतुत्रयसम्बन्धिनि मासचतुष्टये समासव्यवहारो मुख्यो न सम्भवतीति उपचारोऽपि गौणतया ग्रहीतव्यः, एवं द्वितीयेऽपि प्रकारे पौषमाघफाल्गुनचैत्रमासचतुष्टये माघफाल्गुनाभिप्रायेण शिशिरव्यवहारस्य सांकर्यापत्त्या निरासे पौषसम्बन्धेन हेमन्तव्यवहारोऽपि सांकर्यापत्त्याऽवशिष्टफाल्गुनमासाभिप्रायेण वसन्तव्यवहारो मासचतुष्टये गौण इति। एवमेकैकमासपरित्यागेऽपरापरमासग्रहणे चोक्तरीत्या मन्त्रगतं शरद्धेमन्तवसन्तनामकं मासचतुष्टयत्रयं भवति। एतस्यैव त्रयस्य मन्त्रे शरदादिशब्दैर्व्यवहारः। अत्र

प्रतिऋतु शतशब्दार्थसम्बन्धित्वाय मासचतुष्टयं ग्रहीतव्यमन्यथैकस्यर्तोर्मासद्वय-सम्बन्धितया मासस्य च त्रिंशद्दिनकतया साकल्येन दिनानां षष्टिरेव संख्या स्यात्। इष्यते च मन्त्रानुसारेण शतं, तस्याश्च मासद्वयग्रहणे यथानुपपत्तिरेवं मासत्रितयग्रहणेऽप्यनुपपत्तिरेव। मासत्रयस्य दिनसङ्ख्या नवतिर्भवति इष्यते शतमिति तत्रर्तुनाम्ना मासचतुष्टयं गृह्यते। एवं मासचतुष्टये एकर्तुनाम्ना व्यवहारस्य मुख्यत्वाभावेनोपचारतः स व्यवहारो ब्राह्मणानुसारेण। तस्यापि मन्त्रोक्तर्तुग्रहणस्योपपादनायैकमासप्रवेशानुसारेण पूर्वोक्तरीत्यैकस्मिन् मासि ऋतुव्यवहारस्यामुख्यत्वेन गौणत्वेन तादृश उपचारो ग्रहीतव्यः, तावतैव मन्त्रगत-व्यवहारस्य ऋतुत्रयस्य शतसम्बन्धित्वरूपस्योपपत्तौ मासद्वयप्रवेशनिर्गमाभ्यां तद्व्यवहारस्वीकारे प्रयोजनाभावात्प्रयोजकस्य प्रकारान्तरेणोपपत्तौ प्रयोजकस्य प्रयोजकत्वाभावाच्चेति।

किञ्चात्रैकमासप्रवेशनिर्गमाभ्यामेव समासो वक्तव्यो न मासद्वय-प्रवेशनिर्गमाभिप्रायेण। ऐन्द्रसूक्ते वृत्रप्राप्तिप्रापककालस्योल्लेखात्। तथाहि तत्रोच्यते—चत्वारिंश्यां शरदि वृत्रमन्वविन्ददित्यर्थक"चत्वारिंश्यां शरद्यन्व-विन्दद्" इति। तत्र शरदि चत्वारिंशी प्रदक्षिणा चत्वारिंशं दिनं वेति पूर्वमुक्तम्, तदनुसारेण वृत्रलाभः कार्तिकमासस्य शुक्लदशम्यां वक्तव्यः। आश्विनकार्तिकयोः शरदृतुत्वस्य प्रसिद्ध्या आश्विनस्य त्रिंशद्दिनानि कार्तिकस्य प्रथमानि दशेति चत्वारिंशत्संख्यायाः सम्पत्तेः, एवं चार्धाधिकावशेषं कार्तिकं, मार्गशीर्षं, पौषं, माघं च मासचतुष्टयं गृहीत्वा शरदः शतव्यवहारो मन्त्रगतो वक्तव्यः। तत्रर्तुद्वितयग्रहणेन तदुपपादनं कर्तुमशक्यम्। तथाहि शरदः समास-त्वाय पूर्वो वा परो वा ऋतुस्तत्र वक्तव्यः, पूर्वर्तुर्वर्षास्तां गृहीत्वा श्रावणभाद्र-पदाश्विनकार्तिकानां आश्विनकार्तिकमार्गशीर्षपौषानां वोक्तरीत्या समासः शरदृतुशब्देन न वक्तुं शक्यते, मन्त्रोक्तस्य चत्वारिंश्यां शरदि वृत्रलाभस्यानुपपत्तेः। अन्धकारदिनसङ्ख्या शतंजीवेतिमन्त्रे शतशब्देनोच्यते। सा च समासग्रहणेन भवति। एवं सति उक्तरीत्या शतसङ्ख्यायाः कृते पूर्वोक्तरीत्या ऋतुद्वयग्रहणे ततः पूर्ववर्तिऋतौ चत्वारिंश्यां तल्लाभो भवेत् न तु शरदि। उक्तरीत्या शरद-श्चत्वारिंश्यां लाभानुसारेण ततः परमर्धाधिकावशेषस्य शरदो द्वितीयमासस्य कार्तिकस्य समासे प्रवेशे पूर्वसमासीयचतुर्थमासस्य फाल्गुनस्य ततो निष्कासने कार्तिकमार्गशीर्षपौषमाघमासा एव समासार्थतया ग्रहीतव्यास्तेषामुक्तरीत्या शरन्नाम्नैव व्यवहारः सम्भवतीत्ययं समासः शतंजीव शरद इति मन्त्रे वक्तव्यः। प्रकारान्तरेण चत्वारिंश्यां शरदि लाभवर्णनस्यायुक्तत्वं स्यादिति उक्तरीत्या

वसन्ते तदीयैकमासस्य समासे प्रवेशे स्वनयदानस्तुतौ उच्यमानमश्वानां शोणवर्णानां चत्वारिंशत्सङ्ख्यानां सहस्रस्याग्रे श्रेणिवचनं प्रमाणम्। तदुक्तं तत्र— "चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति" इति। अत्र सहस्रस्योदीयमानस्य सहस्रसङ्ख्योपेतरश्मिरूपगोयुतस्य मण्डलस्याग्रे प्रथमं तदुदयात्प्रथमं, दशरथस्य उदयात्पूर्ववर्तिसावित्रौषसघटीदशकरूपस्य षडहदशकस्य, उक्तरीत्या मासद्वयार्थमुपयुज्यमानस्योदयसविधवर्तिनश्चत्वारिंशद्गावो वा तद्रूपा अश्वा वा शोणवर्णाः श्रेणिरूपेण भासन्ते इत्यर्थः पूर्वमुक्त एव। तत्रोदयस्य वसन्ततौ सत्त्वात्ततःपूर्ववर्तिचत्वारिंशत्सङ्ख्याकानि दिनानि पूर्वर्तुगतानि गृह्येरन् यदि तदानी मन्त्रस्थशतमुवसन्तानिति वचनस्यानुपपत्तिः। अतो वसन्तीयान्यन्तिमानि चत्वारिंशद्दिनानि शोणवर्णानि हित्वा प्रथममासस्य दशदिनानि ब्राह्मणोक्ते समासे अधिकानि वसन्तर्तुसम्बन्धिप्रथममासस्योपयोजनीयानि। पूर्ववर्तिसमासगतस्य प्रथमो मासश्च समासतो निष्कासनीयः। तथा सति पूर्वोक्तब्राह्मणीयसमासे प्रथममासस्य परित्यागे मासा भवेयुः पौषमाघफाल्गुनास्त्रयः। तेषां दिनानि नवतिः। वसन्तीयाद्यमासचैत्रीयानि प्रथमानि दशदिनानि, तेषां पूर्वोक्तसमासीयनवतिदिनेषु योजनेन संपद्यमानस्य शतस्य समासार्थं पूर्वसमासीयास्त्रयःपौषमाघफाल्गुनमासावसन्तीयश्चाद्योमासश्चैत्रस्तस्य योजने संपन्नसमासस्य पूर्वोक्तरीत्या वसन्तशब्देनैव व्यवहार इति। एवं सति वसन्तस्थलेऽपि हेमन्तीयोऽन्तिमो मासः पौषः शैशिरीयं मासद्वयं माघफाल्गुनौ वसन्तीयश्चाद्यो मासश्चैत्र इत्येतेषां चतुर्णां समासस्य मुख्यशब्देन वचनासम्भवेनोपचारेणैकस्मिन् मासि वसन्तत्वं गृहीत्वोक्तरीत्या वसन्तत्वेन व्यवहारस्तं समासमभिप्रेत्य च मन्त्रे "शतमु वसन्तानि"तिवचनस्योपपत्तिः।

एवंरूपसमासाभिप्रायेण शतं जीवेति मन्त्रे त्रयाणामृतूनां शतदिनकतोक्ता। त्रयाणामेव ग्रहणेनान्यस्मिंस्तदभावोऽपि बोध्यते। एवं सति उक्तसमासानुरोधेन शत दिनानि तमोऽर्थानि परवर्तीनि उदयात्पूर्वं शोणाभासयुतचत्वारिंशदश्वरूपगवार्थानि, ततः परस्तादादित्यस्योदयः संपद्यमानः शरच्छताभिप्रायेण समासीयमासचतुष्टयं कार्तिकमार्गशीर्षपौषमाघरूपम्। तत्र चत्वारिंश्यां शरदि लाभेन ततोऽवशिष्टानि शरदो दिनानि विंशतिः, ततः परवर्तिमासद्वयं मार्गशीर्षपौषरूपं तदीयानि दिनानि षष्टिः, परवर्तिमाघमासस्य दिनानि विंशतिरिति शतं दीनान्यतीत्य माघस्यावशिष्टानि दिनानि दशातीत्य परवर्तिनं फाल्गुनं मासं तदीयानि त्रिंशद्दिनानि गृहीत्वा चत्वारिंशद्दिनानि शोणार्थान्यतीत्य चैत्रे मासि शुक्लप्रतिपदि वा चैत्रमासि वोदयः। तस्य साधकञ्च मन्त्रे शतं जीवेत्यत्र शतं

शरद इति वचनम्। एवं शतहेमन्तवचनेन मार्गशीर्षपौषमाघफाल्गुनरूपमासचतुष्टयं समासग्रहणेन गृहीत्वा तत्र प्रथमं मासत्रयं मार्गशीर्षपौषमाघरूपं नवतिदिनानि फाल्गुनस्य प्रथमानि दशदिनानि मिलित्वा शतं, ततः परस्ताच्चत्वारिंशद्दिनानि, तत्र फाल्गुनस्यावशिष्टानि विंशतिः, ततः परस्ताच्चैत्रीयविंशतिदिनानि शोणार्थानि, ततः परस्तादादित्यस्योदये चैत्रकृष्णपञ्चम्यां वा अस्मिन्नर्थे शतहेमन्तवचनं शतं जीवेति मन्त्रे। शतं वसन्तानिति वसन्तशताभिप्रायकेन मन्त्रगतेन समासेन ब्राह्मणीयसमासगतमासचतुष्टये आदिमं मार्गशीर्षमासं परित्यज्यावशिष्टं मासत्रयं पौषमाघफाल्गुनं तदीयदिनानि नवतिः, ततः परं शतसंख्यासंपत्त्यर्थं परवर्तिचैत्ररूपवसन्तमासीयादिमदशदिनग्रहणेन शतसंख्यासम्पत्तिस्तस्योल्लेखः शतं जीवेति मन्त्रे "शतमु वसन्तानि"ति। ततः परस्ताच्छोणार्थानि दिनानि चत्वारिंशत्तैश्चैत्रीयानि दिनानि च विंशतिर्वैशाखगतानि दिनानि विंशतिरूपयुज्य तदन्ते वैशाखमासस्य कृष्णपक्षे उदय इति वैशाखान्ते उदय इति। तस्य साधको मन्त्रे शतं जीवेत्यत्र "शतमु वसन्तानि"त्युल्लेखः।

एवं चोक्तमन्त्रे त्रिविधोल्लेखात्त्रिविधस्य आदित्योदयस्य विज्ञानम्। एकश्चैत्रप्रतिपदि शुक्ले द्वितीयश्चैत्रकृष्णपञ्चम्यां तृतीयश्च वैशाखकृष्णपक्षे पञ्चम्यामुदय इति। तत्र चैत्रशुक्लप्रतिपदि उदये दिननक्षत्रं रेवतीनक्षत्रं तदेवादित्याधिष्ठितं नक्षत्रम्। तत्र देवेष्वादित्यस्योदय इति वर्णनेन तद्वासन्तिकसंपातनक्षत्रं भवेत्, तदानीं शारदसंपातनक्षत्रं हस्तनक्षत्रम्, तस्य सूचकं शतं जीवमन्त्रे "शतं शरद" इति वचनम्। चैत्रकृष्णपञ्चम्यामुदये तत्र दिननक्षत्रं मूलनक्षत्रं ततः पश्चाद्वर्ति दिननक्षत्रं पञ्चमं स्वातिनक्षत्रं ततोऽशीत्यंशविदूरं नक्षत्रं भरणीनक्षत्रमादित्याधिष्ठितं तत्रादित्यस्य उदयः, स च देवेष्विति ततो वसन्तसांपातिकत्वं तस्येति शारदसंपाते नक्षत्रं स्वातिनक्षत्रं भवेत्, तस्य सूचकं शतं जीवेति मन्त्रे शतं हेमन्तवचनम्। तथा वैशाखकृष्णपञ्चम्यामादित्यस्य देवेषूदये वसन्तसंपातस्तदानीं भवेत्। तत्र दिननक्षत्रमुत्तराषाढा स्यात्, ततः पूर्ववर्ति षष्ठं नक्षत्रं पौर्णमासीनक्षत्रं भवेत् तच्च विशाखे स्याताम्। विशाखानक्षत्रस्य पूर्णिमायां दिननक्षत्रत्वे आदित्यस्य नक्षत्रं कृत्तिकानक्षत्रं तदादित्याधिष्ठितं स्यात्। तत्र वसन्तसंपातनक्षत्रत्वे शारदसंपातनक्षत्रं विशाखा वा स्यादनुराधा वा स्यात्। दिननक्षत्रस्य वशतः सम्पद्यमानसंपातनक्षत्रस्य स्वल्पविभेदसम्भवात्। एवं च शतं जीवेति मन्त्रे शतं शरदःशतं हेमन्तान् शतं वसन्तानिति त्रयो निर्देशा न शतसंवत्सरबोधनाय, तथा सति एकेनैव वचनेनाभिप्रेतार्थबोधने वचनान्तरवैयर्थ्यप्रसङ्गात्। किन्तूक्तरीत्या शारदसंपातनीयनक्षत्राणां हस्तस्य स्वात्या अनुराधा-

याश्च साधकं भवेत्क्रमेण। तत्र त्रिभिर्निर्देशैरादिमध्यान्तानां नक्षत्रियप्रजापतिगतानां नक्षत्राणां हस्तस्वात्यनुराधानां ग्रहणे साधने मध्यवर्तिनक्षत्रयोरपि शारदसांपातिकत्वमुक्तप्रायम्। संपातस्य क्रमिकतया मध्यवर्तिनक्षत्राक्रमणं विना पार्श्ववर्त्तिनक्षत्राक्रमणस्यासंभवात्।

नचैवं रीत्यानुक्तनक्षत्रमाक्रममाणः संपातो हस्तनक्षत्रपूर्ववर्तीन्यपि नक्षत्राण्याक्रामेत्। तथा सति सर्ववृत्तभ्रमस्संपातः स्यादिति वाच्यम्। नक्षत्रप्रजापतिवर्णनस्य तथा सति विरुद्धत्वं स्यात्। सर्व वृत्तं परिभ्रमति संपाते किमितीदं नक्षत्रपञ्चकमेवादाय प्रजापतित्वकल्पना किमित्यन्यानि नक्षत्राण्यादाय न सेति संशयस्यानुच्छेदः स्यात्। न च तेष्वेव नक्षत्रेषूत्तोलितहस्तपुरुषप्रतिकृतिसंभवात्सा। न चान्येषु नक्षत्रेषु तादृशाकृतिकल्पनस्य निमित्तमस्तीति न तेषु तस्याः कल्पनमिति वाच्यम्। अपरेषु नक्षत्रेषु कानिचन कानिचन नक्षत्राणि गृहीत्वा आकृत्यन्तरकल्पनसंभवः। तस्या आकृतेश्च वशतस्तत्र नक्षत्रियप्रजापतित्वकल्पनसंभवात्। वर्तन्ते च नक्षत्रान्तरेषु विभिन्नाकृतिकल्पनं पूर्वसिद्धम्। अतएवैतरेयब्राह्मणे एका कथोक्ता यत्प्रजापतिः स्वां दुहितरमसदभिप्रायेणाभिध्यातवान्। देवैस्तद्विज्ञायायमकार्यं करोतीति शासनं कर्तुमिष्टं। तदानीं सम्भूय विचारे क्रियमाणे प्रजापतिशासनोपयोगिसामर्थ्यं स्वेष्वदृष्ट्वा तैरेको देवो नूतनो निष्पादितः। निष्पाद्य तमूचुस्तेऽयं प्रजापतिरकार्यं करोतीमं विध्येति, तच्छ्रुत्वा तेन बाणेन प्रजापतिर्विद्ध ऊर्ध्वमुत्फालं कृतवानिति कथामुक्त्वा तत ऊर्ध्वं तत्रोक्तं तमेतमूर्ध्वं कृतोत्फालं प्रजापतिं मृग इत्याचक्षते। यस्तु आकाशे मृगसदृक्षस्तारकापुञ्जो दृश्यते यश्च तत्र तारकापुञ्जे तिर्यगवभासमानतारकात्रयरूपो दृश्यते स तु रुद्रेण मृगस्य हननार्थं प्रेषितो बाणः। यश्च तत्तारकापुञ्जतः पश्चादुज्वलदीप्तिस्तारकाविशेषो दृश्यते "स उ एव सः" "स एव स मृगव्याध" इति वर्णनेन तारकान्तरेष्वपि आकृतिकल्पनस्य पूर्वसिद्धत्वेन तत्र नक्षत्रियप्रजापतिकल्पनस्य सम्भवेन हस्तादिष्वनुराधान्तेषु पञ्चसु नक्षत्रियप्रजापतिकल्पनस्य निर्बीजत्वं स्यात्।

यत्तु पूर्वोक्तैतरेयकथानुसारेणान्येषु नक्षत्रेषु प्रजापतेराकारः कल्पित एवेति, तन्न। तत्र प्रजापतेराकारकल्पनेऽपि न स पुरुषरूपः किन्तु पशुरूपः-सः, पुरुषरूपत्वमत्रैव नक्षत्रपञ्चके भवतीति तत्कल्पना तत्रेत्यपि न युक्तम्। तावता पुरुषरूपत्वस्यान्यत्राभावेनात्रैव पुरुषरूपत्वं प्रजापतित्वं केवलं कल्प्येत यदि तदानीं तद्वशतो नक्षत्रपञ्चकएव संपातभ्रमो नान्यत्रेति कल्पनमसम्भवि भवेत्। अत्र न केवलमत्र नक्षत्रपञ्चके पुरुषरूपत्वं तस्य प्रजापतित्वमात्रं कल्पितं

किन्तु तेन सह यदन्यद्वर्णनं क्रियते तस्यानुपपत्तिः स्यात्। अत्रोच्यते "हस्त एवास्य हस्तः चित्रा शिरः स्वाती हृदयं विशाखे ऊरू अनुराधा प्रतिष्ठा। एष वै नक्षत्रियः प्रजापतिः। यो वा एनं नक्षत्रियं प्रजापतिं वेदोभयोरेनं लोकयोर्विदुः" इति। अत्र उक्तप्रजापतिवचनेन साकं तज्ज्ञाने लोकद्वयविज्ञानमुच्यते तस्य सांपातिकत्वे संभवः। संपातश्चोभयोर्लोकयोः सन्धिस्थले आदित्यसन्दर्शनरूपः। एवं सति तत्रावस्थानेन लोकद्वयविज्ञानं भवति। तदेतत्संपातस्यासाधारणं कार्यमत्रैव निर्दिश्यमानं विरुध्येत। न चैतस्यार्थवादत्वमिति न स्वार्थसाधकत्वमिति न तेनैतन्मात्रनक्षत्रस्थितिः संपातस्य वक्तुं शक्येति वाच्यम्। सत्यम्। अर्थवादत्वेऽपि साक्षाद्विधेयार्थस्य "प्रशस्त" इति प्रशंसाबोधनेनैव प्रशंसायां बोधनीयायां तदकृत्वाऽर्थविशेषव्यवहारद्वारेण तद्वर्णनस्य निष्प्रयोजनत्वं दुर्निवारं स्यात्। अतएव शबरस्वामिभिरर्थवादस्थले लक्षणया विधेयप्राशस्त्यबोधनेनार्थवादस्य सार्थक्येऽपि मुख्यवृत्या प्रतिपाद्यमानव्यवहारस्य नित्यं कञ्चनार्थं गृहीत्वा सार्थक्यवर्णनं प्रदर्शितम्। तस्मादुक्तरीत्यैतस्यैव नक्षत्रियप्रजापतेः फलविशेषश्रवणवशतोऽत्रैव नक्षत्रपञ्चके संपातस्य परिभ्रमो नान्येषु नक्षत्रेष्वित्यर्थस्य बोधनेन संपातस्यासर्ववृत्तपरिभ्रमः सिध्यति।

एवं चोक्तमन्त्रगतेन ऋतुत्रये शतत्रितयव्यवहारेणोक्तरीत्याद्यमध्यान्तिमनक्षत्रत्रयस्य संपातसम्बन्धित्वे बोधिते मध्ययोरपि तदुक्तप्रायमिति। तदेतेन मन्त्रगतव्यवहारेण नक्षत्रियः प्रजापतिर्यजुर्वेदोक्तोऽनुमोदितो भवति इति सिध्यति।

अयं संपातः शारद इति तस्यासार्वत्रिकत्वे वासन्तिकोऽपि संपातोऽसार्वत्रिक इति सिध्यति। तदत्र हस्तमारभ्यानुराधापर्यन्तस्यान्तरस्य चतुष्पञ्चाशदंशरूपत्वेन ज्यौतिषिकग्रन्थोक्तया अयं शारदःसंपातश्चतुष्पञ्चाशदंशान्यावत् आन्दोलितन्यायेन परिभ्रमतीति तदनुरोधेन वासन्तिकः संपातोऽपि तावदेव परिभ्रमेत्, तथा च तस्यासर्वगतित्वमेवेति। तत्र यातायातेन संपद्यमानसङ्ख्यायाः स्वल्पन्यूनत्वसंभवेन औषधिसूक्तगतस्य "शतं धामानि सप्त च"त्यादेरुपपत्तिरिति पूर्वमुक्तमेव। एतदभिप्रायेणैवाक्षसूक्ते उच्यते—

त्रिपञ्चाशः क्रीळति व्रात एषां, देव इव सविता सत्यधर्मा। इति।

तत्रोच्यते, एषामक्षाणां त्रिपञ्चाशो व्रातः क्रीड़तीति, अत्र तस्य अक्षव्रातक्रीड़नस्य दृष्टान्त उच्यते, देव इव सविता सत्यधर्मेत्यनेन। यथा सविता सत्यधर्मा देवस्त्रिपञ्चाशः क्रीड़ति एवमिति।

तत्राक्षस्थले क्रीड़ागतो विशेषस्त्रिपञ्चाशशब्देनोच्यते परन्तु सवितुर्देवस्य त्रिपञ्चाशपदार्थः कः। न चासौ प्रसिद्धः। अप्रसिद्धं चोपमानं न भवति।

अत्र तु उपमानत्वेन तस्योपादानात्प्रसिद्धत्वं प्रतीतम्। तथा त्रिपञ्चाशसम्बन्धित्वे न केवलं सवितृत्वं पर्याप्तं, देवत्वं सत्यधर्मत्वं चापेक्षितम्। तदेतत्पर्यालोच्यमान-सूक्तविधसम्पातयातायातसम्बन्ध्यन्तरमानप्रदर्शनद्वारा संगत भवति।

तथाहि सविता सर्वजगत्प्रकाशनादुत्पादनाच्चासावादित्यः देवः प्रकाशकः। आदित्य इति वर्णनेनैव देवत्वे लब्धे पुनर्देव इति ग्रहणमर्थान्तरमपि क्रोडी करोति। तच्च देवनरूपम्। देवनञ्चाक्षसम्बन्धिनी क्रिया। तस्या लोके क्रीड़ाशब्देन व्यवहारः, आदित्ये गतिशब्देन तद्वचनम्। अक्षानुरोधेन गतिमान् इत्यर्थः। एवं च लोके अक्षशब्देन क्रीड़नोपयोगिपदार्थस्य ग्रहणम्। आदित्यगतौ तत्सम्बन्ध-स्यानुपयोगेनाक्षशब्देन रथाक्ष इव वृत्तरूपादित्यरूपरथाक्षसदृशो ब्रह्माण्डे दृश्ये स्थिर इवावभासमानो ब्रह्माण्डान्तर्गतपदार्थगतिमनुमापयन् कश्चन तेजोरूपो ध्रुवशब्देनाभिलप्यमानः पदार्थो गृहीतो भवति। स एवात्र सूक्ते स्तोतव्यः। तत्राक्षशब्देन व्यवहार आदित्ये रथकल्पनासम्बन्धात्। रथाक्षोऽप्यक्षशब्दे-नोच्यते। तत्राक्षपदश्लेषणाल्लोके क्रीड़ायां सम्बन्धिनोऽक्षपदार्थस्य ग्रहणम्। पदसाम्यात्क्रियासाम्याच्च बिभीतकाक्षोऽप्यत्र वर्ण्यते। एतावता स नात्र स्तोतव्यः, केवलं सादृश्यनिर्वाहार्थं तस्यात्राश्रयणात्। अत्रैव सूक्ते उच्यते मन्त्रः —

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान्। इति।

अत्र प्रारम्भे प्रतीयते वर्णनं विभीतकाक्षस्य। स विभीतको वृक्षस्तत्फ-लान्यपि तेन शब्देनोच्यन्ते। स विभीतको वृक्षः प्रवातेजाः। अधिकवातप्रदेशे जायते उर्वरप्रदेशे। अतएव तस्योदकरहिते स्थितिः। तस्य फलानि भक्षयितारं मादयन्ति कोष्ठचभेदनाज्जागरयन्ति छन्दयन्ति चेति वृक्षफलव्यवहारसाम्येनात्र देवनाक्षो वर्ण्यते, स च देवनाक्षः। तत्र बहुवचनं पदार्थत्रयस्योपयोगात्। ते चाक्षाः क्रीड़यितॄन् वेपयन्ति फलाशङ्कया क्रीड़यितृभिश्च वेप्यन्ते क्रीड़ार्थमिति प्रावेपाः शब्देनोच्यन्ते। एतच्च वेपनं बृहतो महतो जनसमुदायस्येति। एवं तेऽक्षाः प्रवाते वातरहिते क्रीड़ास्थाने वर्तमानाः इरिणे निर्गतार्णे क्रीड़ास्थाने। तत्र स्थाने सञ्जातमृणं पुत्रपौत्रानुगं न भवति। वर्वृताना वर्तमाना वा अतिशयेन चञ्चलत्वमुपयाताः। क्रीड़यितृभिः क्रीड़ावसरेऽपेक्षितरूपेणाक्षाणां निपातार्थं हस्ते गृहीतानां तेषां हस्ताभ्यां मन्थनं कृत्वा परित्यज्यन्ते। तद्वशतस्तेऽतिशयं चञ्चलाः। मूजवत्पर्वते जातस्य सोमस्य भक्ष इवायं विभीदकः कोष्ठचस्य वायोर्भेदनेन वृक्षस्तज्जन्यो देवनाक्षोऽपि विशेषेण नानारूपेण क्रीड़ने भेदनात्स्वरूप-विवरणाज्जयेन पराजयेन व। जागृविर्जागरयिता। जयशालिनो हर्षेण जितस्य

दुःखेन सोऽक्षो देवनाक्षो मह्यं देवनकर्तुरच्छान् अक्षशब्दश्रवणेन मम मनो विषयान्तरतश्छादयित्वा छादनेनाप्रकाशनेनावृत्य केवलमेकस्मिन्नक्षक्रीड़ने एवोत्साहयति।

प्रकृतस्तु सोऽक्षो ज्योतिश्चक्रप्रवर्तको बृहतो महतोऽस्य ज्योतिश्चक्रस्य प्रावेपा अतिशयने वेपनकर्ता प्रेरणकर्तेति यावत्। स्थानभेदेन तस्य भेदेन बहुवचनम्। मा माम्। आदित्यस्योक्तिरिति वर्णनात् आदित्यं मादयन्ति वेपनेनाविज्ञातस्वप्रवृत्तिं पराधीनं कुर्वन्ति। तेऽक्षा उक्तज्योतिश्चक्रचालका अक्षाः प्रवातेजा वेपनाज्जातेनातिशयितेन वातेन युक्ते प्रदेशे जाताः स्थिताः। इरिणे आस्फुरके ईषत्फुरणं यत्र तादृशे प्रदेशे वर्तमानाः। ऋणशब्दस्य जलवाचकत्वेन, तच्चाव्यक्तेषत्प्रकाशपरमिति यत्रेषत्फुरणं वर्तते तत्र प्रदेशे वर्तमानाः। न हि अक्षस्थितिदेशेऽस्माभिः प्रकाश उपलभ्यते। मौजवतः सोमस्य भक्षो यथा उन्मादेन पराधीनं करोति एवमसौ विभीदकः विशेषेण भेदकश्च्यावययिता स्थानात्, जागृविः सर्वदा स्वकार्यकरणे जागरूको मह्यमादित्यमच्छान् अचच्छदत् विभिन्नछन्दस्सम्बन्धं कारयति, अतिशयितं भिन्नदेशसम्बन्धिनं तत्राप्यपराधीनं करोति। असत्यामपि ममेच्छायां हठादन्यदेशसम्बन्धं कारयति मां वेपयतीत्यर्थः। एवञ्चैषा दृश्यमाना ज्योजिश्चक्रगतिः साऽक्षाधीना तत्र तीव्रमन्दगतिमत्त्वाद्देशविप्रकर्षस्य न्यूनाधिकत्ववशतः केचन स्थिरा अवभासन्ते केचन चलाः। यथा आदित्यस्य स्थिरत्वबुद्धिरतिमन्दगतित्वादस्माकमभिप्रायेण, वस्तुतो नासौ स्थिरः किन्तु चलः। अतिदूरत्वात्तद्गतिरस्माभिर्नोपलभ्यते, एतावता स न स्थिरः किंतु ज्योतीरूपत्वात्तस्य पूर्वोक्ताक्षपरिचालितत्वाच्चलत्वमेवेति।

एवं चैतदक्षसूक्तं न विभीतकाक्षबोधनार्थं नापि वा देवनाक्षबोधनार्थं मुख्यतः प्रवृत्तं, किन्तु ज्योतिश्चक्रचालकाक्षबोधनार्थमेव मुख्यतः प्रवृत्तम्। ज्योतीरूपत्वात्तस्य परब्रह्मण उपाधित्वात्। वेदे आदित्यस्यैवैकस्य स्तवादित्यादिकं पूर्वमुक्तमेव। एवं सत्यत्र त्रिपञ्चाशः क्रीड़तीत्यत्र तस्यैव वर्णनम्, तथा सति अक्षाणाम्। वस्तुत एकस्याक्षस्य स्थानभेदे भेदं मत्वा बहुवचनम्। व्रातस्त्रिपञ्चाशः क्रीड़ति, सवितुस्त्रिपञ्चाश इव। स चादित्यो यथा संपातगत्या गमागमं कुर्वाणः गणितानुसारेण विशेषविज्ञानाज्ज्ञातगमागमः। स यथा एकस्थानादपरस्थानपर्यन्तं त्रिपञ्चाशांशपर्यन्तं गच्छंस्त्रिपञ्चाश उच्यते। एवञ्चैतस्य तद्युक्तत्वं विज्ञातमित्युपमानता तस्य। तद्विभेदवशतोऽक्षस्यापि त्रिपञ्चाशस्थानसम्बन्धित्वेन परिभ्रमात् स्थानभेदेनानेकं गृहीत्वाक्षाणां व्रातः समूहः क्रीड़ति गतियुक्त इवावभासते। अक्षेषु देवनाक्षत्वव्यवहारयोग्यत्वायादित्ये देवत्वेन मुख्येऽक्षसम्बन्धे प्रकाशकत्वेन देवनाक्षसम्बन्धेनाक्षैः क्रीड़नकर्तृत्वेन देव इति

विशेषणम्। तच्चादित्यस्य गतिसम्बन्धवशतो ज्ञायमानमक्षक्रीड़नं दिवाभागे प्रकृष्टप्रकाशे सम्यग्ज्ञातुमशक्यमिति रात्रौ तद्विज्ञानाय रात्रिसम्बन्धनाय सवितुः सत्यधर्मेति विशेषणम्। तस्यायमर्थः—सवितुः प्रकाशकं तेजः सवितुर्दर्शनेऽदर्शनेऽपि भवति। तत्र सवितुरदर्शने तेजः सत्यशब्देनोच्यते। तदानीं सवितुरदर्शनेन तस्यासत्त्वे प्राप्ते असत्त्वाभावप्रतिपादकसत्यशब्देनोच्यते। यथा नासत्यशब्दे। तेन हि अश्विनोरन्यतरस्य बोधनं क्रियते तत्रैकः प्रकृष्टप्रकाशः स दस्रशब्द-बोध्यः। अपरस्यार्थादपकृष्टप्रकाशत्वम्, तत्र प्रकाशस्यापकर्षादसत्त्वे प्राप्ते तदभावमुखेन नासत्यशब्देन स बोध्यते, तत्र सत्याभावोऽसत्यशब्देन बोध्यते, न-शब्देन पुनस्तदभावो बोध्यते, तेन सत्य एव न असत्य इत्येवं सोऽश्विनोरन्यतरो देवो बोध्यते। तदुक्तं निरुक्ते "सत्यावेव नासत्यौ" इति। एवं सत्यपकृष्टं तेजः सत्यं तादृशतेजसा प्रकाशनरूपं कार्यं कुर्वाणः सत्यधर्मेत्युच्यते। तस्य तादृशस्य वशतोऽक्षसम्बन्धद्वारा त्रिपञ्चाशत्सम्बन्धितया विज्ञानात्सविता त्रिपञ्चाश-इत्युच्यते। एवं च सवितुर्नक्षत्रसम्बन्धविज्ञानान्नक्षत्रगतान्तरवशतस्तत्रत्यं त्रिपञ्चाशत्वं सवितर्यारोप्य स त्रिपञ्चाश इत्युच्यते। तदिदं सर्वं दिवा न बोधितुं शक्यत इति रात्रिसम्बन्धः सत्यशब्देन बोध्यते। धर्मशब्दः कर्मबोधकः। तच्च सवितुः कार्यं प्रकाशनमित्यभिप्रायेण सत्यधर्मेति प्रतिपादितम्। अयमर्थो विभ्राट्-सूक्तगतेन मन्त्रेण प्रतिपाद्यते। अयं हि तत्रत्यो मन्त्रः—

"विभ्राट् बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितम्।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा। इति।

अत्र दिवो धर्मन् धर्मणि कर्मणि प्रकाशने ज्योतिर्जज्ञे। एवं धरुणे प्रकाश-नीयेऽर्थात् प्रकृष्टज्योतिषोऽसत्त्वेन प्रकाशनीयं धरुणशब्देन गृहीत्वा तत्र सत्यम-प्रकृष्टप्रकाशं तेजोऽर्पितं सत्यरूपमिति। तस्याप्रकृष्टप्रकाशस्य ज्योतिषो विशेष उच्यते अमित्रहेति। अमित्रहावृत्रहाशब्दयोः समानार्थता प्रथमशब्दे मित्रहशब्देन-नञा समासेन वारणीया। तथा च मित्रं हन्ति मित्रहा तादृशं न भवतीत्य-मित्रहा। वृत्रस्यान्धकारस्य हन्तृ इति विशेषणमप्रकृष्टप्रकाशतेजसः। प्रकृष्ट-प्रकाशस्य परवर्तिविशेषणत्रयम्, तत् दस्युहन्तमम्। दस्युहन्तारस्तमसो विनाशका उषआदयस्तेषा मध्येऽतिशयेन दस्युहन्तृतमो विनाशकम्। न हि उषआदिभि-स्तमसः सर्वात्मना नाशः क्रियते। मण्डलेनोदितेन सर्वात्मना तमो विनाश्यत इति प्रकृष्टप्रकाशस्य ज्योतिषस्तमोहन्तृतमत्वेन विशेषणम्। असुरहा सपत्नहेत्य-नयोरपि समानार्थतावारणाय समासभेदः। यथा असुरहेत्यत्र सुरान् हन्तीति सुरहा तादृशं न भवतीत्यसुरहा, सपत्नानां शत्रूणां तम आदीनां हन्तृ ज्योतिः।

एवं च रात्रावप्रकृष्टप्रकाशः सविता सत्यधर्मेति। एवं चाक्षसूक्ते सवितुस्त्रिपञ्चाश इति विशेषणं संपातगतेरंशानामपूर्णानां त्यागेन पूर्णांशग्रहणेन त्रिपञ्चाशत्संख्येति तत्सम्बन्धात्सवितुस्त्रिपञ्चाशोक्तिः।

एवं चेदमपि संपातस्यासर्वगतिं साधयति। संपातस्यासर्वगतिबोधनेऽपरेषां संसूचकानां पूर्वं प्रतिपादनं कृतम्।

नक्षत्रियप्रजापतिस्थले पञ्चनक्षत्राणि संपातार्थानि, तत्र प्रथमतृतीयपञ्चमानां संपातसम्बन्धित्वख्यापनं शतं जीवेति मन्त्रेण क्रियत इत्युक्तम्। मध्यवर्तिनोश्चित्राविशाखयोस्तत्त्वं सम्पातान्तरद्वारा बोध्यते। तत्र कृत्तिकाविषये यजुर्वेदे उच्यते "एता वै प्राच्या दिशो न च्यवन्ते" इति। अत्र प्राग्दिशश्च्यवाभावेन तत्र संपातकालिकी तत्सत्ता बोध्यते। कृत्तिकासु वासन्तिकनक्षत्रत्वे विशाखाशारदसंपातनक्षत्रं भवतीति स्पष्टमेव। अश्विनीनक्षत्रस्य वासन्तिकनक्षत्रता, एवं चित्रायाः शारदनक्षत्रत्वं त्वौषधिसूक्तगतमन्त्रेण विज्ञायत एव, तत् पूर्वं प्रतिपादितम्। विशिष्य दीक्षाब्राह्मणविचारे परस्ताद्विचार्येति।

एवं मन्त्रेषु प्रोच्यमानसङ्ख्यानां विशेषस्य ग्रहणे तात्पर्याज्ञानतो मन्त्रार्थस्यास्पष्टत्वं कतिपयैरुदाहरणैः प्रदर्शितम्। स्पष्टार्थत्वं चादित्यपरव्याख्यया। अथ कतिपयशब्दानां लोके प्रसिद्धार्थानामप्रसिद्धार्थानां वशतोऽपि मन्त्रार्थविस्पष्टमत्या अनुद्भवात्तदर्थमादित्यपरतया व्याख्याने स्पष्टार्थत्वेन तादृशां कतिपयानां प्रदर्शनं क्रियते।

तत्र वृकशब्दः। निघण्टुष्वविज्ञातार्थत्वेन अयं शब्दः पठितः। निरुक्ते निगमवशतस्तदर्थविज्ञाने प्रयत्नः। तत्र वृकशब्दस्य चन्द्रमा अर्थः, कुतोऽसौ वृक उच्यते, तदर्थमाह विवृतज्योतिष्कः विकृतज्योतिष्क विक्रान्तज्योतिष्को वेति। तदर्थं दुर्गाचार्यष्टीकायामाह—विवृतज्योतिष्कः प्रकाशितज्योतिष्कत्वात्। विकृतज्योतिष्कः शीतत्वेन तज्ज्योतिषो भासनात्। सर्वत्र ज्योतिरुष्णं भासते, चन्द्रमसि तच्छीतमिति तद्विकृतमिति। विक्रान्तज्योतिष्कः अन्येभ्यो ग्रहनक्षत्रतारादिभ्यः प्रकृष्टज्योतिष्कत्वादिति। वृकशब्दतस्तल्लाभस्तु शाकटायनरीत्या पदेभ्यः पदेतरार्धसंस्कारन्यायेन। यथा तेन सत्यशब्दस्य निर्वचनप्रदर्शनावसरे उक्तं निरुक्तकारेण प्रदर्शितम् "एतेः कारितं च यकारादि चान्तकरणमस्तेः शुद्धं च सकारादिं चे"ति। तदर्थं उच्यते दुर्गाचार्येण—एतेः इण् धातोः कारितं ण्यन्तं तादृशरूपं कृत्वा ततो यकारादिभागस्य 'य' रूपस्य ग्रहणेन सत्यशब्देऽन्तिमो भागः। एवमस्तेः अस्भुवि इत्यस्य शुद्धं रूपं, ततः सकारादिभागस्तमादौ योजयित्वा संस्कारे सत्यमिति। अयं भावः—इण् धातोर्ण्यन्तस्य रूपमाययति ततो यकारो गृहीतः। अस्धातोः

शतृप्रत्ययान्तस्य रूपं सदिति तस्य पूर्वार्धे योजनेन सत्+य सत्यमिति, सत्यशब्दार्थे इणधातोरस्धातोरर्थदर्शनेनोक्तरीत्या तद्धातुतस्तस्य शब्दस्य सिद्धिः। सत्यशब्दः सन्तं यथावद्रूपमर्थमाययति बोधयतीति सतोऽर्थस्य बोधकः। एवं प्रकृते वृकशब्दे विवृतज्योतिष्कशब्दतो वृशब्दोगृहीतः,' क' रूपोऽन्तिमो भागो योजित इति वृक-शब्दसिद्धिरर्थश्चोक्तः सिध्यति। विकृतज्योतिष्क इत्यतः कृशब्दं गृहीत्वा तस्य ककारस्य स्थाने वकारं कृत्वा पूर्ववद्योज्यम्। विक्रान्तज्योतिष्क इत्यत्र क्रमधातोः क्र इत्यंशमुपादाय रेफस्य ऋकारकरणेन ककारस्य वकारकरणेन वृकशब्दस्तस्यार्थ उक्तः। तत्र प्रयोगानुसारेण शब्दस्यार्थं निर्णीय तद्गतक्रियादिबोधकधात्वादि-शब्दतोऽभिप्रेतपदरूपसाधनम्,इति स न्यायः।

अयं नानाविधकल्पनाकारी गौरवग्रस्त इति तस्य न सर्वत्राश्रयणम्। प्रकृते निरुक्तकारेणैतस्य शब्दस्य प्रयोगस्थलं प्रदर्श्य चन्द्रमोऽर्थत्वं निर्णीयते। तच्च प्रयोगस्थलं यथा तेन प्रदर्शितो निगमः।

"अरुणो मासकृद्वृकः पथा यन्तं ददर्श हि।

उज्जिहीते निचाय्या तष्टेव पृष्ठयामयी वित्तं मे अस्य रोदसी"।। इति।

अत्र मन्त्रे मासकृत्पदं प्रयुक्तं माससंपादनमवयवद्वारा शुक्लकृष्णपक्ष-संपादनेनेति गृहीत्वा निरुक्तकारेणोक्तं मासानां चार्द्धमासानां च कर्ता भवति चन्द्रमाः, स एव वृकपदार्थः। अत्र वर्ण्यमानस्य प्रकारस्य तत्र संभवोऽपि। अरुणो-भवत्यरुणवर्णः स उदये चन्द्रमा येन मार्गेणाकाशे गच्छति तेन मार्गेण गच्छन्ग्रहनक्षत्र-तारकादि तं ददर्श तमभिजिहीते येन येन नक्षत्रादिना योक्ष्यमाणो भवति। तक्ष्णुवन्निव पृष्ठरोगी जानीतं मेऽस्य द्यावापृथिवी इति।

सर्वस्यास्य कल्पनस्य मूलं मन्त्रोक्तो मासकृच्छब्दः। तं दृष्ट्वा प्रसिद्धि-सहकारेण चन्द्रमःपरतानिर्णयः। तत्र मासकृच्छब्दे शाखाभेदेन पदरूपविभेदः। कैश्चनात्र मासकृत् इति पदं छिद्यते। कैश्चनशाखिभिरत्र मा, सकृद्, इति पदद्वयं छिद्यते। तत्र प्रथमपक्षे कथंचनोर्ध्वोक्तार्थसंभवेऽपि द्वितीयकल्पे चन्द्रमःकल्पनाबीजस्य मासकृच्छब्दस्याभावेन वृकशब्दस्यार्थोऽविज्ञातः। पद-द्वितयच्छेतृभिः शाखिभिर्मासकृच्छब्दस्य नोक्तार्थत्वं मन्यते। एवं सति मासकृच्छब्दस्य मासकारित्वाद्यर्थाभावे चन्द्रमःकल्पने मूलाभावान्न वृक-श्चन्द्रमाः।

अथ मन्त्रान्तरवशतो वृक आदित्यः। तत्र मन्त्रः—"वृकस्य चिद्वर्तिका-मन्तरास्यात्प्रामुञ्चतं गृभीतामि"ति। अत्र वृकेण गृहीता वर्तिका क्षुद्रः पक्षी तस्या वृकास्यतो विमोकवचनं वृकशब्दस्यादित्यार्थपरत्वसाधकं, तत्र वृकमुखतो वर्तिका-

मोचनं तावन्मात्रं नादित्यपरत्वसाधकं वृकशब्दस्य। तदर्थं निरुक्तकारेणाख्यानं मन्त्रान्तरसहकारेणोच्यते। तत्र मन्त्रः—

"अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य"। आह्वयदुषा अश्विनौ आदित्येनाभिग्रस्ता। तामश्विनौ प्रमुमुचतुरित्याख्यानम्"। इति। अत्राख्याने अश्विभ्यां वृकास्यतो वर्तिकाया मोचनं कृतमित्येतावन्मात्रमुच्यते, वर्तिका केति न स्पष्टम्। मन्त्रेऽपि 'वर्तिका अश्विनावाह्वयत् अश्विनौ तामभुञ्चतं वृकस्यास्यत' इत्येवोच्यते। तत्र वर्तिकापदार्थस्तु निरुक्तभाष्यकृता उषोरूप इति गृहीत्वा तस्या आदित्यसकाशतो मोचनं गृहीत्वा आदित्यपरता वृकशब्दस्योच्यते। संभवेदिदं यदि वर्त्तिकाशब्देनोषा एव ग्रहीतव्येत्यत्र किमपि प्रमाणं स्यात्। न च तादृशं किमपि प्रमाणं निरुक्ते प्रदर्श्यते। तस्मादत्र वृकवर्तिकासाजात्यं यत्र संभवेल्लोके तदनुसारेण तदर्थनिर्णयः कर्तव्यः। नहि आदित्योषसो. स्वयं वृकवर्तिकारूपताऽस्ति, साजात्यात्त्र तदारोपः। तद्विचारे वर्तिकासाजात्यमादित्यमण्डले एव सम्भवति। यथा वर्तिका स्वल्पकायः पक्षी आकाशे उड्डीनः स्वल्पकायो दृश्यते कन्दुकादिसदृक्षः, एवमादित्यमण्डलं स्वल्पकायमाकाशे सञ्चरदिव दृष्ट्वा तत्र पक्षिकल्पनायाः सम्भवः साजात्यात्। वेदे मन्त्रे ब्राह्मणे च आदित्ये पक्षिरूपत्वकल्पना बहुस्थलेषु प्रोच्यते। एवं सति आदित्यो न वृकपदार्थः किन्तु तदतिरिक्तः, प्रत्युत रात्रिकाले आदित्यमण्डलस्यादर्शनेन रात्र्या तमसा वा तद् ग्रस्तमिति कल्पनासम्भवः। तस्य मोचनमश्विभ्यां कृतमिति वर्णनसंभवः।

वृकशब्दस्त्वारण्ये शुनि प्रसिद्धो लोके, तस्य च शुनः प्राणिशरीरविकर्तनात् प्राणिहिंसाकारित्वाद् वृकशब्दबोध्यता। तत्र वृच्धातोर्हिंसार्थात्तस्य शब्दस्य सिद्धि। अतएव निघण्टुषु हिसार्थकेषु धातुषु वृणक्तीति पठितम्। एवं च विकर्तनसाम्येन हिंसाकर्तृत्वसाम्येन च वृकशब्देन तमो वा रात्रिर्वोच्यते।

आदित्यादर्शनेन तमसा तस्य वधवर्णनसंभवः। अह्नो विकर्तनेन वा तस्य वृकशब्दबोध्यता। एवं सति वृकशब्देन तमो गृहीत्वा तत्सकाशतो वर्तिकारूपस्य क्षुद्रपक्षिसदृशरूपस्यादित्यमण्डलस्याश्विभ्यां विमोचनं, विमोचनार्थं तयाह्वानमिति संभवः। अतएव प्रथममन्त्रार्थः सरलः। रात्र्या वृकशब्दार्थत्वे तत्र वर्तमानस्य तमस उषसो वापि वा वृकशब्दार्थत्वं संभवि। तदनुसारेण वृकशब्दार्थत्वं तमसः प्राप्तमुषसोऽपि। प्रकृते उषोरूपस्यैव वृकस्य ग्रहणाभिप्रायेणोच्यते, 'अरुणो वृक' इति। स चारुणो वृकउषोरूपः। उषा रात्र्याः प्रारम्भे भवति रात्र्या अवसानेऽपि। तत्रोभयस्थलीयोषसोरेकत्वं मत्वोच्यते मासकृदिति। तस्यार्थो मांसकृत् मांसकर्तनकारी। अनुस्वाराभावश्च्छान्दसत्वात्। प्रातस्तन्या उषसो मांसकृत्त्वं मन्त्रान्तरे

प्रकारान्तरेणोच्यते। यथाऽऽर्भवसूक्ते। तत्र ऋभवः स्तूयन्ते ते च त्रय 'ऋभुर्विभ्वा वाज' इति। तत्रर्भुरिन्द्रस्यादित्यस्य सुकर्मा, विभ्वा वरुणस्य सुकर्मा, वाजो देवानां सुकर्मेति ऋभुसूक्तस्थमन्त्रेण "वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा" इत्यनेन प्रतिपाद्यते। ततो ज्ञायते एकोऽस्तोत्तरं कार्यकारी, अपरो दिवाभागे, तृतीयः प्रातःकाले। वरुणोऽस्तोत्तरवर्त्यादित्यः। इन्द्रस्तु दिवाभागीयः। देवा रश्मयस्तु प्रातःकालीनाः। तेषामेव सुकर्मत्वमहस्सम्बन्धात्। तच्च तृतीयस्य कार्यम्। तदेषामृभूणां कार्याण्यपि ऋभुसूक्तगतमन्त्रे उच्यन्ते। तत्रोच्यते—

"शोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम्।

आनिम्रुचः शकृदेको अपाभरत्किंस्वित्पुत्रेभ्यः पितरावुपावतु"रिति॥

निरुक्तकारेण निघण्टौ पठितम्, "अरुण्यो गाव उषसाम्" उषसामरुणवर्णा गावो वाहनानि इति तदर्थः। देवानां वाहनादिविषये निरुक्तकारेणोच्यते 'आत्मैवैषां वाहनमायुधं सर्वं देवस्य देवस्ये'ति। ततो ज्ञायते अरुणवर्णा गावो रश्मयस्तदभिन्ना उषाः। रश्मीनां देवत्वं शतपथब्राह्मण उच्यते इति पूर्वं प्रतिपादितम्। तत्र मन्त्रे उच्यते 'शोणामेक उदकं गामवाजति' शोणा अरुणवर्णा गौरर्थादुषोरूपिणी। तामरुणवर्णां गामेक ऋभुरर्थाद्विभ्वा उदकमव्यक्तं तेजस्तमःकालिकम्। रात्रौ अव्यक्तस्य तेजसोऽप्त्वेन व्यवहारो वेदे इति पूर्वं प्रतिपादितम्, तत्पाययितुमित्यर्थः। अवाजति प्रेरयति। एकेनर्भुणा सायन्तनी उषोरूपिणी गौरुदकं प्रति नीयते। यथा लोके गोपालको गामुदकपानार्थं जलाशयं प्रति नयति तद्वत्। सा चैषा सायन्तनी उषाः। तत्कालतः परस्तात्तमोमयकालस्य प्रवृत्त्या तत्रत्यस्याव्यक्ततेजोरूपस्योदकस्य सविधे नयनं तस्या एव संभवतीति। प्रातस्तनीमुपसमभिप्रेत्योक्तं मन्त्रे 'मांसमेकः पिंशति सूनयभृतम्' इति। एकः प्रातःकालिक ऋभुर्वाजरूपः। सूनया स्वल्पच्छुरिकया भृतं संपादितं कर्त्तितमिति यावत्। मास पिंशति अरुणवर्णं करोति। अयंभावः—प्राय उषःकाले प्रातः सायं चोदयात्पूर्वमस्तोत्तरं चादित्यस्य समेघमरुणवर्णत्वं दृश्यते। ते चारुणा दृश्यमाना मेघा मामखण्डरूपाः। ते च कलामात्रोदितेनात्रास्तमितेन आदित्येन तदभिन्नयाच्छुरिकया कर्तिता इवेति। अरुणवर्णास्त उषसा संभृता इति।

पृथिव्यास्तिर्यक् प्रसरणवशात् देशविशेषे आदित्यस्य स्वल्पकालमुदयस्ततोऽस्तमयः। पुनर्द्वितीयवारे पूर्वतोऽधिककालमादित्यस्योदयोत्तरं सत्ता ततः पुनरस्तमय इत्येवं क्रमेण दिनस्य विवर्धमानता। सा चानेकदिनपर्यन्ता ध्रुवसन्निकटदेशस्थले। तत्र स्वल्पकालमुदित आदित्योऽस्तं यञ्छुनः पुच्छमिवावभासते। अतएव तस्य शुनः पुच्छत्वेन व्यवहारः। तदेतत्परस्तात्सत्यवसरे वर्ण-

यिष्यते। यथा शुनः पुच्छं स्वस्थानतो निर्गतं तिर्यक् भवदर्धवर्तुलाकारं भवति एवं तत्रादित्योऽपि क्षितिजत ऊर्ध्वमुद्गतोऽस्तं यञ्छुनः पुच्छाकारो भासते। एवं स्वल्पकालं कलामात्ररूपं दृश्यमादित्यमुषस्सु अरुणवर्णासु मध्ये दृष्टिपथमुपारूढम्, पुनरदृश्यमेवं भावमुपलक्ष्य अरुणवर्णान्तराले दृश्याया आदित्यमण्डलकलायाश्छुरिकात्वं गृहीत्वा तयेमानि मांसखण्डानि कृत्तानीति कल्पना। एवं च सूना हिंसिका छुरिका। तया भृतं संपादितं मांसमेकः पिंशतीत्युक्तम्। यद्यपीदमुभयविधोषःकालयोः सम्भवति तथापि शोणामेक इत्यनेन सायन्तन्याः पृथग्वचनादत्र प्रातस्तन्येवोषा अभिप्रेयते। एवं च प्रातस्तन्योषसा तद्रूपेण वाजेन सूनया छुरिकया संपादितं मांसं पिंशतेऽरुणवर्णं क्रियते सङ्गृह्यते वा। पिशि अवयव इति धातुः। ततः पेशनमवयवसंपादनमित्यर्थः। रूपसंपादने तस्य संभवः। एवं च प्रातस्तन्या उषसः सायन्तन्या वा मांसकृत्त्वं भवतीत्युक्तम्। सा च प्रकृतेऽरुणोऽरुणवर्णः मासकृत् मांसकृत् मांसकर्तनकारी वृकस्तद्रूपिणी उषाः। मा सकृदिति पदद्वयच्छेदे वृके मांसकृत्त्वं वृकस्वभावतो लब्धम्। अस्तगतस्यादित्यस्योक्तिरियम्। तेनोच्यतेऽरुणो मांसकृद्वृकः पथां यन्तं मा सकृद्ददर्श प्रथमम्, ततस्तमः प्रवृत्त्या तदीयव्यापाराभावः। पुनः प्रातःकाले तामुषसं दृष्ट्वोच्यतेऽयं पूर्वदृष्ट एव वृक इति गृहीत्वा पुनर्व्यापरणे प्रवृत्तः। तदुक्तं उज्जिहीते निचाय्य। निचाय्य प्रथमतो दृष्ट्वाऽऽक्रमणार्थमुज्जिहीते ऊर्ध्वं गच्छन्नाक्रामतीवेति कल्पना। इयं च तष्टेव पृष्ठ्यामयीत्युपमानेन व्यज्यते। स पृष्ठे आमयवान् दुःखयुक्तः हठादुत्थातुमक्षमस्तष्टा लक्ष्यं काष्ठादिकं प्रथमं पश्यति तत उत्थातु चेष्टते ततस्तस्य लक्ष्यानुगो व्यापारो भवति। एवमेतेनारुणेन वृकेण मार्गेण गच्छन्नहं दृष्टः प्रथमम्। ततः स मामाक्रमितुमुत्फालं कृतवान्। उत्फाले मध्यदेशासम्बन्धः स्पष्टः। तादृशोऽत्र तमःकाले उषसोऽसम्बन्धात्पुनस्तस्या दर्शनादुद्गमनकल्पनेति। एवं सत्येवोपमाने तष्टुः पृष्ठ्यामयीति विशेषणदानं सार्थकम्। एवंवृकेणाक्रमणादिकल्पनं हठाद् बुद्धिस्थं न भवति किन्तु पूर्वोक्तसदृशविचारेणेति कूटवद्भावं मनसि कृत्वोच्यते हे द्यावापृथिवी तत्स्था जना वा, अस्य मम वचसस्तात्पर्यं वित्तं जानीतम्, जानीथेत्यर्थः। अस्मिन्सूक्ते प्रतिमन्त्रमेतादृशकूटकल्पनवदुक्तिस्तस्य तात्पर्यं 'जानीत'मित्यस्यावृत्तिः प्रतिमन्त्रम्।

एवं सति वृकपदार्थोऽत्र रात्रिस्तदवयवभूता उषा इत्येव। न तु आदित्यः साजात्यात्। वर्तिकात्वं चादित्यस्य साजात्यात्प्रसिद्धेश्च वेदे इति तस्या आदित्यरूपाया वर्तिकाया मोचनमश्विभ्यां क्रियत इत्यश्विनोः स्तुतिः। अश्विनोर्नासत्यदस्रयोः उदयात्पूर्वमस्तोतरं च सहप्रवृत्तिः। तत्रोदयात्पूर्वसहप्रवृत्तिं गृहीत्वा परस्तादादित्यस्योदयेनाश्विभ्यामादित्यस्य तद्रूपिण्या वर्तिकया अरुणवर्णवृकसकाशतो

मोचनं कृतमिति कल्पना। एवं सत्येवोक्तमन्त्रस्य स्पष्टार्थत्वम्। अन्यथा चन्द्रमसो वृकत्वकल्पने ऋषिणोक्ते पथा यन्तं तं, नक्षत्रादिकं च दृष्ट्वा तेन नक्षत्रेण चन्द्रमा युक्तो भवति। तादृशः चन्द्रमा मां प्रति दृष्टवानिति वर्णने कूटरूपत्वाभावेन "वित्तं मे द्यावापृथिवी" इति मन्त्रांशस्य समञ्जसता न स्यात्। आदित्यपरत्वे तूक्तरीत्या स्पष्टार्थत्वम्। वृकशब्दस्यादित्यपरत्वे वर्तिकाशब्दस्योषःपरत्वे साजात्याभावः। न हि सा पक्षीव पिण्डीभूता दृश्यते आदित्ये तु तत्सम्भव इति पूर्वमुक्तमेव।

एवं वेदे प्रयुज्यमानेच्छब्दविषयेऽपि न विस्पष्टनार्थता।

इच्छब्दविषये निरुक्तकारेणोच्यते मन्त्रेष्विच्छब्दः पादपूरणमात्रफलोऽनर्थकः। तदुक्तं तेन 'अमिताक्षरेष्वनर्थकास्ते पदपूरणा मिताक्षरेषु कमीमिद्विति'। तत्र कमादिविषये न प्रकृते विचारः किन्तु इच्छब्दविषये। तस्यानर्थकत्वं तेनोक्तम्। व्याख्यातृभिर्व्याख्यानावसरे इच्छब्दस्य यथाभिमतं सार्थक्यमुच्यते। यथा यदङ्गेति मन्त्रे भाष्यकारेणोच्यते। तथाहि स मन्त्रः—

"यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।
तवेत्तत्सत्यमङ्गिरः"। इति।

अत्र सायणेनोच्यते—अङ्गेत्यामन्त्रणे, हे अङ्ग अग्ने दाशुषे हविर्दत्तवते यजमानाय तत्कर्मानुसारेण भद्रं वित्तगृहादि करिष्यसि। दास्यसीत्यर्थ। तत्तवेद्। तत्तवैव। अत्र यजमानाय प्रजापश्वादिरूपभद्ररूपफलदानेन स यजमानः साधनसंपत्त्या पुनर्यागं करिष्यति तथासति तत्फलदानं तवैवोपकारकम्। तदुक्तरीत्या तवोपकारकत्व तत्सत्य न तु विपर्यस्त, हे अङ्गिरः अङ्गिरःसकाशात उत्पन्नाग्ने। अथवाङ्गारजाग्ने इति।

अत्र भाष्ये इच्छब्दस्यावधारणार्थत्वमुक्त तवेत् तवैवेति। परंतु वेदे बहुषुस्थलेषु इत्तच्छब्दौ सह प्रयुज्येते, यथा प्रकृते 'तवेत्तद्' इति। एवं मैत्रावरुणे मन्त्रे 'तदित्समानमाशाथे' इत्यत्र तयोः सहप्रयोगः। एवं सौम्ये मन्त्रे "त्वामच्छाचरामसि तदिदर्थ दिवेदिवे" इति। एव बहुस्थलेषु। एवं केवलोऽपीच्छब्दः प्रयुच्यते यथा 'विश्वेदिन्द्रस्य वीर्या कृतानि' इत्यादिषु। तत्रेत्तदित्युभयग्रहणे इच्छब्दस्यार्थभावो न वक्तुं शक्यः प्रत्युत तच्छब्दवशत. कश्चनार्थः कल्प्यः, एवं केवलस्थलेऽपि अर्थविशेषग्रहणेन मन्त्रार्थस्य सम्यगुपकारो भवति। यथा प्रकृते मन्त्रेऽग्निं प्रत्युच्यते हविर्दानवते यजमानाय भद्रकरणं तव इत्तत्सत्यमिति। तत्र ऋतसत्यशब्दयोर्लोके समानार्थत्वेऽपि वेदे सर्वत्र न समानार्थता यथा 'ऋतं च सत्यंचे'ति मन्त्रे। तत्र ऋतसत्यशब्दयोर्न समानार्थत्वं। तथासत्यन्यतरवर्णनेनैवोपपत्तावपरग्रहणवैयर्थ्यं स्यात्। तस्मादृतशब्दस्य दिनार्थकत्वं दिनाभिन्ना-

दित्यार्थकत्वं तदभिन्नयज्ञार्थकत्वं वा। अतएव निरुक्तकारेण ऋतशब्दकथनावसरे सत्यं वा यज्ञं वेति प्रतिपादितम्। तत्र समानार्थत्वमभिप्रेत्य सत्यं वेति वचनं, परं वचनमसमानार्थत्वे। अतएव मैत्रावरुणमन्त्रेऽनेकवारमृतशब्दं गृहीत्वा वर्णनमुपपद्यते। स च मन्त्रः—

ऋतेन मित्रावरुणा वृतावृधावृतस्पृशा।
ऋतु बृहन्तमाशाथे ॥ इति।

अत्र मित्रावरुणयोर्ऋतेन बृहतः ऋतोः कर्मणो व्याप्तिवचनाद्दिनसम्बन्धो व्यज्यते। 'ऋतावृधौ ऋतस्पृशा' इत्यनेन ऋतवर्धकत्वमृतस्पृक्त्वं चोपपादयितुम् ऋतभिन्नसम्बन्धोऽपेक्षणीयः। तथा सति ऋतभिन्नसम्बन्धिनावेतावृतसविधवर्तित्वेनर्तवर्धकौ ऋतस्पर्शकारकाविति वर्णनं सम्यक् भवति। तयोर्ऋतभिन्नसम्बन्धो मित्रावरुणसूक्ते वर्णनतो ज्ञायते। तत्रोच्यते 'दानुमत्या बृहन्तं गर्तमासाथे' इति। दानुमती रात्रिः। 'दाभाभ्यांनु'रित्यौणादिकेन सूत्रेण दाधातोर्नुप्रत्ययात्। दानु दानं तद्वती। रात्रिशब्दोऽपि दानवत्त्वबोधकः। रा दाने इत्यस्मात् 'राशदिभ्यां त्रिप्' इत्यनेन त्रिप्प्रत्ययात्। रात्रिः दानेन तद्वती। अवश्यायादिदानाद्रात्रिर्दानुमती। तस्या बृहन् गर्तश्चोक्तरीत्या तेजसोऽभावात्मक। तत्र तयोर्वर्तमानत्व तेन मन्त्रेणप्रतिपाद्यते। तेन तयो रात्रिकालत्वं ज्ञायते। स च रात्रिकाल आदित्यमण्डलसविधवर्ती उदयात्पूर्वोऽस्तमयादुत्तरो वाऽव्यवहितः। अतएव तौ प्रति सूक्ते उच्यते 'सहस्रस्थूणं बिभृथः सह द्वा' विति। तत्र सहस्रस्थूणमित्यनेनादित्यमण्डलमुच्यते सहस्ररश्मियुक्तत्वात्तस्य। रश्मीनां स्थूणात्वेन वर्णनं साजात्यात्। यथा प्रलम्बमाना मस्तके वृत्ताकारवती स्थूणा भवति एवमिमे रश्मयोऽप्यादित्यात्प्रलम्बमाना मस्तके वृत्ताकारमण्डलसम्बन्धिन इति। सहस्रस्थूणं सहस्ररश्म्युपेतमादित्यमण्डलं 'सह धारयथ' इति सह विधारकत्वमुच्यमानं संगच्छते। यथा दुरादानपदार्थस्य ग्रहणे सन्दंशस्तस्योभयपार्श्ववर्ती अव्यवहितो विधारको भवति तद्वत्। एवं च मुख्यं दिनमादित्योदयेनादित्यसम्बन्धात्। तस्यासमन्तात्सह विधारकत्वोक्तया तयो रात्रिवर्तिमण्डलसविधवर्ती दिनप्रारम्भीयो रात्रिप्रारम्भीयश्च काल इति भवति। दिनस्य ऋतशब्दार्थत्वे रात्रिस्तद्भिन्ना, तत्सम्बन्धित्वमुक्तरीत्योच्यमानं संगतम्। अतएव रात्र्यवसाने दिनप्रारम्भकाले वर्तमानत्वेन तयोर्ऋतस्पृक्त्वमुच्यमानं संगतम्। एवं दिनं यथादित्योदयात्तदस्तमयं यावन्मुख्यं भवति एवं सवितृकालतोऽपि अमुख्य दिनारम्भ उक्तः स तु पूर्वमुक्त एव। सवितुश्च मित्राभिन्नतया ताभ्यां दिनसम्बन्धः। तच्च सवितृकालतः प्रवर्तमानं दिनं न मुख्यं, किन्तु वर्धितमिति तयो ऋत-

वृधत्वं मन्त्रे उच्यमानं संगतं भवति। एवं च ऋतशब्दो दिनार्थकस्तद्भिन्ना च रात्रिस्तत्सम्बन्धिता सत्यशब्दस्य। सा च रात्रिः सत्यशब्देनोच्यते तद्गतं तेजोऽपि तद्वत् सत्यशब्देनोच्यते। ऋत सत्यशब्दयोर्भिन्नार्थकत्वादेव सन्ध्यानुष्ठाने आचमने प्रयुज्यमानमन्त्राभ्यां द्विविधज्योतिषोर्वचनं संगतम्। दिवा सन्ध्यायामाचमन मन्त्रे 'इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा' इत्यादित्यज्योतिषोहोमाधारत्ववचनं, रात्रिसन्ध्यायां तस्मिन् मन्त्रे 'सत्ये ज्योतिषि जुहोमि स्वाहा' इति सत्यस्य ज्योतिषोवचनम्। एवं दिवा भोजनेऽन्नपरिसेचने रात्रिभोजनेऽन्नपरिसेचने यौ मन्त्रौ प्रयुज्येते ताभ्यामप्येवमेवार्थः प्रतीयते। 'सत्यं त्वर्तेन परिषिञ्चामि' 'ऋतं त्वा सत्येन परिषिञ्चामि' इति मन्त्रौ; तयोराद्यो दिनभोजने द्वितीयश्च रात्रिभोजने प्रयुज्यते। अनयोर्मन्त्रयोर्ऋतसत्यशब्दयोर्विभिन्नविभक्तिकत्वेनैकस्मिन्वाक्ये प्रयोगात्तयोर्भिन्नार्थत्वप्रतीतिः। एवञ्च ऋतभिन्नं सत्यमर्थात्सत्यभिन्नता ऋते प्रतीता भवति। तच्च सत्यमृताभावो वा तत्र वर्तमानमव्यक्तं तेजो वेत्यन्यत्।

एवं चोक्ताग्नेये मन्त्रेऽग्निं प्रत्युच्यमानं यजमानाय भद्रदान भविष्यत्कालिकं तव सत्यस्वरूपम्। अर्थात्त्वदभावकालिकम्। पूर्वोक्तरीत्या वह्नेरभावो वन्हेः सत्यमिति भवति। तच्च वन्हेः सत्यमुभयत्र पृथिवीलोके द्योलोके चेति। तत्र पूर्वोक्तलोककल्पनायां बन्हेः पृथिवीसम्बन्धित्वं तत्र च यजमानेन हविर्दानादिकं क्रियते यज्ञस्वरूपं क्रियारूपम्। तस्य फलं च भविष्यकालिके जन्मनि। तत्र यजमानोऽपि तत्रत्य आदित्य एव। तत्र स्थितेन तेन क्रियमाणो यज्ञो मानुषो यज्ञः। एवं द्योलोकावस्थाने तत्र स्थितेन तेन क्रियमाणो यज्ञो दैवो यज्ञः। तत्र मानुषकयज्ञे तज्जन्यं फलं जन्मान्तरे। जन्मान्तरं पूर्वस्य जन्मनोऽवसाने मरणोत्तरम्। तत्र पृथिव्या जातस्य तत्रोदितस्यादित्यस्य मरणं तत्रादर्शने द्योलोके उदयरूपे जन्मनि। तदानी तस्य पूर्वयजमानस्य यद्भद्ररूपं फलं वित्तगृहप्रजापशुरूपं तत्तत्र द्योलोके भवेत्। द्योलोके सूर्यदेवताकत्वं न वन्हिदेवताकत्वमिति वन्हेस्तत्र तत्सत्यम्। एतच्च विदूरवर्तितच्छब्देनोच्यते। एवं तत्र यज्ञे यजमानस्य यत्पूर्वोक्तभद्ररूपं फल तत्तत्र भविष्यत्कालिकं तत्पृथिवीलोके इति तस्य पृथिव्यां सविधवर्तित्वेन इच्छब्देन वचनम्। तदुभयरूपं सविधवर्तिविदूरवर्ति च वह्नेः सत्यरूपमिति गृहीत्वोच्यते मन्त्रे "तवेत्तत्सत्यम्" इति। एवं चात्रेच्छब्देन पृथिवीसम्बन्धित्वं तच्छब्देन विदूरवर्तिद्योलोकसम्बन्धित्वं बोध्यते। एवमेव मैत्रावरुणमन्त्रे "तदित्समानमाशाथे" इत्यत्र मैत्रावरुणयोः सहप्रवृत्तरूपवत्वेन तयोरित्तत्सम्बन्ध उभयोः समानरूप एव। यदेकस्य सविधवर्ति तदेवापरस्य, यच्च विदूरवर्ति तदेवापरस्येति

गृहीत्वोक्तं "तदित्समानमाशाथे" इति। सोम्येऽपि मन्त्रे देवताभिः सोमं प्रत्युच्यते हे सोम त्वामच्छाभिमुख्येन तदिदर्थं तदिदोरन्ते चरामसि इति। अर्थशब्देन गन्तव्यस्थानस्यावसानस्थलं बोध्यते। अतएवाग्निं प्रति मन्त्रे उच्यते "अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवु" रिति। अग्नेः पूर्वे भ्रातरो रथी अध्वनोऽन्तमिवैतमर्थमनुवृत्तवन्तः। अवसानस्थलं प्राप्ता मृता इत्यर्थ इति पूर्वं प्रतिपादितम्। एवञ्चेच्छब्देन पृथिवीसम्बन्धित्वं तच्छब्देन विदूरद्युलोकसम्बन्धित्वमर्थो बोध्यते, न तु नैरर्थक्यं तस्य। अत एवैन्द्रे सूक्ते—

निगव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट्सहस्रा।
षष्टिर्वीरासो अधि षट् दूवोयु विश्वेदिन्द्रस्य वीर्या कृतनि॥

इत्यस्मिन् मन्त्रे इन्द्रस्य पृथिवीलोकस्थानि कृतानि सर्वाणि वीर्याण्युच्यन्ते इच्छब्देन। तत्र विश्वा सर्वाणिइत्पृथिवीलोकसम्बन्धीनि वीर्या वीर्याणि कर्माणीन्द्रस्येत्युच्यते। तानि कर्माणि मन्त्रपूर्वार्धेनोच्यन्ते निगव्यव इत्यनेन। अत्र मन्त्रे राश्याः पञ्चधा विभागस्तद्भेदभिन्नानि पञ्चविधानि कार्याण्यत्रोच्यन्ते तानि सर्वाणीन्द्रकृतानि इत् पृथिवीलोके इति। तत्र गव्यवो गवार्थिनोऽनवो द्रुह्यवश्च प्रतिस्वं षट्सहस्रा षट्सहस्राणि। अनवः शब्दो मनुष्यनाम द्रुह्यवोऽपि मनुष्यनामैव। तत्र गवार्थित्वमुषोर्ऽथित्वं गृहीत्वा पृथिवीसम्बन्धादनव इत्युक्तिः। ते च तेजोरूपाः। द्रुह्यवोऽपि तेजसो द्रोहकर्तारस्तेऽपि पृथिवीसम्बन्धान्मनुष्या अर्थाद्भूलोकसम्बन्धिन एव। एतावता भागद्वयमुपर्युक्तं सङ्ख्या च द्वादशसहस्राणि। ततः परस्तात्षष्टिः शता षट्सहस्राण्येव सुषुपुः स्वापं कृतवन्तो मनुष्यसम्बन्धिनः पृथिवीसम्बन्धिन एव। केवलतमोमयत्वेन तत्र क्रियाभावात्स्वापवचनम्। तदपीन्द्रकर्मैव। ततः षष्टिः शतेत्यध्याहार्य षष्टिः शता षष्टिः शतानि षट्सहस्राणि वीरासो वीराणि शत्रूणामभिभवकर्तॄणि। तमसो विनाशकानि। ततोऽधिकं षट् सहस्राणि दुवोयु, दुवः परिचर्या स्तुतिरिति यावत्। तत्कर्तुमिच्छत्। एवं सर्वं मिलित्वा त्रिंशत्सहस्राणि तावत्पर्यन्तं तेन तेन रूपेण तावत्कालसम्बन्धादिदमिन्द्रकर्तृकमिति गृहीत्वोक्तं विश्वा सर्वाणि इत् पृथिवीलोकसम्बन्धीनि इन्द्रस्य कर्माणीत्यर्थः। एवं चेत्तच्छब्दयोर्न सर्वत्र नैरर्थक्यमिति।

एवं विषुणशब्दार्थाविज्ञानेनास्पष्टार्थता मन्त्रस्य। अयं शब्दो निघण्टुषु अनवगतार्थेषु पठ्यते। निरुक्तकारेणेमं शब्दं गृहीत्वा तदर्थविज्ञानाय निगम उक्तः। यथा—

न यातव इन्द्रजुजुवुर्नो न वन्दनाः शविष्ठ वेद्याभिः।
स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः॥ इति।

अस्य निरुक्तकारेण व्याख्या क्रियते—'स उत्सहतां यो विषुणस्य जन्तोर्विषमस्य मा शिश्नदेवा अब्रह्मचर्याः। शिश्नं श्रथतेः। अपि गुर्ऋतं नः। सत्यं वा यज्ञं वा' इति। दुर्गाचार्येणात्र व्याख्या क्रियते। यथा—हे भगवन् इन्द्र तथा कुरु यथा नेममस्मद्यज्ञं यातवः यातयितारः यज्ञविघ्नकर्तारः केचिदपि जुजुवुरागच्छेयुरित्यर्थः। किञ्च हे शविष्ठ बलिष्ठ ये एते वन्दना वन्दितारो लाटगौडादयः जानपदीभिर्वेद्याभिराकृतिभिर्युक्ताः। किं ब्राह्मणा एते स्युः, उतान्यजातीयाः केचिदिति। अथवा आवेदितव्याभि. प्रवृत्तिभिर्युक्ताः। नहि तासां प्रवृत्तीनामन्तोऽस्ति याभिस्ते प्रवर्तन्ते चपलत्वात्। किञ्च येऽपि चैते श्रोत्रिया अपि सन्तः शिश्नदेवा शिश्नेन नित्यमेव प्रकीर्णाभिः स्त्रीभिः साकं क्रीडन्त आसते श्रौतानि कर्माण्युत्सृज्य। तेऽपि युष्मदनुग्रहादिदमस्माकं ऋतं यज्ञं मा अपिगुः मा आगच्छन्तु। नास्माकं तैरपि यज्ञमभिगच्छद्भिरर्थोऽस्तीत्यभिप्रायः। आह कीदृशास्तर्हि यज्ञमागच्छन्त्विति। उच्यते। स शर्धत्। स एवोत्सहतामिममस्मद्यज्ञमागन्तु, य एवार्य ईश्वर आत्मीयानामिन्द्रियाणाम्। जितेन्द्रिय इत्यर्थः। यश्च विषुणस्य विषमस्य यज्ञविध्वंसयितुर्जन्तोर्मनुष्यस्य निग्रहाय समर्थः। येन परिपाल्यमाना एतं यज्ञमविघ्नेन समाप्येमहीत्यभिप्रायः। एवमेतस्मिन्मन्त्रे यातवो वन्दनाः शिश्नदेवाश्च मा आगच्छन्तु इति प्रतिषिद्धेष्वेतेषु अनिष्टत्वादेतेषां स शर्धदर्यः इति श्रूयमाणमार्यवृत्तमनुष्यागमनविषयमेतद्भवति तस्येष्टत्वात्, स चाभ्यागतः सन्नवश्यं विषुणस्य विषमस्य मनुष्यस्य निग्रहं करोति। तस्माद्विषुणस्येति शब्दो विषमस्येत्युपपद्यते इति।

एवं चात्र भाष्यकृता मन्त्रे यातवो वन्दना शिश्नदेवा इति शब्ददर्शनेन विषुणशब्दस्यानिष्टार्थकत्वमिति गृहीत्वा विषुणशब्दस्य विषमार्थमुक्तम्। यात्वादीनामृते प्राप्तिर्माभूदित्युक्तत्वेन तेऽपि अनिष्टाः। तत्त्वं तेषु दोषकल्पनया। शिश्नदेवा इतिशब्दस्तु विशेषविचारमकृत्वाऽनिष्टपर इति गृहीतं तथा व्याख्यातं च। तत्र टीकाकृता बहुतरार्थस्य योजनेन भाष्योक्तार्थ एव पुष्टतां नीतः। तत्रोक्ता यातव इत्यादयः शब्दा स्वभावतोऽनिष्टबोधका न भवन्ति। यातव इत्यनेन कर्मसु प्रवर्तनं बोध्यते। नहि कर्मप्रवर्तनमात्र दुष्टरूपम्। कर्मप्रवर्तने प्रवर्तयितुः प्रवर्त्यस्य दुःखोत्पादनपूर्वं प्रवर्तनं दोषाय भवेत् न तु सामान्यतः कर्मसु प्रवर्तनं दोषः। एवं वन्दनमपि न दुष्टं स्वभावतः किन्त्वभिप्रायभेदेन दुःखपर्यवसायि दुष्टं, न तु सामान्यतस्तस्य दुष्टत्वम्। एव शिश्नदेवा इति वर्णनमपि अश्लीलशिश्नशब्दयोगमात्रेण शिश्नदेवाः शब्दो दोषपर्यवसायी भवति। परस्परसाहित्येऽपि तेषां न दुष्टार्थपरत्वं किन्तु प्रकारान्तरेण दोषोपक्रमे तत्प्रकरणपठिता एते दोष-

युक्तार्थबोधका भवेयुरित्यनिष्टार्थकतैतेषां स्यात्। प्रकृते च तादृशदोषोपक्रमे प्रमाणाभावेन भाष्यकारीयं तट्टीकाकर्तुश्च व्याख्यानमयुक्तमिति मन्त्रस्यार्थो न विज्ञातो भवति।

आदित्यपरत्वे तस्मिन्नानिष्टगन्धोऽपि। तदर्थ प्रयासः—तत्रैतस्मिन् मन्त्रे आदित्यस्योदयवर्णना क्रियते। उदयावसरे च तस्य किरणैरसम्बन्धः। किरणानां सम्बन्धो हि उदयोत्तरम्। अस्तावरीयाश्च किरणाः अस्तोत्तरं तत्सम्बन्धार्थं तत्पथा गच्छन्तीति तैरप्ययोगः। आदित्यस्य किरणैर्योगः सम्मुखभावेन पाश्चात्यानां, पौरस्त्यानां च किरणानां तिर्यक्त्वेन भवति। उदयावसरे च त्रिविधकिरणा-योग इत्ययमर्थोऽत्र मन्त्रे प्रोच्यते। सूर्योदयकालिकी अत्र वर्णना। स च सूर्य-स्योदयः सुमेरौ देवतानिवासस्थाने वर्ण्यते। तथाहि। "न यातव इन्द्र जूजुवुर्नः" इति। यातवः शब्द उदयप्राक्कालिककिरणाना बोधकः। ते हि किरणा रात्रे-रवसानसम्पादकाः सन्तः प्राणिनस्तदीयव्यापारे प्रवर्तयन्तस्तान्यातयन्ति। प्रयत्न-युक्तान् कुर्वन्ति। रात्रौ तमसा सर्वपदार्थेष्वावृतेषु पदार्थानामभावान्निद्रयाभिभ-वाच्च प्रयत्नविहीनता प्राणिनां जायते। अवसितायां च रात्र्यां सर्वपदार्थप्रकाशने तस्य तस्य प्राणिनः स्वस्वोचितव्यापारे प्रवृत्तिरुत्पद्यते, सा चैतैः किरणैः पदार्थानां प्रकाशनेन कारितेति ते यातयितारः प्रयत्नस्य प्रवर्तका भवन्ति इत्यभिप्रेत्य ते यातव इत्युच्यते। एतादृशं प्रवर्तनं यातनमभिप्रेत्य सवितुस्तदभिन्नस्य मित्रस्य "मित्रो जनान्यातयति ब्रुवाण" इति जनानां यातनमुच्यते। एवं च मित्रस्य तदभिन्नस्य सवितुः प्रातःकालिकाः किरणा यातवः इत्युच्यन्ते। तदुक्तं हे इन्द्र यातव उक्तरीत्या प्राणिना स्वव्यापारे प्रवर्तका यातव किरणाः प्रातःकालिका इति यावत्। नोऽस्माकमृतमुदयन्तमादित्यं न जुजुवु.। न गतवन्तो भवन्तु। आदित्येन सम्बद्धा मा भवन्तु। अतीतो हि तेषां समयः। आदित्यस्येदानीमुदीयमानत्वादि-त्यर्थः। एवं वन्दना अपि अस्तोत्तरवर्तिनः किरणाः। ते हि अस्तं यन्तं गतं वा आदित्यं विरक्तं विरक्ततामुपगतं क्रुद्धमिव मन्वानास्तं नमस्कारेण प्रसादयन्त इव तमनुसरन्ति। अत एवैतान् किरणानभिप्रेत्य 'एहिमायास' इति विशेषणं प्रयुज्यते वेदे। भाष्यकृतोक्तशब्दस्य निर्वचनप्रदर्शनव्याजेनोक्तम् "सौचीकमग्निमप्सु प्रविष्टम्" "एहिमा यासीः" इत्युक्तवन्त इति तदनुकरणहेतुकोऽयं शब्दस्तेषाम्। अस्तं गतमादित्यं विरक्तं मत्वा तत्प्रसादनायेव तदीयमार्गेण गच्छन्तस्तदनु-सरन्तः प्रसादनायेति कल्पना। प्रसादनं च नमस्कारपूर्वकानुनयेनेति तेऽपि तमादित्यं नमस्कारेणानुनयन्तीवेति गृहीत्वा वन्दनशब्देनोच्यन्ते। एवं च वन्दना नमस्कारकर्तारस्ते किरणा नोऽस्माकमृतमुदयार्थ प्राप्तमुदीयमानमादित्यं न जुजु-

वुर्न प्राप्ता भवन्तु। तेषामस्तोत्तरवर्तितया यत्र चास्तस्तद्देशीयैर्व्यापारैस्तद्देश-प्रकाशनरूपैः प्रवृत्तिरिति अत्रोदीयमानदेशेऽप्राप्तिः। यतोऽत्रोदयदवस्था-दित्यस्य। एवं सति तेषामपि अनवसर इति। अस्तमेष्यमाणस्य उदेष्यमाणस्य वा सहप्रवृत्त्योभयोः प्राप्तिस्तदभिप्रायेणोच्यते "स शर्धदिति"। यद्यप्यादित्य-स्यैक्यं तथापि देशादिरूपोपाधिभेदवशात्तद्भेदं मत्वा भेदेन व्यपदेशः। यश्च देवतासूदयन् भवति स देवरूपः। यश्चास्तमुपगच्छन्मनुष्येषु अर्थात्कुमेरौ भवति स तु मनुष्यरूपो भवति। देवलोकश्च सुमेरौ, तद्विपरीते कुमेरौ मनुष्यलोक इति पुरस्तादुक्तमेव। देवेषूदयस्थलं मनुष्येष्वस्तमयस्थलम्। उभयोर्युगपत्प्रवृत्तिः। यथायथैकत्र उदयनमस्तमयनरूपं व्यापारं प्रपद्यते तथा तथा परत्र तद्विरुद्ध-व्यापाराविष्टो भवति। प्रकृते च देवतासु उदेतुं प्रवृत्तस्तदानीमेवासौ मनुष्येष्व-स्तमेतुं प्रवर्तते। यावत्या मात्रयोदेति तावत्या मात्रयाऽन्यत्रास्तमेतीति। तदिदं परस्परद्वन्द्वमिव भवति। तदेवाभिप्रेत्य तस्य देवासुरयुद्धत्वेन वर्णना।

किञ्चेदमेवाभिप्रेत्य "शूद्रार्यौ चर्मणि व्यायच्छाते तमार्य वर्णमुज्जापन्ती" त्यनेन परिमण्डलस्यादित्यस्य प्रतीकरूपं परिमण्डलं चर्म तस्य शूद्रार्याभ्यां भिन्नदेशे समाकर्षणरूपं व्यायमनमुच्यते ब्राह्मणेऽश्वमेधप्रकरणे। एवं सति प्रकृते विषुणः जन्तुर्देवमनुष्यरूपसर्वदेशसम्बन्धरूपो मर्त्यः अस्तमयन् स्यात्। अर्यश्चोदयन् स्याद्देवेषु। अनयोर्जत्वार्ययोः परस्पराभिभवार्था प्रवृत्तिः चर्मव्यायमनेन बोध्यते। तत्रार्यो बलवान् भवतु, अन्यमभिभवतु इत्यभिप्रायेणोच्यते सः प्रसिद्धोऽ-र्थादुदयन् अर्यो गमनशील आदित्यः। विषुणस्य नानारूपस्य तेजस्तमोवैशिष्टयेन नानारूपता। मनुष्यलोक-देवलोकव्याप्त्या सर्वदेशसम्बन्धिता। तादृशस्य जन्तोमर्त्यस्यास्तं प्राप्नुवतः कुमेरावित्यर्थ.। शर्धत् बलवान् भवतु तस्याभिभवं करोत्वित्यर्थः। शृध-धातोरभिभवार्थत्वं तत्कारणबलार्थत्वं वेत्यर्थः। एवं चेदानी नोदयात्प्राग्वर्तिनां वा अस्तोत्तरवर्तिनां वा किरणानामवसरः। मर्त्यस्य चाभिभवेन निरासः। उदयोत्तरवर्तिनामपि तत्राप्राप्तिरुच्यते मा शिश्नदेवा इति। अय भाव'—आदित्यस्य संपूर्णोदये तस्येन्द्रियरूपता वेदे वर्ण्यते। सा चोदयावसरे-ऽस्तोत्तरं च न भवति। अत एवैतरेयब्राह्मणे उच्यते "दक्षिणं पादमवनेनिजेऽस्मि-न्राष्ट्र इन्द्रियं दधामि। सव्यं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं वर्धयामि।" इति। आदित्ये पादकल्पनयाऽवनेजनं प्रक्षालनं पादस्य। तत्तु मलसम्बन्धे। मलसम्बन्धश्च रात्रौ। अस्तावसरे तेन स्वीयतेजसोऽग्नौ निधानेन तस्य तेजो-राहित्यान्मलिनत्वमिति कल्पना। तस्यावनेजनं मलिनस्थले। तद्विरुद्धदेशे चासौ प्रकाशमानो भवति। तद् गृहीत्वोच्यते यदा दक्षिणं प्रदक्षिणमावर्तमानं

सुमेरावादित्यरूपं पादमवनेनिजे प्रक्षालयामि तदानीमस्मिन्कुमेरुरूपे राष्ट्रे इन्द्रियं दधामि। यदाच सव्यं पादं कुमेरुगतादित्यरूपं पादमवनेनिजे प्रक्षालयामि तदानीं सुमेरावस्मिन्राष्ट्र इन्द्रियं वर्धयामीति। तेनोदितस्यादित्यस्येन्द्रियरूपत्वं न उदयतो वा अस्तगतस्य वेति व्यक्तम्। अत एव ब्राह्मण उच्यते "वरुणस्य वा अभिषिच्यमानस्येन्द्रियं वीर्यं व्यपक्रामत्। अपक्रान्तस्य त्रेधाभाव उच्यते— "तृतीयं भृगुस्तृतीयं श्रायन्तीयं तृतीयं सरस्वत्यभव" दिति। एतेनेन्द्रियत्वं दिवाभागे उदयोत्तरमादित्यस्येति तद्भावः। उदयोत्तरं आदित्यस्येन्द्रियत्वात्तदवसरीयाणां किरणानां तद्देवत्वं इन्द्रियं देवः प्रकाशमान एषामिति व्युत्पत्या ते किरणाः शिश्नदेवाः। तेऽपि अस्माकमृतमुदयन्तमादित्यं मापिगुस्तं प्रति प्राप्ता मा भूवन्, अत्र लीना मा भूवन्निति। उदयावसरे तेषामनवसर इति तेऽपि अत्रोदयत्यादित्ये सम्बद्धा मा भूवन्नित्यर्थः। उदयावसरे आदित्यस्यानिन्द्रियभावो मैत्रावरुणे सूक्ते उच्यते। तथाहि तत्रोक्तम्—"दक्षं दधाते अपसम्" इति। दक्षमुदीयमानमादित्यं मित्रावरुणौ दधाते धारयत इति। तत्रादित्यस्य विशेषणमुच्यते अपसमिति। तेन शब्देन पसरूपत्वाभावो बोध्यते। पसःशब्दस्येन्द्रियपरत्वं वर्णव्यत्यासात् सप इत्यस्य विपर्यासेन पसभावः। परिशिष्टाध्याये तदुच्यते "गभभावेशितं पस" इति। तत्र यथा पसःशब्दो व्यत्यययुत एवं गभशब्दोऽपीति। एवं च दक्षस्य अपसमिति विशेषणात्तस्यानिन्द्रियभावो व्यज्यते। तदेवमुदयोत्तरमादित्यस्येन्द्रियरूपत्वम्। तदानीन्तनाः किरणास्तत्प्रकाशितास्तद्देवा उच्यन्त इति ते शिश्नदेवाः। तेऽपि न ऋतमुदयावसरीयं मण्डलमपिगुः। तत्र लीना मा भवन्तु इत्यर्थ इति विस्पष्टार्थत्वं मन्त्रान्तरादिसाहित्येनेति नोक्तविधाश्लीलार्थप्राप्तिरिति।

एवमात्रेये सूक्ते स्वर्भानुनासुरेण तमसा सूर्यस्य वेध इत्यादिवर्णनस्योपरागपरातय वर्णनं न सर्वथा मन्त्रार्थानुगुणम्। यद्यपि अत्रादित्यपरतोच्यत इति नानुक्रमणिकोल्लिखितमतभेदसंभवस्तथापि मन्त्राक्षरस्वारस्यविरहेण तथा वर्णनस्यासङ्गतत्वम्। तथाहि तत्सूक्तीया मन्त्राः—

"यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः।
अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः"॥

अत्र सूर्यं प्रत्युच्यते—हे सूर्य यद् यदा त्वा त्वामासुरोऽसुरसम्बन्धी स्वर्भानुरादित्यस्तमसाऽविध्यत् त्वां तमोयुक्तमकरोत्। कीदृशः स्वर्भानुरक्षेत्रवित् क्षेत्रं गृहं न वेत्ति तादृशः। तदानीं तस्य गृहसम्बन्धाभावात्। यथा मुग्धः। मुग्ध उन्मत्तो यथा क्षेत्रं गृहं न जानाति तद्वत्। तदानीं भुवनानि भूसम्बन्धिनो लोका अदीधयुः दीप्ताः प्रकाशिता अभवन्।

यत्त्वत्र स्वर्भानुत्वेन पुराणानुरोधेनासुरस्य ग्रहणम्, पुराणेऽसुरैः साकं सङ्घर्षे देवानामुभाभ्यां क्षीरोदधेर्मन्थनेन चतुर्दशरत्नानि लब्धानि। तत्रैकममृत-रूपमपि रत्नं तस्य ग्रहणे तेषां विमतौ विष्णुना मोहिनीरूपं धृत्वाऽमृतादीनां विभाजनं स्वीकृतम्। तत्रैकस्यां पङ्क्तावसुराणामवस्थापनमपरस्यां देवानां निवेशस्तत्र राहुनामकेनासुरेण देवानां कपटं विचिन्त्य देवपङ्क्तावुपविष्टम्। यदा मोहिनीरूपधारी विष्णुरमृतकुम्भं गृहीत्वा परिवेषणे प्रवृत्तस्तदानीं राहोर्हस्ते परिविष्टममृतं तेन तदानीमेव प्राशितं दृष्ट्वा पार्श्ववर्तिभ्यां सूर्याचन्द्रमोभ्यां विष्णवे तन्निवेदने क्रुद्धेन विष्णुना राहुणा पीतस्यामृतस्य निगालनात्पूर्वमेव चक्रेण वधः कृत.। अमृतसम्बन्धाच्छिन्नशिरसोऽप्येतस्य जीवनमेवासीत्। ततः प्रभृति सूर्याचन्द्रमसोर्विषये क्रुद्धोऽसौ पर्वणि तौ ग्रसति स तयोरुपराग उच्यते। तादृशो-परागपरताऽत्रेति वर्णनम्। यतोऽत्र स्वर्भानोर्ग्रहणं सूर्यस्य तमसा वेधवचनं चेति। तन्न समञ्जसम्, यतोऽत्र स्वर्भानो राहुपरत्वेन वचने तस्य स्वयमसुरत्वादासुर इति वर्णनस्यासङ्गतिः। एवमदीधयुरित्यस्य भुवनानीत्यस्य बहुवचनान्तकर्तृपदस्य अक्षेत्रविन्मुग्ध इत्युपमानस्य चासङ्गति.।

यत्त्वत्र यदा हे सूर्य स्वर्भानुस्तमसा त्वामविध्यत् तदानी भुवनानि सर्वे लोका अर्थात्तद्वर्ती जनः स्थानमविजानानो दृष्टइति वर्णनम्। अत्र आसुर इत्येवं वर्णनस्यासङ्गत्या साकं बहुवचनान्तस्य भुवनपदस्य तत्स्थलोकपरता लक्षणया वक्तव्या। एकवचनान्तत्वेन लोकलक्षणेऽदीधयुरित्यनेनसम्यगनन्वयः। दीधीङ धातोर्दीप्त्यर्थस्य दृशधातुसमानार्थत्वकल्पना करणीया स्यात्। तावतापि यथेति उपमावाचकपदस्यानन्वय इत्यादयो दोषाभवन्ति। कोशकारेण "तमस्तु राहुः स्वर्भानु" रिति अभेदेनोक्तस्य भेदकल्पना करणीया स्यात्तमसा। तस्मान्नेदंपरमिदं वर्णनम्। किन्तु स्वर्भानोरासुर इति विशेषणेनामौ स्वर्भानुरसुरसम्बन्धीति विज्ञायते। वेदेऽसुराणां देवविरोधितया वचनादयं स्वर्भानुरासुर इत्युच्यते। तद्विशेषणेनापरोऽपि स्वर्भानुर्भवतीति विज्ञायते। तदर्थं स्वर्भानुपदस्यार्थः प्रथम-तश्चिन्तनीयः। तत्र भाधातो दीप्त्यर्थात् "दा-भाभ्यां नुः" इति नुप्रत्यये भानु-र्दीप्तिकर्तेत्यर्थो लभ्यते। "उर्ध्व भानु सविता देवो अश्रेदित्यादिषु भानुशब्दस्य रश्मिपरतादर्शनादत्र भानुशब्देनादित्यरश्मिग्रहणम्। रश्मिरेवैक एकस्मिन्नवसरे भूवनं प्रकाशतीति ऋभुसूक्तेषु वर्णनात्स प्रकाशको रश्मिरेवादित्यशब्देन गृह्यते लोके। अथवा भानुशब्देन प्रकाशक आदित्यो गृह्यते, तस्य स्वःशब्देन विशेषणं स्वर्भानुशब्दे। स्वः शब्दोऽत्र न लोकविशेषपरो रूढः किन्तु शोभनेन गमनेन यौगिकः। सुपूर्वादृधातोः स्वरित्यस्य निष्पत्ति.। सुशब्दस्य शोभनार्थकता लोक-

सिद्धा, तादृशं चात्र ऋधात्वर्थो गमनमिति गृहीत्वा शोभनगमनकर्ता भानुरादित्य इति स्वर्भानुशब्दस्यार्थः। दिवाभागे विश्वप्रकाशनेन तस्य स्वर्भानुशब्देन वचनं, प्रकाशनार्थत्वेन गमनस्य शोभनत्वम्। स च प्रकाशक आदित्यः स्वर्भानुरित्युक्तम्। प्रकाशनं च स्थानभेदेन भिन्नकालिकं भिन्नम्। यथा भारतवर्षस्य दिवाभागे प्रकाशनममेरिकाप्रदेशे तदीयदिवाभागीयप्रकाशनतो भिन्नरूपमेवं सुमेरौ प्रकाशनं कुमेरुप्रकाशनतो भिन्नरूपम्। तत्र सुमेरुं प्रकाशयन्नादित्यस्तत्र शोभनगमन इति तत्र स्वर्भानुः। न तदानीं कुमेरुं प्रति स स्वर्भानुर्भवेत्। एवं कुमेरुं प्रकाशयन्नसौ सुमेर्वभिप्रायेण न स्वर्भानुः स्यात्। तत्र शतपथब्राह्मणे "वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवो देवेष्वेतर्ह्यसौ भवति देवांस्तर्ह्यभिगोपायतीति" वर्णनेन वसन्तादिऋतुत्रये देवेषु वर्तमानो देवान् साम्मुख्येन प्रकाशयन् देवानां गोप्ता देव. देवरूपो भवति। एवं देवताविरोधाद्देवलोकविरुद्धे कुमेरुरूपे देशेऽसुरनिवासरूपे परवर्तिऋतुत्रये वर्तमानोऽसावसुरेषु स्यात्, असुरांस्तदानीम् अभि साम्मुख्येन प्रकाशयंस्तद्गोप्ता आसुररूपः स्यात्। आसुरोऽसुरसम्बन्धी। एवञ्चासुर इति विशेषणादसौ कुमेरुसम्बद्धः प्रतीयते। स्वर्भानुवचनात्तत्र दिवाभागप्राप्त इति भवति। एवं च स्वर्भानुरादित्यो यथा दैव एवं स आसुरोऽपि इति दैवस्य तस्य व्यावर्तनाय स्वर्भानोर्विशेषणं मन्त्रे 'आसुर' इति।

एवं सति मन्त्रे वेधे साधनं तमस्तत्स्वरूपतो भिन्नत्वेनोच्यमानं संगच्छते। स्वर्भानोरेवामराद्यनुरोधेन तमोरूपत्वेन तमसो भेदेन निर्देशस्य संगतिर्न स्यात्। आसुर इति विशेषणस्यायुक्तत्वमुक्तमेव। तत्र सूर्यो देवः सुमेरुगत आदित्यस्तस्य आसुरस्वर्भानुतो भेदः। आदित्यस्योपाधिभेदेन वेदे भिन्नतया वचनमिति प्रतिपादितमेव। स च सूर्यो देवत्वात्सुमेरौ वर्तमानः। तस्य सुमेरौ रात्र्यवसरे तमसा युक्तत्वमिति कल्पनम्। अतएवादित्येनास्तगमने स्वीयं तेजोऽग्नौ निधीयत इति वेदे वचनम्। अग्नौ प्रवेश इति वर्णनाप्युक्तमूलिकैव। तदुच्यते "आदित्यो वा अस्तं यन्नग्निमनुप्रविशति" इति। तेजसोऽग्नौ निधानात्स तेजोरहितः कृष्णरूप इत्यपि कल्पना वेदे। तदेव गृहीत्वा यजुर्वेद उच्यते "यत्कृष्णोरूपं कृत्वा प्राविशस्त्वं वनस्पतीनिति"। एवं चास्य सुमेर्वभिप्रायेणास्तोत्तरं तमोरूपता। कुमेर्वभिप्रायेण तु तदानीं तत्र दिनप्रवृत्त्या स तु तत्र शोभनगमन आदित्यः। तत्र देवेषु रात्रौ सञ्जायमानकार्ष्ण्यस्य तद्रूपतमसो वेधस्य आसुरस्वर्भानुकर्तृकत्वमिति गृहीत्वा प्रकृतमन्त्रे उच्यते हे सूर्य (अर्थात्सुमेरुस्थ) यद्यदा रात्र्यवसरे इत्यर्थः। आसुरः (कुमेरुस्थः) स्वर्भानुरादित्यस्त्वां तमसाऽविध्यत् तमोयुक्तं कृतवान्। तत्र दृष्टान्त उच्यते। यथा मुग्धः कर्तव्याकर्तव्यमजानान उन्मत्तादिवदक्षेत्रविदेव-

मसावपि अक्षेत्रवित्। क्षेत्रशब्दस्यास्तरूपगृहबोधकता, तदु क्षेत्रं न विजानातीत्यक्षेत्रवित्। उदयं प्राप्नुवन्नसावस्तं न प्राप्तो भवतीयमस्ताप्राप्तिरेव क्षेत्रविज्ञत्वाभावरूपेणोच्यते। तदा भुवनानि अर्थात्कुमेरुस्थानि, तत्रापि भूरादिलोकत्रयसत्वस्य पूर्वमुक्तत्वात्तानि अदीधयुः दीप्तिमन्ति प्रकाशितान्यभूवन्। यदा सुमेरौ रात्रिप्रवृत्तिस्तदानी कुमेरौ दिनप्रवृत्त्या तत्रत्यभुवनप्रकाश इत्यर्थः। एवं सति नानेनादित्यस्य उपरागरूपग्रहणबोधनम्। ततः परवर्तिमन्त्रः—

स्वर्भानोरधयदिन्द्र माया अवो दिवो वर्तमाना अवाहन्।
गूळहं सूर्य तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः॥

पूर्वोक्तमन्त्रे रात्रेर्वचनादत्रापि रात्रिकाले संजायमानविशेषा अन्धकाररूपतमसः प्रवृत्तिस्तद्वशतस्तेजसोऽव्यक्तस्योदकरूपस्य प्रतिबन्ध इत्यादय ऐन्द्रसूक्ते उच्यमानास्तेऽपि उक्तस्वर्भानुकृता एवेति गृहीत्वा तासां मायात्वेन व्यवहारोऽत्रमन्त्रे, ताः सर्वा माया दिवो द्योलोकस्यावोऽवस्तात् अर्थाद्दक्षिणदिक्के कुमेरौ वर्तमानाः स्वर्भानोर्मायारूपास्तानिन्द्रोऽवस्ताद्रात्रिरूपे कुमेरुदेशेऽहन्। एवं रूपेणेन्द्रेण मायाविनाशवर्णनादुक्तस्वर्भानुरुक्तरीत्या कुमेरुस्थ एवादित्यस्तेन रात्रौ सूर्यस्य सुमेरुस्थस्यादित्यस्य तमो बेध इति ज्ञायते, नामावुपरागरूप इत्युक्तम्। तदानीं रात्रौ अपव्रतेन निष्कर्मणा, अपकृष्टं सर्वस्य विश्वस्यावरणेन विनाशकरणादपकृष्टं निकृष्टं व्रतं कर्म यस्यैतादृशेन तमसा गूळहं गुप्तमदृश्यं सूर्य तुरीयेण ब्रह्मणा तेजसाऽविन्दत् अत्रिः। अत्रिशब्दस्यार्थो निरुक्ते उच्यते "अत्रैव तृतीयमृच्छतेत्यत्रिः न त्रयो वेति"। अत्राग्निस्थाने भृगावङ्गिरसे च सञ्जाते तृतीयं खननेन विजानीथेत्युक्त्या त्रिरिति। न त्रयइत्यत्रिरिति। तत्र लोक द्वयेन सुमेरुकुमेरुरूपेण सम्बन्धाद् द्वौ भवतः। यश्च तत्सम्बन्धराहित्येन प्रकाशकः तृतीयो वेति कल्पने उच्यते न तृतीयः किन्तु तदभावरूप आदित्यरूप एवात्रिः। ऋषीणामादित्यरूपत्वस्यारण्यकेषूक्तिररिति पूर्वमुक्तम्। चतुर्थेन ब्रह्मणा तेजसाऽविन्दत्। रात्रौ भासमानं तेजः स्थानभेदेन भिन्नमिति गृहीत्वोच्यते तुरीयमिति। सोमविषयिण्यां प्रजापतिदुहित्रारोहकथायां प्रजापते रेतः प्रथमत उद्दीप्तमादित्य इत्युक्तम्। द्वितीयमुद्दीप्तं भृगुरिति। भृगोरर्चिषि संभवस्य ब्राह्मण उक्तेः किरणसन्दर्शनदशायां द्वितीयं तेजः स भृगुरिति। किरणासन्दर्शनदशायां भास्वरमुषोरूपं सान्ध्य तेजस्तृतीयम्, एवं सुमेरौ, कुमेरावपि सैषैव रीतिः। प्रकृते सुमेरुस्था वर्णनेति तत्र सान्ध्यतेजसः परस्ताद्दृश्यं तेजश्चतुर्थम्। यस्य प्रकाशस्य वशतस्तत्र सर्वात्मना तमःप्रवृत्तावपि न तेजसोऽभावः। तस्यैव ब्रह्मरूपत्वेन वर्णनं वेदे। तस्यैव प्रजापतित्वेन वर्णना ब्राह्मणादिषु। तदुक्तमैतरेये—"ब्रह्म वै बृह-

स्पतिरि"ति। "प्रजापतिः प्रजाः सृष्ट्वा महानभवत्"। तेन देवानामुत्पादनेनोत्पादित इन्द्रः प्रजापतिमब्रवीत्, तवेदं महत्वं मम भवतु इति। प्रजापतिनोक्तं यदि मम महत्वं तव स्याद् अहं महत्वरहितः को वा स्यामिति, तदा तदेव तव नाम 'क' इति भवतु, इत्यर्थवादेन प्रतिपाद्यते। तत्तुरीयं ब्रह्म तेजः तेनात्रिर्गूळहं सूर्यं तमसा तुरीयेण ब्रह्मणाऽत्रिरविन्ददित्युक्तं मन्त्रे। एवं सति तुरीयं ब्रह्म न किञ्चन दर्शनसाधनं न वात्र तमसा गूहनमुपरागरूपमिति, न वात्रिणोपरागसन्दर्शनं तत्स्पर्शमोक्षकालविज्ञानरूपमिति कल्पनावसरः। परवर्ती तत्रत्यमन्त्रो यथा—

मा मामिमं तवसन्तमत्र इरस्या द्रुग्धो भियसा निगारीत्।

त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा। इति।

अत्र सूर्यवाक्यत्वेन वचनम्। हे अत्रे तव सम्बन्धिनं सन्तं विद्यमानं त्वदीयमित्यर्थः। इममेवंरूपतापन्नं तमसा विद्धं मां सूर्यरूपम्। इरस्या, अन्नेच्छया। इराशब्दादन्नार्थात्क्यचि लालसायां सुकि क्विपि स्त्रियां टापि तृतीयैकवचनटास्थाने सुपामिति डा। भियसा भयजनकेन तमसा द्रुग्धो द्रोहकर्ता स स्वर्भानुर्मा निगारीत्। भक्षितं मा कुर्यात्, मा भक्षयतु। मा विनाशयतु इत्यर्थः। अतस्त्वं मित्रश्चेह प्रकृते स्थाने विद्यमानं माऽवतं रक्षतम्। यतस्त्वं मित्रोऽसि। मितेर्दुःखात्त्राता भवसि। श्लेषेण मित्रं सुहृद्भवसि। मित्रनामकदेवोऽसि। मन्त्रेषु मित्रस्य सवित्रभिन्नत्वमुच्यते "उत मित्रो भवसि देव धर्मभि"रित्यादिना। मित्रावरुणयोर्विषये मित्रावरुणसूक्तेषु आदित्यबिम्बपार्श्वद्वयेऽर्थादुदयादादित्यस्य पूर्वमेवमस्तोत्तरं च तत्स्थितिर्वर्ण्यते "सहस्रस्थूणं बिभृथः सह द्वौ" इत्यादिषु, तत्पूर्वं प्रदर्शितमन्यत्र। स च मित्र उदयात्पूर्वं वरुणश्चास्तोत्तरं भवति। तत्रास्त उदयश्च सुमेरौ यथा तथा कुमेरावपि भवत इति तत्पूर्वोत्तरभाविता तत्रापि। तत्र विशेषप्रतिपादनाय मित्रावरुणयोःस्थानविशेषाभिप्रायको विशेष उच्यते विशेषणद्वयेन। मित्रस्य विशेषणं 'सत्यराधा' इति वरुणस्य विशेषणं राजेति। तत्र सत्यराधा इत्यनेन तस्य रात्रिसम्बन्धो व्यज्यते। राधःशब्दो धनार्थस्तेज आह। सत्यं तेजो यस्येति। रात्रिकालिकस्य तेजसः सत्यशब्देन वचनं वेदे। अत एव सन्ध्यानुष्ठाने रात्रिकालिकाचमनमन्त्रे 'सत्ये ज्योतिषि जुहोमी'त्युच्यते। अश्विनोः सूक्तेष्वश्विनोः प्रतिदिनं त्रिः सम्बन्धो बोध्यते। तत्र सहप्रवृत्तरूपेण द्विरसहप्रवृत्तरूपेण सकृत्। सहप्रवृत्तं रूपं चोभयतः पार्श्वयोरुदयात्पूर्वमस्तोत्तरं चेति। असहप्रवृत्तं च रूपमेकस्य रात्रिमध्यावसरेऽपरस्य दिने। तत्र तयोः स्वरूपं तन्नाम्ना व्यज्यते। एकस्तत्र नासत्योऽपरो दस्रः। दस्रो व्यक्ततेजोरूपो नासत्योऽव्यक्ततेजोरूपः। तत्राव्यक्तत्वेन तेजसोऽसत्त्वात्तद-

भावे प्राप्ते तत्प्रतिक्षेपमुखेन सत्यत्वं तस्योच्यते नासत्यशब्देनासत्यो न भवतीति। आग्रयणाचार्येण सत्यस्य प्रणेतृत्वमुच्यते। अतएव सौरे सूक्तेऽपि 'धरुणे सत्यमर्पित' मिति तस्य रात्रिसम्बन्ध उक्तः। एवं रात्रिकालिकं तेजः सत्यशब्देनोच्यते, तद्राधो यस्य तादृशस्त्वमिति अत्रिं प्रत्युक्तिः। अर्थादत्रात्रि-मित्ररूप इत्यर्थः। अतएव तस्य वरुणेण साहचर्यमुच्यते। स च रात्रिकालिक इति सत्यराधस्त्वेन तस्य वचनमत्र। वरुणश्च सुमेर्वभिप्रायेण रात्रिकालिकोऽपि कुमेरावसावुदयकालिकोऽपीति तस्य राजेति विशेषणं, राजा राजमानो भासमान इति यावत्। तौ प्रति स्वसरक्षणं बोध्यते सूर्येणेति। एतेनापि नात्रादित्योप-रागपरता, न हि तत्र वरुणसम्बन्धप्राप्तिः। न वा अत्रेरत्र मित्रभावनया संरक्षण-प्रार्थना तथा सति मित्रबोधनाय मित्रपद नपुसकं प्रयुज्येत। इदमपि पूर्वोक्तार्थ-सूचकमुपरागपरतावचने विरुद्धमिति। परश्च मन्त्रः—

ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानो रप माया अघुक्षत्॥ इति।

अत्रात्रेस्त्रिविधः सम्बन्धो बोध्यते। तिर्यक्सम्बन्धद्वयं सम्मुखसम्बन्ध-श्चैक.। आदित्यमण्डलेऽन्यत आगत्य किरणाः प्रविशन्ती'त्यर-नाभि'भावेन किर-णाना सम्बन्धवर्णनं बहुषु स्थलेषु वेदे। स च वामभागत उदयात्पूर्व, दक्षिणभागत उदयोत्तरं तत्सम्बन्धो, देवाश्च किरणाः शतपथादिषूच्यन्ते। तत्र वामभागतः समागतानां सम्बन्धो नमनशब्देनोच्यते, दक्षिणभागतः समागतानां सम्बन्धः स्तोत्रशब्देन स्तुतिशब्देन वोच्यत इति प्रतिपादितमन्यत्र। तदत्रोच्यते—कीरिणा-स्तुत्या सपर्यन् पूजयन् स्तुवन् नमसा स्तुत्योपशिक्षन् पूजयन् स्तुवन् इत्येव। तथा सम्मुखसम्बन्धबोधनाभिप्रायेणोच्यते—ब्रह्मा तन्नामक ऋत्विग्रूपः। अत्रे-र्मित्रत्वं पूर्वमन्त्रे उक्तम्। मित्रस्य सवित्रभेद. पूर्वमुक्तः। सवितुश्च देवयागे ब्रह्मत्व वर्ण्यते वेदे इत्यत्रिरप्यत्र मित्राभिन्नः सवितृरूप इति ब्रह्मर्त्विक्त्वे-नोच्यते ब्रह्मपदेन। न तु ब्राह्मणजात्यभिप्रायेण ब्रह्मपदमत्र तस्य बोधकम्। स च ग्रावस्तुत्। ब्रह्मगणे यज्ञे ग्रावस्तुत् अच्छावाको भवति, आच्छावाकस्यापि ब्रह्मशब्देन वचनम्। यथा होतृगणस्थानां मैत्रावरुणप्रभृतीनां होतृशब्देन वचनं तद्वत्। तेन ग्राव्णः सोमाभिषवीयस्य स्तुतिः क्रियते यज्ञे, सा च स्तुतिः सम्मुख-स्तुतिरूपेति अर्वुदकाद्रवेयाख्यानेन ऐतरेये वर्णितमित्यन्यत्र निरूपितम्। तदिह ग्राव्णो युयुजानः स्तुवन्। आदित्येऽन्यान्यरूपत्वेन कल्पनवत्सोमाभिषव-ग्रावत्वेनापि कल्पनात्तत्स्तुतिः सम्मुखीना स्तुतिरिति। एवं त्रिविधां स्तुतिं प्रयुञ्जानस्त्रिविधं किरणयोगं बोधयन् असावत्रिः सूर्यस्य चक्षुः। सूर्यरूपं

चक्षुः। व्यधिकरणा रूपककल्पना। अत्रेरुक्तरीत्या मित्ररूपत्वात्सूर्ये मित्रावरुण-चक्षुष्ट्वस्य "चक्षुर्मित्रस्य वरुणास्याग्नेः" इति सौरसूक्तादिषु वर्णनात्सूर्यरूपमेव चक्षुरत्र न तु सूर्ये चक्षुषः स्थापनं निरीक्षकत्वेन उपरागे स्पर्शमोक्षयोर्निरीक्षणाय स्थापनम्। तादृशं सूर्यरूपं चक्षुः सन्दर्शनसाधनरूपं विश्वस्य दिवि द्योलोके आधात्स्थापितवान्। सूर्यस्योदयोऽत्रात्रिकृतइति कल्पना। एवं सूर्यउदित इति परमार्थः। एवं स्वर्भानोरुक्तरीत्या कुमेरुगतस्य माया अन्धकारादिकास्ता अपाघुक्षत् अपगूहितवान्। अपकृष्य गूहनं विनाशात्मकं तत्कृतवान्। एतावता सूर्य उदितस्तमो विनष्टमिति परमार्थः। परवर्ती च मन्त्रः—

'यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः।
अत्रयस्तमन्वविन्दन्नह्य१न्ये अशक्नुवन्'॥

अत्र स्वर्भानुकृतः सूर्यस्य वेध उक्तरूप एव। अतएव तस्यापि 'आसुर' इत्येव विशेषणम्। स चोक्तरूपो वेधस्तमसो मित्रेणैव विज्ञायते नत्वन्येन, तस्योदय-कालिकत्वात्। मित्रश्चैकोऽपि उष इव तस्यौपाधिकं बहुवचनम्। एवं सत्यत्र सूक्तगतमन्त्रेषूपरागपरत्वेन वचनं न मन्त्रार्थानुगुणम्। एवं सत्युपरागपरता स्थलान्तरे वक्तव्या भवेत्।

यथाऽथर्ववेदीयमन्त्रेण तत्सिध्यत्युपरागादि, स च मन्त्रभागोऽथर्ववेदीयः—

"उत्पाताः पार्थिवान्तरीक्षाच्छंनो दिविचरा ग्रहाः।
शंनो भूमिर्वेपमाना शमुल्का निर्हतं च यत्॥ नक्षत्रमुल्काभिहतं
शमस्तु, शंनोग्रहाश्चन्द्रमसाद्याः। शमादित्याश्च राहुणा।
शन्नो मृत्युर्धूमकेतुः, शं रुद्रास्तिग्मतेजस" इत्यादि।

निघण्टुषु मध्यमस्थानवासिदेवतावर्णने स्त्रीदेवतानामसु अनुमतिः, राका, सिनीवाली, कुहूरिति चत्वारि नामान्युक्तानि। एतेषामर्थकथनावसरे निरुक्तकारेण यास्केन एतेषां देवपत्नीबोधकत्वमुक्तम्। तत्र पक्षान्तरमपि तत्र भाष्ये उक्तम्। तच्च पूर्वेषां याज्ञिकानां मतं निरुक्तकारेण प्रदर्शितम्। अनुमतीराके पौर्णमास्यौ, सिनी-वाली कुहूश्चामावास्ये इति। तत्रापि या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका, एवं या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति। ऐतरेयब्राह्मणेऽ-प्युच्यते या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका, एवं या पूर्वामावास्या सा सिनीवालीर्योत्तरा सा कुहूरिति। अत्र दिनभेदेन पौर्णमास्यमावास्ययोः पूर्वोत्तरात्वं व्यवस्थाप्यते, तद्वशतश्चोक्तनामभेद इति। ततश्चायमर्थो यत्पूर्वदिनसम्बन्धे पूर्वात्वमुत्तरदिनसम्बन्धे उत्तरात्वमिति। तावता को गुणः पौर्णमास्यमावास्य-योर्यावता पूर्वोत्तरदिनसम्बन्धोऽन्यासामपि तिथीनां सम्भवति, तासां पूर्वोत्तरा-

त्वेन तत्प्रयुक्तभिन्ननाम्ना व्यवहाराभावोऽनयोश्च तत्सम्बन्धमात्रेण तादृश-व्यवहारस्तद्वशतश्च भिन्ननामव्यवहार इति। अथ निरुक्तरीत्याऽनुमननादनुमतिः, रातेर्दानकर्मणो राका, सिनमन्नं तद्वती सिनिनी, वालं पर्व वृणोतेरिति, अन्नयुक्तत्वात्सिनीवाली। कुहूर्गूहतेरितिनिमित्तवशतस्तासां तत्त्वम्। तदपि न। अनुमननमनुमतेर्निमित्तं तत्र कस्य केन कुतोऽनुमननमित्यविज्ञानम्। रातेरित्यनेन 'रा'धातुतो निष्पत्तिर्विज्ञायते, पौर्णमास्याः को गुणः। अन्नवत्पर्ववतीत्यनेन सिनीवालीति, तत्तु कुह्वामपि व्यभिचरति। तावता पूर्वात्वपरात्वाभ्यां को गुणः। किमिति तैश्शब्दैः पौर्णमास्यमावस्ययोरेव ग्रहणं न पुनस्तिथ्यन्तरस्येति निर्णायको न कोऽपि हेतुः। एवं देवपत्नीत्वमपि कुत इत्यपि वचनैकशरणमेवेति। एवं तत्तस्याः कर्मसु प्रोच्यमानेषु मन्त्रेषु उच्यमाना गुणाश्च कथमुपपद्येरन्निति। निरुक्तवचनस्येव तट्टीकाकृता दुर्गाचार्येण स्थितं तद्गृहीत्वा तत्परतयाशेषयोजनेन निगमानां व्याख्यानमात्रं कृतं न तु पदार्थविषये विचारनिर्णयः। एवं सति अनयोः पूर्वात्वपरात्वविषये न काप्युपपादिका युक्तिः। देवपत्नीत्वं यथा निर्युक्तिकं वचनमात्रशरणमेवं पौर्णमास्यमावास्ययोः पूर्वात्वपरात्वे अपीति। दिनभेदेन भेदास्तिथ्यन्तरेष्वपि सम्भवन्ति ततस्तेषामेवमवचनेऽनयोरेवं वचने न किमपि विनिगमकमिति।

न च तिथ्यन्तरेषु विशेषवैदिकानुष्ठानाभावादनयोः पक्षपूरकत्वात् श्रौते कर्म्मणि पर्वानुग्रहस्यापेक्षणीयत्वादिष्टयादेः क्रमिकपक्षे पूर्वदिनेऽन्वाधानादिकरणात्तत्रोपवासस्य कृते तिथिनिर्णयस्यापेक्षणात्पूर्वात्वनिर्णयस्यापेक्षणम्। अतएवैतरेये मतभेद उपवासे तिथिभेदेनोल्लिखितः। 'पूर्वा पौर्णमासीमुपवसेदितिपैङ्ग्यमुत्तरामिति कौषीतकमि'ति। एवममावास्यायामपि दर्शपूर्णमासयोः पर्वप्रतिपत्सन्धौ यागानुष्ठानयोग्यकाले यागानुष्ठानार्थं तद्योग्यता पूर्वदिनीयायाममायामुत्तरदिनीयायां वेति निर्णयस्यापेक्षणेन तदर्थं पूर्वात्वपरात्वनिर्णयोऽपेक्षणीयः। अन्यथा पूर्वदिनयोगमात्रेणामावास्यां गृहीत्वाऽन्वाधाने हविर्निर्वापे परदिनीयप्रातःकाले चन्द्रमसः कलामात्रावशिष्टस्य दर्शने प्रायश्चित्तीयतापत्तिः। तदुक्तं "यस्य हविर्निरुप्तं चन्द्रमा अभ्युदियात्तेन तस्य हविषस्तेभ्यो देवेभ्यो विभज्य शिपिविष्टगुणकविष्णवे दातृगुणकाऽग्नये प्रदातृगुणकायेइन्द्राय यागः कार्यं" इति विभिन्नदेवविषयकस्य यागस्य निरुप्तहविर्गतस्थूलतण्डुलसूक्ष्मतण्डुलमध्यमतण्डुलानां विवेचनेन तद्धविष्कप्रायश्चित्तत्त्वेनानुष्ठानं, पुनः पूर्वोक्तामावास्यायागानुष्ठानं कर्तव्यं स्यादिति ब्राह्मणे प्रतिपादनं सङ्गच्छते, एवं हि तद्ब्राह्मणम्—
"यस्य हविर्निरुप्तं चन्द्रमा अभ्युदियात्त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये

दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधनि चरुं, येऽणिष्ठा स्तान्विष्णवे शिपिविष्टाय घृते चरुमि"ति। तदपि न। तिथ्यन्तेरेष्वपि श्रौत-कर्मानुष्ठाने प्रधानकालयोगनिर्णयाय दिनभेदेन द्वैधे तदर्थं तिथ्यन्तरवेधनिर्णया-द्यर्थमपेक्षणीयपूर्वपरनिर्णयप्रकारस्यात्रापि सम्भवेन तेनैव पौर्णमास्यमावास्य-योरपि पूर्वात्वपरात्वयोस्तिथ्यन्तरवदेव निर्णयेन विशिष्यानयोः पूर्वात्वपरात्वयोः पूर्वापराशब्देन वचने बीजाभावादिति चेन्नात्र तयोः पूर्वापराशब्देन बोधे दिनभेदः कारणं किन्त्वन्यरूपमेव।

तथाहि अत्र पूर्णमास्यमावास्ययोः स्वरूपं तावन्निर्णेयम्। कर्मानुष्ठाने तच्छब्दार्थस्वरूपं लोकएवमुच्यते—यदमावास्याशब्दो न केवलकालवाचकः किन्तु योगरूढः। तत्रावयवार्थ सहवासं निमित्तीकृत्य प्रवृत्तः। स च सहवासः प्रसिद्धया सूर्याचन्द्रमसोः। तौ च सूर्याचन्द्रमसौ सहयोगेऽपेक्षितौ लोक-प्रसिद्धावेवोतान्यरूपौ, यतश्चन्द्रमःशब्दार्थविषयेऽन्यथात्वस्यापि प्राप्तिसम्भवः। चन्द्रमा यथा चन्द्रेन्द्वादिशब्दैर्बोध्यते मासकृदेवं सोमशब्देनापि तद्बोधः। तत्र सोमशब्दार्थविषये ब्राह्मणे उच्यते "सोमो वै वाजस्तस्य चन्द्रमास्तृतीयं योऽयं पवते स तृतीयमि"ति। तत्रायं पवत इत्यनेन भूसम्बन्धिन आदित्यस्येदमा बोध-नस्य वेदे बहुषु स्थलेषु दर्शनेन पूधातोर्गमनार्थत्वस्य गमनार्थकेषु निघण्टौ पाठेन गन्तुरादित्यस्य तेन बोधः। आदित्यश्चरन्नेव सर्वदा भवति न कदापि ततो विरतो भवतीति ऐतरेये उच्यते "सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्" इति। एवं सति यथा सोमशब्दबोध्य आदित्य एवं चन्द्रमःशब्दबोध्यतापि तस्य। 'नवोनव' इति मन्त्रे आदित्यपरतायाः स्वीकर्तव्यत्वात्। तथाहि स मन्त्रः—

"नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो विदधात्यायन्प्रचन्द्रमास्तिरते दीर्घमायुः"॥

एतदर्थं निरुक्तकार आह—नवो नवो भवति जायमान इति पूर्वपक्षादिम-भिप्रेत्य, अह्नां केतुरुषसामेत्यग्रमित्यपरपक्षान्तमभिप्रेत्य। आदित्यदैवतो द्वितीयः पाद इत्येके। भागं देवेभ्यो विदधात्यायन् इत्यर्धमासेज्यामभिप्रेत्य। प्रवर्धयते चन्द्रमा दीर्घमायुः, इति। दुर्गाचार्येणैतस्य व्याख्या क्रियते—नवो नवो भवति जायमानः, चन्द्रमाः, प्रतीच्यां दिशि पूर्वपक्षादिमुपक्रम्य। उपक्रान्तवृद्धिः। अस्तं गतआदित्ये पश्चादादित्यस्य प्रतिमासं जायमानो नवो नवो भवति। अह्नां केतु-रुषसामेत्यग्रमित्यपरपक्षान्तमभिप्रेत्य। अपरपक्षान्तेषु प्राच्यां दिशि प्रक्षीणः-कलामात्रावशेषः। अह्नां केतुर्लक्षणम्। तत्कलोपचयापचयाभ्यां हि प्रतिपत्प्र-भृतीन्यहानि लक्ष्यन्ते। अथवा अह्नां केतुः कर्ता स्वगतिविशेषैः। उषसामेत्यग्र-

मिति। उषसो यः प्रकाशस्तस्य प्रान्ते पुरस्ता त्सूर्यस्योदितो दृश्यते। स पुनरेष एवं पर्यायेण प्रतीचीप्राचीदिशौ श्रायन्, पूर्वापरपक्षविभागेनैकैकशोऽपि पूर्णमास्यमावास्ययोरागत्य कालं भिन्दन् हविर्भागं वा विभागेन यथाविभागं देवेभ्यो भागं विदधाति। एवं कर्मापि पूर्वपक्षात्पौर्णमास्यमावास्ययोः स्वगत्या काले तिथिं विभज्य देवेभ्यो ददाति विभागदाने हेतुर्भवति, "पूर्णे चन्द्रमसि उपचये उपवासात् पौर्णमासीमेवमदर्शनेऽमावास्यायामिति ह विज्ञायते"। य एवं करोति चन्द्रमाः स प्रतिरते प्रवर्धयते ईजानानां दीर्घमायुः। वयमपि च यजामहे तमनेन हविषा। अतः सोऽस्माकमेतत्करोत्वित्येतदाशास्महे। आदित्यदैवतो द्वितीयः पाद इत्येके। 'पूर्वापरं चरतो माययैतौ' इत्यतोऽनन्तरमेवेयम्। इति। मैत्रावरुणीये समाने हविषि विनियोग इत्यपेक्ष्येयमपि सौर्याचन्द्रमसीति। अह्ना केतुरित्यतो विशेषलिङ्गाद् ब्रवीति आदित्यदैवतो द्वितीय पाद इति। तदर्थयोजना—यश्चन्द्रमा नवो नवो भवति जायमानो यश्च देवेभ्यो भागं विदधात्यायन् यश्च प्रतिरते दीर्घमायुः सोऽस्माकमेतत्करोतु। अय च सूर्यः अह्नां केतुः कर्तोदयास्तमयाभ्यामुषसां चाग्रमेति मुख्यत्वमागच्छति तत्कृतत्वादुषसो जन्मनः। तद्रश्मिप्रान्तप्रोत्सार्यमाणे हि तमस्युषसो जायन्तेऽत. स तासां जनयिता मुख्यः। अतः सोऽस्माकमेतदेवं करोत्विति।

एव मन्त्रार्थ निरुक्तानुरोधेन, व्याख्यां निघण्टुनिरुक्तानुरोधेन प्रदर्श्य चन्द्रमस उक्तरीत्या मासकृदर्थकत्वेऽनुपपत्ति प्रदर्शयति। अत्र निघण्टौ मध्यमस्थानदेवताकथनप्रसङ्गे उच्यमानश्चन्द्रमाः कथं मध्यमस्थानः। ननु सूर्यात्परत. शतसहस्रे योजनानां चन्द्रमसः स्थानमिति पौराणिकाः स्मरन्ति। सत्यं स्मरन्ति, कर्मयोगे तु द्युस्थानत्वे सति सर्वदेवतानां विशेषतः स्थाननियमो विवक्षितः। तदेतदैन्द्रं कर्म रसानुप्रदानं वृत्रवधो बलकृतिरिति तथा बाहुल्येनैन्द्रेपु दृष्टत्वात्। बलकृतिश्च चन्द्रे दृष्टा यथा "वधैरजेत दुर्मति"रिति। प्रसिद्धं चेदमिन्दुश्चन्द्रमा इति। रसात्मकत्वाच्चन्द्रमसो रसानुप्रदानसम्बन्धः। एवं चेदिन्द्रश्चन्द्रमाः, तस्य मेघवधाधिकारसम्बन्धकृत्त्वेन सूर्यादर्वागिति युक्तं चन्द्रमा मध्यमस्थानः। अपि च ओषधिः सोमश्चन्द्रमा भवत्यधियज्ञमापन्नः। स चेन्द्रस्यान्नम्। अन्नं चान्नादस्यात्मसाद्भवति। अद्यमानस्यानन्यत्वेनावस्थानादित्यतो युक्तं मध्यमस्थान इति। यथा च सर्वगतो वायुर्मध्यमस्थानो विशेषत इत्येवमित्यतोऽदोषइति। एवञ्च मासकृतश्चन्द्रमसो द्युलोकस्थानस्य मध्यमस्थानदेवतासु पाठात् इन्द्राभिन्नत्वेनादित्याभिन्नता, किञ्च द्युलोकस्थानवासिनोऽपि एकदेवतापक्षे आदित्याभिन्नत्वमेव। एवं च पूर्वोक्तसोमत्रैविध्ये चन्द्रमसः सोमशब्दबोध्यत्वेनादित्यरूपत्वमिति। तच्च भूसम्बन्धित्वेन इदमा बोधनादित्युक्तम्। एवं च सुमेरुप्रदेशीय आदित्यः

सूर्यः, कुमेरुप्रदेशीयश्च भूसम्बन्धी आदित्यश्चन्द्रमाः। अनयोः सूर्याचन्द्रमसोः सहवासं निमित्तीकृत्यामावास्याशब्दप्रवृत्तिविप्रकर्षं च निमित्तीकृत्य पूर्णिमाशब्द-प्रवृत्तिरिति वक्तव्यम्। पूर्वोक्त'नवो नवो'इति मन्त्रस्य केवलादित्यपरत्वेन सुसङ्गताया व्याख्यायाः सम्भवेन मासकृच्चन्द्रमःपरतया यथाकथञ्चिद्व्याख्याया-अयुक्तत्वम्। अन्हां दिनानां केतुः प्रज्ञापकः प्रतिदिनं जायमानो नवो नवो नवप्रकार उषसामग्रमेति। देवेभ्यो भागं विदधान आयन्। आदित्योदये यज्ञानुष्ठानप्रवृत्त्या यज्ञे दीयमानभागो दिनसम्बन्धादादित्यसंपादित इति कल्पना। एतादृशश्चन्द्रमा आदित्यो दीर्घमायुः प्रतिरत इत्यर्थात्। एवं च सूर्याचन्द्रमसोः सहवासं ब्रुवन्नपि अमावास्याशब्दः प्रसिद्धं मासकृतं कलावन्तं चन्द्रमसं न सहवासप्रतियोगितया गृह्णाति मन्त्रार्थाननुगुण्यापत्तेः, किन्त्वादित्यस्यैव देशभेदभिन्नस्य चन्द्रमस्त्वेन ग्रहणेन सूर्याचन्द्रमसोः सहवाससम्बन्धेनामावास्याशब्दः प्रवर्तते इति। कुमेरु-सम्बद्धो भूसम्बन्धी आदित्यश्चन्द्रमःशब्देन बोध्यत इत्युक्तं पुरस्तात्। एवं च सुमेरुसम्बन्धिन आदित्यस्य तत्र प्रदक्षिणपरिक्रमवशतो दक्षदक्षिणशब्दव्यवहार्यत्वं, पूर्वस्यामुदयेन पश्चिमाभिमुखगमनवशतः प्रत्यङ्ङादिशब्दैस्तस्य व्यवहारः' प्रत्यङ देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ विश्वं स्वर्दृश' इत्यादौ यथा।

एवं कुमेरावुदयन्नसौ पश्चिमायामुदेत्य पूर्वाभिमुखं गच्छन्स आदित्यस्तत्र पूर्वप्रथमप्राङादिशब्दैर्व्यवह्रियत इत्युक्तं पुरस्तात्। तदनयोः सूर्याचन्द्रमसोः सहवासश्च तत्रोदयास्तावसरे भवेत्। तत्रैकस्या दिश आदित्य उदेति यथा यथा, तथातथापरस्यां दिश्यस्तमयते। यथा सुमेरुतोऽस्तमयन् तदानीमेव कुमेरावुदयन् भवति। यावत्या मात्रयास्तमेति तावत्या मात्रया कुमेरावुदेति। एवमेव कुमेरावस्तमये सुमेरावुदये। एवञ्च तस्मिन्नवसरे सहवासस्तयोरिति। तत्र सुमेरुसम्बद्धस्यादित्यस्य सम्बन्धेन यथोषआदीनां प्रत्यङ्ङादिप्रतीच्यादिशब्देन व्यवहारः, एवं कुमेरुसम्बन्धवशत आदित्यस्य पूर्वशब्दव्यवहारवदमावास्याया अपि पूर्वाशब्देन व्यवहारः, सुमेरुसम्बद्धादित्यसम्बन्धादुत्तरात्वेन व्यवहारो ब्राह्मणे। तत्रानुमतिः पूर्वा पौर्णमासी, राका उत्तरा पौर्णमासी। एवं सिनीवाली पूर्वामा-वास्या उत्तरा कुहूरिति। तदेतत्तदीयमन्त्रैरपि व्यक्तं भवति। किञ्च सुमेरौ कुमेरौ चोक्तरीत्या सूर्याचन्द्रमसोः सहवासो द्विर्भवति, उदयावसरे अस्तावसरे च। तथापि उदयावसरे सूर्याचन्द्रमसोः सहवासोत्तरमादित्यस्य दर्शनमेव जायते न त्वदर्शनम्, अमावास्यायाश्चायं विशेषः सहवास उभयोरदर्शनञ्चेति। तत्र सत्यप्युदयावसरे सहवासेऽदर्शनस्याभावेन न तत्रत्यः सहवासस्तत्रामावास्याशब्दप्रयोगे निमित्तम्। अत एव न तत्र पूर्वात्वपरात्ववर्णनसम्भवः। अस्तावसरीयश्च सहवासस्तदुत्तरं

यत्रास्तं गत आदित्यस्तत्र तस्यादर्शनंचेति अमावास्याबोधे तत्र निमित्तमिति तत्रत्या साऽमावास्येत्युच्यते। कुमेरावस्ते कुमेरुस्था सामावस्या, सुमेरावस्ते सुमेरुस्था सेति। कुमेरुसम्बन्धिन आदित्यादेः पूर्वादिशब्दैर्व्यवहारस्य पूर्वं बहुशः प्रतिपादनात्तत्रत्यामावास्या पूर्वाशब्दभाक्। एवं सुमेरावपि सोत्तरा भवति। तदेतद्ब्राह्मणादिषु पूर्वात्वपरात्वेन व्यवहारे निमित्तमित्युक्तम्। इदं कर्मसु प्रयुज्यमानतत्तन्मन्त्रैरभिव्यज्यते। तथाहि सिनीवाल्याः कुमेरुसम्बन्धिन्याः पूर्वस्या अमावास्याया अयं मन्त्रः—

सिनीवालि पृथुष्टुके या देवानामसि स्वसा
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः।। इति।

अयं मन्त्रो निरुक्तकारेण व्याख्यातो यथा—सिनीवालि पृथुजघने। स्तुकः स्त्यायतेः सङ्घातः। पृथुकेशस्तुके पृथुष्टुते वा या त्वं देवानामसि स्वसा। स्वसा सु-असा, स्वेषु सीदतीति वा। जुषस्व हव्यमदनं प्रजां च देवि दिश न इति। दुर्गाचार्येणैतस्य व्याख्या क्रियते—हे सिनीवालि पृथुष्टुके विस्तीर्णजघने अथवा पृथुष्टुके पृथु केशस्तुके पृथु केशकलापे अथवा पृथुष्टुते, या त्वं देवानां स्वसा भगिन्यसि माध्यमिकानां, सा त्वं जुषस्वासेवस्व एतत् हव्यमाहुतं, मर्यादया विधानेन च हुतमस्माभिः। आसेव्य च प्रजां देवि दिदिड्ढि नः। प्रजामस्माकं दिश अतिसृज देहि इत्याशास्महे इति।

अत्र मन्त्रे देवस्वसृत्वं तस्या उच्यते। अमावास्या तत्रैव भवति यत्र सहवासोऽदर्शनं च। तदुभयं यत्रास्तस्तत्रैवेति पूर्वमुक्तम्। अस्तदेशे एवास्तोत्तरवर्तिनः किरणा दृश्यन्ते। किरणानाञ्च देवत्वम्। सचास्तः कुमेरौ यदा भवति तदा तत्रत्य आदित्यस्तत्रत्यद्योलोकं प्राप्तः। तत्रत्यकिरणा अपि देवा एव, ते च मन्त्रे यद्यपि विशिष्य नोक्तास्तथापि ते साध्या देवा एव। तच्च देवानां माने इति मन्त्रे प्रतिपादितम्। एवञ्च तत्र तृतीयसवने देवानां निर्माणस्योक्ततयाऽस्तावसरे च तत्प्रवृत्त्या सूर्याचन्द्रमसोः सहवासोऽपि तत्रास्तावसरीयो विज्ञायते, ततस्तस्य चन्द्रमसस्तत्रादर्शनेनामावास्यापि तत्रत्यैवैषा गृह्यते, तत्रादित्यादीनामिवास्या अपि पूर्वाञ्चनात्पूर्वात्वेन ग्रहणमिति ब्राह्मणादिषु पूर्वामावास्यात्वेनोक्तिः, सैषा पूर्वामावास्या समानात्स्थानादुत्पद्यत इति तस्या मन्त्रे "या देवानामसि स्वसा" इति देवान् प्रति स्वसृत्वेन वचनम्। एवं वेदे सूर्येण यत्र देशे सुमेर्वादावुदीयते तदानीं तेन तद्विरुद्धे कुमेर्वादौ स्वीयं तेजो दीयते तद्वशत एव तत्र प्रकाशनं भवति। प्रकाशकरणस्याहुतित्वेन वचनम्' यदस्य विज्ञानं तज्जुहोती'त्यनेन। तदभिप्रेत्य सिनीवालीं प्रति मन्त्रे

उच्यते 'आहुतं' आङ्ईषदर्थकत्वं व्याप्त्यर्थकत्वं वा, आद्ये रात्रौ स्वल्पस्यैव तेजसः प्रवृत्तिः। नहि दिनवत्परिपूर्णः प्रकाश इति। अन्त्ये आ समन्ताद्धुतं तद्धव्यं हे सिनीवालि नोऽस्माकं सम्बन्धि जुषस्व सेवस्व स्वीकुर्वित्यर्थः। देवि! हे सिनीवालि नोऽस्माकं प्रजां दिदिड्ढि दिश देहीत्यर्थः। एवमपरस्तस्या मन्त्रः—

या सुबाहुः स्वङ्गुरिः सुषमा बहुसूवरी।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन॥ इति।

अत्र सूर्याचन्द्रमसोः सहवासमदर्शनं च चन्द्रमसो निमित्तीकृत्य प्रवृत्तैषाऽमावास्या कुमेरुसम्बन्धिनी, अत एवात्र मन्त्रे तस्य विश्पत्नीत्वेन वचनम्। विश्पत्नी विशां प्रजानां पत्नी पालिकेति तदर्थः। सा च सुबाहुः शोभनबाहूपेता। सहवासस्थलीयत्वेन तस्यास्तत्रत्याभिन्नत्वेन तदीयपार्श्वस्य प्रकाशितत्वेन पार्श्वभागीयतेजसश्च बाहुत्वेन वर्णनेनात्रास्तमुपेष्यतः परवर्तिपार्श्वभागस्य सम्यक् प्रकाशितत्वेन शोभनत्वमित्युच्यते सुबाहुः। अस्तमुपयन्नसावर्धशोऽस्तमितोऽर्धशश्चानस्तमितः। आदित्यबिम्बञ्च दशाङ्गुलव्यासमुच्यत इति दशाङ्गुलमध्येऽर्धबिम्बस्यास्तमये पञ्चाङ्गुलमात्रस्य दर्शनेनाङ्गुलिपञ्चकयुतत्वेन हस्तरूपत्वं मत्वा तस्य प्रकाशमानत्वेनापि सुबाहुत्ववर्णनासम्भवः। पञ्चाङ्गुलपरिमाणेऽङ्गुलमितभागानामपि प्रकाशितत्वेन स्वङ्गुरिरित्युक्तिः। लकारस्य रेफो व्यत्यासात्। सुषमेत्यनेन सम्यक्बिम्बार्धरूपत्वं पञ्चाङ्गुलिमितत्वमुच्यते। एवं तस्याः सवनस्य प्रकाशनरूपस्य कर्तृत्वं गृहीत्वा बहुसुवरीत्युक्तिः। अथवा बहूनां परवर्तिकिरणानामुत्पादयितृत्वं मत्वोच्यते बहुसुवरीति। तादृशी या सिनीवालीसंज्ञकामावास्या विशां पालयित्री तस्यै हविर्जुहोतनेत्युक्तिः। एवञ्चात्रोक्तविधमन्त्रद्वयार्थस्योक्तविधपूर्वामावास्यारूपत्ववचनेनैव सामञ्जस्यम्। तस्मात्पूर्वामावास्या कुमेरावर्धास्तमितादित्यरूपिणीति वेदे सूर्यस्यैवैकस्य स्तव इति पूर्वेषां मतस्योपपत्तिः। निरुक्ताभिमतदेवपत्नीत्वस्यापि भेदपक्षेऽमावास्याया देवपत्नीत्ववर्णनस्यापि सम्भवेनोपपत्तिः। याज्ञिकाभिमतपूर्वामावास्यात्वमपि सङ्गतमिति सिनीवाली कुमेरुगतार्धास्तमितादित्यरूपिणीति सिध्यति। सिनीवालीशब्दोऽप्यमुमेवार्थं पुष्णाति। तत्र सिनीत्यनेन बन्ध उच्यते। षिञ्धातोर्बन्धनार्थात्तस्य निष्पत्तेः। तद्युक्तत्वात्सा सिनीवाली। अस्तावसरीयस्यादित्यस्य वरुणशब्देन वेदे मैत्रावरुणसूक्तादिषु वचनात्। वरुणस्य पाशशायुधत्वेन वर्णनात्। अस्तमारभ्य पाशबन्धनस्य वचनात्सिवीवाली पूर्वोक्तरीत्या कुमेरुस्थादित्यरूपिण्यमावास्या पूर्वा सिनीवालीनामिका।

यत्तु निरुक्तकारेण सिनशब्दस्यान्नार्थत्वं गृहीत्वा तद्युक्तार्थे इकारं प्रत्ययं

मत्वा वालशब्दस्य च वृधातुतो निष्पत्तिः, रेफस्य लकारभावो व्यत्यासादिति वालं पर्व सूर्याचन्द्रमसोः सहवासरूपामावास्येति वचनम्। तत्र सम्यक्, अव्यावर्तकत्वात्। सिनीवालीनामान्नवत्पर्वरूपिणी। अन्नं च पैतृककर्मनिबन्धनम्। पैतृकञ्च कर्म दिनभेदेनामावास्याभेदे पूर्वस्यामेव भवति न परस्यामिति नियामकाभावेन परस्या अप्यन्नवत्त्वसम्भवेन पूर्वस्याः सिनीवालीत्वकथने बीजाभावात्। यथा भुवि कुमेरावस्तमयकालीनसूर्याचन्द्रमसोः सहवासकालोऽस्तावसरीयः, तत्रत्यामावास्या सिनीवालीपदबोध्या, एवं भुव उत्तरपार्श्वे सुमेरावस्तकालिकसूर्येन्दुसहवासकालीनतत्रत्याऽऽमावास्या कुहुशब्दबोध्या। अत एवोच्यते 'योत्तरा सा कुहूरिति'। विद्यते हि तत्र सूर्याचन्द्रमसोः सहवासः सूर्यस्यादर्शनं च परस्तात्। उत्तरदिक्सम्बन्धात्सोत्तरेत्युच्यते इत्युक्तम्। कुहूरिति नामाप्युक्तार्थबोधकम्। कुहूरित्यस्य कौ होम इत्यर्थकता, कुशब्दस्य पृथिवीबोधकत्वेन कुमेरुबोधकता, तत्र होमो दानमर्थाद्द्योलोकीयैः। द्योलोकश्च भुव उत्तरपार्श्वे सुमेरुरूप इत्युक्तम्। यथा कुमुरौ विद्यमानेन दीयमानं तेजो यागहोमरूपेणोच्यते, एवं सुमेरौ विद्यमानेन दीयमानस्य तेजसोऽपि होमादिरूपत्वमिति कौ होमो यया सा कुहूरिति कुहूनामकत्वम्। अमावास्येति वचनादुत्तरे सुमेरौ सूर्याचन्द्रमसोः सहवासोऽदर्शनञ्च प्राप्तमिति उत्तरदिक्सम्बन्धात् सहवासादर्शनवत्वाच्च सामावास्योत्तरा कुहूरिति नामबोध्येति। तन्मन्त्रतोऽयमर्थो विस्पष्टः। तथाहि तदीयो मन्त्रः—

'कुहूमहं सुवृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि।
सा नो ददातु श्रवणं पितॄणां तस्यैते देवि हविषा विधेम'॥ इति।

अत्र सुवृतमिति विशेषणेन द्योलोकसम्बन्धितोच्यते। द्योलोकस्य सुवरिति नाम सुष्ठुवरणेन निमित्तेन। तद्वदस्या अपि सुष्ठुवरणेन हेतुना सुवृतमिति विशेषणम्। विद्मनापसमित्यनेन पृथिवीसम्बन्धो व्यज्यते। सुमेरौ द्योलोके यज्ञो यथा यज्धातुना बोध्यत एवं कुमेरौ यज्ञो विद्धातुना बोध्यते। विद्धातोर्यज्ञबोधकत्वं निघण्टौ यागबोधकेषु नामसु विदथेति नाम्ना विज्ञाप्यते। ततो विद्मनेतिपदेन वेदनरूपस्य पृथिवीगतस्य यज्ञस्य वचनेन तेन विद्मना यज्ञेन कर्मवतीं यज्ञरूपकर्मकर्त्रीमित्यर्थः। इदं पदं सुमेरुसम्बन्धं कुह्वा अभिव्यञ्जयति। सुहवायास्तस्याः प्रकृतयज्ञार्थकेन अस्मिन् यज्ञ इत्यनेन सुमेरुतः कुमेरुगतयज्ञस्य बोधः। तस्याः कुह्वाः सकाशात् पितॄणां श्रवणस्य प्रार्थनम्। पितृश्रवणं पितॄणां यत्र पार्श्वे निवासस्तद्रूपं श्रवणं पार्श्वं ददातु तत् पार्श्वं प्रापयत्वित्यर्थः। एवमपरस्तस्या मन्त्रः—

'कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः शृणोतु।
सन्दाशुषे किरतु भूरि वामं रायस्पोषं यजमाने दधातु'॥ इति।

अनेनापि देवानामेषा कुहूरिति वचनेन देवताकर्तृकः कौ होमः, स च देवतास्वस्तमयावसरीय इति। एषा अमृतस्य पत्नी हव्या चास्य यज्ञस्य श्रुतिभावं प्राप्नोतु। दाश्वांश्चोत्तरदिक्कस्तस्मै भूरि वामं वामावृत्तं धनं सा किरतु ददातु। यजमाने च रायो धनस्य पोषं दधात्विति। वाममिति विशेषणं च धनस्य दक्षिणदिक्सम्बन्धं बोधयति। एवञ्चैतद्वचनेन कुह्वाः कुमेरुसम्बन्धव्यक्तिः। तेनैषास्तावसरीयेति च व्यक्तं भवति। एवञ्चैषा सहवासनिबन्धना परस्तात् सूर्यस्यादर्शनेन युतेति पूर्वमुक्तमेव। तत एषोत्तराऽमावास्या कुहूपदबोध्येति।

आदित्यस्यास्तावसरीयत्वं यथामावास्यायास्तद्वशतश्च यथा तस्याः पूर्वोत्तरात्वमेवमुदयकालिकत्वेन पूर्णिमाया अपि तादृशत्वम्, पूर्वोत्तरापदसम्बन्धित्वं च। तथाहि पूर्णत्वं विप्रकृष्टत्वंच निमित्तीकृत्य पूर्णिमाशब्दोऽर्थमाह। तच्च पूर्णत्वं विप्रकृष्टत्वं च निरूपकमपेक्षमाण सूर्याचन्द्रमसावेव तत्त्वेन गृह्णाति। भवति च सूर्याचन्द्रमसोर्विप्रकृष्टत्वं गृहीत्वा तच्छब्दप्रवृत्तिः। तत्र चन्द्रमःशब्देन कलावतो मासकृतश्चन्द्रमसो ग्रहणं लोके, अत्र त्वादित्यस्यैव चन्द्रमस्त्वेन ग्रहणं, पूर्वोत्तरात्वेनामावास्यावत् पूर्णिमाया अपि प्रामाणिकग्रन्थेषु वचनात्। एवञ्च सुमेरुकुमेरुवर्तिनोर्देशभेदेन भिन्नत्वेनाभिप्रेयमाणयोरादित्यरूपसूर्याचन्द्रमसोर्विप्रकृष्टत्वे सम्बन्ध एवं पूर्णत्वेऽपि। एवञ्चेदं विप्रकृष्टत्वं पूर्णत्वं सूर्याचन्द्रमसोरेव। तच्चोदयावसरीयम्। उदयावसरे क्रमेण प्रवृत्त आदित्यःपूर्ण उदितो यत्र तत्स्थानस्य तत्रत्यामावास्यास्थलीयतत्सहवासस्थानतो विप्रकृष्टत्वम्। स्थानगतस्य तस्य विप्रकर्षस्य तत्स्थानवर्तिनि आदित्ये समारोपेण सोऽपि विप्रकृष्टइत्युच्यते। तत्र दक्षिणस्यां दिशि उदितस्य सोमस्य तद्रूपस्यादित्यस्योदयस्थानं, तस्यां दिशि अस्तावसरीयसहवासस्थानतो विप्रकृष्टम्। तत्स्थानगतस्य तस्मिन्नारोपं कृत्वा सोऽपि विप्रकृष्ट इत्युच्यते। तथा तस्य दर्शनं पूर्णत्वेनेति पूर्णत्वं विप्रकृष्टत्वं भवतीति सा पूर्वा पौर्णमासीत्युच्यते। तस्या नामानुमतिः। तदेतत्तदीयमन्त्रतोऽपि व्यज्यते। अयं तन्मन्त्रः—

'अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवतं दाशुषे मयः'। इति। एकत्रोदितेनादित्येनापरत्र प्रकाशस्य दानं यागहोमादिरूपं पूर्वमुक्तम्। एवं सति दक्षिणदिक्केनादित्येन दीयमानः प्रकाशो दक्षिणदिक्कानां यज्ञः। तथा चासौ देवानामभिप्रायेण क्रियमाणो यज्ञः। स च देवतासम्बन्ध्यग्निसापेक्षः। देवतासम्बन्धिन्यन्यकर्तृके च यज्ञे आहवनीयोऽग्निः स देवतासु हव्यवहनाद्धव्यवाहनशब्देनोच्यते। स चाग्निरेषाऽनुमतिश्च नोऽस्मदीयं यज्ञमनुमन्यतामिति दाशुषे सुखसम्पादकत्वमुच्यते इति।

तथा च देवतोद्देश्यकयागवर्णनतो दक्षिणदिशः सम्बन्धो व्यक्तो भवति। एवं चैतन्मन्त्रतस्तस्य विप्रकृष्टस्य पूर्णस्य देवतोद्देश्यकयागकर्तुरुदितत्वरूपपूर्णत्वं प्रतीयते विप्रकृष्टत्वं च। एषा पूर्णिमा पूर्वा भवति। यथैषा दक्षिणदिग्गता पूर्णिमा पूर्वा एवमुत्तरदिग्गता सा राकेति। तत्रापि तद्दिशि सहवासादर्शनस्थानरूपार्घा-स्तमयस्थानतस्तत्र पूर्णबिम्बोदयस्थानस्य विप्रकृष्टत्वं, तच्च तत्रत्य आदित्ये आरोप्य तस्य विप्रकृष्टत्वं पूर्णत्वं चेति तत्कालिकात्वेनैषा पूर्णिमा उत्तरोच्यते। राकेति तन्नामेत्युक्तम्। तदीयश्च मन्त्रः—

"राकामहं सुहवां सुष्टुती हुवे शृणोतुनः सुभगा बोधतु त्मना।
सीव्यत्वपः सूच्या च्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्"॥ इति।

द्वितीयो मन्त्रस्तस्या एवम्—

"यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा"॥ इति।

अत्र सुहवात्वं ह्वानकर्मत्वं, सुभगात्व चोदयकालिक्या एव तस्याः सम्भवतीति उदयकालिक्यास्तस्या ग्रहणं बोधयति। अपां कर्मणां सातत्येन प्रवृत्तिरूपं सीवनमच्छिद्यमानकिरणरूपसूच्या उदयकालिकत्वं तस्या बोधितम्। एवं शतदाययुक्त उक्थ्यो रात्रिकालिकादित्यरूपपुत्रस्य दानं करोतित्यपि तदैव संगतम्। एवं द्वितीयमन्त्रे वसुनः सहस्रपोषत्वं सुभगत्वमुक्तरीत्यैव सङ्गच्छते। एषैवोत्तरा पूर्णमासी वेदे विवक्षिता। अत एव दर्शपूर्णमासयोरहोरूपत्वमुच्यमानं तैत्तिरीये संगतम्। 'ये अहोरात्रे ते दर्शपूर्णमासावि'ति। तत्राहःपदस्य पूर्णमासेन सम्बन्धः। दर्शपूर्णमासशब्दे दर्शशब्दस्याल्पाच्तरत्वेन पूर्वनिपातः। एवं च यदहः सा पूर्णमासी, या रात्रिः स दर्श इति क्रमिकान्वयाभिप्रायेणोक्तवाक्यं संगच्छते। अन्यथाहोरात्रयोस्तद्वचनस्य सम्यक्त्वं न स्यात्। एवञ्चेदानीमुक्त-रूपत्वे निघण्टौ मध्यमस्थानेऽनुमत्यादीनां वचनस्य सङ्गतिः। एवं देवपत्नीत्व-वर्णनमपि संगतमिति दिक्।

निरुक्ते वाताव्यशब्दो निघण्टौ अनिर्णीतार्थत्वेन पठितस्यार्थनिर्णयावसरे उच्यते—'वाताप्यमुदकं भवति वात एतदाप्याययति' इति। एतद्विवरणतो विज्ञायते वाताप्येत्ययं शब्दोऽकारान्तस्तस्यार्थविषये विचार इति। यतो निरुक्ते वाताप्यमुदकं भवतीति वर्णनेन तस्य प्रथमान्तताप्रतीतेः। वातेनाप्यायनाद्वा-ताप्यस्य तत्त्वमिति। तच्चाप्यायनमुदकस्येति वाताप्यशब्द उदकस्य बोधक इति। निगमश्च तत्रोक्तः 'पुनानो वाताप्यं विश्वश्चन्द्रमिति'। टीकाकृता दुर्गादासेन व्याख्यायामुच्यते—वाताप्यमुदकं प्राप्य द्रवीभूतः सोमः। सम्पूर्णो मन्त्रश्चेत्

पर्यालोच्येत तदानीमुभयस्य निर्युक्तिकताप्रतीतिः। एवमत्र सम्पूर्णो मन्त्रः—

'नू नो रयिमुपमास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम्।

प्रवन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात्'।। इति।

अत्र सामानाधिकरण्याद्रयिमित्यस्य विशेषणानि नृवन्तमित्यादीनि प्रतीयन्ते। तथा सति अत्र वाताप्यमित्यपि रयिविशेषणमेव। तच्चेदं पुँल्लिङ्गम्। रयिमित्यस्य पुँल्लिङ्गत्वात्। अतएव नृवन्तमित्यस्य पुंस्त्वमुपपन्नम्। तथा सति वाताप्यमित्ययमपि पुँल्लिङ्गो द्वितीयान्त एव। तत्र पुनः सन्देहो द्वितीयैकवचनान्तोऽसौ किमकारान्तो वा स्यादिकारान्तो वा। मन्त्रान्तरसंपर्कादस्यानकारान्तत्वं प्रतीयते। तथाहि अन्नसूक्ते उच्यते—'वातापे पीव इद्भव' इति। तत्र वातापे इति सम्बोधनान्नायं शब्दोऽकारान्तः प्रत्युतेकारान्तः। तस्येकारान्तस्य सम्बोधने रूपं वातापे इति मन्त्रे। एवं सति प्रकृतमन्त्रेऽपि इकारान्तवातापिशब्दस्य द्वितीयैकवचने बहुलवचनादमि पूर्वरूपाभावे सूर्म्यमितिवद् वाताप्यमिति पुँल्लिङ्गद्वितीयैकवचनान्तस्य वाताप्यमित्येवं रूपम्। तथासति तन्मन्त्रोक्तरयिमिति विशेष्येणानुगुणं विशेषणं स्यात्। एवञ्च वाताप्यमित्यस्य नोदकपरताऽपि तु वातद्वाराऽऽप्तियुक्तमिति यौगिकत्वमात्रम्। तच्च तन्मन्त्रोक्तरयिविशेषणत्वेनोपपद्यत इति। तत्रोदाहरणं मन्त्रे उच्यते—हे इन्दो हे सोमास्मदर्थं पुनानो गच्छन्। पू धातोर्गत्यर्थकेषु निघण्टौ पाठादस्य गत्यर्थत्वम्। रयिं धनमादित्यरूपमुप सविधे मास्वोत्पादय। सविधश्च देशः कुमेरुस्तत्रेत्यर्थः। कीदृशं रयिम्, नृवन्तं नृभिर्नेतृभिः किरणैस्तद्वन्तम्। किरणानां मण्डलनेतृत्वमिति कल्पना। अत एव 'सप्त युञ्जन्ती'त्यादि उपपन्नम्। पुनः कीदृशं रयिम्। वाताप्यम्, वातेन प्राप्यमाणम्। अयं भावः—वातो हि सदा गमनशीलः प्रतिदिनं प्रचलन्नादित्यः। स च क्रमेणोत्तरा गमनावसरे सुमेरौ प्रथमं दृग्गोचरो भवति, ततः परस्तात् क्रमेणादित्यदर्शनमनस्तमितं तत्रोदितं भवतीति पूर्ववर्तिना तेनेदं दत्तमिति कल्पना यथा सुमेरावेवं कुमेरावपि। वातेनाप्यत इति वा वातापित्वं बिम्बस्य। अन्नसूक्तेऽपि बिम्बस्यान्नत्वेन स्तुतौ तस्य वातापे इति सम्बोधनमुक्तकल्पनया। पुनः कीदृशं विश्वश्चन्द्रम्। विश्वं सर्वं प्रत्यविशेषात् देवान् मनुष्यान् पितॄन् पश्वादीनपि प्रति चन्द्रमानन्दयितृ सुखकरमित्यर्थः। कुमेरुष्ठानामुदयतस्तस्याह्लादकरत्वं सुमेरुष्ठानामपि दिवाभागे आपेक्षिकप्रखरकिरणवत्त्वापेक्षया सुखकरताऽस्तमयत आदित्यस्यैवं मध्यमादिस्थानवासिनः प्रत्यपीति गृहीत्वोच्यते विश्वश्चन्द्रमिति। अत्र विश्वश्चन्द्रशब्दस्य सुश्चन्द्रहरिश्चन्द्रवत्सुडागमः। इदमेकं पदमत एव विश्वश्चन्द्रपदे

एकस्वरयोगिता। विश्व इत्यस्य पृथक्पदत्वे चन्द्रमित्यस्यापि तथात्वे उभयोः पृथक्स्वरता स्यात्। एवञ्च दुर्गादासोक्तं विश्वः सर्वो जन इति विवरणं न सम्यक्। आदित्यमण्डले त्रिधा किरणयोगः। तत्राग्रवर्ती किरणसङ्घ आदित्यं स्तौतीति कल्पना। पश्चाद्वर्ती चादित्यं नमतीवेति। सम्मुखश्च तमाह्वयतीवेति। तद्युक्तस्य स्तोतृत्वं मत्वोच्यते वन्दितुरतीतस्य पश्चाद्वर्तिकिरणसम्बन्धिन आदित्यस्य सम्बन्धि आयुः स एवाविरतं चलन्नादित्यरूप आयुरूपो वायुरूपस्तं प्रतारि प्रवर्द्धय। अयं भावः—अयं सर्वदा प्रचलन्नादित्यः सुमेरुसन्निकटे कुमेरुसन्निकटे च देशे हठान्नोदितोऽस्तमितो वा बहुकालं भवति, किन्तु तस्य देशस्य सुमेरुकुमेर्वोः सामीप्यानुसारेण क्रमश उदयास्तमयौ स्वल्पकालमारभ्य बहुकालपर्यन्तं कुर्वाणः प्रवर्धित इत्युक्तिः। अत एवैतस्यादित्यस्य देशानुसारेणोदेत्य स्वल्पकालं प्रकाश्य विश्वं, पुनरस्तमये उदितस्य तस्य स्वल्पोर्ध्वदेश-सम्बन्धोत्तरं पुनरस्तमये शुनःपुच्छवद्भावः। यथा शुनः पुच्छं स्वल्पतिर्यग्भावं प्राप्तं भवति एवम्। अत एव तस्य तथाभावमापन्नस्य शुनःपुच्छशब्देन व्यवहारः। एवं बहुकालं प्रवर्तमानः मः प्रवर्धित इति गृहीत्वाऽऽयुषः प्रतरणोक्तिः। आयुवायुशब्दयोः समानार्थत्वं निरुक्तकार आह—'आयुरेव वकारोपजनं प्राप्य वायुर्भवति'। तद्वदत्र। एवं प्रातःकाले धियावसुरूपो वा सविता तद्रूप आदित्यो जगम्यात् गच्छतु प्राप्तो भवतु दिनमुदितं भवत्विति प्रार्थना।

एवं मर्यादाशब्दवचनस्थलेऽपि न स्पष्टार्थत्वम्। तथाहि मन्त्रः।

'सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्।
आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ'।।

एतन्मन्त्रस्यादिममर्ध निरुक्तकारेण 'अंहुर'शब्दार्थनिर्णयाय निगमत्वेनोक्तम्। व्याख्यातं च तत्तेनैवम्—सप्तैव मर्यादाः कवयश्चक्रुस्तासामेकामप्यभिगच्छन्नं-हस्वान् भवति। स्तेयं तल्पारोहणं, ब्रह्महत्यां, भ्रूणहत्यां, सुरापानं, दुष्कृतस्य कर्मणः पुनः पुनः सेवां पातकेऽनृतोद्यमिति।

दुर्गाचार्येण संपूर्ण मन्त्रं प्रदर्श्य तस्य व्याख्यानमेवं कृतम्—सप्त मर्यादाः सप्त स्थितीः कवयो मेधाविनो हिरण्यगर्भमनुप्रभृतयस्ततक्षुः कृतवन्तः। नित्या एव हि ताः, तैस्तु तत्प्रख्यायिकानुस्मरणार्थ ग्रन्थसन्दर्भोऽभिव्यञ्जितः। एतदेव करणमित्युपचर्यते। तासामेकामिदभ्यंहुरो गात्। इदित्यनर्थकः। अप्यर्थे वा। तासां मर्यादानामेकामभिगच्छन्नभिक्रामन् अंहस्वान् भवति। गादित्येतदभेः समीपमाकृष्य एकामप्यभिगच्छन्निति। कतमास्ता मर्यादा इति?

स्तेयं तल्पारोहणम् इत्येवमाद्याः। यः पुनरेता नाभिगच्छति तस्य किम् इति। स आयोरयनस्य सूर्यस्य स्कम्भे स्कम्भने मण्डले उपमस्य सर्वभूतोपनिर्मातुरादित्यान्तरपुरुषस्य नीळे नीडे निलयने स्थाने यानि धरुणानि धारयितृणि स्थानानि अप्रध्वंसीनि आभूतसंप्लवस्थायीनि तेषु तस्थौ तिष्ठति। आह—कस्मिन् काले? पथां विसर्गे विषयानुप्रवेशमार्गभूतानामिन्द्रियाणां विसर्गे विसर्जनकाले प्राप्ते मृत्युकाल इत्यर्थः। मर्यादासंसर्गात्स्पष्टतर एव निगम इत्यतोंऽहुरशब्दो द्वितीयो नोपात्तः। स्मृतिसमाचारश्चानेन प्रतिविशिष्ट उपदर्शितो भविष्यतीत्येवं मन्त्रेभ्य एवोपश्रुत्य सर्व एव समाचारो विशिष्टैः स्मृतिकारैः सन्दृष्टो न स्वतन्त्र इत्यर्थः इति।

अत्र मर्यादाशब्दस्य तत्सप्तकस्य तत्साहित्येनांहुरशब्दस्य वचनाद्भाष्यकारेण पापपरत्वमुक्तम्। यद्यपि पापानां विषये कापि सङ्ख्या न नियता, विशिष्टपापविषये पञ्चत्वसङ्ख्यायोगः प्रसिद्धो न सप्तसङ्ख्यायोगः। अंहुरशब्दस्यापि न पापयुक्तत्वार्थकत्वं नियतम्। एवं च मर्यादावचनात्तत्सप्तकग्रहणाच्च न पापपरत्वनिश्चयः। एवं महापातकानां पञ्चत्वस्य प्रसिद्धया सप्तसङ्ख्यापूरणार्थ दुष्कृतस्य कर्मणः पुनः पुनः सेवायाः पातकान्तरत्वेन ग्रहणं प्रसिद्धिविरुद्धम्। महापातकं पुनः पुनरनुष्ठीयमानं पातकान्तरं न भवति। ब्रह्महत्या पुनः पुनरनुष्ठिता न पातकान्तरं किन्तु ब्रह्महत्यैव सा। केवलमभ्यासेन प्रायश्चित्ताभावस्य तत्र प्राप्तिः। एवं मिथ्यावचनस्य पापत्वेऽपि न पातकत्वं नापि वा महापातकत्वं, दुष्कृतस्य पातकस्य विषये तस्य पातकत्वसम्भवेऽपि तस्य न महापातकत्वमिति तस्यापि महापातकसदृशत्वेन न प्राप्तिरिति प्रकृते पातकेषु सप्तसङ्ख्याया अप्रसिद्धेर्यथा कथञ्चन तत्पूरणे पातकान्तराग्रहणे विनिगमनाविरहः। तस्मान्नात्र मर्यादाशब्देन पातकानि, तानि च सप्तेति नियन्तुं शक्यम्। संभवमात्रेण ग्रहणे प्रकारान्तरेणापि सम्भवेऽयमेव प्रकारो ग्रहीतव्यो नान्य इत्यत्र न किमपि प्रमाणमुपलब्धं स्यात्। एतेनांहस्वत्व-वचनेन पापपरतेति वचनमपि परास्तम्, तेनोक्तपापसहायकत्वस्य निर्णेतुमशक्यत्वात्। अंहस्वाञ्छब्दः पापिन एव बोधक इति नियमनमपि दुर्घटं न तावता पातकस्य नियमः। एवं परस्परसाहित्यात्तथार्थपरत्ववचनमपि परास्तम्। अस्यां दशायां मर्यादाशब्दस्य तत्सप्तकस्यार्थानिश्चयान्मन्त्रो न विस्पष्टार्थः।

यत्तु टीकाकृता निरुक्तार्थव्याख्याने मन्त्रस्य पूर्वार्धं निरुक्तकाररीत्या व्याख्यायोत्तरार्धं शेषेण व्याख्यातं यथा—यः पुनरेतानाभिगच्छति स इत्यध्याहारेण। तदपि मन्त्रपूर्वार्धस्य सति पूर्वोक्तरीत्या व्याख्याने यथा कथञ्चन

तादृक्तेन वचनीयं स्यात् । श्रायोः सूर्यपरताऽयनवशतः, स्कम्भनमित्यस्य स्पष्टार्थत्वाभावे मण्डलपरता, उपमस्योपनिर्मात्रर्थत्वं तच्च मण्डलस्थे पुरुषे । तस्य नीडे निलयने स्थाने, धरुणशब्दस्याऽप्रध्वंसिस्थानपरत्वं तेषु, तस्थावित्यस्य व्यत्ययेन तिष्ठतिपरता, तच्च पथामिन्द्रियपरत्वं विसर्ग इत्यस्य मृत्युपरता इत्येवं बहुविधार्थकल्पनद्वारेति क्लेशेन सम्पादनीयम् । किञ्च पूर्वार्धे मर्यादानां सप्तत्वोक्त्योत्तरार्धे सप्ताधिकरणानि मर्यादासम्बन्धित्वेन प्राप्तानि, सङ्ख्यासाम्यात् । तानि तत आच्छिद्य मन्त्रेऽनुक्तस्य मर्यादानभिगन्तृपुरुषस्य सम्बन्धित्वेन ग्रहीतव्यानि । अत्रापि तस्थाविति पदेन गृह्यमाणस्य कर्तुर्विशेषावचनात्सप्ताधिकरणसम्बन्धित्वेन सप्तानामप्यधिकरणानां तदधिकरणता वक्तव्या । तां परित्यज्य विसर्गधरुणानामेवाधिकरणानां तत्कर्तृयोगः स्कम्भरूपस्याधिकरणस्य सूर्यमण्डलस्य पुरुषं प्रति तत्त्वं नीडस्य धरुणैः सम्बन्ध इति । ऐकरूप्येण सर्वाधिकरणसम्बन्धस्य स्थितिकर्त्रा प्राप्तस्य परित्याग इति । पूर्वार्धेन तद्योगस्तात्पर्यादिति बहुविधता कल्पनाया इति तत्कल्पने सर्वत्र प्रमाणानुपन्यासेन केवल सम्भवात्सैव विशिष्यादृता । एवं सम्भवपरत्वे प्रकारान्तरेणापि सम्भवेऽयमेवैतस्यार्थ इति नियमनाभावेऽनियमनादस्पष्टार्थता मन्त्रार्थस्येति । तदर्थं प्रयत्यते ।

कविभिर्मर्यादानां तक्षणं करणमित्यंशो मन्त्रे स्पष्टमुच्यते । मर्यादानां सप्तत्वमपि स्पष्टं प्रतिपादितमेव । परन्तु ता मर्यादाः का इति तु न स्पष्टं मन्त्रे, कथञ्च तासा सप्तत्वमित्यंशोऽविस्पष्टः । तत्र द्वितीयपादे तासामेकां योऽभिगात् अभि सम्मुखं गतस्सोंहुरः । अथवा योऽभिगच्छेत् सोंऽहुर इति प्रतिपादेनेन तत्साहित्येन मर्यादाशब्दस्य पापपरता मन्यते । तावता तत्सप्तत्वस्य पापपरताया न सम्यगन्वयः । न हि पापानि सप्तैवेति प्रसिद्धिः । महापापपरत्वे मर्यादाशब्दस्य पापमात्रपरस्य महापापरूपविशेषार्थपरत्वं पापमात्राभिगमने प्राप्तस्यांहुरत्वस्य महापापाभिगमने एव स्वीकर्तव्यं स्यात् । किञ्च तावताऽपि "भक्षितेऽपि लशुने न शान्तो व्याधिरिति" न्यायेन सप्तसङ्ख्यान्वयोऽनुपपन्नोऽवशिष्यत एव । तस्मान्मर्यादाशब्दस्य नात्र पापपरता किन्तु अवधिपरत्वं, ते चावधयः सप्त कविभिः कृता उक्ता इत्यर्थः । ते चावधयः कुत्र कस्येति मन्त्रावचनादलब्धं तस्य स्थाननिर्णयाय मन्त्रे इच्छब्दः प्रयुक्तः । इच्छब्दस्य पृथिवीसम्बन्धपरता पूर्वं प्रतिपादितैव । एवं च पृथिव्यामवधयः सप्त कविभिः कृता इत्यर्थः पर्यवस्यति । कस्येत्यंशः परमवशिष्यते । तच्च द्वितीयपादवशतो लभ्यते । तत्रोच्यते एकामभिगादंहुर इति । एवञ्च

सोऽवधिरभिगमनस्यांहस्वित्वप्राप्तेर्वेति लभ्यते। अवधिसप्तत्वकल्पनेऽपि निमित्तमत्र वर्णनाल्लभ्यते। तच्चांहस्वित्वतारतम्यम्। अवधयोऽनेके बहुवचनात्, 'मर्यादाः' इति बहुवचनम्। तासामेकामभिगन्तुरंहस्वित्वमिति वचने विशेषावचनात्सर्वासामभिगमनेंऽहस्वितेत्यर्थो लभ्यते। एकापदेन तन्मध्यवर्तिन्याः कस्या अपि ग्रहणं प्राप्तमिति सर्वासामभिगमनेऽहंस्वित्वमित्यर्थलाभः। मर्यादानां बहुवचनेन भेदाद्भिन्नकारणवशत एकविधस्यैकस्यैव कार्यस्य वक्तुमशक्यत्वेन कारणभेदे कार्यतारतम्यं लभ्यते इति तत्तारतम्यमेव कारणसङ्ख्याकल्पनेऽपि निमित्तमिति। यद्यपि कार्यभेदेन कारणभेदो वर्णयितु शक्यो न तु तस्येयत्ता, तथापि कार्यविशेषस्य प्रमाणान्तरेण सङ्ख्यानियमने कारणसङ्ख्याया अपि नियमनस्य तेनैव प्राप्तेः। एवञ्चात्र कारणभूतावधेः सप्तत्वं मूल उच्यमानं कार्यसप्तत्वमप्यनुमापयतीति मर्यादासप्तकवशतः कार्यभूतमंहुरसप्तकं कल्प्यते। अंहुर शब्दस्यांहस्विपरतयांऽहस्विशब्दे मतुबर्थकविनिप्रत्यययोगेनांहस्वितारतम्यमंहस्तारतम्ये पर्यवस्यति। तस्मादंहस्तारतम्यस्य सप्तविधत्वं मर्यादया उच्यमानं मन्त्रेंऽहसस्तारतम्यं साधयतीति सिध्यति। सर्वमेवेदमंहःपदार्थविज्ञाने संभवेत्। अंहःपदार्थस्तु न मन्त्रे स्पष्टमुक्त इति सर्वमिदं सदोषमिति चेन्न। वेदे आदित्यस्यैवैकस्य वर्णनमिति पूर्वाचार्याणामबाधितसिद्धान्तत्वेन तदनुरोधेनांहःस्वरूपनिर्णयः। अंहःशब्दस्य मलवाचकत्वेनादित्यस्य वर्णने तत्र तमसोऽपेक्षया मलान्तरस्यासंभवेन तमोरूप एवांहःपदार्थोऽत्र ग्रहीतव्य.। तस्य तारतम्यमुपाधिवशत इति। उपाधिवशतो न्यूनाधिकभावं विभिन्नसङ्ख्याकत्वमुपगतस्यांहसो मर्यादासप्तकं निमित्तमित्यर्थोऽत्र पर्यवस्यति। अंहोरूपं तमश्च रात्रिसम्बद्धं रात्रिभेदरूपोपाधिवशतो भेदमापद्यते। रात्रिभेदोऽपि हि उपाधिवशतोऽनेकविध इति पूर्वं प्रपञ्चितम्। तत्र ये भेदका उपाधयस्ते रात्र्याः साक्षाद्दृष्टार इति गृहीत्वा रात्रिसूक्ते प्रतिपादित "ये ते रात्रि नृचक्षसो युक्तासो नवतिर्नवे"-त्यादिना। ते च तमसो विभेदा अवधिसप्तके भवन्तीति प्रकृतमन्त्रे प्रतिपादितम्।

एवं सतीमे अवधेः सप्त भेदास्तत्रैकमपि अवधिभेदं प्राप्तः, अर्थादादित्यस्तमसा युक्तो भवति, अर्थात्तत्र रात्रिप्रवृत्त्या तस्यादर्शनादिना मलिनत्वं भवतीति। तच्च मलिनत्वं कियत्कालपर्यन्तं भवतीत्येत'द्ये ते रात्रिनृचक्षस' इत्यादिना प्रतिपादिम्। तत्रैतत्सर्वमित् पृथिवीसम्बन्धि भवति। सत्येवं पृथिवीन्यायो द्योलोकेऽपि भवतीति द्योलोकेऽपि तादृशाः सप्तावधयो वक्तव्याः। ते चेत्तादृशा अवधयः प्रोक्तसङ्ख्याका उक्ता लभ्येरंस्तर्हि अत्रापि मन्त्रे

तत्साम्यादस्मदुक्तार्थपरत्वमेवोपोद्वलितं भवति। तच्चानुपदं विचारयिष्यत एव। एवञ्च मन्त्रपूर्वार्धे मर्यादारूपास्सप्तावधय उक्तास्तेषामभिगमनेंऽहस्विता भवतीति प्रतिपादितम्। ते चावधयः पृथिवीसम्बन्धिन इति इच्छब्देन तत्रैव मन्त्रार्धे वर्तमानेनोक्तम्। अवधीनां स्थानानि परं वक्तव्यानि। तत्रावधयः सप्तेति तत्स्थानान्यपि सप्तापेक्षणीयानि। तानि मन्त्रापरार्धे सप्तम्यन्तेनोच्यन्ते। तथाहि मन्त्रोत्तरार्धम्—"आयोर्ह स्कम्भे, उपमस्य नीळे, पथां विसर्गे, धरूणेषु तस्थौ" इत्यनेन। तत्र आयोःस्कम्भे एकम्, उपमस्य नीळे द्वितीयम्, पथां विसर्गे तृतीयम्, धरुणेषु चत्वारीति मिलित्वा अवधेः सप्त स्थानानि निर्दिश्यन्ते तद्वशतस्तेषां पूर्वोक्तमर्यादाभिरेव सम्बन्धो व्यक्तो भवति। आयोःस्कम्भ एकं स्थानम्। तत्रैकस्मिन्दिनेऽर्थात् सुमेरुकुमेर्वोः पर्याये यदोभयोरपि लोकयोरादित्ययोगः पर्यायेण स्वल्पकालं भवति तत्रत्यस्यादित्यस्य पर्यायेणोभयलोकाभ्यां तत्स्थादित्याभ्यामीषन्मिश्रणात्तत्रादित्यस्य आयुशब्देन वचनं, तत्रैकस्मिन्पर्याये यदा कियत्कालपर्यन्तमादित्यस्य एकस्मिन् भुवो दक्षिणार्धगतकुमेरुसम्बन्धिप्रदेशसम्बन्धेन दर्शनं तदैव तस्मिन्नेव पर्याये भुव उत्तरार्धगतसुमेरुसम्बन्धिप्रदेशसम्बन्धेनादर्शनं यदा वा तत्सम्बन्धेन दर्शनमपरस्मिंस्तददर्शनमिति। स च भावः सुमेरौ कुमेरौ वा षाण्मासिकदिनप्रारम्भतः पूर्वं भवति कियत्कालम्। तदभिप्रेत्यैवादित्ये शुनो लाङ्गूलत्वादिकल्पनमिति पूर्वमुक्तम्। एवञ्चात्रत्य आदित्यो यदैकस्मिन् स्वल्पकालसम्बन्धेन युक्तः पर्याये, तदानीमपरत्र तावत्या मात्रया अधिकसम्बन्धो भवति। यदा चैवं स्वल्पकालसम्बन्धस्यात्ययस्तदानी तस्य तत्र देश उदीयमानतेति ततः परस्तात्सोऽनेकपर्यायपर्यन्तमुदित एव दृश्येत, तस्योक्तरीत्यानेकपर्यायपर्यन्तमुदितत्वेन दृश्यमानस्य परा काष्ठा षण्मासा इति। तदेतदुभयस्मिन् सुमेरौ कुमेरौ वा भवति। प्रकृते कुमेरुसम्बन्धो विचारणीय इति तत्र सर्वात्मना पर्याये आयुर्मात्रसम्बन्धित्वं तदायुषो विवर्धनमन्त्रे आशास्यमुच्यते। तत्रायुशब्दस्य सान्तत्वमुकारान्तत्वं वेति गृहीत्वा श्लेषेणायुषोऽपि सम्बन्धस्य विवक्षितत्वं तत्रायुःशब्देन सान्तेन वचनम्। तच्च तादृशं बहुषु स्थलेषु प्रतिपादनम्। उदाहरणार्थमुच्यते—

"सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताधरात्तात्।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः" इति।

अत्र सवित्रा दीर्घस्यायोर्दानमेव दीर्घस्यायुषो दानं तत् प्रार्थ्यते। आयुष्यादिशब्दानामप्युक्तविधायुषः सम्बन्धेनैव प्रवृत्तिरिति परस्तात् प्रतिपादयिष्यते। तमेवायुं गृहीत्वा मन्त्रे प्रोच्यते 'आयुः पवत आयवे' इति। यदायु-

भावस्तदानीमेकस्मिन्पर्याये स्थानभेदेन भिन्नायुद्वययोगः। तत्रोच्यत एक आयुः परस्मा आयवे पवते गच्छति। पूधातोर्गमनार्थेषु निघण्टौ पाठः। तच्चायव आयो-र्गमनं पूर्वमुक्तरीत्या। एवञ्चायोः स्कम्भे स्तम्भे यत्रायुभावोऽवसितस्तत्रैकं मर्यादा-स्थानम्। तच्च 'आयोर्ह स्कम्भे' इत्यनेन सप्तम्यन्तेनोच्यते। द्वितीयमुच्यते 'उप-मस्य नीळे'। नीडशब्दस्य गृहबोधकेषु नामसु निघण्टौ पाठान्नीडं गृहं तच्चास्त-रूपम्, तत्रास्तशब्दस्यापि पाठात्। एवं सति तच्च गृहमुपमस्य। उपमशब्देनोप आयोः सविधे मिमीते प्रकाशयति इति उपमशब्द आदित्यस्य बोधकः। आयोः-स्कम्भोत्तरमेवासौ उपमशब्देनोच्यते। तस्यास्तो यदा तदानीं द्वितीयं मर्यादास्थानं तत्रेति तत् 'नीळ' इति सप्तम्या बोधितम्। तृतीयं 'पथां विसर्गे' इति सप्तम्यन्ते-नोच्यते। तत्र पथामिति बहुवचनं पथिचतुष्टयाभिप्रायम्। पन्थास्तु देवयान-पितृयानरूपो भवति। तस्य प्रत्येकं चातुर्विध्यं पूर्वं विस्तरेण प्रतिपादितम्। तत्र सर्वेषां चतुर्विधानामपि पथाम्, अर्थात् पृथिवीसम्बन्धात् पितृयानरूपाणां सर्वेषां विसर्गेऽवसाने समाप्तावेव। तद्विसर्ग इत्यनेनावसानं समाप्तिर्वा बोध्यते। स च पथां विसर्गो रात्रिमध्ये भवति तदेतत्तृतीयं मर्यादास्थानम्। चत्वारि धरुणानि मर्यादास्थानानि इति मर्यादासप्तके उक्तविधेऽवधिस्थाने वर्तते इति मर्यादाया एकवचनाभिप्रायेण तस्थावित्याख्याते एकवचनम्। धरुणस्वरूपं पूर्वमुक्तम्। पथां चातुर्विध्याभिप्रायेण धरुणानामपि चातुर्विध्यम्।

एवञ्चोत्तरार्धेन मन्त्रस्य मर्यादास्थानान्येव बोध्यन्ते। तथा सति तत्रोक्तरीत्या टीकाकृतो व्याख्यानमत्रानवसरप्राप्तम्। एवञ्चायं मन्त्रो नोक्तविधपापसप्तकबोधको यथा निरुक्ते व्याख्यातम्। एवञ्चादित्यपरत-यैवात्र मन्त्रार्थे स्पष्टत्वमिति सिध्यति। सुमेरुकुमेर्वोर्यावद्दूरं समानन्यायता, हित्वा प्रत्येकं ये विशेषास्तान्। एवं सति कुमेरावुक्तमन्त्रेणोक्तविधमर्यादा-सप्तकबोधनेन सुमेरावपि अवधिसप्तकमपेक्ष्यते। तदुल्लेखस्यासत्त्वेऽपि कुमेरु-समानन्यायेन सुमेरौ तस्य कल्पनं कर्तव्यमेव। तथापि न सर्वथा तदुल्लेखो नास्तीति। तदुक्तं पुरुषसूक्ते—

'सप्तास्यासन् परिधयः त्रिः सप्तसमिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्'॥ इति।

अत्र देवानां यज्ञकर्तृत्ववचनेनायं यज्ञः सुमेरावनुष्ठीयमान इति भवति। देवानां यज्ञः सुमेरौ मनुष्याणां यज्ञः कुमेराविति पूर्वमुक्तम्। एवञ्च पूर्वमर्यादासप्तक-रूपावधिसप्तकमिदित्यनेनपृथिवीसम्बन्धीति पूर्वमुक्तम्। पृथिवीसम्बद्धो यज्ञश्च मानुषो न दैवः। दैवो यज्ञश्च सुमेराविति देवानुष्ठेये यज्ञे सप्तानां परिधीनां

8

वचनं तत्राप्युक्तविधावधिसप्तकस्य बोधकमिति। एवञ्च सुमेरुव्यवहार-साम्यात्तत्रावधिसप्तकवचनादत्र मन्त्रे मर्यादाशब्देनावधेरेव ग्रहणम्। तस्य सप्तेत्यनेन सप्तकं बोध्यते। तस्यैवावस्थानस्थानानि उत्तरार्धेन मन्त्रस्य प्रति-पाद्यन्ते, एवञ्चात्र पापादिपरत्वेन व्याख्यानं न सम्भवतीति दिक्।

एवं विश्वेत्तेति मन्त्रे वराहशब्दस्यार्थाविज्ञानान्मन्त्रस्याविस्पष्टार्थता। तथाहि अयं मन्त्र एवम्—

'विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम्'॥ इति।

अय मन्त्रो निरुक्तकारेण वराहशब्दस्य मेधातिरिक्तार्थे प्रयुज्यमानस्य वराहार-रूपनिरुक्तिवशत एव प्रवृत्तिं मत्वा वराहशब्दस्य निगमत्वेन खण्डश उपात्तो वराहमिन्द्र एमुषमिति। दुर्गाचार्येण चोपर्युक्तं निगमं सम्पूर्णमन्त्ररूपेण विलिख्य व्याख्या क्रियते। यथा—काण्वस्य कुरुसुतेरार्षम्। ऐन्द्री। विश्वा इत्ता विश्वान्येव तानि विष्णुराभरत्। उरुक्रमो बहुविक्रान्तः। त्वेषितः सन्दीपित इन्द्रवाक्येन "दुर्ग्राह्या त्वा आहर्तेत्यवोचथ: एतदाहरे"त्यनेन। त्वा इषित इति पदविभागः। यदि त्वा इषित इति पदविभागस्तथापि तु त्वेषित इति पदविभाग-मकृत्वैव निरुक्तम्। परोक्षकृतत्वान्मन्त्रस्य। नान्यथार्थं उपपद्यते। कानि पुनस्तानि वस्तून्याहरदिति। उच्यते। शतं महिषान्बहून्महतो यज्ञानाहरत्। किं लक्षणानित्युच्यते। क्षीरपाकमोदनम्। प्रायणीयाख्यमादितः कृत्वा ये क्रियन्ते तान्। सोमक्रतूनित्यभिप्रायः। कुतः पुनराहरदित्युच्यते। असुरं वराह-रूपेणावस्थितम्। सर्वेषामसुराणा मध्ये एमुष मोहस्थानीयम्। मायया यमिन्द्रो जघान तन्मध्यादाहरत्। 'यदयं वराहमिन्द्र एमुषमेकविंशत्याः पुरां पारे' इत्युच्यते। एवं ब्राह्मणं मैत्रायणीये। तदभिवादिनी चैषा ऋगिति।

अत्र टीकाकृदभिप्रेतार्थबोधनाय बहूनां पदानामध्याहारो विभक्तिविपरि-णामादिक कल्पनीयम्। तावतापि पूर्वार्धोक्ताहर्तव्यवस्तूना विश्वा इति विशेष-स्यानुपपत्तिः। तेन शब्देन सर्वत्वं बोध्यते। तद्यदि सोमक्रतुविषयकं तर्हि महिषा-निति बहुवचनेनैव सिद्धिरिति शतपदोपादानमनर्थकं, बहुवचनेनैव सङ्ख्याविशेषा-नियमात् सर्वे इत्यर्थलाभः। अथ सङ्ख्याविशेषाभिप्रायकः शतशब्दो मूल इति, तथा सति के ते कुत एते इति सङ्ख्याविशेषग्रहणस्याभिप्रायो वक्तव्यः स्यात्। किञ्च आहर्तव्यसर्ववस्तुबोधनाय मन्त्रोत्तरार्धः प्रवृत्तः। अत एव तेषामाहर्त-व्यताबोधनाभिप्रायेणोत्तरार्धोक्तानामाहरणकर्मताबोधकद्वितीयान्तत्वेनोल्लेखः। तथासति ओदनस्य वराहस्य आहरणेन कर्मत्वेन सम्बन्धो वक्तव्यः। तथासति

ओदनशब्दस्यादित्यप्रायणीयचर्वर्थकत्वेन सोमसम्बन्धे आहरणेन साकं कर्मत्वस्य साक्षात्सम्बन्धेन प्रतीयमानस्यानुपपत्तिः। किञ्च यत्र स चरुहोमः क्रियते तादृशानित्यध्याहारेणार्थकल्पने ओदनशब्दस्य प्रथमान्तत्वे प्रक्रमभङ्गः। द्वितीयान्तत्वे होमकर्मता प्रतीयेत न त्वाहरणकर्मता। किञ्च वराहशब्दस्यापि आहरणकर्मतया प्रतीयमानस्यासुरपरत्वेऽनुपपत्तिः। न हि असुर आह्रियते। किञ्चैकरूपत्वेनोच्यमानस्याभरदिति पदस्य सोमक्रत्वभिप्रायेणान्यार्थत्वं वराहाभिप्रायेणान्यार्थत्वं वक्तव्यं स्यात्। समानरूपेणान्वयसम्भवे तादृशकल्पनाया अयुक्तत्वम्। किञ्चैवमाद्यन्तयोरेकरूपेणाहरणकर्मतयान्वये मध्यवर्तिन ओदनपदस्यापि आहरणकर्मता यथा स्यात्तादृशोऽर्थो वक्तव्यः स्यात्। तथा सति ओदनमित्यस्याहरणकर्मत्वे सोमक्रतुबोधकलिङ्गाभावान्महिषशब्दस्य तदर्थबोधकत्वं न स्यात्। ब्राह्मणोक्तस्यैकविंशत्याः पुरां पारे इत्यस्यानुपपत्तिरेव स्यादिति तस्मादेवमर्थो नोचितः। तस्मादेतन्मन्त्रस्यास्पष्टार्थत्वम्।

तत्रोच्यते—मन्त्रे 'ता' तानि। तेन च तच्छब्देन प्रसिद्धार्थ उच्यते। अतएव ब्राह्मणे विष्णोरभिप्रायेणेन्द्रवाक्यमुच्यते "दुर्ग्राह्या त्वा आहर्ता" दुर्ग्राह्याणि त्वया आनेष्यन्त इत्युच्यते, तर्हि इमानि दुर्ग्राह्याणि तान्याहरेत्यर्थपरमिन्द्रवाक्यमुच्यते 'एतदाहरे'ति। तत्रैतच्छब्दबोध्यस्य दुर्ग्राह्यत्वं प्रसिद्धमिति प्रतीयते। तानि च दुर्ग्राह्यत्वेन प्रसिद्धानि वस्तूनि मन्त्रद्वितीयार्धेनोच्यन्ते। न चात्र ब्राह्मणे एकवचनेन वराहविषयत्वमेव तेन बोध्यते, नेतरशतमहिषादिविषयत्वं तेन बोध्यत इति वाच्यम्। एतदिति नपुंसकलिङ्गैकवचनेन सर्वेषां मन्त्रोक्तानां बोधात्। वराहमात्राभिप्रायकत्वे एतमिति पुँल्लिङ्गो निर्देशः कृतोऽभविष्यत्। तत्रैतेषां यथा दुर्ग्राह्यत्वं भवेत्तथा तानि व्याख्येयानि। मन्त्रे उरुक्रम इति विशेषणेन एकेनैव क्रमेणाहर्तव्याहरणे तव क्लेशो नास्तीति प्रतीयते। स हि विष्णुः पदत्रयन्यासेनैव सर्वं जगद्व्याप्तवानिति उरुक्रमः। त्वेषित इत्यत्र त्वा इषित इति पदद्वयम्। त्वा त्वया इषितः प्रेरितः। तत्रेन्द्रं प्रति प्रतिपाद्यते हे इन्द्र त्वा त्वयेषितः प्रेरितो विष्णुस्ता तानि दुर्ग्राह्यत्वेन प्रसिद्धानि विश्वा सर्वाणि इदाभरत्। सविधवर्तिन्यर्थे आभरत् आनयत् क्रमेणेत्यर्थः। तत्र प्रथमं महिषा आहरणीयविषयाः। तेऽत्र रात्रिकालीनतमोविशिष्टाः परिक्रमाः।

अयं भावः—अत्र राज्यवसानकालिकोऽर्थ इच्छब्देन बोध्यते। तथा च सर्वमिदं वक्ष्यमाणमिदाहृतम्। सर्वमिदं रात्रिकालिकम्। तत्र मेरौ षाण्मासिकदिनरात्राभ्यां संवत्सरो व्याप्यते। तत्र दिनमानं द्व्यधिकाशीत्यधिकशतपरिक्रमरूपम्। तत्रादित्यमण्डलं परिक्रमद् भवति तद्भ्रमवशतो दिने परिक्रमा गण्यन्ते।

एवं रात्रिमानमपि तावत्परिक्रमरूपम्। तत्र रात्रौ दृश्यमाननक्षत्रतारादिपरिभ्रमतो मीयन्ते परिक्रमाः। रात्रावादित्याभावेन तमोविशिष्टास्ते परिक्रमास्तमसो न्यूनाधिकत्ववशतो दुर्गत्वेन व्यवह्रियन्ते। तानीमानि रात्रिकालिकानि वस्तूनि तमसावृतानीति दुर्ग्राह्याण्युच्यन्ते। तत्रादित्यास्तोत्तरं कियत्कालं प्रकाशस्य प्रकृष्टत्वेन न सम्यक् तमस उपलम्भः। स च विंशतिपरिक्रमपर्यन्तं प्रकृष्ट इति विंशतिपुरां पारे परस्तादित्यर्थः। अर्थादेकविंशपरिक्रममारभ्य स्वल्पतमसः प्रवृत्त्या तदारभ्येत्युक्तम्।

यद्यपि पूर्वं 'चत्वारिंश्यां शरदि लाभ' इत्युक्तं तत्ततोऽधिकं विस्पष्टं तमः प्रवर्तत इत्यभिप्रायेण। किञ्चात्र मैत्रायणीयके "विंशतिपुरां पारे" इत्युक्ततया ततो गृह्यते, ततः परस्ताच्छतसंख्याकाः महिषा महान्तस्ते परिक्रमास्तमोवैशिष्ट्येन महिषा महिषसदृशा इत्यपि वक्तुं शक्यम्। एवं सति आभरदित्यस्य सम्यगन्वयः। यद्यपि आनयनमपि कल्पितमेव तथापि शब्दान्वयसौकर्याय महिषकल्पनेति। ततः परस्तात् क्षीरपाकमोदनमुषोरूपं चरुसाधनभाण्डम्। सम्भवत्युषसि मण्डलतस्तिर्यक्प्रसरत्तेजोवशतो न्युब्जभाण्डकल्पना; अथवोत्तानभाण्डकल्पना। चरुशब्दस्य भाण्डपरत्वस्य मीमांसकैर्व्यवस्थापनाद्भाण्डरूपता। किञ्चात्र क्षीरपाकमिति विशेषणेनापि भाण्डरूपत्वमेवोचितम्। न हि ओदनशब्देनोदनं गृहीत्वा तत्र क्षीरं पक्तु शक्यम्। तस्मादोदनशब्दस्तत्साधनभाण्डपर इति तत्साजात्यादत्र ओदनशब्देन तत्साधनं भाण्डं ग्रहीतव्यम्, तच्चोक्तरूपम्। एवं सति उषसमिति द्वितीयमिदमाहरणकर्म। ततो वराह एमुषः। स च सवितृरूपो वा मण्डलरूपो वा। द्वितीयकल्पनैवात्र समुचिता। उषसो भाण्डकल्पनया तस्या आमण्डलं सत्ता अभिप्रेयते। सावित्रकालमन्तर्भाव्यापि उषसः कालवर्णनात्। एवं सति रात्रिकालिकानां सर्वेषां परिक्रमाणां वचनं भवति। पूर्वे विंशतिपरिक्रमाः पुरोरूपत्वेन गृहीताः। ततः शतपरिक्रमपर्यन्ता महिषास्ततः सावित्रकालमन्तर्भाव्य उषसः षष्टिपरिक्रमा इति मिलित्वा २०+१००+६० साकल्येनाशीत्यधिकशतपरिक्रमा रात्रिकालिकाः पूर्णा भवन्तीत्यर्थः। यद्यपि रात्रिपरिभ्रमाणां द्वाभ्यामाधिक्यं पूर्वमुक्तं तथापि सामान्यतो वत्सरमानं षष्ट्यधिकशतत्रयं निगद्यते। यथा ब्राह्मणे उच्यते—"त्रीणि च शतानि षष्टिश्च संवत्सरस्याहानि" इति। रात्रेरप्यहस्त्वेन ग्रहणेन तावन्ति संवत्सरस्याहानीत्युक्तम्। रात्र्या अहस्त्वेन वर्णनं मन्त्रे—"अहश्च कृष्णमहरर्जुनं चे"त्यादौ। मन्त्रेऽप्युच्यते यथा—

'द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत।
तस्मिन् त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः'॥ इति।

तावती रात्रिस्तावत्परिक्रमा ततः परस्तादादित्यबिम्बमुदेतुं परिक्रमते। तत्रेन्द्रो मण्डलमध्यः पूर्वदिक्स्थानः। तत्रेन्द्ररूपताप्राप्त्यर्थं मण्डलस्य परिक्रमाद्वयमपेक्ष्यते, तच्चेद्रात्रिपरिक्रमेषु गण्यते तावता पूर्वोक्तानां द्व्यधिकाशीत्यधिकशतरूपा १८२ संख्या सम्पद्यते। अत्र वराहस्येन्द्र एमुषत्ववचनात्। इन्द्र उक्तरीत्या मण्डलमध्यस्थानः पूर्वस्यां दिशि। अत एव इन्द्रस्याप्रत्यक्षत्वमुच्यते। अत एव सजनीये सूक्ते कार्यमुखेनानुमानेन तत्सत्त्वं "सजनास इन्द्रः" इत्यनेनोच्यते। अत एव ब्राह्मणे—"ऋषयो हैनं न ददृशु"रिति वर्णनम्। तत्रेन्द्रे एमुषत्वं वराहस्योच्यते। एमुषमित्यनेन जग्मिवांसमित्यर्थः प्रतिपाद्यते। अमधातोर्गत्यर्थात् क्वसौ एत्वे अभ्यासलोपे छान्दसत्वादम्यपि सम्प्रसारणे एमुषमिति जग्मिवांसं, तच्चेन्द्र इति सप्तम्यन्तत्वेनेन्द्रे जग्मिवांसमिन्द्ररूपत्वं लब्धुमिन्द्ररूपापादनार्थं वा आगच्छन्तमित्यर्थः। तादृशो वराह आदित्यमण्डलस्वरूप एव वराहरणात्। वराहशब्दो वराणि वस्तूनि-आहरतीति कृत्वा वराहारो वराहशब्देनोच्यते।

अथवा वरं गृहं अर्थादादित्यस्य तच्चास्तमये तस्य। अस्तशब्दस्य गृहनामसु पाठादस्तमयशब्देन तस्य गृहप्राप्तिरुच्यते। तस्माद् वराद् गृहादाह्रियतइति वराहारो वराह इति तेन शब्देनादित्यस्य वचनम्। तस्येन्द्रे आगमनवचनान्मध्यपर्यन्ता प्राप्तिरभिप्रेयते। तावत्पर्यन्तं प्रापणार्थमादित्येन परिक्रमद्वयं कर्तव्यं भवति। अयं भावः—आदित्येन तत्र सुमेरौ कुमेरौ वा मध्यस्थानात् अर्थाद्विषुववृत्तस्य क्रान्तिवृत्तेन संवत्सरप्रारम्भे यत्र सम्पातः क्रियते दक्षिणोत्तरवृत्ते तत्रत्यबिन्दुतो दक्षिणस्यामुत्तरस्यां वा स्थूलेन मानेन चतुर्विंशत्यंशपर्यन्तं सूक्ष्मेण सार्धत्रयोविंशत्यंशपर्यन्तं गत्वा आगम्यते। दक्षिणस्यामुत्तरस्यां वा उभयतो गमनागमनाभ्यां वत्सरः पूर्यते। तत्रैकस्मिन् पार्श्वे तावन्तोंऽशा गमनार्थं तावन्तश्चागमनार्थमुपयुज्यन्ते। तच्च गमनं मासत्रयेण, आगमनञ्च मासत्रयेण सम्पद्यते। तत्र मासत्रयेण मासत्रयार्थमपेक्षमाणाः परिक्रमा नवतिसंख्याकास्तावद्भिः परिक्रमैश्चेत्सार्धत्रयोविंशत्यंशा अतीयन्ते, तदैकेन परिक्रमेण कियदतिक्रमणमित्यनुपातेन—

$$९० : १ :: २३।। :: ? = \frac{१ \times २३\frac{१}{२}}{९०} = \frac{१}{९०} \times \frac{४७}{२} \times ६० = ४७ \times ६० \div ९० \times २ =$$

$२८२० \div १८० = १५\frac{२}{३}$—स्थूलेन मानेन पञ्चदशकलाः प्रतिपरिक्रममतीयन्त इति भवति। आदित्यबिम्बं चैकांशव्यासमापाततः प्रतीतम्। तदेव गृहीत्वा मन्त्रे उच्यते "गायत्रेण प्रतिमिमीते अर्कम्" इति। गायत्रेण दैव्येन छन्दसा अर्कमादित्यं मिमीत इति। दैव्यं गायत्रं छन्द एकाक्षरं छन्दःसूत्रे प्रोच्यते "दैव्येकम्"

इति। अक्षरं चांश इति समानार्थम्। एवं चैकांशात्मकबिम्बस्य पूर्णस्यात्ययनार्थमुदयार्थं वा परिक्रमचतुष्टयं भवति। तत्र बिम्बमध्यप्राप्तिपर्यन्तं परिक्रमद्वयं तत इन्द्ररूपबिम्बमध्यप्राप्तिरिति तस्य परिक्रमद्वयस्य पूर्वोक्तरात्रिपरिक्रमेषु योजनाद्व्यधिकत्वं भवतीति। एवं चात्र मन्त्रे शतं महिषाः, क्षीरपाकमोदनं, वराहश्चेति त्रयमेवाहर्तव्यं बोध्यते, न तु टीकाकृता यथोक्तं मैत्रायणीयानुसारेण वराहनामकमसुरं हत्वा तन्मध्यान्महान्तः सोमयागाः शतसंख्याका इन्द्रवचनेन त्वेषितो विष्णुराहरदिति। क्षीरपाकमोदनमिति वचनं सोमयागबोधकं यतस्तेन वचनेन य आदित्यं चरुं प्रायणीयमनुष्ठाय क्रियते स यागो बोध्यते, तादृशश्च सोमयागो भवतीति महिषशब्देन सोमयागं गृहीत्वा शतशब्देन तावत्संख्याका सोमयागा इत्यर्थः। एवं च टीकाकृता कृतः प्रयत्नः स तु सर्वात्मना न सुसङ्गतोऽत्र मन्त्रे।

किञ्च मन्त्रान्तरानुगुण्येनास्मदुक्त एवार्थोऽत्र मन्त्रे वक्तव्यो न तु टीकाकृदभिप्रेतः। एतावता वराह उदेष्यन्नादित्य एवेति त्रीणीमानि मन्त्रोक्तानि वस्तूनि शतं महिषाः, क्षीरपाकमोदनं, इन्द्र एमिवान् वराहश्चेति दुर्ग्राह्याणि वस्तूनि सर्वाणीमानि विष्णुराभरद्यतोऽयमुरुक्रमः। अत एकेनैव क्रमेणैतान्याहृतानीति। इमानि च सर्वाण्युदयस्थलाभिप्रायेणैवं क्रमाणि। अस्तस्थलाभिप्रायेण क्रमविवक्षणे चैतानि विपरीतक्रमाणि भवेयुः। ताद्रूप्येण च वृषाकपिसूक्ते वचनमुपलभ्यते। तच्च स तादृशं वार्षाकपसूक्तगतं वर्णनमस्य मन्त्रस्यैवंविधार्थकरणे उपोद्वलकमेतद्वशतश्च तत्रत्यमन्त्रस्यार्थकरणमुपपद्यते परस्परसम्बद्धत्वात्। तथाहि तत्रास्तमुपयन्नादित्यो वृषाकपिसूक्तेनोच्यते। तत्रत्यपरिस्थित्यनुसारेण तदीयमन्त्रे विपरीतक्रमेणैतानि वस्तूनि उच्यन्ते।

तथाहि स मन्त्रः—

"अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत्।

असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः॥" इति।

अत्रास्तमुपयन्नादित्यो वृषाकपिरुच्यते। अस्तमुपयतश्चादित्यस्य मध्यमस्थानत्वमिति तद्विष्णोः पादनिधानस्थानमर्थाद्विष्णोरपीदमेकं स्थानमित्यसावस्तमुपयन्नादित्यो विष्णुः। एवमस्तमुपयतिश्च पश्चिमायां, पश्चिमायामुपयन्नस्तार्थमादित्यो रुद्रोऽपि। अत एवेन्द्रं प्रत्युच्यते मन्त्रे—"रुद्राणामेति प्रदिशा विचक्षण" इति। रुद्राणां प्रदिशा विरुद्धया दिशेन्द्र एतीति वर्णने इन्द्रस्य पूर्वदिक्सम्बन्धिताया बहुषु स्थलेषु वेदे उक्तेस्तद्विपरीता पश्चिमारूपिणी रुद्रस्य दिक् भवति। एवञ्च पश्चिमां दिशमुपयन्नादित्यो रुद्रोऽपि।

तदेव गृहीत्वा वृषाकपिशब्दबोध्यत्वमुभयोः। तदभिप्रायेण कोशे उच्यते 'हरविष्णू वृषाकपी' इति।

एवञ्च वृषाकपिरस्तमुपयन्नादित्यस्तत्सम्बन्धितयाऽत्र वृषाकपिसूक्तगते उपरितने मन्त्रे असिः, चरुः, अन इति त्रयाणां "विश्वेत्ते"ति मन्त्रोक्तविपरीत-क्रमेण वचनम्। अत्रास्तावरीयं खण्डितं बिम्बमसिः, स च तत्रत्यं तमो विनाशयतीति वा पूर्वस्य यत्रासावस्तमेति तस्य विश्वस्य स्वगमनेनान्धकारयुतत्वसम्पादनेन वा हिसक इति तस्य सूनेति विशेषणम्। ततः परवर्तिसान्ध्यप्रकाशात्मोषसश्चरु-शब्देन वचनम्। चरुशब्देनौदनपाकसाधनं पात्रमुच्यते। चरुशब्दस्य पात्रपरताया बहुत्र वेदे व्यवहारो मीमांसकसम्मतः। तच्चेदानीं नवमिति विशेषणेन विशेष्यते। ततः परं चैधस्यं काष्ठपरिपूरितमनः। तच्च काष्ठपरिपूरितवचनेन समेधनार्ह-मिति प्रतीयते। तच्च तमोरूपम्। तमसः पचनीयत्वेन वचनमन्यत्र। तमस्तेजः-संयोगयोग्यं, तेजःसंयोगश्च पाकपदबोध्यः। एवञ्च पाकयोग्यं पचनीयमिति तमसः पचनीयत्वेनैधस्यत्ववचनम्। आचीतमित्यनेन आ समन्ताच्चितं पुञ्जीभूत-मिति विशेषणमनसः। तमसः पचनीयत्वाभिप्रायेण ब्राह्मणान्तरे उच्यते "वरुण-स्याभिषेच्यमानस्येन्द्रियं वीर्यमपाक्रामत्। तत्त्रेधाभवत्, भृगुस्तृतीयं श्रायन्तीयं तृतीयं सरस्वती तृतीयमिति"। तत्र श्रायन्तीयमित्यनेन पचनीयत्वमुच्यते तमसः। श्रा पाके इत्यस्माच्छ्रायन्तीयपदस्य सिद्धेः। तृतीया सरस्वती तेजोयुक्ता उषाः। तस्याः सरस्वतीत्वेन ग्रहणं ततः पूर्ववर्तिनस्तमस एव श्रायन्तीयशब्देन वचनं तच्चोक्तार्थकं तमसो बोधकम्। प्रथमतृतीयस्य भृगुबोधनेनापि उक्तमध्यवर्ति-तमस एव श्रायन्तीयत्वप्रतीतिः। एवञ्च पचनीयमिति विशेषणात् पचनीयं तम एवात्र एधस्यानःशब्देन गृहीतम्। तथा च विश्वेत्तेतिमन्त्रे उक्ताः 'शतं महिषाः क्षीरपाकमोदनं वराहमिन्द्र एमुष'मित्येवंरूपास्त्रयोऽत्र विपरीतक्रमेणोच्यन्ते। तदत्रादित्यः सूनापदबोध्यः प्रथमस्ततो नवचरुबोध्योषास्तत आचितमेधस्यमनः इति पूर्वविपरीतक्रमेणोच्यन्ते त्रयः पदार्थाः। एवञ्चैतेषामर्थानामत्र ग्रहणं क्रमश्च तद्वशतो विश्वेत्तेतिमन्त्र इमे एवार्था एतद्विपरीतत्वेन गृह्यन्ते। तत्रेवात्रापि विपरीतक्रमेणेम एवार्था गृह्यन्त इति परस्परमन्त्रार्थप्रतिपादने परस्परमन्त्रार्थस्य साहाय्यकत्वमिति।

अत्र मन्त्रे पूर्वार्धे "अयमिन्द्र वृषाकपिः परस्वन्तं हतं विददि"त्यत्र हत-शब्देन न हिंसितत्वं गृह्यते किन्तु अशोभनत्वं तच्च परस्वत्वात्। अर्थाद्विदूर-देशवर्तितयाऽशोभनं तच्च परार्धोक्तमस्यादिकं विददित्येवार्थो न तु मृगादिरनुप-स्थानात्। सन्निहितस्यान्वययोग्यस्य सत्त्वे तत्परित्यागेनानुपस्थितेन सम्बन्धस्या-

योगात्। किञ्च विददित्यस्य स्वातन्त्र्येण हतमित्यस्य मृगपरस्य कर्मतया सम्बन्धित्वे परार्धोक्तानामसँल्लग्नकतापत्तिरिति तत्परत्वे व्याख्यानमयुक्तम्।

यत्तु तस्मिन् सूक्ते मन्त्रः—

"उक्ष्णो हि मे पञ्चदश साकं पञ्चन्ति विंशतिम्।
उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः॥"

इति मन्त्रे संख्येयरहितसंख्यामात्रनिर्देशेन तस्य पञ्चन्तिशब्दसान्निध्यादुक्ष्णो विशेषणत्वेन तावत्संख्याकान् वृषभान् मदर्थं पचन्ति ऋत्विजः। तानहं भक्षयित्वा पीवएव स्यां मम कुक्षिद्वयं पूरितं स्यादित्यर्थकरणं, तदाकस्मिकं, कुत एतावतो वृषभान् ऋत्विजः पचन्ति, कुत्र चैतद्भक्षणमिन्द्रस्य, अकस्मात् कथमिदमुच्यते मन्त्रे, उताहमद्मि पीव इदित्यस्योक्तभक्षणेन पीवो भविष्यामीत्यस्य करणं तत्तु उतशब्दग्रहणस्य स्वारस्यविरुद्धम्। उतशब्दस्त्वत्राप्यर्थः। अहं पीवोऽपि सन्नद्मीति प्रतीतेः। 'उभा कुक्षी पृणन्ति' इत्यत्र कर्तृत्वं कुक्ष्योर्न भवितुमर्हति पृणन्तीति बहुवचननिर्देशात्। तदर्थं पूर्वार्धोक्तस्य कर्तुरनुषङ्गे ऋत्विजां सम्बन्धो भवेत्, नहि ते कुक्ष्यो पूरकाः। अथ यदि उक्ष्णां सम्बन्धः कर्तृत्वेन तर्हि पूर्वस्मिन् वाक्ये कर्मत्वेन द्वितीयान्तस्योक्ष्णःपदस्याननुषङ्गो विभक्तिविपरिणामश्च कर्तव्य इत्यनेकाः कल्पनाः कर्तव्या भवेयुः। तावताऽऽकस्मिकत्वं तु दुर्वारमेव। यत्तु उक्ष्णां पाकः सर्वसाधारण इति न स्थानविशेषापेक्षा। अत एव मन्त्रान्तरे उच्यते—"उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन्"। इति मन्त्रवशात उक्षपाकः पूर्वमासीदिति साधनं, तेषां पूर्वस्मिन् काले धर्मत्वमासीत् न तु तन्मन्त्रकाले इति, तदपि न साम्प्रदायिकमर्थकरणमिति पश्चात् प्रतिपादयिष्यते।

एतावता उक्ष्णो हि मे इति मन्त्रस्य वेदकालतः प्रवर्तमानमतेनानुक्रमणिकाकारोल्लिखितेन विरुद्धं, तेन वेदे सूर्यस्यैवैकस्य स्तव इति प्रतिपाद्यते। यद्यपि इन्द्रादिपरत्ववर्णनया नैतेन तन्मतविरोध इत्यपि सम्भवेद्वचस्तथापि सूर्येण तदभिन्नेनेन्द्रेण वस्तुत ऋषभानां भक्षणस्यासम्भवेनैतद्वर्णनस्य न वाचनिकार्थपरत्वं किन्तु भिन्नतात्पर्येण तादृशं वचनं तर्हि तस्याप्रदर्शनेन न्यूनता। यत्तु तादृशं वचनं मृगशिरसि सम्पातनक्षत्रत्वसूचनायेति तावतापि उक्तसङ्ख्याकानामुक्ष्णां पाको भक्षणमित्यादेरतत्परत्वेनायुक्तत्वम्। वस्तुतस्तदपि न, नक्षत्रियप्रजापत्यादिबोधकवाक्यविरोधात्। तस्मादस्य मन्त्रस्य न स्पष्टार्थत्वं संगतार्थत्वं चेति।

तदर्थमस्यार्थ उच्यते। अत्रादित्यरूपेणेन्द्रेणोच्यते, उक्ष्णो वर्षकस्यार्था-

त्तेजसः। तेजसोऽप्त्वेन वेदे वचनमिति पूर्वं प्रतिपादितम्। तस्मात्तेजोरूपाणामपां वर्षकस्य तेजसः प्रदातुः सर्वप्रकाशकस्येति यावत्। तादृशस्य मे मम पञ्चदशकलात्मका भागा इत्यर्थः। आदित्यस्योदयाद्यवसरे एकेन प्रक्रमेण तावतीनां कलानां सन्दर्शनमिति पूर्वं प्रतिपादितं, ते पञ्चदशकलात्मका भागा एव, ते साकं सहैव युगपदेव विंशति पचन्ति। पाकोऽत्र तेजःसंपर्कः, पचन्ति युगपत्-प्रकाशितां कुर्वन्ति। 'विंशतिम्' विंशतिशब्देनात्र केवला संख्या निर्दिष्टा न तु संख्येयं, तथापि अत्र पुरुषसूक्ताद्यनुसारेणोषोभागरूपं संख्येयं गृह्यते। तत्र पुरुषसूक्ते उच्यते—"तस्माद्विराळजायत विराजो अधि पुरुषः"। अत्र तस्मात्पुरुषात् विराट् अजायत। विराडुत्पन्ना। विराट् विशेषेण राजमाना उषा इत्यर्थः। तस्या विराट्त्वं विभ्राजनात्। एवं विराट्छन्दःसाम्याद्दशाक्षरयुक्तत्वम्। अक्षरशब्दस्यांशरूपदेशमानबोधकत्वं पूर्वमुक्तं, ततो दशानामंशानां योगेनैषा विराट्छन्दःसदृशी विराट्शब्दबोध्या। तस्याः पुरुषसकाशात उत्पत्तिवचनेन पुरुषसविधवर्तित्वं तस्याः प्रतीयते। पुर्नविराजो अधिपुरुष इति वचनेन विराजो अधि उपरिष्टात् पुरुषस्योत्पत्तिः। एवञ्च पुरुषस्योभयतः पार्श्वयोः प्रत्येकं दशांशपर्य्यन्ता तत्सत्ता विज्ञायते। एवञ्च उभयतः पार्श्वयोर्दशांशपर्यन्तं विराट्-सत्त्वबोधनेन साकल्येन विंशत्यंशसम्बन्धिता प्रतीयते, सा च मध्यवर्तिना आदित्येन। विराजो विराट्त्वमादित्यतेजोवशात इति तेषां विंशति-संख्याकानामुषोभागानां तेजःसम्पर्कात् पाकः स च युगपदेव। आदित्यस्य सर्वासु दिक्षु तेजसः प्रसरादुभयोः पार्श्वयोरपि तेजसः प्रसरः स च युगपत्। आदित्यश्चैकेन प्रक्रमेण परिक्रमेण पञ्चदशकलात्मक एव दृश्यते इति तेन तेजस्विनो मम पञ्चदशैव कलाः युगपत् पार्श्वद्वयवर्तिनामुषसः सम्बन्धिनां विंशतिसंख्याकानामंशाना पाचिकाः। अर्थादादित्येन स्वस्थितिदेशतः पार्श्वभागे दश दश सख्याकांशपरिमिते युगपत् प्रकाशनं क्रियते, तद् गृहीत्वोच्यतेऽत्र मन्त्रे—'उक्षणः' उक्तरीत्या प्रकाशकस्य 'मे' मम। उक्षण इत्येतन्मे इत्यस्य विशेषणम्। न तु पञ्चन्तीत्यस्य कर्म। पञ्चदश कलात्मका भागाः प्रतिपरिक्रमं प्रकाशकाः पञ्चन्तीत्यस्य कर्तृपदं। नत्वत्र ऋत्विजां कर्तृत्वेन कल्पनम्। ते भागाः साकं सहैव युगपदेव न तु क्रमेण। विंशतिं प्रतिपार्श्वमवस्थितान् दश दश भागानंशान् मिलित्वा विंशति-सङ्ख्याकान् अंशान् येषु उषःसत्त्वेन प्रतीतिः। तान्। नात्र उक्षण इति विशेष्य-पदम्। पञ्चन्ति युगपत् पाकं कुर्वन्ति। तेषु युगपत् तेज आदधति तान् युगपत् प्रकाशयन्तीत्यर्थः। एवञ्च पाकोऽत्र प्रकाशनमेव न विक्लित्तिः। तेन मे उभा उभौ कुक्षी पार्श्वभागौ पूरितौ भवतः। एवञ्च पृणन्तीत्यत्रापि पूर्वोक्तविंशतेः

प्रकाशकानां पञ्चदशानामेव कर्तृत्वम्। न तु ऋत्विजां नापि उक्ष्णाम्। तदिदं विंशत्यंशपर्यन्तभागस्यादनं प्रकाशेनात्मसात्करणम्। तावद्भागोपाधिकाना-मुषसामादित्ये विलयादादित्येनेन्द्राभिन्नेन तददनमित्यर्थः। इदित्यनेनादित्यस-विधवर्तिपूर्वरूपोभयकुक्षिपूरणम्। स्वयं पूरितोऽहं तदद्धि। पीव इत्यनेन पूर्णता बोध्यते न तु उषःप्रकाशविलयेन पूर्णता। अत्र विंशतेरदनवचनेन तावतोभयकुक्षि-पूरणवचनात् पीव इत्यनेन स्वयं पूरणवचनाच्चादित्यप्रकाश उदयास्तादिस्थले तावदंशपर्यन्तमेव प्रसरति, तावत्पर्यन्तं स उदितो दृश्यत इत्यर्थः। एवं सति नात्र मन्त्रे ऋषभपाकः। विंशतिश्च पञ्चदश च न पाच्यर्षभसंङ्ख्येत्यादिकं सिध्यतीति पूर्वोक्तार्थकरणमसङ्गतमेव।

यत्तु उक्षाणं पृश्निमिति वचनेन ऋषभपाको वस्तुसन् प्राचीन आसीन्मन्त्रकाले। स प्राचीन इति "तानि धर्माणि प्रथमान्यासन्" इति वर्णनम्। तदपि न स्वारस्यपरम्। तस्य भिन्नार्थत्वान्नोक्तसाधकत्वमिति परस्तात्प्रतिपाद-यिष्यते। यत्तु अत्र प्रयुज्यमानसङ्ख्याद्वय पञ्चदशरूपं तथा विंशतिरूपं द्वयं संकल-नेनैकीकृत्य सम्पन्नाया. सङ्ख्यायाः पञ्चत्रिंशद्रूपाया ग्रहनक्षत्रसङ्ख्यापरत्वेन व्याख्यानाशंका। सा त्वतिस्थवीयसी। ग्रहनक्षत्राणामत्रानुपस्थानात् सङ्ख्या-नुपपत्तेः। तत्कल्पनं तु वक्तुमशक्यं, प्रकारान्तरेण तदुपपादनात्। किञ्च तथात्वे तदीयसङ्ख्यारूपावयवद्वारेणैव ग्रहनक्षत्रसङ्ख्या प्रदर्शिता अभविष्यत्। पञ्च-त्रिंशत्सङ्ख्याया अनेकावयवकत्वे न ग्रहनक्षत्रापेक्ष्यवयवद्वारेणाष्टाविंशतिर्नक्षत्राणां सङ्ख्या ग्रहाणां सप्तेत्येवं २८—७ रूपावयवकथनद्वारेणैव तत्प्रदर्शनं कृतम-भविष्यत् न तु पञ्चदश-विंशतिरूपावयवप्रदर्शनेन तत् प्रदर्शनं युक्तं स्यात्। तस्मान्न तादृशार्थकरणमुचितमिति दिक्।

द्वितीयो भागः

यथा मन्त्रभागेष्वेतावत्पर्यन्तमर्थस्य स्पष्टत्वायादित्यपरत्वमाश्रित्य प्रयत्नः प्रदर्शित एवं ब्राह्मणभागेऽपि आदित्यपरत्वं विना न सामञ्जस्यम्। टीकाकाराणां व्याख्या अपि यथाकथञ्चन प्रवर्तमाना न मनसस्तोषावहा इति कानिचन स्थलानि गृहीत्वा प्रदर्श्यन्ते।

यद्यपि मीमांसकैर्ब्राह्मणभागस्यार्थविषये बहुलं प्रयतितम्। तैर्वेदीय-ब्राह्मणभागस्य भागद्वयं प्रकल्प्य अपूर्वार्थबोधको भागो विधिभागस्तदितरोऽर्थवाद-भाग इति विभागं कृत्वा विधिभागस्य विधेयार्थप्रकाशनेनार्थवत्त्वमुक्त्वा तत्सविधे उच्यमानस्य भागस्य प्रकारान्तरेण सार्थक्याभावेन वैयर्थ्ये प्राप्ते लक्षणावृत्त्या विधेयार्थप्रशंसाद्वारेण विध्येकवाक्यतया सार्थक्यं प्रदर्शितम्। तावतापि तत्र तेषां प्रयत्नः पुनर्न्यून एव भवति। यतोऽर्थवादभागस्य लक्षणावृत्त्या विध्येकवाक्यतया सार्थक्यसम्पादनेऽपि विधिनाऽपेक्षितविधेयार्थप्रशंसाया लाभार्थं कुत एतादृशो वाग्विन्यासो लक्षणावृत्त्या प्रशंसार्थमपेक्षितः। तादृशं वर्णनं कृत्वान्यथानुपपत्त्या लक्षणया विधेयप्राशस्त्यार्थो वर्णनीयो नहि साक्षाद्वाच्यवृत्त्यैव विधेयार्थप्रशंसको ब्राह्मणभागो ब्राह्मणेन कुतो नोक्तः। लक्षणया प्रशंसाबोधनार्थमेतादृशभागस्य वचनेन 'भवति किञ्चित्प्रयोजनम्' इति न्यायेन तस्य कश्चन उपयोगो वक्तव्यः, किमित्येतादृशं शास्त्रलोकविरुद्धवर्णनं कृतमित्यस्य तैर्न सम्यक् समाधानं कृतम्।

यद्यपि शबरेण भाष्यकृता तादृशस्थले वाच्यस्यार्थस्य नित्यं कञ्चन वायु-माकाशं सूर्यं वा अर्थं गृहीत्वा वर्णनं कर्तव्यमित्युक्तं परन्तु तस्य विस्तरार्थं न प्रयतितं तावता तदीयः प्रयत्नस्तदंशे न्यून एव। यद्यपि कुमारिलभट्टाचार्यैरुक्तो-दाहरणत्वेन सुब्रह्मण्याख्यनिगदीयमेकं वाक्यं गृहीत्वा नित्यार्थपरतया व्याख्यानं प्रदर्शितम्। यथा—निगद वाक्यं "अहल्यायै जार" इति। तस्य अहनि लीयत इत्यहल्या रात्रिस्तस्या जारो जरयिताऽऽदित्य इति व्याख्यानं प्रदर्शितम्। तावता स प्रयत्नो न्यून एव। तदर्थं कतिपयार्थवादादिभागविषये प्रयत्यते।

तत्रानुक्रमणिकाकारोपदर्शितप्राचीनमतान्तरानुसारेण सर्वस्य ब्राह्मण-भागस्यार्थाद्विधिरूपस्यार्थवादरूपस्यापि आदित्यपरता अपेक्षणीया यतस्तेन पूर्वा-चार्यमतमेवं प्रकाशितम् "एकैव वा देवता वेदे स्तूयते स महानात्मा स सूर्य इत्या-चक्षत" इति। तत्र वेदे इति वचनाद् ब्राह्मणभागस्यापि वेदभागत्वेन अर्थाद्विदत्वेन तत्र सूर्यस्यैवैकस्य वर्णना। एवं चार्थवादभाग इव विधिभागेऽपि सूर्यस्यैव वर्णना

कर्तव्या। वर्णना स्तुतिरूपा गुणक्रियाप्रदर्शनद्वारेणेति विधिभागे विधीयमानक्रियादीनामप्यादित्यपरत्वं यथा स्यात्तथा व्याख्यानप्रदर्शनमपेक्ष्यते। अर्थवादभागेऽपि आदित्यपरत्वेनैव सामञ्जस्यं प्रदर्शनीयम्। तत्र मीमांसकैर्विधिभागे विधेयार्थमात्रप्रदर्शननादित्यपरतायास्तत्रापेक्षणीयाया अप्रदर्शनान्न्यूनतैव व्याख्यानस्य। अर्थवादभागेऽपि लाक्षणिकार्थस्य विध्येकवाक्यतया सार्थक्यप्रदर्शनेऽपि वाच्यार्थस्योपादानं तस्यादित्यपरतादिकस्याप्रदर्शनान्न्यूनतैव प्रयत्नस्य। तदर्थमर्थवादभागे आदित्यपरत्वेन व्याख्यानार्थं प्रथमं प्रयासः।

तत्र सोमयागे यजमानेन प्रथमतो दीक्षाग्रहणं कर्तव्यं तेन तस्य पुनर्जन्मसंपादनमिति ब्राह्मणे उच्यते "पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्ती"तिवचनेन दीक्षया यजमानस्य पुनर्जन्मसंपादनमिति प्रतिपादितम्। जन्मग्रहणे प्रथमत आरभ्य क्रियाः अत्रापि साजात्येन वर्णनीया इति तदर्थं ब्राह्मणे प्रतिविधेयं गर्भसाजात्यं प्रदर्श्यते। तत्र प्रथमतो यजमानस्याद्भिरभिषेकः कर्तव्य इत्युच्यते "अद्भिरभिषिञ्चन्ती"ति। तस्य गर्भसारूप्याय तत्रोच्यते "रेतो वा आपस्सरेतसमेवैनं तत्कृत्वा दीक्षयन्ति" इति। यथा गर्भस्थाने प्रथमा अवस्था रेतोभावापत्तिः सा अत्र यजमानस्याभिषेकेण संपादयन्ति ऋत्विजः। रेतो जलरूपं। या आपस्ता रेतोरूपिण्यः। एवं सति यजमानस्याद्भिरभिषेकस्तस्य रेतोभावापत्तिरूपा गर्भस्य या प्रथमावस्था तत्संपादक इत्यर्थः। तत ऊर्ध्वं द्वितीयो यजमानस्य संस्कार उक्तस्तत्र "नवनीतेनाभ्यञ्जन्ती"ति। नवनीतेन यजमानगात्रे अभ्यञ्जनं कुर्वन्ति ऋत्विजः। तत्र गर्भयोग्यं नवनीतमिति तेन गर्भभावापन्नस्य यजमानस्याभ्यञ्जनं कर्तव्यमित्युक्तम्। नवनीतस्य गर्भयोग्यताख्यापनार्थं ब्राह्मणे अर्थवादः। यथा—"आज्यं वै देवानां सुरभि घृतं मनुष्याणामायुतं पितृणां नवनीतं गर्भाणामि"ति। तत्र मुख्यं विवक्षितं 'नवनीतं गर्भाणां योग्यं' परन्तु प्रसङ्गान्नवनीतस्यावस्थान्तराणि विभिन्नानां योग्यानि प्रियाणि प्रतिपादितानि। तत्र नवनीतावस्थैव गर्भस्य योग्या। नवनीतस्य गर्भपोषकत्वाद्योग्यत्वम्। तत्राज्यावस्था देवानां प्रिया तत्र प्रसिद्धिर्वैशब्देन द्योत्यते। तदुक्तम् "आज्यं वै देवानाम्" इति। अत्र योग्यं प्रियमित्याध्याहारः। आज्यस्यावस्थारूपत्वमुच्यते सांप्रदायिकैः 'ईषद्विलीनमाज्यं स्यादि'ति। नवनीतस्य पाकेन संपाद्यमाना ईषद्विलीनघृतावस्था सा आज्यशब्देनोच्यतइति तदर्थः। अपरावस्था घनीभूतता सा मनुष्याणां प्रियेत्युच्यते ब्राह्मणे 'सुरभि घृतं मनुष्याणा'मिति। अत्रापि योग्यं प्रियं चेत्यध्याहारः। घृतावस्थावर्णनं सांप्रदायिकैः "घनीभूतं घृतं विदुः" इत्युच्यते। अर्थात् नवनीतपाकोत्तरं घृतभावापत्तौ या पूर्वा ईषद्विलीनभावावस्था सा देवानां, योत्तरा घनीभावावस्था सा मनुष्याणां

योग्या प्रिया चेति। या च मध्यवर्तिनी अवस्था ईषन्मिश्ररूपा। घनीभावप्रारंभे देव प्रियत्वं, स्वल्पे घनीभावे स्वल्पे विलीनभावे पितृणां प्रिया सावस्था, या च परवर्तिनी घनीभावावस्था सा मनुष्याणां योग्या प्रिया च। या च मूलभूता नवनीतावस्था सा च गर्भाणां योग्या। अतिमृदुलत्वाद्गर्भाणामतिमृदुलचिक्कण-भावापन्नं नवनीतं गर्भप्रियं गर्भयोग्यम्। तत्पोषकत्वादित्युक्तमेव।

तत्र भाष्यकारेणास्यार्थवादस्य व्याख्यानं कृत्वोक्तम्-यद्यपि तैत्तिरीयैः "घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां नवनीतं गर्भाणामिति वर्ण्यते" इति वर्णनाया विभिन्नरूपत्वेन विरोधं प्रदर्श्य समाधानमेवं कृतम्। उभयत्र ऐतरेये तैत्तिरीये च नवनीतार्थवादत्वेन प्रशंसितो विरोधोऽकिञ्चित्कर इति।

तत्रोच्यते—भवतूभयत्र नवनीतार्थवादता तावता वर्णने भेदः किन्निबन्धन इति शङ्काया असमाधानमेव। तत्रापि पुनरेवं भवति नवनीतं विधेयम्। तस्यैव केवलं प्रशंसा कर्तव्या नवनीतं गर्भाणां योग्यमिति तावतैवात्र सार्थवादसंपत्त्या किमिति प्रकृतेऽनुपयुक्तम् "आज्यं वा" इत्यादिकं वर्ण्यते। तदनपेक्षणादन-पेक्षिते पुनर्भेदः किमित्याश्रीयते। अथ प्रसङ्गान्नवनीतावस्था वर्ण्यन्ते तासां तत्तत्प्रियत्वमिति। तत्रापि केवलं नवनीतावस्थावर्णनं भवतु तासां पुनःप्रशंसा "आज्य वा" इत्यनेन किमित्युच्यते। विधेयार्थस्य प्रशंसाऽनुष्ठानायापेक्ष्यते। अविधेयार्थस्य प्रशंसा सर्वात्मनानुपयुक्तैव। नहि अत्र आज्यादीनि विधीयन्ते। अथ नवनीतसम्बद्धत्वात्तेषामपि वर्णनं विधेयनवनीतप्रशंसैवेति। तदपि न युक्तम्। विधेयनवनीतसम्बद्धानामपरेषामप्यर्थानां सत्त्वाद्विनिगमनाभावात्तेषामवर्णनेन न्यूनतापात इति। तस्मादादित्यपरत्वं वर्णनस्येति द्योतयितुमेव तदुपादानम्। तथाहि अत्रादित्यक्रियासारूप्येणैवेमे दीक्षितसंस्कारा विधीयन्ते। अतएव तेषां गर्भरूपसम्पादनार्थतोच्यते "पुनर्वा एतमृत्विजो गर्भं कुर्वन्ती"ति। अन्यथा कर्म कर्तव्यं संशोधनार्थो दीक्षासंस्कारो वक्तव्यः, तदङ्गतया स्नपनादिकं विधेयमित्ये-तावतैवोपपत्तौ तत्र गर्भसम्पादकत्ववर्णनस्य सर्वात्मनाऽनुपयुक्तत्वम्। आदित्य-क्रियासारूप्यायैव गर्भरूपत्ववर्णनम्।

तथाहि आदित्यस्य वस्तुत एकस्यापि सत उपाधिवशतो भेदं प्रकल्प्य यज्ञयजमानरूपकल्पना। अत एव "यज्ञेन यज्ञमयजन्ते"ति पुरुषसूक्ते उच्यते। यज्ञो विष्णुरादित्य इति तस्यैव यजमानत्वं साधनद्रव्यरूपत्वं यागे इज्यमान-देवतारूपत्वमिति। एवञ्चादित्य एव यजमानस्तस्य तदा तदा तत्तत्कार्यकर्तृत्वेन तदा तदोपस्थिता रश्मय एव ऋत्विजस्ते तमादित्यं पुनर्गर्भं कुर्वन्ति। आदित्यो यत्र प्रकाशनार्थं प्रवर्तते तस्मिन् लोके सोऽन्तः प्रविष्ट इत्युच्यते, गर्भोऽपि यथा

मातुरुदरे प्रविष्टो भवति। यदा चास्तमेति तत्तस्य जन्मेति वर्णना। अत एव वेदे कूटप्रश्नत्वेन वर्णना 'को वै तद्विजानाति यद् गर्भस्य सतः सर्वैर्विज्ञानं प्रसूतमुत्पन्नं न कोऽपि जानाती'ति। 'दशेमं त्वष्टुर्जनयन्त गर्भमि'त्यादिना तस्य गर्भभावो वर्ण्यते। यदोदेतुं प्रवर्तते स तत्र गर्भरूपः, तस्य गर्भरूपतापादनार्थं पूर्वं रेतोरूपप्राप्त्यादिकास्तस्य वर्णनीया भवन्ति। वेदे साजात्येन वर्णनदर्शनादत्राप्यादित्यस्य गर्भसाजात्याद् गर्भत्वं तस्य रेतोभावादिर्वक्तव्यो गर्भधर्मः। तत्र तस्य गर्भरूपतापादनाय स यत्रासावुदेष्यति तत्रत्यपूर्ववर्तिरात्र्या उत्तरेऽर्धेऽद्भिरप्रूपैरव्यक्ततेजोभि. स संपृक्तो भवतीति कल्पना। अत एव तत्रादित्ये पादरूपकल्पनया दिवा भागे तेजोयुतत्वेन स्वच्छत्वं रात्रौ तेजसा विहीनत्वेन मलिनत्वमिति गृहीत्वा पादावनेजनकल्पना ऐतरेयब्राह्मण उच्यते "दक्षिणं पादमवनेनिजे" इत्यादिना।

एतावता रात्रौ तस्याव्यक्ताभिस्तेजोरूपाभिरद्भिर्योगो देवकृतस्तदभिषेकरूपो भवति। तत्साजात्यान्मानुषकोऽपि यजमानः यजमानत्वरूपगर्भत्वसम्पत्त्यर्थं प्रथमत ऋत्विग्भिरभिषेच्यते। तस्मिन्नव्यक्ततेजोरूपाभिरद्भिः सम्पर्कमात्रेण विशेषोऽभिप्रेतो न सिध्यति। तत्सिद्धयर्थं द्वितीयो व्यापारो नवनीतेनाभ्यञ्जनं नामोच्यते। अत्रैवं विशेषो यदसावादित्यो याभिरद्भिर्गर्भभावार्थं संपृक्तो भवति। तासां विशेषो भवति। तत्रापो वा तेजांसि वा द्विरूपाणि पूर्वाहःसम्पादकान्येकविधानि, द्वितीयाहः संपादकानि तु पूर्वेभ्यो भिन्नानि। तेषां मध्ये पूर्वाणि पूर्वाहःसमाप्तिपर्यन्तं व्याप्रियमाणानि भवन्ति। पूर्वाहःसमाप्तौ तेषां व्यापाराभावः, पूर्वाहःसमाप्तिस्तु रात्र्या मध्ये। अत एव देवयानप्रदर्शनावसरे तच्चातुर्विध्यं प्रदर्शितं, तत्र प्रथम देवयान पितृयाणावसाने देवयानप्रवृत्तितः प्रवर्तते, तच्च मकरसंक्रान्ति प्रारम्भे। तत्प्रारम्भश्च सुमेरौ रात्र्यवसरे कुमेरु प्रति प्राप्तस्यादित्यस्य तत्रत्यदिनमध्यसमारोहे। सुमेरौ रात्रिः कुमेरौ दिनमित्युक्तम्। एवं च सुमेरौ रात्रेर्मध्यः कुमेरौ दिनमध्यस्ततोऽसावादित्यो दक्षिणायनं परित्यज्योत्तरां गन्तुं प्रवर्तत इति तत्प्रथम देवयानं तत एव मकरसंक्रान्तिः प्रवर्तते इति देवयानचातुर्विध्यप्रदर्शनावसरे पूर्वमुक्तमेव। या रीतिः सुमेरुकुमेर्वोरहर्विषये सैव षष्टिदण्डैर्यत्र दिनरात्रिभाव. पूर्यते तत्रापि। एवं सति पूर्व दिनं रात्रिमध्येऽवसितं द्वितीयं च दिन ततः प्रवर्तत इति पूर्वदिनसम्बन्धिनां व्यापाराभावो द्वितीयदिनसम्बन्धिनां तेजसां प्रवृत्तिर्भवति। तानि यानीमानि द्वितीयदिनसम्बन्धीनि तेजांसि पूर्वापेक्षया नवान्यानीतानि देवैः किरणैरिति कल्पना। तैर्नवनीतैस्तेजोभिरस्यादित्यरूपस्य यजमानस्य सम्बन्धस्तद्रूपविशेषबोधनार्थं तेजसां नवनीतशब्देन व्यवहारः। तत्र नवनीततेजोभिरस्य आदित्यरूपस्य यजमानस्य सम्बन्धोऽभिषेक इवाद्भिः

सर्वाङ्गीणः। तत्साजात्याय लोकेऽपि मानुषयजमानस्याभिषेकोत्तरं नवनीतसम्बन्धः। आदित्याभिप्रायकनवनीतशब्दे श्लेषेण पयसो दध्यातञ्चनपूर्व मन्थनेन निष्पादितस्सारःरूपःपदार्थो लोके नवनीतशब्देनोच्यते तस्य च ग्रहणम्। स च मसृणोऽद्रव इति तेन स्नपनस्य लोकोऽप्रसिद्धेस्तत्सम्बन्धः सर्वाङ्गीणोऽभ्यञ्जशब्देनोच्यते इति दीक्षितकृते द्वितीयः संस्कारो नवनीतेनाभ्यञ्जनरूपो ब्राह्मण उक्तो "नवनीतेनाभ्यञ्जन्ती"ति। तदयं तेजोगतो विशेषो मन्त्रान्तरे उच्यते—

"समानमेतदुदकमुच्चैत्यवचाहभिः।
भूमि पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः"।। इति।

तेजसोऽब्रूपत्वमित्युक्तं, तस्य समानस्य सत ऊर्ध्वगमनमधोगमनमनेकैरहोभिः सुमेरुकुमेर्वोरभिप्रायेण। उदकस्यावागमेन वृष्टिव्यवहार ऊर्ध्वगमने वाष्पशब्देन व्यवहारः। अत्र तादृशो विशेषो नोक्तः। वृष्टिकरणं पर्जन्यस्येत्युक्तं 'भूमि पर्जन्या जिन्वन्ती'ति। वाष्परूपतासंपादकत्वं वह्नेरित्युक्तं मन्त्रे "दिवं जिन्वन्त्यग्नय" इति। आदित्यकिरणानां गतिप्रतिबन्धेऽग्निरूपत्वमितिपूर्व प्रतिपादितम्—"अग्ने यं यज्ञम्"इति मन्त्रव्याख्यावसरे।

एवं च दीक्षितस्य नवनीतेनाभ्यञ्जनरूपः संस्कार आदित्यव्यवहारानुकारायैव। अदृष्टार्थ इति वर्णनमनुष्ठाने शैथिल्याभावाय। तस्य तेजस आदित्यपक्षे देशभेदेन विभिन्नैः सम्बन्धृभिः सम्बन्धो विभिन्ननामभिरुच्यते। तस्य वचनाभिप्रायेण नवनीतावस्थाप्रतिपादनव्याजेन नवनीतस्योक्तरीत्या दिनान्तरं गर्भरूपतामापत्स्यतो योग्यत्वमिति नवनीतप्रशंसारूपोऽर्थवादोऽत्रोच्यते "आज्यं वै देवानां सुरभि घृत मनुष्याणामायुतं पितृणा नवनीतं गर्भाणां तद्यन्नवतीतेनाभ्यञ्जन्ति स्वेनैवैनं तद्भागधेयेन समर्धयन्ती"ति। तत्राज्यं देवानामित्यनेन देवानां देवनानां प्रकाशकानां रश्मीनामादित्यसम्बन्धार्थं गमनावसरे आज्यशब्देन व्यवह्रियते तत्सम्बद्धं तेज.। तस्याज्यशब्देन व्यवहारे निमित्तं वेदे प्रतिपादितम्। स्तोत्रशस्त्रादावपि आज्यशब्देन व्यवहार उक्तनिबन्धन एवेति तत्परस्तात्प्रतिपादयिष्यते। आज्यशब्दस्य व्युत्पत्तिस्तत्रैवं प्रतिपाद्यते "यदाजिमीयुस्तदाज्यानामाज्यत्व"मिति। स्तोत्रशस्त्रस्थले आज्यशब्देन व्यवहार आजिधावननिबन्धनः। स्तोत्राणां शस्त्राणां चामूर्तानामाजिधावनासम्भव इति व्युत्पत्तौ 'आजिमीयुः' इत्याजिधावनं रश्म्यभिप्रायं वक्तव्यम्। रश्मीनामाजिधावनं वेदे वर्ण्यते, यथा मन्त्रे— "ईर्मान्तासः शिलिकमध्यमास" इत्यत्र। तत्तन्मन्त्रव्याख्यानावसरे पूर्वमुक्तम्। एवं चाजिधावनस्थले रश्मिसम्बद्धं तेज आज्यशब्देनोच्यते। नवनीतस्यापि

पाकेन संपाद्यमाना विशिष्टावस्था सा आज्यशब्देनोच्यते, दैवकर्मसु तदवस्थस्य तस्योपयोग इति सा अवस्था आज्यरूपिणी देवानां प्रिया देवानां योग्या चेति। तदर्थविवरणे सांप्रदायिकैरुच्यते "ईषद्विलीनमाज्यं स्यादि"ति। अतएवोच्यते "आज्यं सुराणामाहार आज्यं यज्ञे प्रतिष्ठितमि"ति। आजिधावनं च विशिष्टस्थानतो विशिष्टदेशपर्यन्तं धावनमाजिधावनशब्देनोच्यते। ते च रश्मय आजिं धावन्त आदित्यपर्यन्तं धावन्तीति वेदे प्रतिपादनं "तेऽग्नेर्गृहपतेरादित्यं काष्ठामकुर्वत" इत्यनेन।

एवं सत्युदीयमानादित्यावसरे तत्प्राप्त्यर्थ रश्मीनां धावने यन्नवनीतं तेजस्तद्देवानां भवति न तु गर्भरूपतामापन्नस्येति विशेषः क्रोड़ीकृत 'आज्यं वै देवानामि'त्यनेन। नवनीतं तेजो गर्भार्थं, गर्भभावश्च आदित्यस्य सुमेरुकुमेर्वोरपि। तत्र कुमेरौ गर्भभावापत्तिर्न प्रकृते वर्ण्यते किन्तु सुमेरुगता। तत्र आदित्योदयपर्यन्तं देवानां धावनमाजिरूपं तस्य समाप्तिरादित्यस्योदये। तस्यामवस्थायां कुमेरावादित्यबिम्बस्य उदितस्य तस्य घनीभूताज्यसदृक्षता। कुमेरौ च मनुष्यनिवास इति तद्घनीभूतघृतसदृशमादित्यमण्डलं मनुष्याणामित्युक्तं, तच्चादित्यमण्डलं तत्र सुरभि शोभनारम्भयुतम्। आदित्यस्य शोभन आरम्भो दिनकरत्वेन। तद्बोधयितु तत्र सुरभिपदं घृतविशेषणम्। लोके सुरभिपदेन श्लिष्टेन सुगन्धयुतत्वं बोध्यते तच्च मनुष्यप्रियमिति नवनीतस्यापरावस्था बोधिता। सुमेरावुदयात्प्राक् तत्सविधवेलाया कुमेरावादित्यस्यास्तसविधदेशप्राप्त्या तस्य मध्यमदेशसम्बन्धिता, मध्यमो देशश्च दक्षिणस्यां पितृसम्बन्धी, तदानीं मध्यमदेशे आयुरूपेण प्रवृत्तमादित्यबिम्ब स्वल्पकालेनोदयदस्तमयच्चेति तस्य तेजस आयुतशब्देन व्यवहारः। तदायुतं तेजः पितृणामित्युक्त लोके नवनीतस्यावस्थान्तरे आयुतभाव ईषद्विमिश्रभावापन्नं घृतं पितृणां योग्यं प्रियमित्यभिप्रायेण अर्थवादे आयुतं पितृणामित्युक्तिः। एवं चैकस्यैव तेजसो घृतशब्देन व्यवहारो मनुष्यलोकाभिप्रायः मनुष्यलोकशब्देन कुमेरुर्गृह्यत इत्युक्तम्। उदय सविधप्राप्त्या आज्यशब्देन देवाभिप्रायो व्यवहार, एवमन्तरिक्षलोकवासिपित्रभिप्रायेणायुतशब्देन व्यवहारः। तच्च नवनीतं तेजो गर्भभावापत्ता उपयुक्तमिति नवनीतं गर्भाणां योग्यमिति प्रतिपादितम्। प्रकृते केवलं नवनीतस्यैव सम्बन्धो यज्ञे आदित्यव्यवहारानुकारे मानुषके यजमाने इति सर्वमिदं वचनं नवनीतार्थवाद। एवंरूपो नवनीतार्थवाद ऐतरेये उच्यते। तैत्तिरीये तु "घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणा"मिति विभिन्नरूपतार्थवादे। तत्र भाष्यकृतोच्यते— "अत्रोभयत्र नवनीतार्थवादत्वेन उक्तो' र्थवादगतविरोधोऽकिञ्चित्कर" इति।

भवतु तत्रोभयत्र नवनीतार्थवादता। तावता वर्णने भेदः किं निबन्धन इत्यस्यासमाधानमेव। तदर्थमादित्यपरतया वर्णने ऐतरेयगतं वर्णनं देवतास्थानगतम्, तैत्तिरीये च कुमेरुगताभिप्रायेण। अथवा अर्थवादगतमैतरेयवर्णनं देवतास्वस्ताभिप्रायेण। अस्तोत्तरमपि देवतानामाजिधावनवर्णनात्तदाज्यं देवानाम्, सुमेरावस्ते कुमेरावुदयः। उदये च आदित्यबिम्बं घनीभूतघृतरूम्। घृतं तेजस्तद्रूपमिति 'घृतं मनुष्याणामि'त्युक्तिः। तच्च तत्र दिनप्रारम्भीयमिति शोभन आरम्भो दिनप्रवर्तनात्मा यस्य तादृशं सुरभि भवति। कुमेरावस्तोत्तरमप्यायुरूपेणान्तरान्तरादित्यदर्शनस्थानं पितॄणां, तत्रोक्तरीत्या तमसा मिश्रणे"नायुतं पितॄणा"-मित्युक्तिः। ततःपरस्ताद्दिनान्तरारम्भवेलायां पूर्वदिनसमापकतेजोऽपेक्षयेदानी नूतनप्रवर्त्स्यमानदिनप्रारम्भाभिप्रायकं तेजो नवनीतं तस्य दिने गर्भत्वमुपेष्यतोऽनुगुणमिति "नवनीतं गर्भाणा"मित्युक्तिः। एवञ्च नवनीतविध्यर्थवादे नवनीतवर्णनं हित्वा आज्यादीनां क्रमिकं वर्णनमुपपद्यते। एतदैतरेयं वर्णनं देवतास्वस्तगमनाभिप्रायेण। यत्तु तैत्तिरीये "घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणां नवनीतं गर्भाणाम्" इति वचनं तन्मनुष्येष्वस्ताभिप्रायेण। यदा च मनुष्येष्वस्त आदित्यस्य तदानी देवेषूदयेन तत्रत्यं मण्डलं घनीभूतघृतसदृशं घनीभूतघृतात्मकं तद्देवानामित्युक्तिरिति न ऐतरेयेण वचनेन विरोधः। मनुष्येषु तदानीमस्तोत्तरभावि आज्यरूपं तेजः तद्युक्तत्व तत्प्रकारान्तरेणात्र निष्पक्वशब्देनोच्यते। निष्पक्वं नितरां पक्वं द्रवीभूतमाज्यरूपमित्यर्थः। एवं तत्रापि पूर्वोक्तरीत्या आयुतभावो दक्षिणदिक्को मस्तुशब्देनोच्यते स च पितॄणामिति।

अयं भावः——सुमेरुकुमेर्वोरादित्यस्योदयावसरेऽस्तमयावसरे वा तदधस्तनदेशेषु स्वल्पाधिककालं मण्डलस्य दर्शनादर्शने प्रवर्तेते। तत्रोदयावसरे दर्शनकालस्याधिक्यमदर्शनकालस्य न्यूनता। अस्तावसरे च दर्शनकालस्य क्रमेण न्यूनताऽदर्शनकालस्य क्रमेण वृद्धिरिति प्रकार उभयत्र सुमेरुकुमेरुसविधवर्तिदेशेषु समः। तत्र दक्षिणदिक्कस्य तस्य पितृसम्बन्धिता तत्रोदयावसरीया आयुतता पूर्वमायुतशब्देनोक्ता। अत्र तु अस्तावसरीया मस्तुशब्देन बोध्यते। मस्तुशब्देन दधिभवो मन्थनजन्यो द्रवीभाव उच्चते। आदित्यमण्डलस्य दधिरूपत्वेन वर्णना, तज्जन्यस्योक्तरीत्या द्रवभावरूपविमिश्रभावस्य मस्तुशब्देन ग्रहणेन तादृशं तेजः पितॄणामित्युक्तं भवति। एवञ्चेदं वर्णनं देवेषूदयावसरीयमिति। एवं च कुमेरावुदेष्यतो गर्भरूपत्वमेष्यतस्तत्र नवनीतसम्बन्धादिकं पूर्ववद्वर्णनीयमिति विशेषाभाव इति तदनुल्लेखः। एवञ्च नवनीतप्रस्तावे आज्यादीनां वर्णनमुक्तरीत्या आदित्यक्रियानुकारात्मकताबोधनायेति भवतीति।

एवमैतरेये यूपशब्दनिर्वचनाख्यायिकोक्ता। देवा यज्ञमनुष्ठाय स्वर्गं गच्छन्तो भीता व्यचारयन्। अस्माकं स्वर्गप्राप्तिमनु मनुष्या ऋषयश्चैवं यज्ञं विज्ञाय स्वर्गं लोकमागच्छेयुः। कथं वा अत्रैषां भ्रमो व्युत्पादितः स्यादिति। तेषां यज्ञसमाप्तेरूर्ध्वं यूपस्तथैवोर्ध्वोऽवस्थित आसीत्। तैर्यूपस्य वशतो भ्रम उत्पादनीय इति स्थिरीकृत्योर्ध्वाग्रस्य यूपस्य स्वर्गगमनावसरेऽवाचीनाग्रत्वं संपाद्य भ्रम उत्पादितः। यतस्तैरूर्ध्वाग्रस्य यूपस्यावाचीनाग्रत्वं संपाद्य भ्रम उत्पादित इति योपनस्य भ्रमस्य साधनत्वाद्यूप इति तस्य नाम सम्पन्नमिति। ततो मनुष्याश्च ऋषयश्च देवानां यज्ञगृहमागताः, यज्ञस्य किञ्चिद्वस्तु लब्ध्वा तद्वशतो यज्ञस्वरूपं विजानीमह इति। तैस्तत्रावाचीनाग्रो यूपो लब्धः। अवाचीनाग्रस्य तस्य यूपस्य तैरूर्ध्वाग्रत्वेन निमानं कृतम्। ततस्तैः स्वर्गो विज्ञातोऽनुष्ठानेन च स लब्ध इति।

अत्र देवानां कथं भीतिः, कथं भ्रमोत्पादनकल्पना, कथं च यूपस्यान्यथाकरणमात्रेण भ्रमोत्पादः, कथं चर्षिभिर्मनुष्यैश्च प्रयत्नेन संपादितभ्रमोत्पादस्यानायासतो विज्ञानेन यथावद्रूपविज्ञानमिति नानाविधाः संशयाः प्रादुर्भवन्ति। तत्र मीमांसकैर्याज्ञिकैश्चोच्येत, यूपकरणार्थोऽयमर्थवाद इति तस्य स्वार्थतात्पर्याभावेन अस्थाने सर्वे इमे संशया इति। श्रुतौ वचनादेव यूपमात्रेण भ्रमो निरासश्चेति नात्र सन्देहावसर इति। तथा सति तात्पर्याभावेनाविवक्षितार्थस्य ग्रन्थस्य व्याख्याने भाष्यकारादीनां कथं प्रयासः।

अथ मीमांसाभाष्यरीत्या नित्यं कञ्चनार्थं गृहीत्वैतादृशस्थले व्याख्यानं कार्यमिति तर्हि स नित्योऽर्थोऽत्र कीदृश इति तस्य प्रदर्शनं कार्यं, तदव्याख्यानाद्भाष्यकारस्यात्र न्यूनतेति चेत्। अत्रोच्यते—आदित्यरूपमर्थं गृहीत्वा व्याख्यानान्न न्यूनतेति। तथाहि देवा अत्र द्योलोकस्थानवासिनस्तैः स्वर्गार्थं यागोऽनुष्ठितस्तत्र पुरुषादिरूपस्य पशोर्बन्धनार्थं यूप उपयुक्तः। तस्योर्ध्वाग्रतया निमानं कृतमवसिते यागे यागोपयुक्तसर्वपदार्थानां वह्नौ प्रहरणं कृतं, केवलं यूप एवावशिष्ट आसीत्। तस्यैवाघोऽग्रत्वं संपादितं तावता देवयज्ञविपरीतभावः। तत्रादित्येन सुमेरौ भ्रमता यस्मिन्देशे दक्षिणोत्तरवृत्ते उदयबिन्दुविशिष्टे उत्तरस्यां दिशि सार्धत्रयोविंशत्यंशा आरूढाः स तद्वृत्तीयो भागो यूपत्वेनोच्यते। तत्रैवादित्यस्य पशोर्नियोजनात्। तस्यैव च देवयज्ञस्य सुमेरावादित्यदर्शनावसानपर्यन्तत्वादादित्येऽस्तमिते परस्तात्कुमेरौ दिनप्रवृत्या तत्रत्ययज्ञस्य प्रवृत्तिः। न च स दैवो यज्ञः। अवसिते च यज्ञे सर्वस्य सुमेरौ दिनावसानत्वेनास्तमयेन तमसोव्याप्त्याऽसत्कल्पत्वात्। केवलदक्षिणोत्तरवृत्तभागस्यैवावस्थितिरिति यूपस्यावस्थितिरिति पूर्वमवोचाम। द्योलोकेऽस्तत उर्ध्वं कुमेरौ दिनप्रवृत्तिः। कुमेरुश्च

दक्षिणदिक्कः। दक्षिणा च दिगधोवर्तिनीति तत्रादित्येनोक्तदक्षिणोत्तरवृत्ते सार्धत्रयोविंशत्यंशपर्यन्तमधो गम्येत। एवं च स यूपो यो देवयज्ञे ऊर्ध्वाग्र आसीत्सोऽयमेवेदानीमवाचीनाग्रोऽधोऽग्रः संपन्नः। स देवैर्भीत्या तथा संपादित इत्यर्थवादे कल्पना। तस्य यूपस्याधोऽग्रत्वमित्यनुक्त्वाऽवाचीनाग्रत्ववर्णनेन तस्य दक्षिणाग्रत्वसंसूचनेनाप्युक्त एवार्थः सूचितः। दक्षिणस्या दिशोऽवाची-अपाचीशब्दाभ्यां बोधनात्। ततो मनुष्यैर्ऋषिभिरपि च तस्योर्ध्वाग्रत्वं कृतम्। तद् द्वेधा संभवति। तस्यां दशायां तत्रत्यैरादित्यस्योर्ध्वं एव समारोहो मन्यते। एवं च या वस्तुतोऽवाची दिक् सा तैरुत्तरा मन्येतेति तत्र याम्योत्तरवृत्तभागरूपयूपस्योर्ध्वाग्रत्वं तद्वशतो यज्ञस्वरूपविज्ञानम्। यज्ञो हि आदित्यः। तत्सम्बन्धेन दिनं तत्स्वरूपविज्ञानं तैरिति। अथवा वास्तवमूर्ध्वाग्रत्वं कल्पनया विज्ञाय दैवयज्ञस्वरूपं विज्ञातमिति। एवं भ्रान्तिजनकतया यूपनामतेति। यूपदर्शनं च मनुष्यैर्ऋषिभिश्च देवानां यज्ञवास्तुनि। वास्तुशब्दो गृहार्थकं नाम। गृहं चादित्यस्यास्तमयस्थले, तत्र यूपदर्शनवर्णनेन स एवार्थ इति।

एवं यजुर्वेदे सप्तदशाक्षरसमुदायस्य छन्दस्यत्वमुक्तम्। तस्यैव प्रजापतिरूपताप्युच्यते। सप्तदशाक्षराणि तत्रैवं प्रदर्शितानि। "ओ३श्रा३वयेति चतुरक्षरम्। अस्तु श्रौ३षडिति चतुरक्षरम्। यजेति द्व्यक्षरम्। ये३यजामह इति पञ्चाक्षरम्। द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरश्छन्दस्य" इति। एतस्य सप्तदशाक्षरसमुदायसमूहरूपवाक्यजातस्य यज्ञे प्रयोगेण छन्दोरूपत्वम्, छन्दोऽर्थत्वमिति वा 'एष वा' इत्यादिना स्तुतिः।

तत्रोच्यते—यज्ञेऽपरेषामपि वाक्यानाम् "उद्धराहवनीयम्" इत्यादीनां प्रयोगात्तेषामपि यज्ञार्थतया कुतो न छन्दस्यत्वेन वचनम्। को वा एतेषामेव वाक्यानामक्षराणां विशेषो यत इमान्येवाक्षराणि वाक्यानि छन्दस्यत्वेनोच्यन्ते नान्यानीति।

याज्ञिकैरुच्यते, एतेषामेव समूहरूपत्वेन विशेषतया वचनादेतान्येव छन्दस्यरूपाणि नान्यानीति। अपरे केचनैकदेशिनो ब्रुवते यज्ञे हविषः प्रदानमेव मुख्यं, तदर्थतयैतेषां विशिष्टतेति छन्दस्यत्वेनैतेषां स्तुतिः। अपरेषामपि यज्ञगतानां वाक्यानां यज्ञार्थत्वमस्ति परन्तु तत्परम्परया तेषाम्। इमानि तु साक्षाद्यज्ञोपयोगीनीत्येतेषामेव स्तुतिर्नान्येषामिति।

परन्त्वेतत्समाधानवर्णनं न मनस्तोषावहं, यत एतस्याक्षरजातस्य न सर्वयज्ञार्थता। सोमस्थले तस्य तादृशत्वाभावात्। किञ्च साक्षाद्यज्ञोपयोगित्वोक्तिरपि न समञ्जसा। यतो यजमानेन देये वस्तुनि स्वस्वत्वनिवृत्तिपरस्व-

त्वोत्पत्तिरूपदानपदार्थरूपयागपदार्थस्य बोधनाय प्रयुज्यमानस्य "देवायेदं न मम" इति वाक्यस्य तत्रासङ्ग्रहात्। यजमानव्यापारस्यैवात्र मुख्यत्वात्। किञ्च साक्षाद्यागोपयोगित्वस्य तत्प्रवर्तनारूपस्यात्राद्यवाक्यत्रये सम्भवेऽपि चतुर्थस्य वाक्यस्य होतुः प्रेरणाऽसम्बन्धितया तस्यात्र सङ्ग्रहस्य न समुचितत्वम्। शुद्धेन कर्म कर्तव्यमिति स्वशौचबोधनार्थतया तस्यापि प्रकृतार्थतेति चेद्—अध्वर्यो-राग्नीध्रस्य चोक्तप्रेरणासम्बद्धवाक्यप्रयोगयोग्यत्वाय तादृशवाक्यप्रयोगस्य तस्य सङ्ग्रहस्य चाभावेन न्यूनताप्राप्तेः। स्तुतिकर्तृत्वाद्धोतुरेव तादृशं वचनं योग्य-मव्यवधानात्स्तुतेरपरयोस्तु व्यापारो न साक्षात्स्तुतेरव्यवहित इति। तदपि न युक्तियुक्तम्। स्तुतिरूपस्य यागेऽत्यन्तापेक्षितस्य व्यापारस्य कर्तृत्वेन होतुस्तद्युक्त-त्वेन प्रधानकार्यदेवतास्तुतिबोधकयाज्याक्षराणामसङ्ग्रहो निर्युक्तिकः स्यात्। न च याज्याक्षराणामनियतत्वेन प्रजापतिसारूप्यरूपसप्तदशाक्षरत्वस्य तैः संपा-दनासम्भवेन तदग्रहणम्। मुख्यस्य दानबोकधस्य याज्यासंश्लिष्टस्य वषट्कारस्य द्व्यक्षरस्य तत्र ग्रहणेन याज्यांशग्रहणकल्पनया न्यूनत्वाभाव इति। स्वाहाकारा-दीना चोक्तरीत्या याज्यासंपृक्तानामप्युक्तरीत्याऽध्वर्युणाग्नीध्रेण च प्रयुज्यमान-वाक्यपूर्वत्वाभावेन नात्र ग्रहणम्। होत्रा वषट्कारवचनोत्तरमुच्यमानस्य 'वागोजः सह ओजो मयि प्राणापाना'वित्यस्यानुमन्त्रणवाक्यस्याप्यत्राग्रहणम्। सप्तदशाक्षरत्वसमाप्तेः। प्रत्युत तद्विघातकत्वात्तस्येति। अत एव सोमस्थले 'शों सावों' प्रभृतीना स्तुत्यर्थानामपि क्रमिकतया सप्तदशाक्षरसमूहपूरकत्वाभावेन तदग्रहणम्। शस्त्रे तेषामभिगरादीनां वाक्यानामनेकवारमाम्रेडनेन नोक्ततादृश-सङ्ख्यापूरणसम्भव इति, तन्न। प्रजापतिसारूप्यस्य सङ्ख्यासाम्येन निष्पत्तिरिति सङ्ख्यासाम्यायैव इमान्येवाक्षराण्यपेक्षन्ते इति नियमाभावात्। आग्नीध्रवाक्ये 'अस्तुश्रुत'मिति चतुरक्षरस्य प्रकृतार्थबोधकस्य ग्रहणेनापि साम्यनिष्पत्तेः। वेदे तस्यावचनात्प्रत्युत 'अस्तुश्रौषट्' इत्यस्यैव वचनात्तस्याग्रहणमेतस्य ग्रहणमिति त्वगतिकगतिभूतम्। युक्तिकल्पनसम्भवे तस्याश्रयणस्यायुक्तत्वात्। तस्मात्कुत इमान्येवाक्षराणि छन्दस्यत्वेन स्वीकार्याणि कश्चैषां विशेष इति चेदत्रोच्यते—

अत्राक्षराणामेव प्राधान्येनाश्रयणम्। तान्यभिप्रेत्यैवाभिप्रेतसप्तदश-सङ्ख्यापूरणात्। अत एव ब्राह्मणे "एष वै सप्तदशाक्षरश्छन्दस्य" इत्यक्षरग्रहणे-नैव तन्निर्देशः। एतदक्षरविशिष्टवाक्यत एवाभिप्रेतार्थलाभात्। तथाहि एतदक्षर-विशिष्टवाक्यानां तावत्कोऽर्थ इति विचारणीयम्। न च वक्तृसम्बन्धमात्रेण योग्यतयार्थकरणं, यथा साम्प्रदायिकैः क्रियते। तथाहि 'ओ श्रावये'त्येवमध्वर्यु-राग्नीध्रमभिप्रेत्य ब्रवीतीति ओ इत्यनेन सम्बोधनपूर्वं श्रावयेत्यनेन श्रुतिविषयतां

प्रापय श्रुतिर्यथा स्यादभिप्रेतपुरुषस्य तथा संपादयेत्यर्थः। अभिप्रेतः पुरुषश्च होता। यतः श्रावणीयतया विवक्षितस्य 'यज' इति वाक्यस्य याज्यां पठेत्यर्थकस्य याज्यापाठे प्रेरणपरत्वेन याज्यपाठकर्तृत्वेन होतुरुपस्थितत्वात्। उपस्थित-परित्यागे कारणाभावात्। एवमध्वर्युणा प्रेरितस्याग्नीघ्रस्य प्रत्युत्तररूपं द्वितीय-वाक्यं 'अस्तु श्रौषट्' इति, तस्य मुख्यं वक्तव्यं श्रुतं भवतु। अर्थादस्तु भवतु संप्रतिपद्यत इत्यर्थः। 'श्रौषट्' इत्यस्य मुख्यं वक्तव्यं श्रुतं भवतु इत्यभिप्रायेण छान्दस्या प्रक्रियया तव्यार्थत्वं प्रकल्प्य श्रौषट् श्रोतव्यमित्यर्थः। यन्मया श्रावणीयं तच्छ्रुतं भवत्विति परमार्थः। ततोऽध्वर्युणा पुनर्वाक्यं प्रयुज्यते 'यजे'ति। यजेत्यस्य याज्यां पठेत्यर्थः। तदिदं याज्यापठनं होतुः कार्यमिति होतारं प्रति वक्तव्यमित्यर्थः। ततो होताऽध्वर्युप्रेरितः स्वीयपाठपठनावसरे प्रारम्भे ब्रवीति 'ये ३ यजामहे' इति। इदं चतुर्थं वाक्यं छन्दस्यगतम्। अनेन होत्रा स्वस्य वंशशुद्धिः प्रतिपाद्यते, शुद्धिश्चानेकविधा। तत्र बीजशुद्ध्यर्थं देवतामेव विज्ञां प्रकल्प्योच्यते 'ये यजामह' इति। ये वा के वा यजामहे। वस्तुतो मदीयस्वरूपोत्पत्तिः प्रसिद्ध्य-नुसारेण मया वक्तुं शक्या। न परं परमार्थायास्तस्या वर्णने मम शक्तिरस्ति। यतस्त्र्यपराधात्पत्युः पुत्रदर्शनेन तत्र दोषसम्भवात्। तस्मान्न तस्या यथार्थतो ज्ञानं मम। ममेति किं, मनुष्यमात्रस्य। केवलं तद्विज्ञाने देवतैव समर्थेति। हे देवते ये वा के वा यज्जातीया यद्गोत्रीया वा वयमिति भक्त्या विज्ञायते ते वयं यजामहे याज्यां पठाम इत्यर्थः। एवं वंशशुद्धिं प्रतिपाद्य परस्तात्स्वेन पठनीयां प्रकृतयागीयप्रकृत-देवतासम्बन्धिनी याज्यां प्रपठ्यान्ते हविषः प्रदानार्थकं वषट्कारं योजयित्वा वषट्कारं ब्रवीति। तस्य वषट्कारस्य याज्याङ्गत्वं प्रकल्प्य याज्यांशस्य वषट्-कारस्य पाठ इति।

अत्रोक्तार्थकल्पने कुत्रचन वक्तुर्वशतः कुत्रचन संभावितकर्तृतयाऽर्थविशेष-वचनम्। यथात्र प्रथमे वाक्ये केवलम् 'ओश्रावये'ति पठ्यते, वक्ता श्रोता चोभयमव्यक्तम्। 'अस्तु श्रौषडि'त्यनेन प्रतिवचनमात्रं निरूप्यतेऽत्रापि वक्तृ-श्रोत्रोरव्यक्तत्वमेव। एवं यजेत्यस्य यागं कुरु इत्यर्थस्य श्रुतिसिद्धस्य त्यागेन याज्यां पठेत्यर्थस्य स्थलविशेषानुरोधेन लभ्यत्वम्। यावत्पर्यन्तं तदर्थानुपस्थिति-स्तावत्पर्यन्तं तत्कर्तृत्वेन होतुरप्राप्तिः। 'यजे'त्यस्य यागकरणार्थत्वे 'ये यजामहे' इति यजधातुप्रयोगः सङ्गच्छते। यजेत्यनेनैकवचनार्थस्य प्रेरणाविषयत्वेन 'यजामहे' इति बहुत्वविशिष्टप्रयोगस्यासङ्गतिः। एवं ये इति बहुवचनं व्याख्यातम्। तस्यापि संगत्यभावात् होतृपरतया व्याख्याने आत्मनेपद-विरोधश्च। नहि तेन स्वात्मार्थं यागः क्रियते, तज्जन्यफलभोगित्वं वा तस्य, येन

'स्वरितञ्जित' इत्यात्मनेपदमनुगुणं स्यात्। किञ्च होतृपरत्वे ऋङ्मन्त्रपाठमात्रं प्राप्नुयात् न तु तदन्ते वषट्कारः। तत्र प्रेरणाभावात्। किञ्चैषां वाक्यानां क्रमोऽपि वचनादेव तथा स्वीकार्यं उत तस्य निमित्तान्तरसव्यपेक्षत्वम्। विध्यन्तरानुरोधेनोक्तवाक्यानां पूर्वोक्तार्थपरत्वं पूर्वोक्तक्रमपरत्वं चेति चेद्, अस्तु। परं त्वेतद्वाक्यबोध्यानां क्रियाणां मूलभूतसौरक्रियानुरूप्यं वक्तव्यं, कीदृशं तदिति विचारणीयमेव। ब्राह्मण एव तत्र तत्र देवालायागमनु सौरीं क्रियामनु यागे तथानुष्ठानस्य बहुश उक्तेः। दिङ्मात्रं तु पूर्वं प्रदर्शितं नवनीतार्थवादप्रसङ्गेन। प्रपञ्चयिष्यते च परस्तात्सविस्तरम्।

तदर्थमुच्यते—इदं पूर्वोक्तवाक्यसमूहगतं प्रथमं वचनमध्वर्योरेव तच्च 'ओ३श्रावय' इति। अत्र वाक्ये प्लुतिः स्वरस्य क्रियते। प्लुतिस्तु शब्दधर्मस्तावता शब्दस्वरूपे आधिक्यं प्रतिपन्नं भवति। तावता तद्बोध्येऽर्थे लोके न कोऽपि विशषो भासते। वेदे तस्यापि स्वरस्येव विशेषार्थप्रतिपत्तिकरत्वम्। यथा स्वर उदात्तादिः अर्थविशेषप्रतिपादको वेदे, यथा इन्द्रशत्रुशब्दे। तद्विषये ब्राह्मण उच्यते 'पूर्वं विश्वरूपस्त्वाष्ट्रो देवानां पुरोहित आसीत्। स देवविरोधिकर्मकरणादिन्द्रेण हतः'। सा च विश्वरूपवधवार्ता त्वष्ट्रा होमकरणवेलायां होमार्थं हविर्गृहीत्वा तस्य देवतोद्देशेनाग्नौ प्रक्षेपनवेलायामुपलब्धा। तद्वशतः क्रुद्धस्त्वष्टा तदेव होमार्थं गृहीतं हविर्देवतायै अदत्त्वा मन्त्रविशेषपाठेनाग्नौ अभिचारफलार्थं हुतवान्। मन्त्रविशेषसम्बन्धादेव तस्य कर्मण आभिचारिकत्वम्। अभिचारो नाम शत्रुहिंसाकरं कर्म। इदानीं पुत्रघातकत्वेनेन्द्रः शत्रुस्तस्य हिंसाभिप्रायेण तेन त्वष्ट्रा गृहीतं तद्धविर्मन्त्रविशेषेणाग्नौ हुतम्, मन्त्रश्च तेन तत्र प्रोक्तः—"इन्द्रशत्रुर्वर्धस्व" इति। तद्धविस्त्वष्ट्रा तेन मन्त्रेण 'इन्द्रस्य घातकं यथा स्याः एवं वर्धस्वे'त्यभिप्रायेण हुतम्। तद्धुतं हविरग्निं प्राप्य केषांचिन्मतेऽग्निमप्राप्य सर्वासु दिक्षु इषुमात्रमिषुमात्रं विवर्द्धितुमारेभे। वृद्धेन तेन सर्वं विश्वमावृतम्। आवरणाद्विवर्धनाद्वा तस्य वृत्रशब्देन व्यवहारः।

अत एव ब्राह्मणे उच्यते "यदवृणोत्तद्वृत्रस्य वृत्रत्वम्। यदवर्धत तद्वृत्रस्य वृत्रत्वम्"। सर्वं व्याप्य स्वरूपेणावर्त्ततेति वर्तनवशतो वृत्रनामेति ब्राह्मणे प्रतिपादितम्। ततस्य सर्वव्याप्तिं दृष्ट्वेन्द्रेण तस्य वधः कृतः। तत्र त्वष्ट्रा इन्द्रशत्रुशब्दस्येन्द्रघातकाभिप्रायेण षष्ठीतत्पुरुषरूपेण तस्य शब्दस्य प्रयोगः कर्तुमिष्टः परन्त्वनवधानाद्बहुव्रीहिरूपेणैव स मन्त्र उक्तः। तत्रानुपूर्व्या स एव शब्दः षष्ठीतत्पुरुषरूपो वा बहुव्रीहिरूपो वा भवितुमर्हतीति तत्कृतस्तु न तत्र विशेषः किन्तु स्वरकृतः। षष्ठीतत्पुरुषे तस्य शब्दस्य "समासस्य" इति पाणिनीयसूत्रेणा-

न्तोदात्तता भवति। बहुव्रीहौ तु 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्यनेन पूर्वस्य पदस्य समासेऽप्रवेशदशायां यः स्वरः स समासे प्रवेशेऽपि समासस्य स्वरो भवति। प्रकृतेन्द्रशत्रुशब्दे बहुव्रीहौ पूर्वं पदमिन्द्ररूपं तस्य समासेऽप्रवेशदशाया-माद्युदात्तत्वम्। नित्स्वरेण तस्याद्युदात्तत्वात्। ततस्तेन बहुव्रीहिकरणेऽपि स एव समासस्वरइति 'इन्द्रशत्रु'शब्द आद्युदात्तो भवति। अत इन्द्रस्य घातक इत्यर्थे तेन स शब्दोऽन्तोदात्तो वक्तव्यः।

न च शत्रुशब्दस्य रिपूबोधकत्वेन षष्ठीसमासे बहुव्रीहौ वा समासेऽर्थे तादृशो घातकोऽर्थो न प्रतीयते। षष्ठीसमासेन इन्द्रस्य वृत्रो रिपुरिति प्रतीत्या वाच्यवृत्त्येन्द्ररिपुत्वं वृत्रे भासते, समानवित्तिवेद्यन्यायेनार्थादिन्द्रे वृत्ररिपुत्वं भासत एव। एवं बहुव्रीहौ समासे इन्द्रः शत्रुर्यस्येति करणेन वृत्ररिपुत्वमिन्द्रे वाच्यवृत्त्या बोध्यते, तत्रापि उक्तन्यायेनार्थाद् वृत्रेऽपि इन्द्रशत्रुत्वं बोध्यत एवेति न कोऽपि षष्ठीतत्पुरुषबहुव्रीहिसमासकृतो विशेषः प्रकृते इति न वाच्यम्। यतोऽत्र शत्रुशब्दः 'शदिर् विशरणे' इत्यस्मात्कर्तरि 'त्रु'प्रत्ययेन निष्पन्नो घातकमर्थमाह। एवं सति षष्ठीसमासे इन्द्रस्य घातक इत्यर्थादिन्द्रो घात्यः वृत्रो घातक इत्यर्थः। बहुव्रीहिसमासे तु इन्द्रः शत्रुर्घातको यस्येति वृत्रस्य घात्यता इन्द्रस्य घातकता प्रतीयते। तत्र क्रुद्धस्य त्वष्टुरभिप्राय आसीदिन्द्रस्य घातको वृत्रो भवतु परन्तु बहुव्रीहिप्रयोगेण इन्द्रघात्यत्वं वृत्रे प्रकाशितमितीन्द्र एव घातकस्तस्य सञ्जातः।

तच्चेदं विशेषार्थप्रत्यायनं स्वरेण कृतमेवमत्र प्लुतिकृतो विशेषः प्रतीयते। प्लुतिर्हि स्वरे मात्रापरिच्छेदः। स हि उच्चार्यमाणवर्णे कालस्य मात्राणां परपरवर्तिनीनामधिकरणत्वे प्राप्ते तस्य स्तम्भो बन्ध इति यावत्। प्लुतौ मात्रात्रये बन्धप्रतीतिः। मात्रायास्तु स्वभावतो वर्णाधिकरणत्वबन्धस्तस्यात्र मात्रात्रये बन्धप्रतीत्या यस्य वर्णस्य बन्धत्रयं स प्लुत इत्यर्थः संपद्यते। बन्धत्रय-साम्यात् स्वरस्यायं धर्मः प्लुतिर्नाम न तु व्यञ्जनस्येति स्वररूपत्वमादित्यस्य वेदे प्रतिपादनात्तस्यासौ धर्मो बन्धत्रयमिति आदित्य एवात्र प्लुतशब्देन बोध्यते। आदि-त्यस्य स्थलत्रये बन्धो वेदे प्रतिपाद्यते 'त्रिणाभिचक्रमजरमनर्वमि'त्यादौ। आदित्य-स्यैवाग्निरूपत्वम्, अग्नेस्त्रिर्बन्धः "त्रिधा बद्धो वृषभो रोरवीति"इत्यादावुक्तः। एवं च प्रकृते प्रथमे 'ओ३श्रा३वये'ति वाक्ये न केवलं सम्बोधनमात्रमुच्यते किन्त्वा-दित्यरूपमपि इति तदादित्यं सम्बोध्याध्वर्युर्ब्रवीति। 'ओ३' हे आदित्य! श्रा३-वयेति। यद्यपि आदित्य एक एव परन्त्वसावुपाधिभेदाद्भिन्न इव भवति। अत एव उदयस्थानसविधवर्ती आदित्योऽध्वर्युशब्देनोच्यते। आदित्यशब्देनात्र दैनंदिने वृत्ते

दिनरात्रिसंपादनार्थं गच्छन् स उच्यते, स च रात्रिं प्राप्तस्तेजोरहित इति कल्पना पूर्वमुक्ता आदित्येनास्तं गच्छता स्वीयं तेजोऽग्नौ निधीयत इत्यनेन। एवं च स तत्र तेजोरहितः कृष्णवर्ण इवेति। अत एव स्थलान्तरे 'कृष्णो रूपं कृत्वा वनस्पतिं प्राविशदि'त्युच्यते। तं प्रत्यध्वर्युणोच्यते श्रा३वयेति। आदित्यस्य रश्मयो-मण्डलस्य सर्वासु दिक्षु तिर्यक्त्वेन प्रसृताः प्रसिद्धास्तेषां सर्वेषां रश्मीनां केन्द्ररूप-मध्यस्थाने मण्डलं भवति। ते चेमे रश्मयो देशप्रमितिकारका इति करशब्देन भुजशब्देन वोच्यन्ते। अत एव आदित्यस्य सहस्रकरादिशब्दैर्व्यवहारः। यथा क्षेत्र-माने क्षेत्रपरिच्छेदकारिणी मर्यादा रेखा करभुजादिशब्दैर्व्यवह्रियते त्रिभुजं क्षेत्र-मित्यादिषु, एवं तस्या मर्यादारेखायाः कर्णतत्समानार्थकशब्दैर्व्यवहारस्तत्र प्रसिद्धः लम्बकर्ण क्षेत्रमित्यादौ। एतावता रश्मीनां यथा करभुजप्रभृतिशब्दैर्वचनमेवं कर्णश्रुतिप्रभृतिशब्दैरपि वचनं स्थलविशेषे। एवं सति अध्वर्युणा तद्रूपेणादित्येन स्वीयस्तिर्यक्प्रसारिसविधतमो रश्मिरत्र श्रुतित्वेनाभिप्रेत्य तत्र तत्सम्बद्धदेशे आदित्यस्यायनं प्राप्तिः प्रतिपाद्यते, हे आदित्य! उक्तरीत्या दिनरात्रिसंपादक! श्रुतावय श्रुतिस्थानं प्राप्नुहीति। यत्रावस्थितस्य मम श्रुतियोगः, अर्थात्तिर्यक्-प्रसारिसविधवर्तिरश्मियोगस्तत्स्थानं प्राप्नुहीत्यर्थः।

इदं प्रकारान्तरेणापि वक्तु शक्यम्। यत्र स्थाने स्थितस्यादित्यस्य रश्मय उदयदेशं प्राप्ता भवन्ति तत्स्थानं प्राप्नुहि। तत्रादित्य आगतो भवतु इत्यभि-प्रायनिवेदनं मन्त्रेण। आदित्यस्य च रश्मयो दैनन्दिनवृत्ते आदित्योदयबिन्दुतः पूर्ववर्तित्रिंशदंशरूपवृत्तभागपर्यन्तं व्याप्नुवन्ति। अर्थात्ततः पूर्ववर्तिस्थाने स्थित-स्यादित्यस्य यत्र स्थाने उदयस्तस्य तत्र तदीयरश्मीनामदर्शनमिति स ततो न दृश्यते। तदेव गृहीत्वा भाष्यकृतोक्तम्—'आदित्यो यस्मिन्देशे गच्छति ततः प्राक् त्रिंशद्योजनभूभागवर्त्तिनां स उदितो दृश्यते' इति।

एवञ्चात्र त्रिंशद्योजनपर्यन्ता श्रुतिः कर्णो वा अध्वर्योर्यत्र तं देशं प्राप्नुहि इति। तदेवोच्यते 'श्रा३वये'ति शब्देन। अत्रापि श्रा३वयेति शब्दे प्लुत्या श्राविति पृथक्पदत्वं प्रतिपद्यते। तस्य च श्रुतिसमानार्थता। एवं श्रौ श्रुतौ पूर्वोक्तरीत्या कर्ण-स्थानं तदय गच्छ प्राप्नुहि इति। तदनुकाराय अध्वर्युणा आग्नीध्रप्रेषणे उक्तार्थस्वीकारकं प्रेरणवाक्यं प्रयुज्यते ओ३श्रा३वयेति। तत्र प्लुतद्वयेन पूर्वोक्तवाक्यान्तर-संश्लिष्टता प्रतिपाद्यते। अयमेव वाक्यान्तरसंश्लेषोऽत्र प्लुतेन बोध्यते। आदित्या-नुकारश्च पूर्वोक्तरीत्या। अयं चाध्वर्योः कर्णस्त्रिंशदंशपर्यन्त उदयस्थानात्, स च वेदिरूप इति मन्त्रव्याख्याने विस्तरेण प्रतिपादितम्। तत्र वेद्यामेव वैदिकानि कर्माण्यनुष्ठीयन्ते तेषां कर्मणां श्रौतत्वव्यवहारोऽपि उक्तार्थस्य साधकः।

किञ्च शूद्रस्य श्रुत्यसम्बन्धोऽपि उक्तार्थवशत एव। तथाहि शूद्रस्योत्पत्तिरुच्यते"पद्भ्यां शूद्रोऽजायत"इति पुरुषसूक्ते। तत्रोदितस्यादित्यस्य पदरूपता। उदयश्च दक्षिणोत्तरा सुमेरुकुमर्वोस्तत्रोदितस्य तस्य पदरूपत्वं, स्थानद्वयाभिप्रायेण द्वित्वं, तादृशपदद्वयसकाशतः शूद्रस्योत्पत्तिरुच्यते। अत्रोत्पत्तिमत उत्पत्तिकारणतोऽभिन्नत्वम्। अत एव "मुखं ब्राह्मणो बाहू राजन्य उरू वैश्य" इति प्रक्रमे पाठात्पादावेव शूद्र इति भवति। शूद्रशब्दस्यार्थो निरुक्ते उच्यते शु आशु द्रवति गच्छति इति शूद्रः। उदितस्य तस्यादित्यस्य शीघ्रां गतिमपेक्ष्य तस्य शूद्रत्वव्यवहारः। यद्यपि आदित्यस्य पृथिव्या वा गतिः समानरूपिण्येव तथापि दिवाभागे कार्यान्तरव्यापृतत्वेन मनुष्याणां दिनस्य शीघ्रं समाप्त्यवभासनाद्दिने आदित्यस्य शीघ्रा गतिरिति। गतिमद्भावश्चोदिते पदरूपतापन्ने आदित्य इति तस्य शूद्रत्वेन शीघ्रगतिमद्रूपेण व्यवहारः। रात्रौ तमसा व्याप्त्या विश्वस्य निद्रां हित्वा परं मनोविनोदस्थानं न भवति, तत्र निद्राभावे रात्र्या दीर्घत्वेनावभासोऽनुभवसिद्धः। स चादित्यस्य रात्रिसंपादकस्य मन्दगतिं विना न संभवतीति रात्रौ तस्य मन्दगतित्वेन व्यवहारो वेदे।

तदुक्तं मन्त्रे—"षष्टिश्चाध्वर्यो नवतिश्च पाशा अग्निं होतारमन्तरा विचृत्ताः। सिनन्ति पाकमतिधीर एति" इति।

अतिधीरोऽतिमन्द एति मन्दत्वं च गताविति। एवं च पदरूप आदित्यः शीघ्रगमनत्वाच्छूद्र इति। तत्रानुपदमुदितस्यादित्यस्य पृथक्तया रश्मीनामनवभासात्तत्र कर्णादिरूपाभावः। कर्णत्वाभावः श्रुत्यभावः। तदेव गृहीत्वा 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इत्युक्तम्। श्रुतिः श्रुतिविषया न भवति तदानुगुण्येन शूद्रस्य श्रुत्यभावो धार्मिकव्यवहारे, यथा शूद्रस्य कर्णाभावाच्छ्रुत्यभाव एवं स्त्रीरूपाया उषसोऽपि तदभाव इत्यनुकरणात्स्त्रिया अपि श्रुत्यभाव उक्तः। यथोदितस्यादित्यस्योदयसन्निकटे देशे तदभाव एवं परस्तादपि आदिनावसानं तद्वद्भाव इति तेषां द्विजबन्धुत्वं गृहीत्वा तेषामपि श्रुत्यभावस्तदनुसारेण व्यवहारे तेषां श्रुत्यभाव उच्यते। एतावता आ३वयेत्यनेन श्रुतिप्राप्तिरुच्यते, सा चोक्ततद्वाक्यगतप्लुतिवशत इत्युक्तम्।

ततो द्वितीयं वाक्यम् 'अस्तु श्रौ३षट्'इति। अत्रापि श्रौशब्दे प्लुत्या श्रौषट्शब्दे पदद्वयकल्पनयाऽर्थान्तरं प्रतीयते। तत्र पदद्वयकल्पनायां श्रौ श्रुतिभावे षट्। षड़ित्यनेन ऋतुचक्रप्रवर्त्तकस्य मण्डलस्य सत्वं बोध्यते, अर्थात्तन्मण्डलमादित्यस्य श्रुतिभावापन्नं भवतु इति आदित्यस्तद्देशप्राप्तो भवत्विति परमार्थः। तदनुसारेण श्रावयेत्यस्य प्रेरणार्थकताप्रतीत्या तदुत्तरवर्ती व्यापारः श्रौषड़ित्यनेन प्रतीयते। तत्र तस्यार्थ अस्तु भवतु श्रौषट् श्रुतं भवत्विति। ततः परस्ताद्य-

जेत्यस्य तृतीयवाक्यस्य प्रेरणारूपस्य प्रयोगः। यजेत्यस्य सम्मुखो भवेत्यर्थः। यजधातोर्यज् देवपूजासङ्गतिकरणमित्रकरणदानेष्वित्युक्तेः सङ्गतिकरणार्थत्वं गृहीत्वा तदर्थः। सङ्गतिः साम्मुख्यम्। अभिमुखीभाव इत्यर्थः। आदित्यस्य रश्मयस्त्रिरूपा अवभासन्ते तिर्यक्त्वेन साम्मुख्येन च। तिर्यक्त्वं साम्मुख्यात्पूर्ववर्ति परवर्ति चेति द्विविधम्। रश्मिसन्दर्शनमेवादित्यसन्दर्शनमिति। तत्तु विध्यं गृहीत्वा रश्मीनामृभुरूपतेति प्रतिपादितम्। ऋभवस्त्रयस्तेषां रश्मिरूपत्वं निरुक्तकारेण सूक्तेषु चोच्यते। कार्यञ्च तेषामादित्योदयात्पूर्वमुदित आदित्येऽस्तमयोत्तरं चेति। तत्तु "वाजो देवानामभवत्सुकर्मे"ति मन्त्रेण पूर्वं प्रतिपादितम्। देवा आदित्यरश्मय उदयपूर्ववर्तिनस्तेषां सुकर्मत्वमेकस्य वाजरूपस्य ऋभोः कार्यं तच्च साम्मुख्यात्पूर्ववर्ति। इन्द्रस्य सुकर्मत्वमृभोस्तत्साम्मुख्यरूपम्। वरुणस्य सुकर्मत्वं विभ्वरूपस्य ऋभोस्तच्च साम्मुख्यपरवर्तितिर्यक्रूपत्वेन। तच्च साम्मुख्यरूपं संगतिकरणं यजेत्यनेन बोध्यते। श्रुतिभावप्राप्तेरूर्ध्वं सम्मुखभावस्यैवेषणात्। किञ्च सङ्गतिकरणमेवात्र दानं पूर्वस्यादित्यस्यास्मिन्नुदीयमाने आदित्ये दानं तेन, पूर्वस्तु यज्ञे उपयुक्त उत्तरस्त्विदानीं कार्यकर्तेति। याज्यापाठः याज्यया गमनम्, पठधातोर्निघण्टौ गमनार्थेषु पाठात्। याज्या च हविर्दाने प्रोच्यमाना ऋक्। ऋक्त्वं चादित्यस्य, सा दैनन्दिनगमनोपयोगिवृत्तरूपा। अतएवैतरेयब्राह्मणे ऋक्सामयोः संवाद उक्तः संगच्छते।

तत्रोच्यते—"ऋक् वा इदमग्रे साम चास्तां सैव नाम ऋगासीदमो नाम साम सा वा ऋक् सामोपावदन् मिथुनं सम्भवाव प्रजात्या इति नेत्यब्रवीत्साम ज्यायान्वा अतो मम महिमेति ते द्वे भूत्वोपावदतां ते न प्रतिचन समवदत तास्तिस्रो भूत्वोपावदंस्तत्तिसृभिः समवदन् यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति तिसृभिरुद्गायन्ति तिसृभिर्हि साम सम्मितमि"ति। तत्र साम्न ऋग्भिः संवाद उक्तः। प्रथममेकयर्चा साम्नः सहभावप्रार्थने साम्ना निराकरणं ततस्तस्याधिक्यात्। द्वाभ्यां प्रार्थनेऽपि निराकृते तिसृभिः प्रार्थने साम्नानुमननम्। अतएव गानावसरे एकं साम तृचे क्रियते तदेव स्तोत्रियं न गानमात्रम्। तस्य गानमात्रस्यैकस्यामृचि पर्याप्तत्वात्। तथा च तिसृभिः स्तोत्रियस्य साम्नः समत्वं नाम आधिक्याभावः स च कथमुपपद्यते। यद्यादित्यपरत्वेनात्र विचारस्तदानीं तस्य वचनस्योपपत्तिः।

तथाहि ताण्ड्यब्राह्मणे चतुर्विधं सामोक्त्वाऽपरासां विधानामेकस्मिन्स्वरान्तरूपायां विधायामन्तर्भावमुक्त्वा एकमेव सामेत्युक्त्वा स्वररूपमेव सामेत्युक्त्वा स्वरस्त्वादित्यरूप इत्युक्तम्। ततश्चादित्यरूपस्य साम्नस्तिसृभिर्ऋग्भिः समता-

प्रतिपादनमुक्तरीत्या त्रिभिः पर्यायैरुदयस्थलाभिप्रायम्। पूर्वं सूक्ष्मेण मानेनादित्येनोदयबिन्दुतः तद्युक्तयाम्योत्तरवृत्ते उदयबिन्दुतः प्रतिपार्श्वं सार्धत्रयोविंशत्यंशपर्यन्तं नवतिपर्यायैर्गमनमुक्तम्। तेन च प्रतिपर्यायं पञ्चदशकलानामुपयोगेन सर्वस्यांशात्मकस्य बिम्बस्योदयार्थं पर्यायचतुष्टयमित्युक्तं, स्थूलेन मानेनादित्येन याम्योत्तरवृत्ते मध्यबिन्दुतो नामोदयबिन्दुतः प्रतिपार्श्वं चतुर्विंशत्यंशपर्यन्तं गमनागमने क्रियेते। तावता वत्सरः पूर्णो भवति। तच्चेदं तावदंशपर्यन्तं गमनमागमनं च सुमेरुकुमेर्वोर्भवति। तत्रैकस्मिन्स्थाने समुदित आदित्यो मासत्रयेण चतुर्विंशत्यंशपर्यन्तमारोहति, तावता कालेन च पुनः प्रत्यारोहति। ततस्तत्रास्तमेति ततो भुवोऽपरस्मिन्पार्श्वे उदयबिन्दुत उपरिष्टात्तावदन्तरं मासत्रयेण गत्वा मासत्रयेणावारोहति इति वत्सरः पूर्यते। तत्र चतुर्विंशत्यंशानामतिक्रमणे यदि मासत्रयं नवतिपर्याया वा अपेक्षितास्तर्ह्येकांशातिक्रमणार्थं कियन्त इत्यनुपातेन प्रत्यंशं त्रयः पर्याया भवन्ति पूर्णाः। चतुर्थस्त्वपूर्ण इति तं परित्यज्य पूर्णानां ग्रहणे त्रयः पर्याया भवन्ति। तत्र पर्यायेषु ऋक्त्वग्रहणे तिसृभिर्ऋग्भिस्त्रिभिःपर्यायैर्वा आदित्यबिम्बस्योदयेन तैर्बिम्बस्य साम्यमिति गृहीत्वा तिसृभिर्ऋग्भिः साम्नः समत्वप्रतिपादनमुपपद्यते। एवं चैकस्यैव पर्यायस्य ऋक्त्वमिति भवति। पर्यायस्यैव सुमेरुकुमेर्वोर्विषुववृत्तादिस्थलेषु दिनशब्देन व्यवहारः। एवं च प्रतिदिनमादित्येनाक्रामणीयवृत्तस्य ऋक्त्वमिति भवति। तत्र सुमेरुकुमर्वोरुदयावसरे योऽन्तिमः पर्यायोऽन्तिमं दिनार्थवृत्तं तद्रूपा ऋक् याज्येत्युच्यते, तयैवर्चा आदित्यस्य विरुद्धदेशात उदयदेशे दानं क्रियते। या दानार्था ऋक् तस्या याज्यात्वम्। याज्याया दानरूपत्वं ब्राह्मणे उच्यते—

तदुक्तम्—"याज्यया यजति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्यामेव तल्लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते" इत्यनेन। एवं च यजेति तृतीयेन वाक्येन याज्यापाठः, याज्यया गमनरूप एव याज्यया यजनात्मकः तस्य वचनम्। तच्च गमनं सम्मुखमित्युक्तम्। तदनुकारेण होत्रा ऋत्विजा याज्यापाठः, याज्याया ऋचो वचनं, तत्कर्तव्यमिति यजेति वचनेन बोध्यते। ततः परस्ताच्चतुर्थेन वाक्येन 'ये३यजामहे' इत्यनेन वस्तुतो रश्मीनां यागकर्तृत्वं तदभिप्रायेण ये यजामह इति बहुवचनम्, ये इत्यनेन सर्वेषां रश्मीनां न तादृग्रूपत्वं किन्तु केषाञ्चिदेवेति बोधनाय ये इति बहुवचनान्तो निर्देशः। लोके यज्ञानुष्ठाने यच्छब्दस्यार्थाविज्ञानेन तत्सार्थक्यायाज्ञानादिवशतः स्वरूपाज्ञानेनाव्यक्तार्थाभिप्रायेण यच्छब्दप्रयोगः। तत्रैवाज्ञाने सम्भविनो दोषस्य निमित्तत्वेन कल्पनं स्त्र्यपराधादित्यादिना सूत्रकारेण। परवर्तिभिर्याज्ञिकैर्मीमांसकैरपि तस्यैवानुसरणम्, परन्तु तत्र बहु-

वचनस्यात्मनेपदस्य सार्थक्यं तु यथाकथंचन प्रयोगभेदाभिप्रायेण होतॄणामानन्त्येन बहुवचनस्य कथञ्चनोपपत्तिं समर्थ्यात्मनेपदमनित्यत्वादिनासमर्थ्यते, तत्तु सर्वथाऽयुक्तमेव।

भवतु यथाकथञ्चित्। यागकर्तारोऽत्र रश्मयस्तेषां विभिन्नेऽवसरे तथात्वेन प्राप्त्या ये इति सर्वनाम्ना बहुवचनेन निर्देशः, यागफलस्यापि तेष्वेवेति यजामह इत्यात्मनेपदस्याप्युपपत्तिरिति प्रतिपादितम्। पञ्चमं वाक्यं तु द्व्यक्षरं वौषट्रूपम्। अत्र वौ इत्यनेनादित्यस्य बोधस्तत्र षडित्यनेन ऋतुषट्कं, तत्त्रार्पितमिति तस्योदयात्परवर्त्यवस्थाबोधकत्वम्। एवं सत्यनेन वाक्यजातेन पूर्वोक्तावस्थात्रयं बोध्यते साम्मुख्यं तदुभयपार्श्वयोस्तिर्यक्त्वेन प्रवृत्तिरिति सर्वथाऽऽदित्यगत्यनुकारबोधकत्वमत्रेत्येतस्मिन्प्लुत्यादिना द्विविधार्थबोधकपदसंश्लेशबोधकत्वं प्लुतेरित्येतेषामेव वाक्यानामक्षराणां तथात्वसंभवो नान्येषां वाक्यानामक्षराणामित्येषामेव छान्दस्यत्वेन स्तवः। स्मृतावप्येतेषामेव विष्णुरूपत्वेन स्तुतिः।

तदुच्यते—"चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्या स गे विष्णुः प्रसीदतु"॥ इति।

प्रजापतेः साप्तदश्यं ब्राह्मणे बोध्यते, यथैतरेये उच्यते "सप्तदशो वै प्रजापति"रिति। अत्र वैशब्देन प्रजापतेः साप्तदश्यं प्रसिद्धं बोध्यते। तस्य कथमुपपत्तिरिति। तत्प्रतिपादनार्थं ब्राह्मणउच्यते—"सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान्संवत्सर संवत्सरः प्रजापति"रिति। अत्र प्रजापतेः सप्तदशत्वं कथमिति कथनार्थं ब्राह्मणे प्रथमतः प्रजापतिः संवत्सराभिन्न इति प्रतिपाद्य संवत्सरे सप्तदशत्वं व्यवस्थापयितुमुच्यते 'द्वादश मासाः पञ्चर्तव' इति। तत्र संवत्सरे साक्षात्सप्तदशसंख्याऽयोगेन सप्तदशत्वस्य व्यवस्थापयितुमशक्यत्वात्तदवयवगतसङ्ख्यया तद्व्यवस्थाप्यते। अवयवसंङ्ख्ययाऽवयविनः सङ्ख्याव्यवस्थापनेऽनाम्रेडितरूपेणावयवसङ्ख्यायोगो वक्तव्यः। स चात्र न संभवतीति संवत्सरमाम्रेड्य संवत्सरद्वये विभिन्नावयवसङ्ख्यावशतस्तत्साप्तदश्यं व्यवस्थाप्यते। यथा संवत्सरस्य मासरूपोऽवयव एकः ऋतुरूपोऽवयवश्चापरः। नह्येकस्मिन् संवत्सरे मासानां द्वादशसङ्ख्या, ततः पृथगृतुसङ्ख्या प्रवर्तते। संवत्सरेऽवयवसङ्ख्याप्रदर्शनार्थं मासरूपमानग्रहणे तद्द्वादशत्वसङ्ख्यया संवत्सरः पूर्णो भवति। तावतैव तस्य प्रदर्शनसंपत्तेर्ऋतुरूपमानान्तरानपेक्षा। ऋतुरूपमानग्रहणे च तेनैव संवत्सरस्य पूर्णतया प्रदर्शने न मासरूपमानान्तरापेक्षा भवति। यद्यपि मासाभ्यामेव ऋतुर्घटितो भवति तथापि ऋतोर्मासद्वारको मासस्य वा ऋतुद्वारकः सम्बन्धो नात्र विवक्षितः। अन्यथा मासानामृतुद्वारकसम्बन्धविवक्षणे

संवत्सरेण ऋतूनामेव सम्बन्धःसाक्षात्स्यात्, न तदा माससङ्ख्या संवत्सरेण सम्बन्धुं शक्या। उपस्थितर्तुसङ्ख्ययैव तत्सिद्धेः।

एवमृतूनां मासद्वारकसम्बन्धविवक्षणे मासानामेव साक्षात्सम्बन्धः संवत्सरेण स्यात्तदानीमृतूनां संवत्सरेण साक्षात्सम्बन्धाभावेन तदीयसङ्ख्यायाः संवत्सर-सम्बन्धायोगः। साक्षादवयवगतसङ्ख्यायोगावसरेऽवयवावयवसङ्ख्यायोगस्यापि विवक्षणेऽनेकपारम्परिकावयवसत्त्वे एतावतामेवावयवावयवानां सङ्ख्या विवक्ष-णीया नान्येषामिति विनिगमनाभावः। यथा संवत्सरस्यावयवा मासा एवमृतवो दिनानि दिवारात्रं घटीमुहूर्तादिक्षणपर्यन्तं तदवयवाः। तत्रर्तुपर्यन्तमेवावयवावय-वसङ्ख्या नियन्तव्या, न परस्तादित्यत्र न विनिगमकम्। अथोच्येत प्रजापतेः सप्तदशत्वव्यवहार एव संवत्सरे ऋतुपर्यन्तावयवावयवसङ्ख्याग्रहणनियामकः। आदित्याभिन्नप्रजापतेः स्वातन्त्र्येण सप्तदशत्वसिद्धेः तदानुकुल्याय संवत्सरेऽपि उक्तवशतः सा नियम्येत। अत्र तु संवत्सरसम्बन्धिसङ्ख्ययैव प्रत्युतादित्या-भिन्नप्रजापतिसङ्ख्याव्यवहार उपपाद्यते। अस्यां दशायां नियामकस्यासत्त्वे उक्त-विधनियमनासम्भवोऽन्योन्याश्रयदोषापातात्। किञ्चादित्याभिन्नप्रजापतौ सप्त-दशत्वमुपपादयितु किमिति संवत्सरावयवावयवसङ्ख्यया अनियततया तदुपपादनम्। सप्तदशवारं संवत्सरावृत्त्याऽपि संवत्सरे सा सङ्ख्या स्यात्, तत्साम्यादपि प्रजापतेः सप्तदशत्वमुपपादितं स्यात्।

अथ संवत्सरे सङ्ख्याऽऽवृत्तिगतसङ्ख्यानुरोधेनेति सप्तदशवारमेवावृत्ति-स्तत्र वक्तव्या न न्यूना नाधिकेत्यत्र प्रजापतेः सप्तदशत्वमेव नियामक-मिति समाधिस्तुल्यः। अवयवावयवसङ्ख्याग्रहणे आवृत्तिसङ्ख्याग्रहणे चेति। तस्मान्नेदमुपपादनं सम्यक्। किञ्च भक्षितेऽपि लशुने न शान्तो व्याधिरिति नयेन नात्र निस्तारः। मासर्तुरूपावयवसङ्ख्याविवक्षणेऽष्टादशैव सङ्ख्या भवेत्। मासानां द्वादशसङ्ख्याकत्वात्, ऋतूनां च संवत्सरे षट्संख्याया एव प्रसिद्धेः। अतएव अनुपपत्त्या ऋतुष्वपि अन्याय्यकल्पनाश्रयणेन सङ्ख्यान्तर व्यवस्थाप्यते 'हेमन्तशिशिरयोः समासेने'ति। तावता ऋतुपञ्चकमर्थः। तत्रापि किमित्यनयो-रेवर्त्वोः समासो नापरेषामृतूनामिति विनिगमकाभावः। अथान्यर्तुद्वयसमास-स्यापीदमुपलक्षणं तावता किमित्येषा क्लिष्टा कल्पनाश्रयणीया प्रकारान्तरेणापि संवत्सरगतत्वेन सप्तदशत्वसंख्याया व्यवस्थापनसंभवः। यथा—मासा द्वाद-शायने द्वे ऋतुदिनरात्रिरूपविभागत्रयमित्यनेनापि सप्तदशत्वसङ्ख्यासंपत्तेः। तस्मादादित्याभिन्नप्रजापतौ सप्तदशत्वं कल्पनान्तरमूलकं प्रसिद्धं, सैव च प्रसिद्धिः वै शब्देन द्योत्यते। तदनुसारेण संवत्सरेऽपि सेति वक्तव्यम्। तथा

सति सा प्रजापतौ स्वातन्त्र्येणोक्तसङ्ख्यासिद्धिः कथमिति चेत्, अत्रोच्यते—

प्रजापतिर्हि आदित्यस्तस्य बिम्बतः पृथिव्या आसमन्तात्तदीयं भास्वरं तेजो बिम्बादर्शनकाले दैशिकषोड़शांशपर्यन्तं भासते। ते षोड़श बिम्बादर्शन-कालिका दैशिकांशास्तानपेक्ष्यायं सप्तदश इति सप्तदशत्वसङ्ख्यायास्तत्र प्रसिद्धिः। अत एव सुमेरुकुमेर्वोरादित्यस्योदयतः पूर्वमेकमासपर्यन्तः सावित्रः प्रकाशस्ततः पूर्वं चैकमासपर्यन्त औषसः प्रकाशः प्रकाशते। एकमासार्थं च तत्रां-शाष्टकमारोहार्थमादित्येनापेक्ष्यते।

अयं भावः—आदित्येन दक्षिणोत्तरयोरयनयोर्गमनागमनाभ्यां दक्षिणोत्तर-वृत्तगताश्चतुर्णवत्यंशा ऊर्ध्वाधरभावेन उपयुज्यन्ते तावता च संवत्सरः पूर्यते द्वादश-मासात्मकः। इत्थं च द्वादशभिर्मासैश्चेदादित्येन चतुर्णवतिरंशा उपयुज्यन्ते तदैक-मासेन कतीत्यनुपातेनांशाष्टकं लभ्यते। एवञ्चोदयात्पूर्वमंशाष्टकं सावित्रमास-रूपं तत्पूर्वमंशाष्टकमौषसमासरूपमिति षोड़शांशानामादित्यप्रकाशसम्बन्धिनाम-पेक्षया आदित्यरूपः प्रजापतिः सप्तदशः। न चापरसङ्ख्यापूरणमपरेणेति वाच्यम्। अन्यगतसङ्ख्यापूरणस्य 'यजमानपञ्चमा इड़ां भक्षयन्ति' इत्यत्र वेदे ऋत्विग्गतसङ्ख्यापूरणस्य यजमानेन दृष्टत्वात्। अत एव तस्य सप्तदशत्वेन व्यवहारः प्रजापतिश्चादित्य इत्युक्तम्। औषस अंशा अष्टौ भवन्ति। अत एव तस्यास्तत्र त्रिंशत्पर्यायपर्यन्तं सम्बन्धो वेदे प्रतिपाद्यमान उपपद्यते। तत्र प्रति-पर्यायमेकैकपादन्यासमपेक्ष्य त्रिंशत्पादन्यासैः क्रमवर्णनस्य औषससूक्तगतस्योप-पन्नत्वम्, तदुक्तं—"हित्वी शिरो जिह्वया वावदच्चरत्त्रिंशत्पदान्यक्रमीदि"त्युष-सं प्रत्युच्यते वेदे। अतएव त्रिंशदुषस्तावकं सूक्तमप्युपपद्यते। प्रतिपर्यायं भिन्ना-मुषसं गृहीत्वा त्रिंशत्पदत्वस्याप्युपपत्तिः। त्रिंशदुषस्तावके सूक्ते उषसां त्रिंशत्त्वं तत्समूहपञ्चकेन वर्ण्यते। तत्र उषसां पञ्चकं पृथगुक्त्वा तत्र प्रत्युषसं पञ्च पञ्च भगिन्य इति वर्णनेन उषसां संघपञ्चकमुच्यते, तेन संघपञ्चकेन उषसां षड़हपञ्चकयोगो विज्ञायते तद्वशतस्तासां पञ्चत्वयुक्तत्ववर्णनया मासरूपः काल उषस इत्यपि भवति। यथोषस उक्तरीत्या पञ्चसम्बन्धियोग एवं सवितुरपि पञ्चसङ्ख्याकयोगाभिप्रायेण मित्रसूक्ते "मित्राय पञ्च येमिरे" इत्युच्यत इत्यादिकं पूर्वं प्रतिपादितम्।

एवं चोक्तांशगतषोड़शसङ्ख्यां गृहीत्वाऽधिकसंख्यापूरणेन प्रजापतिः सप्तदशः। किञ्च सुमेरुकुमेर्वोरुदयन्नादित्यः प्रतिपर्यायं षोड़शकलाभिरुदेतीत्य-तस्तस्य उपनिषत्सु षोड़शकलपुरुषत्वेन व्यवहारः। ताः षोड़शकलास्तासु सम्पूर्णस्य सामान्येनैकत्वेन प्रजापतिसम्बन्ध इति सप्तदशत्वं तस्य। प्रजापतित्वं

चादित्यस्य, रश्मीनां प्रजात्वेन वर्णनात्। किञ्च वेदे आदित्यस्यैव स्तव इति स्तूयमानः प्रजापतिरादित्य एवेति दिक्।

एवं ब्राह्मणे सरस्वतीभृगुप्रभृत्युत्पत्त्याख्यायिकोच्यते। शतपथे राजसूये वरुणस्याभिषेके सारस्वतीनामपामर्थवादे उच्यते "वरुणस्य वा अभिषिच्यमानस्येन्द्रियं वीर्यमपाक्रामत्। तत्त्रेधाऽभवत्। भृगुस्तृतीयं, श्रायन्तीयं तृतीयं, सरस्वती तृतीयम्" इति। तैत्तिरीये इन्द्रसम्बन्धेनेदमेवोच्यते। यथा—"इन्द्रस्य सुषुवाणस्येन्द्रियं वीर्यमपाक्रामत्। तत्त्रेधाऽभवत्। भृगुस्तृतीयमभवत्। श्रायन्तीयं तृतीयं, सरस्वती तृतीयम्" इति। अत्राभिषेकेण कथं वरुणस्येन्द्रियवीर्ययोरपक्रमः। कथं च तयोर्भागत्रयं भृग्वादिरूपमभवत्। एवमिन्द्रस्य सवनेनेन्द्रियवीर्ययोरपगमः। कथं चेन्द्रियवीर्ययोरुक्तवद्भृग्वादिरूपतेति। अर्थवादात् स्वार्थतात्पर्याभावेन दोषाभाव इति तु न युक्तम्। अर्थवादत्वेऽपि न सर्वथा तात्पर्याभावः, किन्तु विधेयाभिप्रायेण तात्पर्याभावेऽपि वाच्यार्थस्य नित्यार्थपरतया व्याख्याने तात्पर्यस्य मीमांसकैः स्वीकृतत्वात्।

अत्रोच्यते—ऐतरेयब्राह्मणानुसारेणार्थकल्पने उपपन्नतायाः संभवः। तथाहि अत्र प्रथमेऽर्थवादे वरुणस्याभिषेकावसरे इन्द्रियवीर्ययोः परा गतिरुच्यते। द्वितीये च इन्द्रस्य सवनावसरे तथा। तावता विज्ञायतेऽभिषेकः सवनं वा यदा तदानीमिन्द्रियाभावः। इन्द्रियत्वेन चादित्यस्यैव रूपणम्। अत एव वैष्णवे सूक्ते विष्णोः शिपिविष्ट इति नाम्न इन्द्रियार्थकता वेदे उच्यते। तदुक्तं निरुक्तकारेण, 'शिपिविष्टः विष्णुरिति विष्णोर्द्वे नामनी भवतः। कुत्सितार्थीयं पूर्वमित्यौपमन्यवः' इति। तदर्थं मन्त्रोऽपि तेनोक्तः—"किमित्ते विष्णो परिचक्ष्यं भूत्प्रयद्ववक्षे शिपिविष्टो अस्मि" इत्यादिः। तदर्थस्तेन व्याख्यातः, किं ते विष्णोऽप्रख्यातमेतद्भवति अप्रख्यानीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मि अप्रतिपन्नरश्मिः इति। दुर्गाचार्येणात्रोच्यते तदर्थः। किमेतदेवैकं विगतरश्मिरूपं परिचक्ष्यं परिख्यापनीयं भूत् भवति, नान्यानि तव रूपाणि सन्ति येनैवं प्रववक्षे पुनःपुनर्ब्रूषे अस्माकमग्रतः शिपिविष्टो अस्मीति। अप्रतिपन्नरश्मिर्हि सूर्य उदयकाले निर्वेष्टितः शेपस्वरूपो भवति। ततस्तद्रूपगुणयोगित्वं कुत्सितार्थमित्युपपद्यते इति। यद्यपि वरुणेन्द्रियवीर्ययोरपि आदित्यरूपत्वं तथापि क्रियाभेदाद्भेदं मत्वोच्यते वरुणस्येन्द्रियापराम इति। तस्यार्थः—वरुणोऽभिषेकावसरे इन्द्रियभावानापन्न इति। ऐतरेयब्राह्मण ऐन्द्राभिषेकावसरे मन्त्रा उच्यन्ते—

"अस्मिन् राष्ट्रे श्रियमावेशयाम्यतो देवीः प्रतिपश्याम्यापः।
दक्षिणं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं दधामि ॥

सव्यं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं वर्धयामि।
पूर्वमन्यमपरमन्यं पादाववनेनिजे ॥
देवा राष्ट्रस्य गुप्त्या अभयस्यावरुध्यै।
आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे" ॥ इति।

यद्यप्यत्र भाष्यकारेण सायणेन इन्द्रियशब्दस्येन्द्रियसामर्थ्यप्राप्तिरर्थ उच्यते तथापि तावद्विदूरार्थकलक्षणस्वीकारापेक्षया तां विना प्रकारान्तरेणार्थकथनस्य समुचितत्वम्। एवं चात्रोच्यते—यस्मिन् राष्ट्रे श्रियमावेशयामि अतो राष्ट्रतो विरुद्धदेशे भासुराणामपां सन्दर्शनं मम। तच्च वर्त्तमानकालं पश्यामीत्यनेनोच्यते। यद्यप्यत्र कर्ता न स्पष्टमुच्यते तथाप्यत्र कर्तृत्वेन इन्द्रस्य वा आदित्यस्य वा ग्रहणम्। ऐन्द्राभिषेकसम्बन्धात्। वेदे आदित्यस्यैव स्तव इति सर्वा वर्णना आदित्यपरेति वा। एवं सति वक्ता आदित्यो ब्रवीति, यदा एकस्मिन् राष्ट्रे श्रिय आवेशनं ततो राष्ट्रादपरदेशेऽपः प्रतिपश्यामीति।

अयं भावः—आदित्यो यदोदेत्येकस्मिन् देशे व्यक्तं तदानी तद्विरुद्धदेशे तस्यास्तमयः। ततश्च तत्रास्तोत्तर व्यक्तस्य तेजसः क्रमेण न्यूनीभावेनाव्यक्ततेजसः प्रवृत्तिः। तेजसश्चाप्त्वेन वर्णना वेदे इत्युक्तम्। अत एव वेदे आदित्यस्यैव वर्णनेन तस्येन्द्रत्वात्तेन विनाश्यो वृत्रादिरसुरोऽन्धकाररूपस्तेनापां निरोध उच्यमानोऽपा तेजरूपत्व एव संभवति। इन्द्रेण च वृत्रस्य विनाशनेनापां प्रवर्तनमुच्यमानमपि तदैव सङ्गच्छते। अतएव चेन्द्रस्य वृष्टिकर्तृत्वमुच्यमानमपि सङ्गतमित्यन्यत्र विस्तरेण निरूपितम्।

श्रीश्च प्रातःकालिकी सन्ध्या तद्रूपिण्युषा वा। अत एव यजुर्वेदे "श्रीश्च ते लक्ष्मीश्च पत्न्या" इति प्रोच्यमानं सङ्गतम्। तत्र श्रीर्मण्डलाश्रयणात् प्रातःकालिकी, लक्ष्मीश्च लक्षणात्सायन्तनीति पत्नीद्वयम्। अन्यथा श्रीलक्ष्मीशब्दयोरेकार्थत्वेन भेदबोधकद्विवचनयुतत्वेन वर्णनमसङ्गतं स्यात्। अत एव तत्रैव मन्त्रेऽग्रेऽहोरात्रे रूपमित्युक्तम्। तदनुसारेण श्रियः प्रथमेनाह्ना द्वितीयस्या लक्ष्म्याश्च द्वितीयया रात्र्या क्रमिकः सम्बन्धो भासते तस्योपपत्तिः। एवं च श्रिय आवेशनवचनादेकस्मिन् देशे उदयावसरप्राप्तिः। ततो विरुद्धेऽन्धकारयुते देशेऽपामव्यक्ततेजसां सत्त्वं तद्दर्शनं च। प्रतिपश्यामीत्यत्र प्रतिशब्देन विरुद्धभावप्रतीतिः। एवं भिन्नदेशस्थितेनादित्येनोदितेन तद्विरुद्धदेशे यत्रानेन पूर्व स्थितं तत्र देशभेदेन भिन्नस्यास्तगतस्यादित्यस्यास्ते वह्नौ स्वतेजोनिधानान्मलिनस्य तेजसः प्रदानेन तद्रूपाभिरद्भिस्तस्य निर्णेजनं शुद्धिः संपाद्यते। तच्च निर्णेजनं पुनस्तत्रोदयपर्यन्तं भवति। उदये च तत्रादित्यबिम्बस्य भास्वरत्वं दृश्यते तच्च

भास्वरत्वं तत्राद्भिर्निर्णेजनात्सञ्जातमिति कल्पना। एवं रूपता चोदयास्तमययोः पर्यायेण सर्वत्र प्रवृत्त्या सर्वत्र भवेत्। तत्र विशेषबोधार्थं पूर्वोक्तनिर्णेजनं परवर्ति-मन्त्रेण स्पष्टमुच्यते। तथाहि—"दक्षिणं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं दधामि। सव्यं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं वर्धयामी"ति॥ अत्र पादयोर्दक्षिणसव्य-शब्दाभ्यां विशेषणाद्दक्षिणशब्दो दक्षिणावर्त सुमेरुगतं पादं बोधयत्यादित्यरूपम्। एवं सव्यशब्दो वामावर्त कुमेरुगतं पादं बोधयति। एवं चैतत्पादयोरद्भिर्निर्णेजनं मलनिरासार्थम्। अद्भिर्मलनिर्णेजन एव निश्शब्दपूर्वस्य निज्धातोः प्रयोगात्। मलसम्बन्धश्चादित्यरूपे पादे रात्राविति पूर्वमुक्तम्।

एवं सति दक्षिणं दक्षिणावर्तं पादं सुमेरुस्थमवनेनिजेऽद्भिः प्रक्षालयामि, तदानीमस्मिन्कुमेरुरूपे राष्ट्रे भ्राजमाने इन्द्रियं दधामीति। तत्रत्यभासमानादित्य-मण्डले इन्द्रियं इन्द्रियभावं दधामि। मण्डलस्यैवेन्द्रियत्वेन रूपणम्। सुमेरौ रात्रिप्रवृत्त्या कुमेरौ दिनप्रवृत्त्येन्द्रियस्थापनोक्तिः। एवं कुमेरौ सर्वस्य पादस्य मालिन्येऽर्थात्तत्र रात्रिप्रवृत्तौ तस्याद्भिः प्रक्षालने सुमेराविन्द्रियवर्धनमिन्द्रियस्य प्रवर्तनम्। सुमेरोरूर्ध्वमुत्तरस्यां वर्तमानत्वेन वर्धनमूर्ध्वारोपणमित्युक्तिः। तदुक्तं सव्य वाम वामावर्त पादमवनेनिजेऽद्भिः प्रक्षालयामि। तदानीमस्मिन् सुमेरुरूपे राष्ट्रे इन्द्रियं वर्धयामीति। तयोः सव्यदक्षिणयोः पादयोः पूर्वापरशब्देन व्यवहार-पूर्वकमवनेजनमत्र बोध्यते मन्त्रे। तच्चावनेजनं राष्ट्रस्य भ्राजमानस्य गुप्त्यै रक्षणायाभयस्य तमःसकाशात इति शेषः, अवरुद्धिर्लाभस्तस्मै भवति हे देवा इति। तदुक्तम्—"पूर्वमन्यमपरमन्यं पादावनेनिजे। देवा राष्ट्रस्य गुप्त्या अभयस्याव-रुद्धचै" इति। तदुक्त पूर्व पूर्वाञ्चनं पूर्वामभिप्रेत्य गच्छन्तं कुमेरुस्थमिति यावत्।

अयंभावः—कुमेरावादित्यस्य पश्चिमायामुदय उदितस्य तस्यास्तार्थं पूर्वामभिमुखीकृत्य प्रवृत्तिः। तत्पूर्वामभिमुखीकृत्य गमनं पूर्वाञ्चनं। तदभि-प्रायेणादित्यस्य पूर्वप्राङ्प्रभृतिशब्दैर्व्यवहारो वेदे। तच्चा"ग्निःपूर्वेभि"रित्यत्र विस्तरेण प्रपञ्चितम्। तथा च पूर्वमन्यं भिन्नं पादम्। एकस्यैवादित्यस्योपाधि-भेदेन भिन्नता। एवमपरं पश्चिमाञ्चनं पश्चिमामभिमुखीकृत्य गच्छन्तम्। तच्च सुमेरौ, तत्रादित्यस्य पूर्वस्यामुदयेनास्तार्थं पश्चिमामभिमुखीकृत्य गमनात् तस्य प्रत्यङ्ङादिशब्दैर्व्यवहारो यथा—"प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान्" इत्यादौ। तावुभौ पादाववनेनिजे प्रक्षालयामि, अर्थाद्भिन्ने काले भिन्ने देशे इति यावत्। राष्ट्रगोपनार्थमभयप्रापणार्थमित्युक्तं "देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्धयै" इत्यत्र। इमाः पादावने जनीरापो मे द्विषन्तं शत्रुभूतं तमो निर्दहन्तु निरासयन्त्वित्यर्थः। तदिदं पादावनेजनमद्भिः सेचनम्। अयमेवा-

भिषेको यदा वरुणस्य तदानी तस्येन्द्रियमिन्द्रियभावो वीर्यं तेजश्च व्यपगतम्, विनष्टम्। वरुणो हि पश्चिमायां दिशि यत्रोदयो दक्षिणस्यां दिशि। तत्र स्थितस्यादित्यस्य वरुणरूपतेति। स च कुमेरुस्थ आदित्य इति यावत्। तस्याभिषिच्यमानस्योक्तरीत्यास्तगमने तदीयं द्वयमिन्द्रियं वीर्यं च विनष्टम्। तस्यैवास्तोत्तरवर्तितेजोरूपत्वम्। मध्ये च श्रपणीयतमोरूपत्वं सञ्जातमिति गृहीत्वास्तोत्तरकालिकस्य भृगुरूपत्वम्। तदुक्तं 'तत्त्रेधाऽभवत्'। तत्र तृतीयमस्तोत्तरकालिकं तेजस्तद्भूरूपो भृगुरभवत्। मध्यमकालिकतृतीयरूपं च श्रपणयोग्यं तमोऽभवत्।

अथ भावः—तेजसा हि विभिन्नस्य वस्तुनः पाकः। पाकः पचनं स्वरूपतश्च्यावनम्। तद्योग्यता च तमसि इति तत्पचनीयत्वेनोच्यते—'श्रायन्तीय तृतीय'मिति। श्रै पाके श्ना पाके इत्यस्माद्धातोरुक्तरूपसिद्धिः। तस्य तृतीयभाव उक्तः। उदयप्राक्कालिकतेजोऽभिप्रायेणोच्यते—तृतीयभागकालिकं तेजश्च सरस्वती अभवत्। सरस्वती तेजोयुक्ता उषा इतियावत्। सरःशब्द उदकनामसु पठ्यते, उदकं च तेजस्तद्युक्ता उषा इति पूर्वमुक्तम्। यद्यप्यत्र भृग्वादीना तृतीयभागत्वमुक्तं तथापि प्रजापतिदुहित्रन्वाख्यानब्राह्मणानुरोधेन प्रथमतृतीयभागत्व भृगोर्विज्ञायते। तत्र हि प्रजपते रेतःप्रथममुद्दीप्तमादित्यरूपं तदभवत्। द्वितीयमुद्दीप्त भृगुरभवत्। तत्र प्रथमं पूर्व पूर्वोक्तरीत्या पूर्वाञ्चनं कुमेरुस्थादित्यरूपं तदभवत्। ततः परस्तादादित्यास्तमये यदुद्दीप्त स भृगुरूपमभवत्। अत एव स्थलान्तरेऽस्तोत्तरं यावद्रश्मयो भवन्ति तत्र भृगुरभवदित्यभिप्रायेणोच्यते—"अर्चिषि भृगुरभवदिति"। इन्द्रियकल्पना उदयोत्तर प्रवर्तते। उदयावसरेऽस्तावसरे रात्रौ च सा न भवति। तदेव गृहीत्वोक्तेन ब्राह्मणद्वयेनेन्द्रियवीर्ययोरपगम उक्त इन्द्रवरुणयोः। उदयावसरे चेन्द्रियभावाभावो मैत्रावरुणसूक्ततो व्यक्तम्। तत्र मित्रावरुणयोःसूक्ते उच्यते तयो. "दक्षं दधाते अपस"मिति। मित्रावरुणयोरादित्यस्योदयाव्यवहितपूर्वकालवर्तित्वमस्ताव्यवहितोत्तरकालवर्तित्वम्। ताभ्यामुदयतोऽस्तमयतो वा धारणमनेनोच्यते। तत्र दक्षस्य विशेषणमपसमिति तेन तदानीमनिन्द्रियभावो बोध्यत इति पुरस्ताद्विस्तरेण प्रतिपादितम्। एवं "मा शिश्नदेवा अपिगुर्ऋतं नः" इत्यनेनापि उदयावसरेऽनिन्द्रियभावो बोध्यत इति प्रतिपादितं पुरस्ताद्विस्तरेणेति। एवञ्चोक्तरीत्या अभिषेकावसरे वरुणस्य सवनावसरे इन्द्रस्येन्द्रियवीर्ययोरभाव उच्यमान उक्तरीत्या रात्रिसम्बन्धादुपपद्यते। एवञ्च तस्य त्रेधाभावेन भृगोरुत्पत्तिः श्रायन्तीयस्य सरस्वत्याश्च सत्त्वमप्युक्तरीत्योपपन्नमेवेति।

एवं "पुरुषं वै देवाः पशुमालभन्त" इत्यैतरेयब्राह्मणगताख्यायिका आदित्य-परत्वेनैवोपपद्यते। तथाहि ऐतरेये पशुयागाङ्गपुरोडाशयागस्य विधावाख्यायिकोच्यते "पुरुषं वै देवाः पशुमालभन्त तस्मादालब्धान्मेध उदक्रामत् सोऽश्वं प्राविशत्तस्मादश्वो मेध्योऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स किंपुरुषोऽभवत्तेऽश्वमालभन्त सोऽश्वादालब्धान्मेध उदक्रामत् स गां प्राविशत्तस्माद् गौ मेध्योऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स गौरमृगोऽभवत्तेगामालभन्त स गोरालब्धान्मेधउदक्रामत् सोऽविं प्राविशत्तस्मादविर्मेध्योऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स गवयोऽभवत्तेऽविमालभन्त सोऽवेरालब्धान्मेधउदक्रामत् सोऽजं प्राविशत्तस्मादजो मेध्योऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स उष्ट्रोऽभवत् सोऽजेज्योक्तमाविवाग्मत तस्मादेष पशूनां प्रयुक्ततमो यदजस्तेऽजमालभन्त सोऽजादालब्धान्मेधउदक्रामत्स इमां प्राविशत्तस्मादियं मेध्याऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स शरभोऽभवत्, त एते उत्क्रान्तमेधा अमेध्याः पशवस्तस्मादेतेषां नाश्नीयात्तमस्यामन्वगच्छन् सोऽनुगतो व्रीहिरभवत्तद्यत् पशौ पुरोडाशमनुनिर्वपन्ति समेधेन नः पशुनेष्टमसत्केवलेन नः पशुनेष्टमसदिति"।

अत्र पुरुष-अश्व-गो-अवि-अजरूपाणां पञ्चानां पशूनां देवैर्यज्ञ आलम्भः। आलब्धात् पशोर्मेधनिर्गमोऽन्यत्र तस्य प्रवेशः। ततो मेधाभावादालब्धस्य पशोः परित्यागः। परित्यक्तस्य प्राण्यन्तररूपत्वम्, अन्ते अजादालब्धान्निर्गतो मेधो भूमौ प्रविष्टस्तस्य तत्र व्रीहिभावः। तस्माद् व्रीहिजन्यपुरोडाशयागः पशुयागे मेधयुक्तत्वायानुष्ठेयः। तावता पशोर्यागे मेधयुक्तता भवति। तदुक्तं ब्राह्मणे—"तद्यत् पशौ पुरोडाशमनुनिर्वपन्ति समेधेन नः पशुनेष्टमसदि"ति। यागे कृत्स्नस्य पशोरेव द्रव्यत्वेन विधानात्तस्यैव हविष्ट्वं भवति। हविःशब्दो हूयमानपदार्थार्थकः। एवञ्च पशोर्हविष्ट्वे तस्य हूयमानताऽपेक्षिता। न च सा तस्य। पशुयागे हृदयाद्यङ्गानामेव हूयमानत्वम्। तदर्थश्चावदानरूपः संस्कारो हृदयादीनामङ्गानामुच्यते न तु पशोः। तदुक्तं "हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस" इत्यादिना। एवञ्च कृत्स्नः पशुर्देयत्वेनोच्यते, होमावसरे च कतिपयानि तदङ्गानि हृदयादीनि हूयन्ते इति पशोर्भूयान् भागोऽदत्तोऽहुतो विनष्टो भवति। तदुक्तं ब्राह्मणे—"तदाहुर्हविरेष यत् पशुरथास्य बह्वपैति लोमानि त्वगसृक्कुष्ठिकाः शफा विषाणे स्कन्दति पिशितमि"ति। एतैर्भागैर्न्यूनस्य कथं पूर्णत्वमित्याशङ्का ब्राह्मण उच्यते "केनास्य तदापूर्यते" इति, तदुत्तरं तत्रैवोच्यते "केवलेन नः पशुनेष्टमसत्" इति। अस्यार्थो भाष्यकारेणोच्यते—'केवलेन साधनान्तरनिरपेक्षेण मेधपूर्णेन पशुनेष्टं भवत्विति' तदभिप्राय इति।

न च पशुयागस्थले पिष्टमयमेव पशुं कृत्वेष्टसिद्धिः। पिष्टमये पशौ लोमादीनामपगमाभावेन न्यूनत्वाभावादिति वाच्यम्। पशुविधायकवाक्ये—"अग्नीषोमीयं पशुमालभेते"त्यादौ वास्तवपशोरेव विधानात्। च न लक्षणया पिष्टपशोर्बोध इति वाच्यम्। 'न विधौ परः शब्दार्थ' इति तद्विरोधात्। एवञ्च पिष्टमयपशुना यागकरणे विहिताकरणादविहितकरणाद्यागस्य प्रायश्चित्तीयता व्यङ्गत्वञ्च स्याताम्। एवञ्च पशुयागे पशुस्थाने पिष्टमयं पशुं गृहीत्वा यागानुष्ठानमवैधमेव भवतीति वास्तवपशुनैव यागस्तत्रोक्तरीत्या न्यूनतापूर्त्यर्थः पुरोडाशयागः। तयोरङ्गाङ्गिभावस्य मीमांसायां निर्णयात्। तत्र पुरोडाशप्रशसार्थोक्ताख्यायिका 'पुरुषं वा' इति।

तत्र किमिति पञ्चैव पशव उपादेया उक्ताः, किमिति पुरुषादय एव ते। अन्येषा कुतो न ग्रहणम्। तत्र मेधव्यपगमः कथम्, कथञ्च तस्यान्यत्र प्रवेशः। उद्गतमेधस्य पशोः कथं पश्वन्तररूपता। अन्ते व्रीहिप्रवेशो मेधस्य कथम्, को वा मेधपदार्थो यस्यैवं गमागमौ भवत.। कैश्चित् कालभेदेन उपपादनार्थं प्रयत्यते, पूर्वं पुरुषाणामेव यज्ञे पशुत्वेनोपयोग आसीत्। ततः क्रमेणोन्नतविचारास्ते पुरुषान् परित्यज्याश्वादीनुपयोजितवन्त इत्यादिना। अतो प्राणिवधे दोषदर्शनेन पशुस्थाने पुरोडाशस्य प्रवर्तनमिति। अपरे पुनर्वर्णयन्ति पूर्वं गृहीतानां दोषदर्शनेन परित्यक्तानां पुनस्तत्त्वेनोपयोगाभाव इति। दोपदर्शनेनाजस्य परित्यागे पुरोडाशस्योपयोगनिर्णये कथं पुनरजस्य पशुत्वेनोपयोग इति। किञ्च परित्यक्तस्य पश्वन्तररूपत्व तावताऽनुपपन्नम्। अविः परित्यक्त उष्ट्रः सञ्जातइति हि वर्ण्यत आख्यायिकायाम्। तस्मान्नेदंपरैषा वर्णनेति। मीमांसकादयस्त्वत्र ब्रुवते—अयं त्वर्थवादः। शास्त्रदृष्टविरुद्ध तत्रोच्यमानमपि न तत् प्रमाणम्। तस्य विधिस्तावने तात्पर्यात्। अतात्पर्यार्थस्य विरोधेऽसामञ्जस्येऽपि दोषाभाव इति। ननु तात्पर्याविषयत्वेन मुख्यार्थस्य विरोधेऽपि न दोषस्तर्हि किमित्येषा विरुद्धा उन्मत्तकल्पा वर्णना क्रियते। किमिति चैतादृशस्य ग्रन्थस्य व्याख्यानार्थं व्याख्यातॄणां प्रयासः। नहि विषं भुङ्क्ष्वेति वाक्यस्य पित्रादिहितकृत्प्रयुक्तस्य स्वार्थे तात्पर्याभावे तद्व्याख्याने प्रयासो दृश्यते, विषमित्युच्यते कीदृशं तद्विषमित्यादिकः। एवं चैतस्या आख्यायिकाया अर्थवादत्वेऽपि तत्त्वेन विध्युपयोगेऽपि स्वार्थे किमित्येषा वर्णना एवंक्रमिका। कथं च मेधव्यपगमः। को वा मेधपदार्थः। कथं च तस्यान्यत्र प्रवेशः। कथं च त्यक्तमेधस्य पशोः पश्वन्तररूपत्वमिति वर्णिता अंशा निर्णयमपेक्षन्त एव।

अथ मीमांसाभाष्यरीत्यैतस्य व्याख्यानम्। तत्र हि भाष्ये वपायाग-

प्रशंसार्थेऽर्थवादे "स प्रजापतिरात्मनो वपामुदक्खिदत्। तामग्नौ प्रागृह्णात्। ततोऽजस्तूपर उदपद्यतेति" रूपे उच्यते, "कथं पुनरनुत्खिन्नायां वपायां प्रजापतिरात्मनो वपामुदक्खिददित्याह? उच्यते—असद्वृत्तान्तान्वाख्यानं स्तुत्यर्थेन प्रशंसाया गम्यमानत्वात्। इहान्वाख्याने वर्तमाने द्वयं निष्पद्यते यच्च वृत्तान्वाख्यानं यच्च कस्मिंश्चन प्ररोचना द्वेषो वा। तत्र वृत्तान्तान्वाख्यानं न प्रवर्तकं निवर्तकं चेति प्रयोजनाभावादनर्थकमित्यविवक्षितम्। प्ररोचनया तु प्रवर्तते द्वेषान्निवर्तते इति तयोर्विवक्षा। वृत्तान्वाख्याने आदिमत्तादोषो वेदस्य प्रसज्जेत। कथं पुनरिदं निरालम्बनमन्वाख्यायते इति। उच्यते। नित्यःकश्चिदर्थः प्रजापतिः स्याद्वायुराकाश आदित्यो वा। स आत्मनो वपामुदक्खिदत्, वृष्टिं वायु रश्मिं वा। तामग्नौ प्रागृह्णाद्वैद्युत आर्चिषे लौकिके वा। ततोऽज इत्यन्नं बीजं वीरुद्वा। तमालभ्य तमुपयुज्य प्रजाः पशूनाप्नोतीति गौणाः शब्दा" इति। तदनुसारेणात्र प्रकृते तर्हि कीदृशी व्याख्या। भाष्यकारेण तदप्रदर्शनान्न्यूनता भाष्यस्य। तस्मात् कथमिदमुपपादनीयमिति चेदत्रोच्यते—

अत्र देवा रश्मयः। रश्मीना देवत्वं शतपथब्राह्मण उच्यते—"रश्मयो वै विश्वेदेवा" इति। ते आदित्यरूपं पुरुषं पुरुषत्वेन पशुत्वेन आलब्धवन्तः। पुरुष इत्यनेन पूरणात् पुरुष इति पूर्ण रूपं विवक्षितम्। पूर्णत्वं तु तेजसा रश्मिभिर्वा। तादृशेन पूर्णत्वेन पुरुषत्वेन पशुरूपेणालब्धवन्तः। मेधः सारांशः सोऽत्र पुरुषत्वरूपः। तस्य ततो व्यपगमः। पुरुषत्व ततो व्यपगतम्। पुरुषत्वं च पूर्णत्वं तत्ततो व्यपगतं नाम तत्र पूर्णत्वस्याभावः संवृत्तः। एषात्रादित्यस्यास्तमयकालिकी वर्णना। सापि सुमेरुगता। सुमेरौ देवानां निवासात्। आदित्यस्योदयेऽस्तमये च नानाविधाः कल्पना वेदे। अस्तगमन मरणमुदय उत्पत्तिरित्येकविधा कल्पना। अस्तगतस्यान्यत्र दानं यत्रासावुदित इत्यपि कल्पना। दानं च प्रकृते सुमेरावस्तमयवर्णनाद्देवैः क्रियते इति सुमेरावस्तं गन्तु प्रवृत्त आदित्यो दीयते। दानस्य होमरूपत्वं यागरूपत्वम्। देयस्य च पशुत्वं हविष्ट्वमित्येव नानाविधाः कल्पनाः। स तत्रादित्योदेवैर्देयत्वेन पुरुषत्वेन गृहीतः। अस्तमये चादित्यस्य तेजसो न्यूनत्वमिवेति गृहीत्वाऽऽख्यायिकायामुक्तं ततः पुरुषरूपादर्थात्पूर्णरूपान्मेधः सारांशः पूर्णत्वरूपो व्यपगतः। अर्थान्न्यूनतेजाः स सम्वृत्तः। तदिदं न्यूनतेजस्कत्वं पूर्णतेजस्कत्वरूपपुरुषस्य पूर्णत्वस्य व्यपगमेनेति। तदुक्तं—तस्मादालब्धान्मेधः सारोंऽशःपुरुषत्वरूप उदक्रामत्, उत्क्रान्तो निर्गतो विनष्ट इति। ततस्तैरादित्ये वर्तमानेन द्वितीयरूपेणालम्भः कृतः। द्वितीयं च रूपमश्वत्वम्, अश्वत्वमवृद्धत्वम्। अश्वशब्दस्य

'टु ओ श्वि गतिवृद्धयो'रिति वृद्धचर्थाच्छ्विधातोर्निष्पन्न-श्वशब्देन नञा समासेन सिद्धिः। श्वयतीति श्वः। न श्वोऽश्व इति। अवृद्ध अपूर्ण इति यावत्। तेनैवा-श्वत्वेनावृद्धत्वरूपेण पशुत्वेनालब्धवन्त.। गतसारस्य पूर्वस्य पुरुषस्य पूर्णत्वं रूपं परित्यज्य द्वितीयं रूपमवृद्धत्वरूपाश्वत्वं तद्गृहीत्वाऽऽलम्भः। तदुक्तं 'तेऽश्वमाल-भन्ते'ति। उत्क्रान्तमेधमत्यार्जन्त तं परित्यक्तवन्तः। परित्यक्तः स उत्क्रान्तमेधः पुरुषः किम्पुरुषः कुत्सितः पुरुषः किम्पुरुषः स तादृशोऽभवत्। तेजसो न्यूनतया किम्पुरुषत्वम्। एव पूर्व यद्रूप गृहीतमासीत्तदभावेन तद्रूपवतः पुरुषस्य परित्याग इति वर्णना। ते देवास्तदानीमादित्यवर्तिद्वितीयरूपमवृद्धत्वमश्वत्वरूपं तेन रूपेण पशुत्वेन तमालब्धवन्तः। किंवा पूर्वोक्तधातोर्गत्यर्थत्वेन श्वयतीति श्वो गन्ता न श्वोऽश्व इत्यगन्ताऽगमनात्स्थिर इवेति अश्वत्वं, तेन रूपेण पशुत्वेन तमालब्ध-वन्त.। तदपि अवृद्धत्वरूप सारोंऽशस्तस्मादश्वाद्व्यपगतः। अवृद्धत्वाभाववान् संवृत्तः। नचावृद्धत्वाभावो वृद्धत्वमिति कल्पना, अभावाभावस्य प्रथमाभावप्रति-योगिरूपत्वादिति वाच्यम्। अभावाभावस्य प्रथमाभावप्रतियोगिनश्च समनियत-त्वेऽपि एकरूपत्वाभावात्। प्रथमाभावप्रतियोगिनश्च भावत्वेन अभावाभावस्य त्वभावत्वेन बुद्धिविषयत्वाद्भेदात्। अथवा पूर्वोक्तमगन्तृत्वरूपमश्वत्वं तेन रूपेण पशुत्वेनालम्भः। तत्र सारोंऽशोऽगन्तृत्वरूपमश्वत्वं तस्य व्यपगमः। पूर्वोक्त-मगन्तृत्वरूपं स्थिरवद्भाव परित्यज्यास्ताचलं गन्तु प्रवृत्तः। एवं सति अगन्तृत्व-रूपाश्वत्वरूपस्य सारस्य व्यपगमः। ततो देवैरादित्ये वर्तमानमश्वत्वरूपमपि हित्वा तृतीयेन रूपेण तस्यालम्भ कृतः। तदुक्तं 'तस्मादालब्धान्मेधउदक्रामत्स गां प्राविशत्' इति। अर्थात्तृतीयं रूप गोत्वं गमनकर्तृत्वं तेन रूपेण पशुत्वेन तस्यालम्भः। गोशब्दस्य निरुक्तकारेणार्थ उच्यते "गौर्दूर गतो भवती"ति। दूरदेशश्च प्रकृतेऽस्तसविधवर्ती। पूर्व रूपमश्वत्वं तस्य परित्यागात्तेन रूपेण सोऽमेध्यः संवृत्तः। उत्क्रान्तमेधस्य परित्यागे सोऽश्वो गौरमृग सञ्जात इति। अत्र गौरमृग इत्यत्र नैकं पदं किन्तु पदद्वयम्। गौः, अमृग इति तादृशः सञ्जातः।

अयं भावः—गन्तुरादित्यस्य द्वे रूपे, एकं मृगरूपमपरममृगरूपम्। मृगशब्दस्य निरुक्तकारेण मार्गणीयार्थत्वमुच्यते, तच्च मार्गणीयत्वं वस्तुनोऽसन्नि-धाने भवति। प्रकृतेऽपि आदित्यस्यासन्निधाने मार्गणीयत्वरूपमृगत्वम्, सन्निधाने-ऽमृगत्वम्। गन्तृत्व चोभयविधत्वेऽपि। तदेव गृहीत्वाऽश्वत्वस्य परित्यागेन अर्थादगन्तृत्वस्य परित्यागेन स गन्ता सञ्जात इत्यर्थः। सचेदानीमपि अस्ता-प्राप्त्या सन्निहित इति सन्निधानादमार्गणीयताऽमार्गणीयत्वेनामृगरूपतेति। तद्-गृहीत्वाऽश्वो गौरमृगः सञ्जात इत्युक्तिः।

एवं चादित्यस्य बहुदूरमस्तसविधे गमनेन गोरूपत्वम्। तच्चास्तात्पूर्वमेकमस्तोत्तरवर्ति चापरं, तत्रास्तोत्तरवर्तिरूपस्य व्यावर्तनाय 'अमृग' इति गोविशेषणम्। एवञ्चामृगोऽमार्गणीयोऽनस्तं गमित इति यावत्। तादृशो गौर्दूरं गतोऽस्तसविधं प्राप्तः संहितया गौरमृग इत्युक्तम्। तादृशः संवृत्तः। एवं च तदानीमादित्ये वर्त्तमानं गन्तृत्वरूपं गोत्वं गृहीत्वा गोत्वेन पशुत्वेनालम्भ इत्युक्तम् 'ते गामालभन्त' इति। तदपि रूपं गतमित्यभिप्रेत्य ततो मेधनिर्गमवचनम् 'स गोरालब्धादुदक्रामत्' इति। अयं च गच्छन्निव भासमानः पृथिवीप्राप्त्या स्थिर इवेति गृहीत्वा तस्य गन्तृत्वरूपस्य गोत्वरूपसारांशस्य विगमेन तत्परित्यागः। ततो गोत्वरूपस्य परित्यागादादित्ये विद्यमानं चतुर्थ रूपमवित्वं तेन रूपेण पशुत्वेन तदालम्भः। तदुक्तं "स गोरालब्धादुदक्रामत्सोऽविं प्राविशत्तस्मादविर्मेध्योऽभवदिति"।

वयतेर्गत्यर्थस्य 'वि'रिति रूपम्, तस्य नञा समासे अविरगन्ता स्थिर इति यावत्। अथवा पूर्वोक्तममृगगोरूपं व्यपगतमादित्यात्तस्यास्तगमनप्रवृत्तेः। अस्तं गच्छन्तं भूसंपर्किणं तं गृहीत्वा अवित्वेन तस्यालम्भः। अविशब्दे विः पक्षी स न भवतीत्यविः। पक्षिणश्च भूपरित्यागेनोड्डीयमानता। अयं च प्रत्युत भूसम्पर्क्येवेत्यविरूपः, भूसम्पर्काद्भूपरित्यागाभावेनापक्षिरूपत्वात्। तच्चादित्यवर्ति चतुर्थं रूपमवित्वं तेन रूपेण पशुत्वेन तस्यालम्भः। ततो गोत्वरूपपरित्यागेन परित्यक्तस्य तस्य गोरादित्यस्य गवयरूपता सञ्जाता। तदुक्तम्—"अथैनमुत्क्रान्तमेधमत्यार्जन्त स गवयोऽभव"दिति। गवयशब्दो गामयते गच्छतीति गोसम्पर्की भवतीति गवयः। गोशब्दोऽत्र भूवाची। पृथिवीसम्पर्कादविरूपत्वं तेन रूपेण तमालब्धवन्तः, तदुक्तं "तेऽविमालभन्ते"ति। तदपि अविरूपमस्त गन्तुं प्रवृत्तेऽत एव खण्डिते आदित्येऽविद्यमानम्। यतस्स भूवं प्राप्तो भूसम्पर्क्यखण्डितमण्डलरूप एवाधारोऽवित्वस्य, स चाधारोऽस्तगमनप्रवृत्त्या खण्डितभावेन विनष्ट इति आधाराभावादवित्वमपि व्यपगतमित्युच्यते "सोऽवेरालब्धादुदक्रामत्" इति। अत्रालम्भेऽवित्वमेव सारांशस्तस्याधाराभावेन व्यपगमात्सोऽमेध्यः सञ्जातः। तदुक्तं—'सोरवेरालब्धादुदक्रामत्' इति। अस्तं गच्छतः खण्डितत्वेनाखण्डिताधाराभावेनावित्वरूपमेधस्य व्यपगम इत्युक्तम्। अयं चेदानीं सुमेरावस्तं गच्छन् कुमेरावुदयन् भवेत्। तत्र परदेशे सम्पद्यमानं जन्यं रूपं तस्याभावाभिप्रायेण तस्मिन् अस्तं गच्छत्यादित्ये "न जायते इत्यज" इति अजत्वं पञ्चमं रूप तद्गृहीत्वा तेन रूपेण पशुत्वेनोपलम्भ इत्युक्तम्; "सोऽवेरालब्धादुदक्रामत्सोऽजं प्राविशत्। तस्मादजो मेध्योऽभवदिति"।

'तेऽजमालभन्तेति'। ततस्तस्मादुत्क्रान्तमेधत्वेन परित्यक्तोऽविरुष्ट्रोऽभवदिति। स च परित्यक्ताविरूपः स आदित्योऽस्तोत्तरसन्ध्यारूपः सञ्जात त्युच्यते। इ सन्ध्या चोषः शब्देनोच्यते। 'उषस्'शब्दश्च यथा असून् प्रत्ययान्त एवं 'ष्ट्र' प्रत्ययान्त उष्ट्रशब्दः सोऽपि समानादेव धातोर्निष्पन्नस्सन्ध्यामर्थमाह। एवं च परित्यक्ताविरूपः सायन्तनसन्ध्यारूपः सञ्जात इति यावत्। सोऽजे वर्तमानोऽजन्यभावरूपो धर्मः, अजत्वमित्यर्थः। तस्यापि खण्डितादित्यरूपवृत्तित्वेऽपि तस्य खण्डितस्य रूपस्यापि कलामात्रावशेषित्वदशायामभावेनाधाराभावादजन्यत्वरूपाजत्वस्य तद्रूपस्य मेधस्य व्यपगम इत्युच्यते सोऽजादालब्धादुदक्रामत् स भूमिं प्राविशदित्युच्यते "स इमां प्राविशदिति"।

तस्योत्क्रान्तमेधस्याजस्य परित्यागे सोऽजः शरभोऽभवदित्युच्यते। स शरभभावो द्वेधा भवति। कलामात्रावशेषित्वेन शर इव भासनाच्छरभ इति, अथवाऽत्रास्तेनापरत्र कुमेरावसावुदित इत्यनेन पूर्वस्थानवर्तिनो हननं क्रियते इतिकल्पना। अस्तं गच्छत आदित्यस्य सिंहत्वेन वर्णनादसावत्रोदितः पूर्ववर्तिनःसिंहस्य हन्ताऽष्टास्वपि दिक्षु रश्मिरूपपादयुत इत्यष्टापदः प्राणिविशेष इव सञ्जात इति वर्णना। भाष्यकारेण शरभोऽष्टापदः सिंहघाती प्राणिविशेष इति शरभपदस्यार्थ उक्तः। एवं च देवेष्वस्तमित आदित्यो भूमौ प्रविष्टस्तस्य देवैः किरणैरनुगमोऽन्वेषणम्। अन्विष्टश्च स मेधो व्रीहिरभवत्। व्रीहिशब्दो न धान्यवाची किन्तु आदित्यमभिप्रेत्य प्रयुक्तः। वरि ईहा चेष्टा यस्येति व्युत्पत्त्या व्रीहिः। वरशब्दवद्वृधातुतो निष्पन्न'वृ'शब्दस्यापि गृहार्थत्वम्। गृहं चादित्यस्यास्तमये। अस्तमयशब्दस्य गृहगमनमर्थः। अतएव निघण्टुषु गृहबोधकेषु नामसु अस्तशब्दस्य पाठः। एवं च वरि गृहे ईहा चेष्टा यस्य स व्रीहिः। चेष्टा चात्र प्रकाशनरूपो व्यापारः। एकत्रास्तमितोऽन्यत्र तदानीमुदितस्तत्र प्रकाशमान आसीदिति यावत्। एवं रूपेणादित्यस्य पञ्चावस्थाभिप्रायेण रूपपञ्चकवत्त्वेन सुमेरौ तस्यास्तावसरीया वर्णना। अस्ते दानमादित्यस्येति वर्णनादिदं दानं सुमेरौ वर्तमानैः किरणैरिति वर्णना। सर्वोऽयं प्रकारो देवकर्तृकयागाभिप्रायेण। देवैर्यथाऽदित्यो दीयते कुमेरावेवं तत्रास्तमयावसरे तत्रत्यैरप्यसौ दीयते सुमेराविति सोऽपि यज्ञस्तत्रत्यैरनुष्ठीयमानः। तत्राप्यादित्यस्यास्तगमनावसरे उक्तविधपञ्चावस्थोपेतत्वसम्भवः। तत्रत्यैः क्रियमाणस्य यागस्य मनुष्ययज्ञत्वेन व्यवहारः। तत्रापि उक्तविधपञ्चावस्थाः संसूच्यन्ते शस्त्रादिषु।

यज्ञे स्तोत्रशस्त्रयोर्वचन भवतीति प्रसिद्धम्। स्तोत्रशस्त्रयोः सारूप्य भवतीति च प्रसिद्धम्। अत एव "यथा वै स्तोत्रमेवं शस्त्रमि"ति ब्राह्मणे उच्यते।

स्तोत्रं च सामयुतं, शस्त्रं च तद्रहितमिति व्यक्तम्। आदित्यस्य सामरूपत्वं तलवकारब्राह्मण उच्यते। तत्रोच्यते—"साम चतुर्विधं स्वारं निधनवद् ऐळम् ऋक्-सममि"ति। तत्र ऋक्समं नातिरिक्तं किन्तु स्वाररूपमेव।

अयं भावः—साम्नो हि गानरूपता। गानं च स्वराणामारोहावरोहादिरूपमिति स्वारं स्वरसम्बन्धिरूपमित्युच्यते। ते च आरोहावरोहरूपविशेषयोगिनः स्वारा ऋक्षु भवन्तीति ऋक्समरूपता तस्य। वस्तुत ऋचोऽपि स्वररूपत्वमेव। तत्रत्या व्यञ्जनवर्णाः स्वराणामर्थाभिव्यक्त्युपकारकाः, अर्थवत्त्वं तु स्वराणामेव। ते च स्वरा ऋग्रूपा एवेति ऋकसमरूपं सामापि स्वाररूपमेव। न तत्र ऋक्समरूपो भेद इत्यभिप्रायेणोक्तम्—"त्रिरूपं साम स्वारं निधनवद् ऐळमिति। ऋक्समं तु स्वाररूपमेवे"ति तत्र। ऋच्यन्ते इळाशब्दयोगितया साम्न ऐळरूपता। सा च साम्नोऽन्तिमभागस्य निधनशब्देन व्यवहरणात्साम्नो निधनवतो भेद एव ऐळमिति गृहीत्वा द्विरूपमेव साम "स्वारं निधनवच्च" नास्त्येवैळमिति पृथग्भेदः। निधनवत्येवैळस्यान्तर्भावात्। वस्तुतो निधनरूपताप्युक्तरीत्या स्वरस्यैवेति स्वाररूपमेकरूपमेव साम। नास्ति निधनवन्नामातिरिक्तो भेदः। तदुक्तं तत्र—"तदेकरूपमेव साम स्वाररूपमेवे"ति। तत्र स्वारशब्देन स्वराणां सम्बन्धितोच्यते। सा चारोहावरोहादीनामित्युक्तं प्राक्। स चारोहोऽवरोहोऽपि स्वरस्यैवेति स्वरस्यैव सामरूपता। स्वरश्चादित्यरूप एव, तच्छब्दव्युत्पत्तेः।

तत्र स्वयं राजनात्स्वरत्वमुच्यते। तच्चादित्ये स्पष्टमेव। "स्वृ"धातोरुपतापार्थकादुपतपति स्वरतीति स्वररूपत्वं तदप्यादित्ये एवेति आदित्यस्यैव स्वररूपत्व स्वररूपत्वात्सामरूपत्वमप्यादित्यस्यैवेति। तदुक्तं तत्रैव ब्राह्मणे—"तदेकरूपमेव साम स्वाररूपमेव, योऽयं पवते तदि"ति। योऽयं पवत इत्यनेन ब्राह्मणे सर्वत्रादित्यस्यैव वचनमिति आदित्यरूपत्वं साम्नो विस्पष्टम्। प्रपञ्चयिष्यते चायमर्थ उपरिष्टात्। एवं चादित्यस्य सामरूपत्वम्। स्तोत्रं च सामयुतमिति तेनादित्यसम्बन्धिता व्यज्यते। तत्सम्बन्धश्चोदयमारभ्येति तदारभ्य तत्सम्बन्धः स्तोत्रेऽपि बोध्यते। शस्त्रं च सामरहितमिति तेन तस्यासम्बन्धो बोध्यते। तस्यासम्बन्धश्चास्तमारभ्येति शस्त्रेणास्तमारभ्यादित्यासम्बन्धिता प्रतिपाद्यते। आदित्यास्तमयमारभ्य प्रवृत्तेः शस्त्रसम्बन्धित्वे तदस्तमयपूर्वभाविन्याः परिस्थितेः शस्त्रादिरूपत्वम्। शस्त्रादौ होतृजपत्वेनोच्यमानो भागोऽस्तावसरीय इति भवति। एवं च होत्रा शस्त्रादौ होतृजपत्वेनोच्यमानाक्षरपञ्चकात्मको भाग एकैकेनाक्षरेणैकैकामवस्थां बोधयन्नक्षरपञ्चकेना-

वस्थापञ्चकं प्रतिपादयन्यागरूप एवानेन बोध्यते। अत एवैतस्याक्षरपञ्चक-योगिन एतस्य भागस्याक्षरपङ्क्तियज्ञत्वेन व्यवहारो ब्राह्मणे। तानि च पञ्च-रूपाणि अक्षराणि दैवयज्ञवदेवैकैकाक्षरेणैकरूपस्याभिधानक्रमेणोच्यन्ते। अक्षर-शब्दस्यादित्याभिप्रायेण वेदे वचनात्पञ्चाक्षराणि अवस्थापञ्चकयुतान्यादित्य-बिम्बान्येवेति। तानि चाक्षराणि अवस्थापञ्चकाभिप्रायेण पञ्चैव भवन्तीति तत्सूचकाक्षरपञ्चकस्यैव तेन क्रमेणावस्थानां प्रवृत्त्योक्तक्रमयोगित्वं यज्ञत्वं च ब्राह्मणे उच्यते। तानि चाक्षराणि "सुमत्पद्वग्दे" इत्येवं पञ्चैवंक्रमिकाणि।

तत्र 'सु' इत्यनेन शोभनवचनेन पूर्णत्वं गृहीत्वा पुरुषत्वरूपिणी प्रथमावस्था बोध्यते। मदी हर्षग्लेपनयोरिति धातुनिष्पन्नेन 'मदि'त्यनेन ग्लानत्वेनापूर्णत्वेना-वृद्धत्वरूपमश्वत्वं तद्रूपा द्वितीयावस्था बोध्यते। 'पदि'त्यनेन गोरूपत्वं तद्रूपिणी तृतीयावस्था बोध्यते। पद गतावित्यस्मात्पद्शब्दः। 'वगि'त्यनेन वज व्रज गता-वित्यतः सिद्धेन देशान्तरगमनं गवयवदभिप्रेत्य विरूपभावेनावित्वं तद्रूपिणी तुरीयावस्था बोध्यते। अथवा वच परिभाषण इत्यतो निष्पन्न"वगि"त्यनेन वग्न्-शब्दवद्वाचो बोधनम्। वाचश्चास्तोत्तरं प्रवृत्तिवचनेन वग्शब्देनोष्ट्रशब्दवदुषसो बोधनमित्यविरूपावस्थाबोधनम्। अन्तिमं रूपं च देशान्तरे उदितत्वरूपं "दे" इत्यनेन बोध्यते। तत्र "पुरुषं वा" इत्यस्य सुमेरावस्ताभिप्रायकत्वे "सुमदि"त्यनेन कुमेरावस्ताभिप्रायकता व्यज्यते। कुमेरावस्तमितः सुमेरावुदित इति सुमेरोर्देव-निवासाद्देवत्व प्राप्त इति 'दे' शब्देन देवत्वेन तस्य बोधः। शरभशब्दवाच्यवत्त-स्यापि अष्टदिक्प्रकाशकत्वेनाप्टापदत्वादिसंभवात्। एव चैतेनाक्षरपञ्चकेन कुमेरुगतास्तावसरीयावस्थापञ्चकं बोध्यते इति प्रकृते सुमेरुगतावस्थापञ्चकाभि-प्रायेण पञ्चानामेव पशूनां तेषामप्युक्तेनैव क्रमेण वचनम्। तथावस्थापञ्चक-बोधकशब्देषु उक्तपञ्चपशुबोधकशब्देष्वेव श्लेषेणोक्तावस्थाबोधनमिति पशु-बोधकशब्दैस्ता अवस्था उच्यन्ते। तासां क्रमिकत्वादि उपरिष्टाद्विस्तरेण प्रति-पादितमित्यस्यार्थवादस्य स्पष्टार्थत्वमिति दिक्।

पुरुषं वा इत्यत्रावस्थापञ्चकयोगित्वेनास्तमयत आदित्यस्य पञ्चावस्थाः श्लेषेण पुरुषादिशब्दैः प्रतिपादिताः। ताश्च सुमेरावस्तावसरीया इति प्रतिपादितं पुरस्तात्तदनुरोधेन कुमेरावपि अस्तं गच्छन् आदित्यस्य समानन्यायेनावस्था-पञ्चकं स्यात्। वेदे यथा मानुषो यज्ञः प्रोच्यते एवं दैवो यज्ञोऽपि बोध्यत एव। स्वल्पप्रदेशेषु दैवयज्ञस्य साक्षात्परम्परया निर्देशो वर्तते, नैतावता स नोच्यत इति। एवं सति उपर्युक्तार्थवादे दैवयज्ञस्य वचनात्तदनुरोधी मानुषो यज्ञोऽप्यपेक्ष्यत एव। तथा च सुमेरुसमानन्यायतया दैवानुरूप्याय च कुमेरावस्तं

गच्छत आदित्यस्यावस्थापञ्चकं यज्ञशब्दव्यवहार्यमपेक्ष्यते। तच्चावस्थापञ्चकं "सुमत्पद्वग्दे" इत्यक्षरपञ्चकनोच्यते। अत एवैतस्याक्षरपङ्क्तियज्ञत्वेन ब्राह्मणे व्यवहारः। किञ्चैतस्याक्षरपञ्चकस्य यज्ञे शस्त्रप्रारम्भे होत्रा वक्तव्यत्वेन होतृजप इति सञ्ज्ञा। शस्त्रशब्दस्य गानराहित्येन स्तुतिपरत्वं सांप्रदायिकैरुच्यते। स्तोत्रं च गानयुत तदुभयोः स्तोत्रशस्त्रयोः सोमे प्रयोगः। सोमस्येतिकर्तव्यता ज्योतिष्टोमे प्रोच्यते। तस्य ज्योतिष्टोमत्वं द्वादशभिः स्तोत्रैः शस्त्रैर्योगात्। सोमस्यानुष्ठानं सवनत्रयेण, त्रीणि सवनानि कालानुरूपनामभिर्बोध्यन्ते, प्रातःसवनं माध्यन्दिनं सवनं तृतीय सवनमिति। आदिमयोः कालवाचकशब्दयोगेनानुष्ठाने कालोऽपि वोध्यते प्रातःसवनं प्रातःकाले माध्यन्दिनं सवनं मध्यन्दिने। तृतीयस्य तु कालबोधकशब्दायोगेन मध्यन्दिनोत्तरं सायंकालतः पूर्वमनुष्ठानमिति भवति। प्रतिसवन च स्तोत्रशस्त्रे उपयुज्येते। तत्र स्तोत्रप्रवक्तार उद्गातृप्रमुखाः, शस्त्रप्रवक्तारश्च होतृप्रमुखाः।

तत्र ज्योतिष्टोमे प्रात सवने पञ्चस्तोत्राणि पञ्चशस्त्राणि भवन्ति। बहिष्पवमानस्तोत्रमेक चत्वारि आज्यनामकानि स्तोत्राणीति पञ्चस्तोत्राणि। होतुराज्यनामकं शस्त्रं प्रउगनामकं चेति शस्त्रद्वयम्, तदितरेषां होतृगणस्थानां त्रयाणां मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानामेकैकं शस्त्रमिति त्रीणि, मिलित्वा प्रातःसवने शस्त्राणि पञ्च भवन्ति। "यथा वै स्तोत्रमेवं शस्त्रमि"ति स्तोत्रसारूप्यस्य शस्त्रे विहितत्वात्प्रातःसवने प्रथम स्तोत्रं बहिष्पवमाननामकम्। तस्येतरस्तोत्रवत्सदस्यवस्थाय न वचनं किन्तु वेदितो बहिरुत्करदेशे गत्वा वचनम्। अतएव तस्य बहिर्देशयोगात् पवमानसम्बन्धित्वाच्च बहिष्पवमाननामत्वम्। पवमानशब्दश्च पूधातुतो निष्पन्नः पवनकर्तारं निर्दिशति, स चात्र तन्नामको देवः। स तु तेन नाम्ना व्यवह्रियमाण आदित्य एव। स च पवमानो गच्छन्, पूधातोर्निघण्टुषु गमनार्थकधातुषु प्रयोगात्। एवं च तस्य गच्छतो दिनसम्पादनार्थं यो बहिर्देशयोगोऽर्थाद्यत्र दिन सम्पादनीयं ततो भिन्नो देशो बहिर्देशस्तस्य तत्स्थस्य स्तुत्यभिप्रायेण ऋत्विग्भिस्तदनुकारिभिर्वेदितो बहिर्देशं गत्वा स्त्रोतवचनमिति तस्य बहिष्पवमाननामत्वम्। तच्चानुकारं यज्ञक्रियासु सूचयति। एवं तस्य स्तोत्रस्यानुरूप्याय होत्रा आज्यनामकं प्रथमं शस्त्रमुच्यते। यद्यपि स्तोत्रसादृश्यं शस्त्रे नामतो मन्त्रतश्छन्दस्तो देवतोऽर्थतश्चेति सर्वविधमपेक्ष्यते। तदत्र शस्त्रे न नामतः सादृश्यं प्रत्युत परवर्तिस्तोत्रसादृश्यमत्र भवति, परवर्तीनि स्तोत्राणि आज्यशब्देनोच्यन्ते। एतस्य शस्त्रस्यापि नाम आज्यमिति। एवं सति नामतः सादृश्येनैतस्याज्यस्तोत्रोत्तरं वचनं युक्तं परन्तु सर्वेभ्यः सादृश्येभ्योऽर्थकृतसादृश्यस्य

प्रबलत्वेनार्थसादृश्यानुरोधेनैतस्य शस्त्रस्य बहिष्पवमानस्तोत्रोत्तरत्वं न तु नामसादृश्यवशत आज्यस्तोत्रोत्तरत्वं तस्येति। तदेतदभिप्रेत्य ब्राह्मणे आज्यप्रउगशस्त्रयोर्विहरणमुक्तम्, विहरणं वैपरीत्यं स्थानवैपरीत्यादिति परस्ताद्विस्तरेण उच्येत। प्रकृतेऽर्थसादृश्यवशत आज्यं शस्त्रं बहिष्पवमानस्तोत्रोत्तरं शस्यते। आज्यं शस्त्रं भागत्रयेण युक्तं ते च भागास्तूष्णीशंसो निविदः सूक्तं चेति। तदुक्तं "तूष्णीशंसनिवित्सूक्तैराज्यशस्त्रं त्रिपर्वक"मिति। तत्राद्यो भागस्तूष्णीशंसनामकः। तस्य तूष्णीशंसत्वं तूष्णीत्ववशतः। तदुक्तं ब्राह्मणे "तूष्णी सारो वा एष यत्तूष्णीशंसः" इति। तूष्णी शब्दप्रयोगश्च वाचाऽसम्बन्धेन, वाक्सम्बन्धश्चादित्यासत्त्वे इति मन्त्रव्याख्याने सविस्तरं प्रतिपादितम्। वाक्सम्बन्धो यत्र प्राप्तस्तत्र तदसम्बन्धस्य तूष्णीत्वेन वचनात्तादृशं स्थलमुदीयमानवेलायाम्। नहि तदानी पूर्ण मण्डलमादित्यस्येति तस्यासत्ता, असत्त्वेऽपि खण्डिततत्सम्बन्धेन वाण्या असत्त्वात्तूष्णीत्वम्। दिनप्रारम्भत आदित्यस्य सामरूपता। दिनप्रारम्भश्च संपूर्णमण्डलोदयोत्तरमिति खण्डितमण्डलस्थलीयो भागो दिनबहिर्भूत इति तस्य बहिर्योगिता पवमानतेति। बहिष्पवमानस्तोत्रे यथा खण्डितमण्डलसम्बन्धिना एव तूष्णीशंसरूपे आज्यशस्त्रभागेऽपि उक्तरीत्या खण्डितमण्डलयोगितेति नामतः प्राप्तसादृश्यानुरोधेन प्राप्तं देशं विपरिवर्त्यार्थतः सादृश्यानुरोधेनाज्यं शस्त्रं प्रथममुच्यते। आज्यशस्त्रस्य प्रारम्भः खण्डितमण्डलकालत इत्युक्तम्। खण्डितं च मण्डलं सायमस्तावसरेऽपि भवति तथाप्यत्र प्रातस्सवनगतस्त्रोत्रानुरूप्यायोदयकालिकस्यैव तस्य ग्रहणम्।

एवं चादित्यस्योदीयमानावस्थादशायां प्रोच्यमानशस्त्रे तत्प्रारम्भतः पूर्वमुच्यमानो होतृजपः सोऽपि उदयावस्थापूर्वभावमभिप्रेत्येति होतृजपत्वेनोच्यमानस्याक्षरपञ्चकस्योदयावस्थापूर्वकालिकता बोधयति। सा चोदयावस्था यत्रासावुदीयमानो भवति तद्देशाभिप्राया, यत्र त्वसावस्तमेष्यति तदभिप्रायेणास्तसन्निकटावस्था स्यात्। देवेषु सुमेरावुदयेऽस्तावस्था कुमेरुदेशाभिप्रायेण। शस्त्रस्यादित्यासम्बन्धितया रात्रिसम्बन्धव्यञ्जकत्वे रात्रिसम्बन्धस्य सर्वात्मना मण्डलादर्शनतः प्रवृत्तिः, तत्र स्तोत्रसादृश्याय बहिष्ट्वसम्बन्धाय यथोदीयमानावस्थाग्रहणमेवं शस्त्रप्रारम्भायापि तथाविधामवस्था गृहीत्वा शस्त्रं प्रवृत्तमिति ततः पूर्वमुच्यमानो होतृजपोऽप्यस्तसविधवर्तिनीमवस्थां गृहीत्वा प्रवृत्त इति तेन कुमेरावस्तसविधवर्त्यवस्था एव बोध्यन्ते इति। ताश्चाक्षरपञ्चकेनाक्षरपङ्क्तिर्यज्ञ इति व्यवहारेण पङ्क्तिशब्देन प्रत्येकं यज्ञत्वोपगमस्य स्वातन्त्रप्रतीतेः 'पुरुषं वा' इति दैवयज्ञसारूप्याय च कुमेरुगतस्यास्तगमनावसरीया एवावस्थाः

पञ्चाननाक्षरपञ्चकेन बोध्यन्त इति युक्तम्। एताश्च देवयज्ञाभिप्रायिका आदित्यस्यावस्था यथा सुमेरौ देवतानिवासे प्रवर्तन्ते तथैव ता एवावस्थाः कुमेरावपि भवन्ति। इतिकृत्वैतेनाक्षरपञ्चकेन यथा पुरुषं वेत्यत्रत्या अवस्था बोधिता भवेयुरेवमेव तस्याक्षरपञ्चकस्यार्थो वक्तव्यो स एव युक्तियुक्तो न्यायसङ्गतः प्रमाणपथारोहीति। न तु व्युत्पत्त्या यथाकथं चन किमपि सारूप्यं गृहीत्वाऽसम्बन्धोऽर्थोऽत्र युक्तो भवति।

एवं च सर्वेषां ब्रह्मपरत्वेन व्याख्यानं यथोच्यते—"एतद्धोतृजपाख्यस्य त्वादितोऽक्षरपञ्चकम्। एकैकमक्षरं चात्र परस्य ब्रह्मणो वपुः॥ सुपूजितं मत्प्रहृष्टं पत्सर्वव्यापि तच्च वक्। सर्वस्य वक्तृ ब्रह्मैव दे फलाना प्रदातृ तत्" ॥ इति। इदं यत्र कुत्रापि सङ्गतेऽसङ्गतेऽपि शब्दस्थले वक्तुं शक्यम्, अव्यर्थत्वसम्पादनस्यैका अगतिकगतिः। 'सर्वे सर्वार्थवाचका' इति नयेन यज्ञे यज्ञाद्बहिरपि प्रोच्यमानशब्दानां ब्रह्मपरत्वस्य वक्तुं शक्यतया विशिष्यैतेषामक्षराणां विशेषाभावेन विशिष्टक्रमग्रहणे च तावता हेत्वभावेनैतेषामक्षरपङ्क्तित्वेन स्तवस्य निर्बीजत्वापातः। ब्राह्मणवचनादेतेषामक्षराणां क्रमो विवक्षितोऽक्षरपङ्क्तियज्ञत्वेन स्तव इति न वाच्यम्। हेत्वन्तरसिद्धस्य ब्राह्मणेऽनुवादात्। अत एव ब्राह्मणे 'यो वै यज्ञमक्षरपङ्क्ति'मिति, 'एष वै यज्ञोऽक्षरपङ्क्ति'रिति यच्छब्दयोगेन वै शब्दयोगेन च तस्य वचनम्। यच्छब्दयोगो विधिविरुद्धो वै-शब्दश्च प्रसिद्धार्थ इति। एतेन श्रौतसूत्रोक्तिरपि व्याख्याता। ब्राह्मण उच्यमानानामपि हेतुवचनं छन्दस्यं 'ये यजामह' इत्यत्र "स्त्र्यपराधात्पत्युः पुत्रदर्शनं, ये वा के वा यजामहे" इति मीमांसकैः प्रतिपादितम्। एतेन भट्टभास्करोक्तिरपि प्रत्युक्ता, "सुष्ठु माद्यन्तीति सुमदः, ईदृशा भवन्ति प्रपत्तारो यस्याश्च वक्तारः स्तोतारो यस्यै च हवींषि प्रदातारः सा वाक् 'सुमत्पद्वग्दा' इति"। स्वातन्त्र्येणार्थबोधकानि अक्षराणि अत्र गृह्यन्ते, उक्तरीत्या वाग्रूपैकार्थबोधने तेषा तादृशत्वाभावात्। असम्बद्धवचनता तु दुर्वारैव। शस्त्रे होतृजपेऽयमक्षरसमूहः प्रोच्यते। तत्र प्रकृतत्वं शस्त्रदेवताया न तु वाच इति तत्परत्वेन व्याख्यानस्याप्रकृतत्वात्। अध्याहारादिना सार्थक्यवचनं त्वत्रातीवागतिकगतिभूतम्। एवं पदेभ्यः पदेतरार्थसंस्काररूपं शाकटायनमतमाश्रित्य यथा कथञ्चन हविष्पङ्क्तियज्ञसम्बद्धव्याख्यानं यथा—धानानां माङ्गलिकत्वस्य प्रसिद्धया सुशब्देन माङ्गलिकेन तासां ग्रहणम्। करम्भ इत्यत्रत्यमकारं गृहीत्वा मच्छब्देन करम्भनिर्देशः, परिवाप इत्यत्र पकार इति पच्छब्देन स बोध्यते, पुरोडाशशब्दो वज्रं स्मारयतीति वग्शब्दः पुरोडाशबोधकः, पदशब्दगतश्च दकारो विष्णुपदे इति तेन पयस्या बोध्यत इति। तदपि बहुदोषग्रस्तम्। एवमेवाक्षीः-

परत्वादिवर्णनमपि प्रत्युक्तम्। तस्मादुक्तरीत्या दैवयज्ञसारूप्याय उक्ताक्षर-पञ्चकस्य पूर्वं प्रतिपादित एवार्थ इति दिक्।

कृष्णयजुर्वेदे नक्षत्रियप्रजापतिरुच्यते यथा "हस्त एवास्य हस्तश्चित्रा शिरः स्वाती हृदयम्, विशाखे ऊरू, अनुराधाः प्रतिष्ठा, एप वै नक्षत्रियः प्रजापतिः। य एवं नक्षत्रियं प्रजापतिं वेद उभयोरेनं लोकयोर्विदुः" इति। अत्रोर्ध्वोत्तोलितहस्तपुरुषस्वरूपकथनं तेन रूपेणात्र नक्षत्रियप्रजापतिवर्णनं नक्षत्रपञ्चके। तत्र विचारः—किमिति नक्षत्रपञ्चके प्रजापतिस्वरूपकथनं नान्येषु, यथा सर्वान् राशीन् अभिप्रेत्य पुरुषस्वरूपकथनमेवं कुतो न सर्वेषु नक्षत्रेषु तत्स्वरूपकथनम्। यदा च नक्षत्रपञ्चक एव तत्कथनं नाधिकेषु नक्षत्रेषु, यदा च नक्षत्रपञ्चक एव तत्स्वरूपकथन तदापि कुत एतस्मिन्नेव नक्षत्रपञ्चके तत्कथनं कुतो नान्यस्मिन् नक्षत्रपञ्चक इति।

अथोच्येत—हस्तनक्षत्र हस्तांगुलिसदृक्षभावदर्शनात्तदनुरोधेन तत्र हस्त-कल्पना, विशाखयोर्नक्षत्रयोर्विभक्तोरुद्वयसाजात्येन विभक्तत्वेनोरुत्वकल्पनयाऽवशिष्टेषु शिर आदिकल्पना, विशाखयोरूरुत्वे सविधवर्त्यनुराधानां प्रतिष्ठात्वमित्येवमूर्ध्वोत्तोलितहस्तकल्पना अस्मिन्नेव नक्षत्रपञ्चके नान्यस्मिन् नक्षत्रपञ्चके न वाऽन्येषु नक्षत्रेष्विति चेन्न। तथा सति तदेतन्नक्षत्रपञ्चके उक्तरीत्या नक्षत्रिय-प्रजापतेःकल्पने तद्विज्ञाने उभयलोके विज्ञानत्व कथं स्यात्। न चार्थवाद इति वर्णनेन निस्तारः। अर्थवादे सत्यपि वृत्तान्तविशेषबोधनस्यानुपपत्तिरेव। किञ्च ओषधिसूक्ते उच्यमानाना सप्तोत्तरशतधाम्नां सांपातिकत्वं विनानुपपन्नाना तत्सम्बन्धिनां पञ्चनक्षत्राणां वासन्तिकत्वबोधनमनुपपन्नं तद्वशत एतेषामपि पञ्चाना नक्षत्राणां शारदसाम्पातिकत्वमवश्य वक्तव्यमिति शारदसाम्पातिकत्वे-नैतेषामेव पञ्चाना नक्षत्राणा प्रजापतिवर्णनस्यावश्यकत्वात्। किञ्च 'शतं जीवे'ति मन्त्रे शरद्धेमन्तवसन्ताना प्रत्येकं शतशब्दयोगित्वेन निर्देशस्यान्यथानुपपत्तिरिति पूर्वं सविस्तरं प्रतिपादितम्। एतच्च सम्पातस्यासर्ववृत्तपरिभ्रमे एव सम्भवति नान्यथा। सर्ववृत्तपरिभ्रमेऽन्येपामपि नक्षत्राणां सांपातिकत्वेनैषामेव पञ्चाना ग्रहणस्य प्रजापतित्वेन वर्णनस्य ओषधिसूक्तसम्पातपरिभ्रममात्रेणोपपाद्यमानस्य संख्याविशेषस्यानुपपत्तिः। 'शतं जीवे'ति मन्त्रार्थस्याप्यनुपपत्तिः। एतेन वेदकाले संपातगत्यविज्ञानमिति परास्तम्। न च गीतायां "मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकर" इति वर्णनेन द्वयोरपि सह प्रवृत्तिवचनम्। मासानां मध्ये मार्गशीर्षस्य वत्सरारम्भकत्वेन ऋतूनां मध्ये कुसुमाकरस्यार्थाद्वसन्ततोर्वत्सरारम्भकत्वेनोभयो-र्भगवद्विभूतिमत्ववचनम्।

यत्तु आनन्दगिरिणा समृद्धिमत्त्वेन मार्गशीर्षस्य विभूतिमत्त्वमुक्तम्। तत्तु न युक्तम्। यथा ऋतूनां मध्ये वसन्तोऽर्थाद्वत्सरारम्भकत्वेन भगवद्विभूतिरूप एवं मासाना मध्ये मार्गशीर्षोऽपि वत्सरारम्भकत्वेन भगवद्विभूतिरूप इति वर्णनस्यैव युक्तत्वम्। ऋतुषु सम्भविना धर्मेण वत्सरारम्भकत्वरूपेणैव मासानामिति वचनस्याप्युपपत्तौ धर्मान्तरकल्पने मानाभावात्। प्रकृतस्यैवांशस्य 'परमार्थप्रमा'नामिकायां सूर्यपण्डितेनापरोऽर्थ उक्तः "यद्वा मृगशिरः पूर्णिमासम्बन्धेन वर्षादिरभिहितः, तस्मिन्नेवाग्रहायणीत्यभिधानात्। अग्रे हायन यस्या साग्रहायणी। अतएवाग्रहायणिक इति मार्गशीर्षनाम। अतोऽस्य मासस्य मुख्यत्वाद्विभूतिमत्त्वमि"ति। एवञ्चाग्रे हायनं यस्या इति वचनेन हायनप्रारम्भपूर्वभाविनी रात्रिस्तत्रत्या पूर्णिमा तद्योगान्मासनाम आग्रहायणिक इति।

तदाशयः—अत्राग्रहायणीपूर्णिमायोगादाग्रहायणिक इति मार्गशीर्षनामेत्येषा व्युत्पत्तिस्तु मूलभूतोक्तभगवद्गीतास्थवाक्यस्येति प्रतीयते। परन्तु आग्रहायणिक इति यौगिकं नाम न तु रूढमिति तन्नामको मास इति मासनामतया वक्तुमशक्यत्वम्। यौगिकशब्दस्य रूढिशब्दत्वाभावेन तन्नामकमासस्य वर्षारम्भकत्वस्याभावेऽपि प्रमादेन तमेवार्थं गृहीत्वा गीतायां मार्गशीर्षस्य वर्षादित्वाद्विभूतिमत्त्वमुक्तम्। अय च वर्षादिरिति वर्णनेनासौ मकरसङ्क्रमणादिरूप एव वर्षादिरुच्येत, मकरसङ्क्रमणस्य तु न वर्षादिता, वसन्तऋतुना वर्षादेः साहचर्यस्य प्राचीनग्रन्थेषूक्तेः। आग्रहायणी पूर्णिमा अग्रे हायनसम्बन्धात्सवत्सरस्यान्तिमरात्रिरूपेति द्वितीयदिने उत्तरायणप्रारम्भः। अर्थात्तत उत्तरायणं प्रवर्तेत मृगशिरःसम्बन्धादेषा पूर्णिमा मार्गशीर्षमासस्य। पूर्णिमायाश्च सूर्याचन्द्रमसोः परस्परमशीत्यधिकशतांशविप्रकर्षेण मृगशिरसस्तावदशविदूरस्थले सूर्यस्य नक्षत्रं भवेत् मृगशिरोनक्षत्रं दक्षिणायनान्तस्थाने भवेत्। दक्षिणायनान्तस्थानतः पश्चान्नवत्यंशे वसन्तसम्पातस्य स्थानं स्यात्। सूर्यसिद्धान्ते विषुवस्थानतो मृगशीर्षस्य त्रिषष्टचंशविदूरितत्वमुच्यते। एवं च नवत्यशेषु त्रिषष्टचंशाना न्यूनीकरणे अवशिष्टफल सप्तविशत्यंशास्ते च विपुवस्थलमर्थाद्रेवतीनक्षत्रं ततः पश्चात्सप्तविशत्यंशविदूरस्थाने भवेयुः। परन्तु वैदिकग्रन्थेषु कृत्तिकाया नक्षत्रादित्वं माघमासतश्चोत्तरायणमिति वचनाद्रेवतीतः पुरस्तात्सप्तविंशत्यंशस्थानं वसन्तसंपातस्येति प्राप्नोति।

एवं सति गीतावचनस्य मार्गशीर्षस्योत्तरायणादित्वसाधकस्य वशतो वसन्तसंपातो रेवत्याः पश्चात्सप्तविशत्यंशस्थाने लभ्यते, कृत्तिकाया नक्षत्रादित्वे रेवतीतः पुरस्तात् सप्तविशत्यंशस्थानं वसन्तसंपातस्येति विरोधे प्राप्ते प्राचीनैस्तत्राविरोधसंपादनाय संपातस्यान्दोलितगतिः स्वीकृता। तेन गीताया अपि प्रामाण्यं

वेदस्यापीति कल्पना कृता। एतस्या आन्दोलितगतेरपरं हेत्वन्तरं यावत्कैरपि न दीयते तावत्पर्यन्तमान्दोलनकल्पनाबीजमुक्तमेव भवेत्। अतो मार्गशीर्षपौर्णमास्याः संवत्सरस्यान्तिमा रात्रिरिति वचनस्योपपत्तये तदानी सूर्यस्याभिजिन्नक्षत्रे स्थितिर्भवेत्। एवं सति तत्र वसन्तसंपातो भवेत्। संपूर्णवृत्तपरिभ्रमे वसन्तसंपातस्योक्त-ईशवीयशकप्रवृत्तेः पूर्वं विंशतिसहस्रं वर्षाणि तत्समकालो भवेदिति नैषा कल्पना योग्या। एवं च सर्वथा अस्याः कल्पनाया बीजत्वं आग्रहायणीति पूर्णमासीग्रहणसम्बन्धिनी व्युत्पत्तिरिति। तस्मात्तां हित्वा प्रकारान्तरेण आग्रहायणीशब्दस्य व्युत्पत्तये प्रयत्नः कर्तव्यः। यथा—उक्तरीत्या आग्रहायणीत्यस्य पूर्णिमापरत्वे वर्षारम्भस्यासम्भवादाग्रहायणीति नक्षत्रनाम गृहीत्वा वर्षारम्भः साधनीयः। एवं च तस्य नक्षत्रस्य वर्षारम्भस्थत्ववशात्तस्याग्रहायणीति नाम। तस्य नक्षत्रनामत्वे ततो वसन्तसपातप्रवृत्त्या फाल्गुने मासि उत्तरायणप्राप्तिः। एवं च मृगशिरस आग्रहायणीति नामवशतो वसन्तसपातः फाल्गुनीपौर्णमास्या भवेत्। तदा शारदसंपातो मूलनक्षत्रे स्यात्। अतएव तस्य 'मूले'ति नाम प्रवृत्तं स्यात्। मृगनक्षत्रस्य वसन्तसंपातनक्षत्रत्वे तदानी सूर्यस्यास्तावसरे मूलनक्षत्रमेवोदीयमानं भवतीति मूलछेदनार्थकमूलबर्हणीति नाम। अस्तावसरे उत्तरायणस्य विनाश इति तन्नामेति।

एवं चोत्तरायणशब्दस्य वेदकालिकोऽर्थः वसन्तसंपातमारभ्य शारदसंपातमध्यवर्ती कालः। गीताकालिकश्चार्थो मकरसक्रमणमारभ्य कर्कसंक्रान्तिपर्यन्तः कालः। तदनुसारेण पितृयाणस्य प्रारम्भः कर्कसंक्रान्तित इति। एवं चोदगयन फाल्गुनपूर्णमास्यां यदि तदा पितृयाणं दक्षिणायनं वा भाद्रपदपौर्णमास्यां भवेत्। तथाच भाद्रपदस्य कृष्णपक्षः पितृयाणस्य प्रारम्भीयः पक्षो भवेत्। अयमेव च पक्षः पितृपक्ष इत्यस्माभिस्तत्र पितृश्राद्धादीनि क्रियन्ते। न केवलमस्माभिः पारसीकैरपि अयमेव पक्षः पितृपक्ष इति मन्यते। पारसीककालगणनाप्रारम्भो दक्षिणायनतः प्रवर्तते। अयमर्थः पाश्चात्त्येन डा: 'गिइगर'-महोदयेन 'मध्यर्यो' इति पारसिकधर्मग्रन्थेषु प्रयुज्यमानपदवशतः साधितः। 'मध्यर्यो' इति पदस्य तेन वर्षमध्य इत्यर्थं स्वीकृत्य वसन्तसपाततः प्रारब्धस्य वत्सरस्य मध्यः कालः दक्षिणायनारम्भे इति तत आरभ्य तेषां कालगणना प्रवर्तत इति पूर्वोक्तार्थस्यैव साधकम्। पारसीकानां धार्मिकादयः सर्वे व्यवहारा वैदिकव्यवहारविपरीता इति वैदिकानां वत्सरारम्भो वसन्तसंपाते वा उत्तरायणे वा। तेषां तदारम्भो दक्षिणायने शारदसंपाते वा भवति। एको विशेषस्तु पूर्वमुक्तो यद्भाद्रपदमासि उभयोः पितृपक्ष इति। तत्रापि उभयोर्विरोधो वरीवर्त्येव।

यतो वैदिकानां पितृपक्ष उत्तरायणान्ते, पारसीकानां दक्षिणायनारम्भे इति तेषामयं मासः 'फ्रवशिनम्' पितृमास इत्युच्यते तैः। ततश्चतुर्थो मासः 'तिष्ट्रे हे' इति वा तिष्ट्रस्य मास इति वोच्यते। 'तिष्ट्रच'मिति मृगव्याधरूपेणाकाशे दृश्यमानस्तारकाविशेषस्तद्रूपं 'सिरिग्रस्' इति तैर्व्यवह्रियमाणं नक्षत्रमिति। भाद्रपदमासतश्चतुर्थो वैदिकानां मार्गशीर्षमास इति। मृगशिरसो व्याधस्य सविधर्वाततया मार्गशीर्षमास एव तेषां तिष्ट्रचमास इति। तेषां 'फ्रवशिनम्' मासे दक्षिणायने वत्सरारम्भे ततः सप्तमस्तेषां मासो वसन्तसंपातारम्भे प्रवर्तते। अयं च मासस्तै- 'दंघुषो' मास इत्युच्यते। अयं च मासस्तै 'दंघुषो' अर्थात्सृष्टिकर्तुः 'अहुरमज्दा' इत्यस्य अर्थादहिर्बुध्न्यमास उच्यते। पारसीकव्यवहारतः मृगशिरसि वसन्तसम्पातः कदा चनासीदिति लभ्यत इति। तदेतत्सर्वं मृगशिरसि वसन्तसाधकं न भवति, नक्षत्रियप्रजापतिप्रतिपादकवचनविरोधात्। शतं जीवेति मन्त्रे त्रयाणामृतूनां शतमिति विशेषणत्वेन प्रयोगविरोधात्। उभयमपि विस्तरेण प्रतिपादितम्।

यत्तु प्राचीने वैदिककाले उत्तरायणशब्दस्य वसन्तसंपातस्थलत आरम्भं कृत्वा शारदसंपातपर्यन्तः काल एवार्थो नान्यो मकरसंक्रमणादिः कर्कसङ्क्रान्तिपर्यन्तः कालः। स च गीतागतमार्गशीर्षस्य भगवद्विभूतित्वप्रतिपादनवशतो लभ्यत इति। तन्न। वैदिककालेऽस्यापि उत्तरायणशब्देन देवयानशब्देन विज्ञानमासीत्। न केवलमनयोरेव किन्तु अन्यप्रकारद्वयेनापि देवयानस्य प्रसिद्धिरासीत्। अत एवाश्विनसूक्ते अश्विनौ प्रति उच्यते "एह यातं पथिभिर्देवयानैः" इति। अत्र बहुवचननिर्देशात् देवयानानामनेकत्वं वेदकालिकमिति सिध्यति। देवयानानामनेकत्वे पितृयाणान्यपि अनेकविधानि सिध्यन्ति। अत एव यमं प्रति उच्यते "यस्ते स्व इतरो देवयानात्" इति। यमस्य दक्षिणदिक्सम्बन्धाद्दक्षिणस्यां दिशि यानं पितृयाणं यमस्य पित्रधिपत्वेन पितृणां दक्षिणस्यां दिशि सत्त्वेन यमस्यापि मार्गः पितृयाणरूप एव। अत एवोपर्युक्ते मन्त्रे उच्यते यमं प्रति "हे यम त्वदीयेन पथा आगच्छ यस्तु त्वदीयः पन्थाः पितृयाणरूपः स देवयानाद्भिन्न" इति। किञ्च विष्णोर्वर्णके विष्णुसूक्ते "चतुर्भिः साकं नवतिं च नामभिश्चक्रन्न वृत्तं व्यतीँरवीविपदि"त्यत्र चतुर्णवतिसङ्ख्यानां वेपनवर्णनतः वृत्तं चक्रमिवेति दृष्टान्तेन तस्य उत्तरदक्षिणसभ्रस्थशब्देन विशेषणान्मकरसंक्रमणादिर्देवयानमार्गो वेदकाले विज्ञात आसीत्, नहि स पाश्चात्यः। तदेतद्विस्तरेण पूर्वं प्रतिपादितम्। अत्र मकरादिः कर्कान्त एव मार्गो विवक्षणीयस्तथा सत्येवोक्तचतुर्णवतिसङ्ख्याया उपपत्तिः। उक्तमन्त्रेण चतुर्णवतिरेव सङ्ख्या विवक्षणीया, न तु नवतिचतुष्टयम्। ऐन्द्रसूक्त उच्यमाननवनवतिसङ्ख्याविरोधात्। नवनवतिसङ्ख्याया अभिप्रायः

पूर्वं प्रतिपादितः। एवं च मकरसङ्क्रमणादिर्देवयानस्य प्रकारोऽर्थात्कर्कसङ्क्रमणादिः पितृयाणस्य प्रकारः पूर्वसिद्धः। "वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवो देवेषु तर्हि भवति। शरद्धेमन्तःशिशिर इति ते पितर इति पितृषु तर्हि भवती"ति वर्णनेन देवदिनात्मकं देवयानस्वरूपम्। देवदिनं च यथा वसन्तप्रारम्भे भवति एवमुषःकालारम्भेऽपि देवयानप्रारम्भः। अत एवोषसो 'ज्यायसी स्वसेति' वर्णनं "स्वसा स्वस्रे ज्यायस्यै योनिमारैगि"त्यादिषु। अत एव ऋतावरीति उषसो बोधकं नाम निघण्टुषु उच्यते। वैदिकेषुषःसूक्तेषु तन्नामप्रयोग इत्यपि पूर्वं प्रतिपादितम्। एवञ्चायमपि देवयानमार्ग एव। एव सवितृकालमारभ्यापि देवयानप्रारम्भः। अत एव सावित्रसूक्ते 'ऋतं कृण्वते' इति सवितुर्विशेषणमुपपद्यते इति पूर्वं प्रतिपादितम्। अत एव देवयानाः पन्थानश्चतुर्विधा भवन्ति, मकारादिरेक उषःकालादिर्द्वितीयः सवितृकालादिस्तृतीयो वसन्तादिश्चतुर्थं इति। अत एव मन्त्रे उच्यते—

"ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति।
तेषां योऽज्यानि मजीतिमावहात्तस्मै नो देवाः परिदत्तेह सर्वे"॥ इति।

अत्र स्पष्टमेव चत्वारो देवयानाः पन्थानः। अत एव "एह यातं पथिभिर्देवयानै"रिति बहुवचननिर्देश इत्युक्तम्। देवयानचातुर्विध्ये पितृयाणानामपि चातुर्विध्यमुक्तप्रायम्। एवं च देवयानस्य मकरसंक्रमतः प्रवृत्तौ दैवदिनप्रवृत्तिस्ततो वक्तव्या। तथा सति भास्कराचार्यवचनमेव युक्त स्यात्, यत्तैरुच्यते—'दिनोन्मुखेऽर्के तत्फलकीर्तनाय दिनमेव तन्मत'मिति। तथा सति दीक्षाब्राह्मणे सवत्सरसत्रार्थमुच्यमानाः संवत्सरप्रारम्भीया दीक्षाकालाः किंस्वरूपाः। कि तत्र मकरसङ्क्रान्त्यादिर्वा काल उतोषसोऽर्थाद्व्युषःकालादिर्वा आहोस्वित्सावित्रकालादिर्वा अथवा सूर्योदयकालादिरूपवसन्तादिर्वा काल इति। दीक्षाकालबोधक ब्राह्मणं तैत्तिरीयसंहितागतोऽनुवाकश्च तथा। ताण्डब्राह्मण उच्यते—"एकाष्टकायां दीक्षेरन्। एषा वै संवत्सरस्य पत्नी यदेकाष्टका एतस्यां वा एतां रात्रिं वसति साक्षादेव तत्संवत्सरमारभ्य दीक्षन्ते। तस्य सा निर्या यदपोऽनभिनन्दन्तोऽभ्यवयन्ति। विच्छिन्नं वा एते संवत्सरस्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः। आर्तं वा एते संवत्सरस्याभिदीक्षन्तेऽयेऽन्तनामानावृतू अभिदीक्षन्ते। तस्मादेकाष्टकायां न दीक्ष्यम्। फाल्गुने दीक्षेरन्। मुखं वा एतत्संवत्सरस्य यत्फाल्गुनी, मुखत एव तत्संवत्सरमारभ्य दीक्षन्ते। तस्य सा निर्या यत्संमेघे विषूवान् संपद्यते। चित्रापूर्णमासे दीक्षेरन्। चक्षुर्वा एतत्संवत्सरस्य यच्चित्रापूर्णमासो मुखतो वै चक्षुर्मुखत एव तत्संवत्सरमारभ्य

दीक्षन्ते तस्य न निर्यास्ति। चतुरहे पुरस्तात्पौर्णमास्या दीक्षेरन्। तेषामेकाष्टकायां क्रयः संपद्यते तेनैकाष्टकां न शंबट् कुर्वन्ति। तेषां पूर्वपक्षे सुत्या संपद्यते पूर्वपक्षे मासाः सन्तिष्ठमाना यन्ति ते पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठतः पशव ओषधयोऽनूत्तिष्ठन्ति तान् कल्याणी वागभिवदत्यरात्सुरिमे सत्रिण इति ते राध्नुवन्ति" इति। तैत्तिरीयसंहितायामुच्यते यथा—

"संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एता रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्ते। आर्त वा एते संवत्सरस्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः। फल्गुनीपूर्णमासे दीक्षेरन्मुखं वा एनत्सवंत्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यत्साम्मेघ्ये विषुवान् संपद्यते। चित्रापूर्णमासे दीक्षेरन्मुख वा एतत्संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्य न काचन निर्या भवति। चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्। तेषामेकाष्टकायां क्रयः संपद्यते तैनैकाष्टकां न छंबट् कुर्वन्ति। तेषां पूर्वपक्षे सुत्या संपद्यते पूर्वपक्षं मासा अभिसंपद्यन्ते। ते पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पयोऽनूत्तिष्ठन्ति तान्कल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति" इति।

तत्र संवत्सरादिव्यवहारस्य चतुर्विधदेवयाने उत्तरायणत्वाऽविशेषाद्यस्य कस्यापि ग्रहणमिति प्राप्ते नाद्यस्तत्र विवक्ष्यते कालः। तथा सति हिं एकाष्टकाशब्देनोच्यमानमाघकृष्णाष्टम्या मकरसंक्रमे उत्तरायणारम्भः स्यात्। ततस्तृतीयमासान्ते वैशाखकृष्णाष्टम्यां मेषसंक्रान्त्या वसन्तः प्रवर्तेत सूर्यस्य चोदयः स्यात्। ततो मासद्वयमर्थाज्ज्येष्ठकृष्णाष्टम्याषाढ़कृष्णाष्टमीं यावद्वसन्तः स्यात्। परस्ताच्छ्रावणकृष्णाष्टमीभाद्रकृष्णाष्टमीति मासद्वये ग्रीष्मः स्यात्। आश्विनकृष्णाष्टमीकार्तिककृष्णाष्टमी यावद्वषर्तुः स्यात्। अस्मिंश्च सांवत्सरिके काले आनुष्ठानिकसंवत्सरदीक्षारम्भस्य मकरसंक्रान्त्यामेकाष्टकायां स्वीकारे हैमन्तमासि दीक्षाप्रारम्भः स्यात्। अत्र माघकृष्णाष्टमीमारभ्य फाल्गुनकृष्णाष्टमीं यावद्धेमन्तर्तोः सत्त्वात्। हैमन्तमासाभ्यां दीक्षाप्राप्त्यभावश्चैतरेयब्राह्मण उच्यते, तेन साकं विरोधः स्यात्। किञ्चात्र ब्राह्मणे एकाष्टकायां मकारादिकालस्य सांवत्सरिकस्य विवक्षणे तत्रैव परवर्तिफल्गुनीपूर्णमासचित्रापूर्णमासयोर्दीक्षार्थत्वेन वर्णनस्य तयोरपि पूर्वं कदाचन मकरसङ्क्रान्त्याधारत्वमासीदिति तयोरत्र दीक्षार्थं स्वीकारे चित्रापूर्णमासे दीक्षाप्रारम्भकल्पे दोषाभाववर्णनमेतद्ब्राह्मणसंहितोभयगतं विरुध्येत। चैत्र्यां दीक्षाप्रारम्भे वैशाखशुक्लनवमीतः

सुत्याप्रारम्भेणानुष्ठानिके संवत्सरे वैशाखशुक्लनवमीतो मासगणना प्रवर्तेत। तथासति ज्येष्ठशुक्लनवमी आषाढ़शुक्लनवमीति प्रथमं मासद्वयम्, श्रावणशुक्लनवमी भाद्रशुक्लनवमीति द्वितीयं मासद्वयमाश्विनशुक्लनवमी कार्तिकशुक्लनवमीति तृतीयं मासद्वयमिति षण्मासा भवेयुः। ततः कार्तिकशुक्लदशम्यामानुष्ठानिको विषुवान् प्रवर्तेत तदानीं च कालिकसंवत्सरस्य वर्षर्तोः सत्त्वेन संमेघे विषुवतः प्राप्तिरूपस्य दोषस्य सत्त्वात्। एवं चास्मिन् कल्पे "तस्य न काचन निर्या, तस्य न निर्यास्ति" इति संहिताब्राह्मणगतं दोषाभाववचनं विरुध्येतेति।

अथ एतदनुसारेण संपातस्य यतः कुतः प्रवृत्तिर्भवतु वसन्तादिऋतुव्यवहारश्चैत्रमारभ्यैव। तथासति आश्विनकार्त्तिकयोः शरदृतुत्वेन वर्षाकाले विषुवतः प्राप्तिरूपो दोषो नास्तीत्युच्येत। तत्तु न युतक्म्, "वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवो देवेषु तर्हि" इति वचनविरोधापातात्। एवं फाल्गुनीपूर्णमासदीक्षाकल्पेऽपि अवभृतश्चैत्रशुक्ले प्राप्नोति, तदानीमेकाष्टकायां मकरसंक्रमणादित्वदशायां वसन्तस्य वैशाखकृष्णाष्टम्यां प्रवृत्त्या चैत्रशुक्ले शिशिरस्यैव सत्त्वेन अवभृथे अपामनभिनन्दनरूपस्यापि दोषस्य सत्त्वात् 'तस्यैकैव निर्या यत्सामेघ्ये विषुवान् संपद्यते' इत्यनेन विरोधः। तस्मादत्रैकाष्टकायां दीक्षारम्भे न मकरसङ्क्रमणादिः कालो विवक्ष्यत इति। नायनरूपो देवयानः पन्था अत्र विवक्षितो भवति दीक्षाब्राह्मण इति।

अथ वसन्तादिरूपोऽत्र काल एकाष्टकायां विवक्ष्येत। तथा चात्र कल्पे माघकृष्णाष्टम्यां वसन्तप्रारम्भे फाल्गुनकृष्णाष्टमी चैत्रकृष्णाष्टमी वसन्तः, वैशाखकृष्णाष्टमी ज्येष्ठकृष्णाष्टमीति मासद्वयं ग्रीष्मः, आषाढ़कृष्णाष्टमी श्रावणकृष्णाष्टमीति मासद्वयं वर्षर्तुः कालिके संवत्सरे भवेत्। अत्र कल्पे माघकृष्णाष्टम्यां दीक्षाप्रारम्भे द्वादश दिनानि दीक्षाः फाल्गुनशुक्लचतुर्थी यावद्भवेयुः। ततो द्वादश दिनानि सुत्याः फाल्गुनकृष्णद्वितीयां यावद्भवेयुः। फाल्गुनकृष्णद्वितीयातः सुत्याप्रारम्भे आनुष्ठानिको मासगणना ततः स्यात्। तत्र चैत्रकृष्णद्वितीया वैशाखकृष्णद्वितीयेति प्रथमं मासद्वयम्। ज्येष्ठकृष्णद्वितीया आषाढ़कृष्णद्वितीयेति द्वितीयं मासद्वयम्, श्रावणकृष्णद्वितीया भाद्रकृष्णद्वितीयेति तृतीयं मासद्वयमिति षण्मासा भवेयुः। ततो भाद्रपदकृष्णतृतीयायां विषुवतः प्राप्तिः स्यात्। तत्रैकाष्टकायां दीक्षापक्षे संवत्सरस्यार्तिव्यत्यासरूपौ दोषौ ब्राह्मण उच्यमानावसङ्गतौ स्याताम्। किञ्चात्र पक्षे परवर्तिनोः फल्गुनीपूर्णमासस्य चित्रापूर्णमासस्य च मकरसंक्रान्तिमासत्वेन पूर्वं स्थितिरासीदिति संवत्सरमुखादित्वकल्पनया दीक्षार्थं वचनमिति स्वीकारे वसन्तादिमासस्य दीक्षार्थं

ग्रहणप्रस्तावे पूर्वं सत्त्वेन संभावितान्वसन्तादिमासानव्यवहितान्परित्यज्याकस्मिकं व्यवहितं मकरादिमासत्वेन ग्रहणमापद्येत, प्रक्रमश्च भज्येत। अत इमावपि पूर्वं वसन्तादिमासावास्तामिति संवत्सरमुखत्वकल्पनया तत्र दीक्षादिवचनमित्युच्येतेति न तत्र व्यवधानकल्पनेति, तावतापि वासन्तिकमासयोर्दीक्षाप्राप्त्यभावबोधकैतरेयब्राह्मणविरोधस्तदवस्थ एव। किञ्चात्र पक्षे फाल्गुन्यां दीक्षारम्भे सुत्याप्रारम्भश्चैत्रशुक्लदशम्यां स्यात्ततश्च मासगणनाप्रवृत्तौ षण्मासा आश्विनशुक्लदशम्यां पूर्येरन्। ततश्चाश्विनशुक्लैकादश्यां सम्पद्यमानो विषुवान् न सम्मेघकाले भवेदिति तद्दोषवचनं फाल्गुन्यां दीक्षायामेकाष्टकायां वसन्तप्रवृत्तिपक्षेऽसङ्गतं स्यात्। न हि तदानीं वर्षर्तुकालः। तस्यैकाष्टकायां वसन्तप्रवृत्तिपक्षे श्रावणकृष्णाष्टम्यामेव समापनात्। शैशिराभ्यां मासाभ्यां दीक्षाप्राप्तिबोधकब्राह्मणविरोधश्च। तस्मादत्रैकाष्टकाशब्देन न वसन्तादिःकालो विवक्षित इति।

अथात्रैकाष्टकाशब्देनाभिलप्यमानमाघकृष्णाष्टमी सवितृकालादित्वाभिप्रायेण संवत्सरप्रारम्भकालत्वाद्दीक्षार्थमुच्यते इति कल्प्यः। अर्थात्तृतीयदेवयानं सवितृकालादितः प्रवर्तमानं स च काल एकाष्टकाया प्रारम्यत इति तदभिप्रायकं तत्र दीक्षाप्रारम्भवचनमिति। अत्र च कल्पे शैशिरमासाभ्यां दीक्षाप्राप्तिबोधकब्राह्मणविरोधो न भवति। सवितृकालस्यैव शैशिरत्वात्। तथापि परवर्तिनोः फाल्गुनचैत्र्योरपि प्रक्रमाभेदाय पूर्वं सवितृकालादित्वाभिप्रायेण संवत्सरमुखादित्वकल्पनया दीक्षार्थमुपादानमिति वक्तव्यम्। तत्र फाल्गुन्यां दीक्षाप्रारम्भे दीक्षोपसत्प्रक्रमेण सुत्यानां षण्मासपूर्तिराश्विनशुक्लदशम्यां स्यात्। तदानी चैकाष्टकायां सवितृकालादित्वपक्षे वर्षाकालस्यातीतत्वेन सम्मेघे विषुवतः प्राप्तिरूपदोषवर्णनमनुपपन्नं स्यात्। तथाह्यत्र कल्पे एकाष्टकायां सवितृकालादित्वे फाल्गुनकृष्णाष्टम्यां वसन्तारम्भ आदित्योदयश्च स्यातामिति ततश्चैत्रवैशाखौ वसन्तः, ज्येष्ठाषाढौ ग्रीष्मः, श्रावणभाद्रपदौ वर्षामासौ स्याताम्। ततश्चोक्तदोषानुपपत्तिरिति। तस्मादत्रैकाष्टकाशब्देनौषसः कालो विवक्ष्यते। तथा चैकाष्टकात उषःकालप्रवृत्त्या देवयानप्रारम्भ इत्यभिप्रायेण तत्रोच्यते 'एकाष्टकायां दीक्षेरन्नि'ति। एकाष्टकोषोरूपिणीति संवत्सरस्य पत्नी। उषस आदित्यपत्नीत्वेन ऋग्वेदे बहुश उक्तेः। संवत्सरश्चादित्याभिन्न इति एकाष्टकायाः संवत्सरपत्नीत्ववचनस्य युक्तत्वम्। एकाष्टकायां माघकृष्णाष्टमीरूपायां राज्यां संवत्सरस्य वासकल्पनया संवत्सरस्य पूर्वस्यावसानं परस्य च प्रारम्भः, उषःकालतो देवयानप्रवृत्तेः। तत्र नूतनसंवत्सराभिप्रायेण साक्षात्संवत्सरमारम्य दीक्षावचनम्। तत्र दीक्षायां शैशिरमासत्वेन ऐतरेयब्राह्मण-

विरोधोऽपि न। माघफाल्गुनयोः शैशिरमासत्वात्। तत्र दीक्षायां फाल्गुनकृष्ण-द्वितीयातः सुत्याप्रारम्भ इति मासगणना आनुष्ठानिके संवत्सरे प्रवर्तेत।

मासानां कृष्णपक्षादित्वमित्यन्तनामत्वमृत्वोर्मासयोर्दोष एकाष्टकायां दीक्षणे। एवमेकाष्टकाऽन्तिमा रात्रिः संवत्सरस्येति संवत्सरविच्छेदो दोष इति। फाल्गुने सुत्याप्रारम्भे फाल्गुने एवावभृथप्राप्तिस्तदानीं मुख्यस्योत्तरायाणस्य चैत्र्यां प्रारम्भेण फाल्गुने शिशिरत्वेन शैत्यसत्त्वादपामनभिनन्दनोक्तिः। अत एवैकाष्टकायां दीक्षणे संवत्सरस्यार्तिर्दोष इति। तस्मादेकाष्टकायामुषःकालप्रवृत्त्या देवयानप्रारम्भेऽपि न दीक्षा युक्ता। ततः सावित्रकालाभिप्रायेण फाल्गुनीपूर्णमासोरूपो द्वितीयो दीक्षाकाल उच्यते तद्वत्सरीय एव। न तु पूर्व कदाचन तस्य संवत्सरादित्वमित्यभिप्रायेण। तदुक्तं 'फल्गुनीपूर्णमासे दीक्षेरन्नि'ति। फल्गुनीपूर्णमासस्य संवत्सरमुखत्वोक्तिस्तस्य संवत्सररूपादित्यस्य दिनरूपदेवयानप्रारम्भाभिप्रायेण। सावित्रकालमारभ्यापि देवयानप्रवृत्तिः पूर्वमुक्ता। तस्मिन् दीक्षणे चैत्रशुक्लनवम्यां सुत्याप्रारम्भेण ऋतोरन्तनामत्वाभावः। सवत्सरस्यैकाष्टकायामन्तिमरात्रित्ववचनेन व्यस्तत्वमिवात्र दिन एव दीक्षणेन व्यस्तत्वरूपदोषाभावो विच्छिन्नत्वस्यापि दोषस्याभावो रात्रिसम्बन्धाभावः। एवं पूर्वोक्तदोषाभावेऽपि अत्र सम्मेघे विषुवतः प्राप्तिरूपदोषस्य प्राप्तिः फल्गुनीपूर्णमासस्य सावित्रकालादित्वे आदित्योदयात्मदिनप्रारम्भश्चित्रापूर्णमासे, ततो देवयानरूपदैवदिनप्रवृत्त्या वसन्तादिऋतुत्रयं ततः प्रवर्तेत। एवं वैशाखज्येष्ठपूर्णमासीपर्यन्तं वसन्तः, आषाढश्रावणपौर्णमासीपर्यन्तो ग्रीष्मो भाद्रपद-आश्विनपौर्णमासीपर्यन्तो वर्षर्तुः।

चैत्रशुक्लनवम्यां सुत्याप्रारम्भतस्तत आनुष्ठानिकमासप्रवृत्तौ वैशाखज्येष्ठशुक्लनवमीपर्यन्तं प्रथम मासद्वय आषाढशुक्लनवमीश्रावणशुक्लनवमीपर्यन्तं द्वितीयं मासद्वयं भाद्रपदाश्विनशुक्लनवमीपर्यन्तं तृतीयं मासद्वयमिति आश्विनशुक्लदशम्यां विषुवतः प्राप्तिरिति वर्षाकाले विषुवतः प्राप्तिरूपो दोषः। न च सम्मेघशब्देन प्रभूतमेघयुक्तत्वरूपत्वं विवक्षितं वर्षान्ते मेघप्राचुर्याभावेन सम्मेघत्वाभाव इति वाच्यम्। तैत्तिरीयसंहितावशतो वर्षर्तोरेव विवक्षणाद्वर्षर्तोरत्र सत्त्वाद्दोषः। तैत्तिरीये सामेघ्ये विषुवतः प्राप्तिरूपो दोष उच्यते, तत्र साम्मेघ्यशब्देन प्रचुरमेघार्हे काले इति भवति स च वर्षाकाल इति। न ह्ययं नियमो वर्षाकाले नियतेऽवसर एव मेघप्राचुर्यम्। अत एव ऋङ्मन्त्रे—

'पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परेऽर्धे पुरीषिणम्।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळरआहुरर्पितम्।।

इत्यत्रोत्तरार्धेन सुमेरुगतः प्रकारो वर्ण्यते। तत्र 'उपरे विचक्षणमि'ति विशेषणादन्तरान्तरा मेघानां प्राचुर्याभावो बोध्यते। उपरे मेघे विचक्षणं दृश्यमित्यर्थः। प्रचुरमेघे आदित्यदर्शनाभावः। अत्र तद्दर्शनमविशेषेण वचनात्सम्मेघयुक्तत्वनियमाभावेन साम्मेघ्ये सम्मेघार्हवर्षाकाल इत्येव विवक्षणाद्वर्षाकालस्य तदानीं सत्त्वाद्दोष इति। तत्रैकैव निर्येति वचनेनात्र पक्षे दोषान्तराभावः। ततस्तृतीयः कालो मुख्यदेवयानरूप आदित्योदयस्वरूप उच्यते 'चित्रापूर्णमासे दीक्षेरन्' इति। तस्य विशेष उच्यते 'चक्षुर्वा एतत्संवत्सरस्य यच्चित्रापूर्णमास' इति। आदित्योदयेऽपि संवत्सरस्य मुखमेव तत आरभ्य संवत्सरप्रवर्त्तनात्। अत एव तैत्तिरीये 'मुखं वा एतत्सवत्सरस्य यच्चित्रापूर्णमास' इति मुखत्वेनैव वर्णनम्, ताण्ड्ये तत्रादित्यसन्दर्शनात्मविशेषबोधाभिप्रायेण चक्षुर्वेत्युक्तम्, तथा सति तस्य मुखत्वाभावशङ्का भवेत्तद्वारणाय तत्रोक्तं 'मुखतो वै चक्षु'रिति। तत्र मुखशब्देन न केवलमास्यं गृह्यते किन्तु परिचययोग्यः शिरोरूपो भागस्तत्र चक्षुषोऽपि सत्त्वान्मुखत एव सवत्सरारम्भ इति। तादृशेन मुखशब्दार्थेन प्रारम्भस्य विवक्षणाच्चित्रापूर्णमासे संवत्सरस्य मुख्यदेवयानात्मकस्य प्रारम्भस्य सत्त्वम्। उदीयमानं बिम्बं तदानीं प्रवर्तत इति सूर्योदयरूपस्य मुख्यस्य देवयानस्य प्रारम्भवचनम्। उदितस्य बिम्बस्य चक्षुष्ट्वेन वचनं मन्त्रे प्रतिपाद्यते, तत्रोक्तं "चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने'रिति। अत्र कल्पे शुक्लादय एव मासा भवन्तीति अन्तनामत्वाभावः। संवत्सरप्रवृत्त्या आर्तिर्विच्छेदो वेति दोषयोरभावः। वैशाखशुक्लनवम्या सुत्याप्रवृत्त्या तत आनुष्ठानिकमासगणनाप्रवृत्तिः। ज्येष्ठाषाढशुक्लनवम्यां प्रथमं मासद्वयम्। श्रावणभाद्रपदशुक्लनवम्यां द्वितीयं मासद्वयम्। आश्विनकार्तिकशुक्लनवम्यां तृतीयं मासद्वयमिति षण्मासा भवेयुस्ततः कार्तिकशुक्लदशम्यां विषुवान् प्रवर्तेत। तदानी वर्षाकालस्यातीतत्वेन साम्मेघ्ये विषुवतः प्राप्तिरूपदोषाभाव इति। तदुच्यते 'तस्य न काचन निर्यस्ती'ति।

एवंरूपेण दीक्षाकालत्रयं प्रतिपाद्य निर्दोषस्य तृतीयस्य कालस्य सत्त्वेन चतुर्थप्रकारस्य कथनं 'चतुरहे पुरस्तात्पौर्णमास्या दीक्षेरन्नि'ति वचनेनात्रापि पक्षे कस्य चन दोषस्य सत्ता विद्यत इति सूच्यते। 'न कापि निर्ये'ति वचनेन तु पूर्वोक्तदोषाणां मध्ये न कोऽपीत्यर्थः। न सर्वथा दोषाभाव इति। ततः 'पुरस्तात्पौर्णमास्याश्चतुरहे' इति वचनेन सन्निहितत्वाच्चित्रापूर्णमास्याः पुरस्तादित्यर्थो लभ्यते। तथा सति केवलं चतुरहे पुरस्तादिति वचनेनैवेष्टार्थलाभे पौर्णमास्या इति ग्रहणस्य वैयर्थ्य स्यात्। तस्मात्का पौर्णमासी अत्र विवक्षणीयेति विचारे सन्निहिताया अपि चैत्र्याःपरित्यागो दोषवत्त्वात्। दोषश्चात्रै-

तरेयब्राह्मणानुरोधेन दीक्षाप्राप्त्यभावः। तत्रोच्यते—वासन्तिकाभ्यां मासाभ्यां दीक्षाया अप्राप्तिरिति। एवं सति पूर्णिमाविशेषनिर्णये विनिगमनाभाव इति चेत्तदपि न। तत्रैवापरेषां सर्वेषामृतूनां मासद्वयेन दीक्षाया अप्राप्तिं प्रतिपाद्य केवलं शैशिराभ्यां मासाभ्यां दीक्षाप्राप्तिरुक्ता। शैशिरत्वं द्वयोर्मासयोरिति तत्र द्विवचनेन निर्देशः। एकाष्टकायां दोषदानेऽपि अन्तनामानाविति द्विवचनं तदभिप्रायमेव। एवञ्चान्तनामत्वं शैशिरीयत्वोरित्यभिप्रायस्तत्र। अन्यथा एकस्मिन् प्रारम्भस्थले ऋतोरन्तनामत्वे सर्वेषु ऋतुषु तदीयमासेषु प्राप्त्या 'अन्तनामानावृतू' इति वचनस्यासङ्गतिरेव स्यात्। एवं च शैशिरीया पूर्णमासी अत्र विवक्षणीया, सा च शैशिरस्य द्वैमासिकत्वेनानिर्णये प्राप्ते द्वितीयस्य शैशिरीयमासस्य फल्गुनीपूर्णमासरूपस्य दोषवत्त्वाद्दीक्षानुपयोगित्वेन तदीयपौर्णमास्याः परित्यागेऽवशिष्टा शैशिरीया पौर्णमासी माघपूर्णमास्येवेति तस्याः पौर्णमास्याः पुरस्ताच्चतुरहे दीक्षा कर्तव्येति। एवं सति शुक्लपक्षे सुत्याप्रवृत्त्याऽत्र पक्षे दोषाभाव इति। एतेनैकाष्टकायाः परित्यागाभावरूपगुण इति मूले उक्तम्। तेन सर्वदा एकाष्टकाया अपरित्यागो दीक्षायामिति वचनादेकाष्टकायाश्च माघकृष्णाष्टम्यामेव प्रसिद्धिरिति बोध्यते, परस्तात्फाल्गुनचैत्रयोरेवोपादानात्सर्वत्र ऋतुशब्दव्यवहारश्चैत्रादित्वेनैव वसन्तादिप्रवृत्त्या बोध्यत इति ज्ञायते। एवं कृत्तिकादिनक्षत्रेषु संपातप्रवृत्त्यापि चैत्रादिरेव वसन्तादिऋतुव्यवहारो नापरमासादिः। मासानां च शुक्लपक्षाद्यमान्तत्वमेवेति विज्ञायते। यद्यपि पूर्णमासशब्दे कृष्णपक्षादिपूर्णिमान्तता मासव्यवहारस्य प्रतीयते तथापि न सा देवयानसम्बन्धिनीति परस्तादनुपदं बोध्येतेति। एवं च दीक्षाब्राह्मणे चैत्रपूर्णमास्या वत्सरादित्वेन चैत्र्या चित्रानक्षत्रयुक्तत्वं चित्रा च तदा दिननक्षत्रमिति चन्द्रमसस्तन्। पूर्णमास्या सूर्याचन्द्रमसोः परस्परमशीत्यधिकशतांशविप्रकृष्टत्वेन चित्रातस्तावद्विदूरे स्थितं नक्षत्रमश्विनीति तत्र वसन्तसंपातनक्षत्रता सूर्याधिष्ठितत्वं चेति।

एवं तैत्तिरीये कृत्तिकाना संपातनक्षत्रत्वस्य "एता वै प्राच्यै दिशो न स्यन्दन्ते यत्कृत्तिका" इति वचनेन प्रतीत्या कृत्तिकासंपातस्य विज्ञत्वदशायामेव परस्तात्सम्पत्स्यमानाश्विनीसंपातस्य सूचकस्य चित्रापूर्णमासस्य संवत्सरमुखत्वस्य वचनेन इदमश्विनीसम्पातस्यैतत्पर्यायगतत्वस्य वक्तुमशक्यत्वेन पूर्वपर्यायगतं तदिति वक्तव्यम्। तथा सति सम्पातस्य सर्ववृत्तपरिभ्रमे विंशतिसहस्रवर्षतः पूर्ववर्तित्वस्य वक्तव्यत्वं स्यात्तथा सत्यपरापरनक्षत्रेषु संपातस्थित्या नक्षत्रियप्रजापतिवचनस्यायुक्ततापात इति तदनुसारेण नक्षत्रपञ्चक एव संपातपरिभ्रमो

न सम्पूर्णवृत्तेऽत्र एवौषधिसूक्तगतनक्षत्रपञ्चकस्य वसन्तसंपातनक्षत्रत्वस्य संपात-परिभ्रमाभिप्रायकानां सप्तोत्तरशतसङ्ख्याकानामंशानामुपपत्तिः। शतऋतुशब्द-स्यार्थस्याप्युपपत्तिः। शतंजीवेति मन्त्रार्थस्याप्युपपत्तिरिति पूर्वं प्रतिपादितम्।

देवयानानामनेकविधत्वं पूर्वं प्रतिपादितम्। तदनुसारेण पितृयाणाना-मपि तावद्विधत्वमुक्तप्रायम्। मुख्यं देवयानं सुमेरावर्थाद्देवनिवासे, तस्य स्वरूपं छान्दोग्योपनिषदादौ प्रोच्यते। तत्रोच्यते—"अर्चिषोऽहरह्न आपूर्यमाणपक्षमा-पूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य इति मासेभ्यो देवलोकं तेषां न पुनरावृत्तिः" इति। आदित्यस्य प्रातरुदयावसरेऽग्नेः सकाशात आदित्य उदेतीति अग्नेरर्चिस्त्वेन ग्रहणं कृत्वा ततोऽह्नः प्रवृत्तिरह्नः शुक्लाद्या अमान्ता मासाः षट्, तावत्पर्यन्तमादित्य 'उदङ' उदीच्यां दिशि वर्तमान इति ततो मासेभ्यो देवलोक प्रति प्राप्तिरिति तेषां पुनरावृत्त्यभाव इति। यथेदं देवता-स्वह्नो रूपं देवयानस्यैवं पितृष्वपि पितृयाणरूपं तत्रैवोच्यते "धूमाद्रात्रिं रात्रेर-पक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् षण्मासान्दक्षिणादित्य इति मासेभ्यः पितृ-लोकमि"ति। 'आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' इतिवचनेन देवलोके-ऽस्तमितस्यादित्यस्याग्नौ प्रवेशोऽग्नेर्धूमोत्पत्तिरिति धूमाद्रात्री रात्रेः क्रमि-कापह्रियमाणपक्षत्वं तदाद्याः षण्मासा आदित्यो दक्षिणैतीति 'मासेभ्यः पितृ-लोक'मिति पितृलोकस्य रूपमुच्यते। इदमपि सुमेरुस्थैः कल्पनयोच्यते। यथा सुमेरौ सूर्यादे. स्थितिः षण्मासास्तदभावेन रात्र्या अपि स्थितिर्मासषट्कं तथा कुमेरावपि सा तथैव, केवलं दिवा सुमेरावुत्तरस्यामादित्यस्थितिरेवं कुमेरौ दक्षिण-स्यामिति विशेषः। सुमेरावुदङ्ङावृत्तिरेव कुमेरौ दक्षिणावृत्तिरिति विशेषः। एवं सति सुमेरौ षण्मासावसाने आवृत्त्यभाव उक्तः। स तु सूर्यस्य तद्रश्मीनां तत्र, एवमेव कुमेराविति समानन्यायात्। इदं तु मुख्यदेवयानपितृयाणयो रूपे अभिप्रेत्य। उक्तविधमुख्यदेवयानादेः स्वरूपाभिप्रायेण "मुखं वा एतदृतूनां यद्वसन्तः" इति वचनस्योपपत्तिः। तदभिप्रायेणैव "वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवो देवेषु तर्ह्यसौ भवति देवांस्तर्ह्यभिगोपायती"ति। "शरद्धेमन्तः शिशिर इति ते पितर" इति। अत्रापि देवलोकाभिप्रायेण शरदादीनां पितृषु सत्त्ववचनम्। तत्र तु भिन्नैरेव नामभिर्व्यवहारः। अतएव तत्र ऋतुपञ्चकव्यवहारो "देवानां माने" इति मन्त्रे प्रतिपादितः। एतावता 'देवयानादीनामपरा विधा एव न भवन्ति, 'वेदे नोक्ता' इति मतमयुक्तम्। देवयानचातुर्विध्यस्य "ये चत्वारः पथयो देवयाना" इति मन्त्रेणोक्तत्वात्। देवयानचातुर्विध्ये पितृयाणचातुर्विध्यस्यापि प्राप्तिरिति पूर्वं प्रतिपादितम्। पितृयाणादीनां चातुर्विध्ये मुख्यातिरिक्तस्थले पितृयाणादिरूपदिन-

व्यवहारस्यायुक्तत्वे भास्कराचार्यरीत्यैव "दिनोन्मुखेऽर्के तत्फलकीर्तनाय दिनमेव तन्मतमिति" उपपत्तिर्वक्तव्या। नायं प्रमादः प्रत्युत तस्योपपन्नत्वं तैः प्रतिपादितम्।

एवं प्राचीने वैदिककाले सौरं नाक्षत्रवर्षम्, तिथ्यभिप्रायेणार्थाच्चन्द्रकलाभिप्रायेण चान्द्रा मासाः। तत्रापि शुक्लपक्षादिरमान्तो मास इति मासस्वरूपमासीत्। वर्षादिता वसन्तसंपातादित आसीन्नतु तत एवेति देवयानादिचातुर्विध्यस्योक्तत्वात्। सांपातिकं वर्षमपि ज्ञातमासीत्। यत्तु सांपातिकवत्सरविषये वेदादिषूल्लेख· सप्तविंशत्यंशपर्यन्तं प्रतिपार्श्वं गमागमविषयकस्तद्विषये मार्गशीर्षपौर्णिमाया. संवत्सरस्यान्तिमा रात्रिरिति तत आरभ्य उत्तरायणरूपो देवयानादिः स्यात्तथा च तत्रोत्तरायणस्य प्रवृत्तौ तदवसानं पितृयाणप्रारम्भे तत्रत्यान्तिमायां रात्रौ स्यात्तदा च तत्र दिननक्षत्र मृगशिरः स्यात्ततः पूर्व नवत्यंशस्थले वसन्तसंपातरूपं देवदिनरूपमुख्यदेवयान स्यात्। एवं नक्षत्रचक्रान्तरेवत्यन्ततो मृगशिरसः त्रिषष्टयंशविदूरितत्वेन तावतामंशानां वसन्तसम्पातस्थलीयपूर्वोक्तनवत्यंशतो न्यूनीकारे सप्तविंशत्यंशास्तावत्पर्यन्तं रेवत्याः पश्चाद्वसन्तसंपातस्थानं लभ्येत। वेदेषु प्रत्यक्ष कृत्तिकाया वसन्तनक्षत्रत्ववचनेन माघे उत्तरायणवचनेन रेवत्या अग्रे सप्तविंशत्यंशस्थानं वसन्तसम्पातस्योपलब्धमिति उभयोः प्रामाण्याय संपातस्यान्दोलनगतिर्ज्योतिर्विद्भिरुक्तेति वचनं तद्वालस्यापि समाधानाय नालम्। सकृत्तत्रोपलम्भेनान्दोलनकल्पना बालेनापि न स्वीक्रियेत। आन्दोलनगतिनिर्णयार्थमसकृत्तत्र गमागमाविज्ञायान्दोलनगतिवचनं तु साहसमेव स्यात्।

वस्तुतस्तु औषधसूक्तानुसारेणेन्द्रस्य शतक्रतुशब्दवशतश्शताश्वमेधानां सम्यक्त्वेन व्यवस्थापनेन नक्षत्रियप्रजापतिवर्णनेन शतंजीवेति मन्त्रे त्रिः शतशब्दप्रयोगेण चान्दोलनगतिविज्ञानमिति पूर्वमुक्तम्। एव च मार्गशीर्षपूर्णिमा संवत्सरस्य रात्रिरित्यादेरेकाष्टकावन्नोपपत्तिर्वक्तव्या किन्तु तस्यामुत्तरायणप्रवृत्तिरित्यर्थ इति। उत्तरायणप्रवृत्तौ पौष्यामुप·कालो माघ्या सावित्रःकालः फाल्गुन्यां वसन्त इति तत्र सत्स्वप्यन्येषु मास्सु गीतायां मार्गशीर्षस्यैव भगवद्विभूतित्वमुच्यमानं कथं संगच्छेतेति विचारे गीताटीकायामानन्दगिर्यादिभिः समृद्धिमत्त्वेनोक्तमासस्य विभूतिरूपेण वर्णनेति व्याख्यायते। परमार्थप्रपाटीकाकारसूर्यपण्डितैश्चैतन्मासस्य वर्षादित्वेन भगवद्विभूतित्वमिति वर्ण्यते, परन्तु वर्षादित्वेन यदि भगवद्विभूतिता मार्गशीर्षस्य तर्हि वर्षादित्वमपरेषामपि मासाना वर्तत इति तेऽपि भगवद्विभूतय इति को विशेषो मार्गशीर्षस्य यदन्ये वर्षादयः सन्तोऽपि न भगवद्विभूतित्वेन वर्ण्यन्तेऽयं तु वर्ण्यत इति। यत्त्वत्र भगवद्गीतावाक्ये मार्गशीर्षस्य

मासानां मध्ये भगवद्विभूतित्वमृतूनां मध्ये वसन्तस्य ऋतोर्भगवद्विभूतित्वमिति सहैव मासत्वोर्ग्रहणेन मार्गशीर्षोऽपि वसन्तादिमासत्वेन भगवद्विभूतिरिति। तदपि न। वसन्तादित्वस्याप्यन्येषु मासेषु सत्त्वेन अस्यैव तादृशत्वं नान्यस्येत्यत्र नियामकाभावात्। किञ्च सहवचनमात्रेण वसन्तमासत्वकल्पनस्यायुक्तत्वाच्च।

यत्तु मार्गशीर्षस्यापरं नामाग्रहायणिक इति तद्वशतो वर्षादिमासत्वं तस्य निर्णीय तत्त्वाद्विभूतित्वमिति। तदपि न युक्तम्, यतस्तेन नाम्ना तस्य वर्षादित्वाबोधनात्। तद्धि नामाग्रहायणीति पूर्णमासीनामतः प्रवृत्तम्। पौर्णमास्याश्चाग्रहायणीनाम्ना न संवत्सरादित्वं ख्याप्यते। तथा सति हि तत एव संवत्सरप्रवृत्त्या नाग्रे हायनत्वं तस्या भवेत्। अत एव तच्छब्दव्युत्पत्तिरप्युच्यमाना सङ्गच्छते। तत्र तच्छब्दस्य व्युत्पत्तिरेवमुच्यते 'अग्रे हायनमस्या आग्रहायणी न तु हायनस्याग्रमग्रहायणी'ति। एवं च तस्या अग्रे हायनप्रवृत्त्याग्रे हायनसत्त्वेन साग्रहायणीति पूर्णमास्या नाम। पूर्णमास्याश्चाग्रे प्रवर्तमानं हायनममावास्यातः प्रवर्तते। तदेव चादाय तस्या आग्रहायणीशब्देन व्यवहारः। यद्यप्यमावास्यायां प्रवर्तमानं हायनं पौर्णमास्या इव कृष्णचतुर्दशीपर्यन्तानां सर्वासां तिथीनामग्रे भवतीति विनिगमनाविरह इति तदपि न। मासनामप्रवृत्तौ पौर्णमास्या एव निमित्तत्वेनान्येषु मासेषु गृहीतत्वेन पौर्णमास्या एव तत्त्वं गृहीत्वा तेन नाम्ना व्यवहारात्।

यद्यपि मासान्तरीयपौर्णमासीनामप्यमावस्यायां हायनप्रवृत्तौ तन्नामव्यवहारोऽपेक्षणीय इति तासां तेन नाम्ना व्यवहाराभावेनैतस्या एव तन्नामव्यवहारे पुनर्बीजाकाङ्क्षा अस्त्येवेति, तथापि सर्वादितयोत्तरायणमासत्वस्य मार्गशीर्षे एव सत्त्वेन ततः पूर्ववर्तिमासेषु उत्तरायणस्याप्रवृत्त्या तस्यैव मासस्य भगवद्विभूतिमत्त्वेन वर्णनात्। सर्वादितयोत्तरायणस्य प्रवृत्तिर्मार्गामावास्याया-मेवेति तदादाय तस्या एव पौर्णमास्या आग्रहायणीशब्देन व्यवहारात्। नक्षत्रियप्रजापतिः, इन्द्रस्य शतक्रतुरिति नाम, ओषधिसूक्ते सप्तोत्तरशतधामव्यवहारेण संपातस्य हस्तनक्षत्रपर्यन्तत्वमेव नियमनस्यावश्यकत्वेन तदनुसारेण मार्गामावास्यापर्यन्तस्यैवोत्तरायणे प्राप्तेः। एवञ्चोत्तरायणस्य प्रथमप्रवृत्तिवशत एवेमं वर्षादिमभिप्रेत्य मार्गपौर्णमास्या आग्रहायणीत्वेन व्यवहारस्तमादायैव मार्गशीर्षस्याग्रहायणिकेति नाम प्रवृत्तम्। तदुक्तं पाणिनिना "साऽस्मिन् पौर्णमासीति संज्ञायाम्" इत्यधिकारे "आग्रहायण्यश्वत्थाट्ठक्" इत्यनेनाग्रहायणीशब्दतस्तत्सिद्धि ब्रुवता। यद्यपि पौर्णमास्या अग्रेहायणीत्वं न संवत्सरादित्वरूपं तथापि तस्मिन्नेव मासि अमावस्यायामुत्तरायणप्रवृत्त्या हायनस्य प्रवृत्तेस्तस्य मासस्य वर्षादिसम्बन्धवशतो वर्षादिमासत्वेन व्यवहारः। अतएव तैत्तिरीयसंहितायां दीक्षा-

विध्यवसरे "मुखं वा एतत्संवत्सरस्य यत्फल्गुनीपूर्णमास" इति मासस्यैव संवत्सर-मुखत्वं वर्णितं न तु तिथेः। अतएव तत्र 'फल्गुनीपूर्णमास' इति पदं प्रयुक्तम्। फल्गुन्यां पूर्णोमासोऽर्थात्फाल्गुनः संवत्सरस्य मुखमित्यर्थः। एतदेवोपादाय फाल्गुनस्य वसन्तमासत्वेन व्यवहारः पक्षभेदेन भाष्यकृता सायणेन प्रदर्शितस्त-द्व्याख्यावसरे 'फाल्गुनश्चैत्रो वसन्त' इति। एतेन सुश्रुतग्रन्थोऽपि व्याख्यातः। तत्रापि फाल्गुनचैत्रयोर्वसन्तमासत्वोक्तेः। मार्गपौर्णमास्या एवाग्रहायणीत्वेन "तस्मिन्नेवाग्रहायणी"ति कोशव्याख्यावसरे भानुदीक्षितैराग्रहायणीपदस्य नक्षत्र-परता पौर्णमासीसंबन्धवशतः प्रतिपादिता, मासमारभ्यैव च वर्षादित्वमुक्तम्— "अग्रे हायनं यस्याः, मार्गशीर्षमारभ्य वर्षप्रवृत्तेः। प्रज्ञाद्यण्, पूर्वपदादिति णत्वम्। आग्रहायणी पूर्णमासी। तद्योगान्नक्षत्रमपि तथे"ति ग्रन्थेन।

यत्तु मार्गशीर्ष्याः पौर्णमास्या आग्रहायणीत्वं नाग्रे हायनसम्बन्धात्किन्तु मृगशिरोबोधकाग्रहायणशब्दतो नक्षत्राणि अग्रहायणनक्षत्रयुक्ता पौर्णमासी आग्र-हायणी इति। पाणिनेरिदमेवाभिप्रेतम्। अतएव तेन ठक प्रत्ययं विधातु 'आग्र-हायण्यश्वत्थाट्ठगि'ति पौर्णमासीपरत्वमेव तेन तत्र गृहीतम्, न तु तच्छब्दस्य स्वातन्त्र्येण पौर्णमासीपरत्वसाधनाय कोऽपि प्रयत्न आरचितः। यत्तु भट्टोजी-दीक्षितैः सिद्धान्तकौमुद्यां भानुदीक्षितैरमरकोशव्याख्यायामुक्तशब्दस्य प्रज्ञाद्यणा स्वातन्त्र्येण पौर्णमासीपरतया सिद्धिरुक्ता, तत्तु मुकुटाख्यकोशव्याख्याया टीका-कारेण आग्रहायणीति निपातनादेव प्रथमाचो वृद्धिं गृहीत्वा गौरादिङीषोक्तशब्द-सिद्धिं कृत्वा प्रत्याख्यातम्। भानुदीक्षितैस्तु ङीप्ङीषोः स्वरभेदेन गौरादिगणे ङीप्मात्रेणाद्यचो वृद्ध्यभावान्निपातनस्वीकारेण वृद्ध्युक्तावपि स्वरार्थं ङीपः कृते प्रज्ञादिगणाश्रयणस्यावश्यापेक्षणे तेनैवोक्तरूपसिद्ध्या निपातनाद्दीर्घत्वकल्पन-स्यायुक्तत्वमिति प्रतिपाद्यान्ते गौरादिपाठफलं मृग्यमित्युक्तम्। तत्सर्वमुपर्युक्त-रीत्या नक्षत्राणैव कार्त्तिक्यादिवदाग्रहायणीत्यस्यापि सिद्ध्या निरर्थकमित्याहुः। तदयुक्तम्। पाणिनेर्गौरादिपाठेनाग्रहायणीशब्दस्याभिप्रेतत्वेन तेन 'आग्रहायणी'ति सूत्रे ठग्विध्यवसरे आद्यचो दैर्घस्योक्तस्योपपत्तये प्रज्ञादिगणपाठं विनाऽनुपपत्तेः। यद्यपि 'साम्रायानुजावरे'त्यादिवार्त्तिकेनैव तस्य सिद्धिस्तथापि गणपाठेनैव सिद्धौ नापूर्वत्वमित्यभिप्रायेण तद्गणाश्रयणात्। नक्षत्राणा त्वत्रानिर्वाहः। अग्रहायण-शब्दस्य मृगशिरोनक्षत्रबोधकत्वे प्रमाणाभावात्। प्रत्युतामरसिंहेन आग्रहायणी-शब्दस्यैव तन्नक्षत्रबोधकताया उक्तेः। तस्याश्च भानुदीक्षितप्रदर्शितरीत्यैव पौर्ण-मासीसम्बन्धादेव प्रवृत्तिर्वक्तव्या गत्यन्तराभावात्। अन्यथा ठग्विध्यवसरे पौर्ण-मासीबोधकत्वस्यानुपपत्तेः। एतेन प्रज्ञादिगणेऽग्रहायणीशब्दानुक्त्या गौरादि-

ङीषेकारान्ततच्छब्दसिद्धावपि आद्यचो वृद्धिर्दुर्लभा स्यात्। अमरानुरोधेना-ग्रहायणीशब्दस्य नक्षत्रपरत्वे नक्षत्राणा त्वनायसतस्तत्सिद्धिरिति परास्तम्। प्रज्ञादिपाठाभावेऽपि 'सान्नाय्ये'ति वार्तिकेनैव वृद्धेर्लभात्। वार्तिकप्रामाण्या-त्प्रज्ञादिपाठकल्पनेति त्वन्यत्।

यत्तु परमार्थप्रपाप्रामाण्यान्मृगशिरसोऽग्रहायणनामकत्वमुच्यते। तदयुक्तम्। तस्या भिन्नार्थत्वात्। तथाहि तत्रत्यो ग्रन्थः "यद्वा मृगशिरःपूर्णिमासम्ब-न्धेन वर्षादिरभिहितस्तस्मिन्नेवाग्रहायणीत्यभिधानात्। अग्रे हायनं यस्याः साग्रहायणी। आग्रहायणिक इति मार्गशीर्षनाम। अतोऽस्य मासस्य मुख्यत्वाद्वि-भूतिमत्त्वमि"ति। आग्रहायणीति मार्गशीर्ष्या नामेति तत्सम्बन्धादस्य मासस्य वर्षादित्वमभिहितम्। तस्मिन्नित्याद्यभिधानात्पौर्णमास्याः प्रदर्शितरीत्या तन्नाम भवति। तच्च नक्षत्रेऽपि तत्सम्बन्धादेव प्रवर्तते। अतएव तस्य नामाग्रहायणिक इति। नक्षत्रपरत्वं तु तच्छब्दस्य वक्तुमशक्यं प्रमाणराहित्यात्। न च कोशात्तस्य पौर्णमासीपरत्वेन तत्त्वस्य नक्षत्रसम्बन्धादेव वक्तव्यमिति वाच्यम्। कोशे नक्षत्रनामसु प्रक्रान्तेष्वकस्मात्पौर्णमास्याः कथनस्यायुक्तत्वापातात्। नक्षत्रपर-त्वादेव कोशकृता तच्छब्दस्य त'त्रैव'शब्दः प्रयुक्त'स्तस्मिन्नेवे'ति। अन्यथा तस्य वैयर्थ्यं स्यात्। तत्सम्बन्धमात्रस्य पौर्णमास्यां बोधनीये हि तस्मिन्नित्येतावतै-वेष्टसिद्धेः। नक्षत्रपरत्वे तु तत्सार्थक्यम्। आग्रहायणीशब्दस्य पौर्णमासीपरत्वस्य पाणिनीयव्यवहारतः सिद्धया नक्षत्रपरता न स्यादिति तद्बोधनाय 'तस्मिन्नेव' उक्तनक्षत्रे एव आग्रहायणीत्यर्थबोधनाय तत्सार्थक्यात्। किञ्च पौर्णमासीपरत्वेऽपि तस्यास्तस्मिन्नेवेति वचनेन तन्नक्षत्रसम्बन्धित्वबोधेऽपि आग्रहायणेत्यस्य नक्षत्र-नामत्वे तत्सम्बन्धादेव च तस्य शब्दस्य पौर्णमास्यां प्रवृत्तिरित्यर्थे प्रमाणाभावात्। तथा सति हि 'तस्मिन्नेवाग्रहायण'मित्येव वदेत्। येन तस्य मृगशिरोनक्षत्र-बोधकत्वे गृहीते कार्तिक्यादिवन्नक्षत्राणा पौर्णमास्या अपि बोधकाग्रहायणीत्यस्य शब्दस्य सिद्धेरिति न किञ्चिदेतद्।

प्राचीनैर्ज्योतिर्विद्भिः संपातस्यासर्ववृत्तभ्रमो मार्गशीर्षस्य मासानां मध्ये भगवद्विभूतिबोधकगीतावचनं प्रत्यक्षतः कार्तिक्यां सम्पातोपलम्भदर्शनमित्यत इति। तदयुक्तम्। उभयकोट्योः सकृद्दर्शनमात्रेणान्दोलनगतिकल्पनस्य बालेनापि असम्भ-वात्। तदेतत्पुरस्तात्प्रतिपादितम्। किञ्च दर्शनोत्तरभाविनां तथा कल्पने-ऽभ्युपेत्य गृहीतेऽपि गीताकालतः पूर्वभाविवैदिकमन्त्रब्राह्मणयोरसर्वगतिकल्पनं विनानुपपत्त्या तस्या उक्तमूलत्वासम्भवः। उक्तं चासर्वगतिसाधकं सम्पातस्य नक्षत्रियप्रजापतिवचनं याजुषम्, ऋग्वेदीयौषधसूक्तगतानामोषधीनां सप्तोत्तर-

शतधाम्नां वचनमिन्द्रस्य शतक्रतुनामेत्यस्यानुपपत्त्या साधकमिति पुरस्ताद्विस्तरेण प्रतिपादितम् । एवं च प्राचीनैर्ज्योतिर्विद्भिः तदेव नक्षत्रियप्रजापत्यादिवशतोऽसर्वगतित्वं संपातस्य मतमिति ।

एवमाग्रहायणीशब्दस्याग्रयणशब्दस्य वा साधनार्थं भाषाशब्दविकरप्रथामनुसृत्य विचारः सोऽपि नाभिप्रेतार्थसाधकः । तथाहि तैरुच्यते आग्रयणीशब्दस्य पूर्वमाग्रहायणीत्यनेन समानार्थत्वं समानरूपत्वं च यतो बहुषु स्थलेषु भापिकशब्दविकारप्रथानुसारेण शब्दादेः क्वचनाधिकेन हकारेण योगः क्वचन सतोऽपि तस्य निरासो दृश्यते, यथा पाश्चात्यैः 'ईस्टरि हिस्तरी' इत्यत्र । यथा वा इन्वकेत्यत्र हिन्वका, अट् हट् अय् हय् अन् हन् इत्यादिषु दृश्यते । यद्यपीमे भिन्ना एव धातवो नात्र हकारयोगो वा तन्निरसनं वेति वक्तु शक्यम् । सत्यमिमे भिन्ना एव धातव. परन्तु अर्थाभेदेऽन्यतरेणैव गतार्थत्व उभयविधधातुस्वीकारस्य निर्युक्तिकत्वात् । यद्यप्युभयविधरूपाणां सर्वत्र प्रयोगेण तदुपपत्तय एकविधस्य धातोरुभयविधरूपस्वीकारापेक्षया धातुद्वयकल्पनस्यैव युक्तियुक्तत्वम् । न च सर्वविधरूपाणां प्रयोगाभावेन न तादृगकल्पनाया अवसर इति वाच्यम् । व्याकरणमहाभाष्यकारेणैतद्विषये दत्तोत्तरत्वात् । तेनोच्यते "किमिद व्याकरणं प्रयुक्तानां वाऽप्रयुक्ताना वा शब्दानामिति, अप्रयुक्तानामिति चेत्, न सन्त्येवाऽप्रयुक्ता· शब्दाः । सप्तद्वीपा वसुमती साङ्गाः सरहस्या एकशतमध्वर्युशाखा. सहस्रवर्मा सामवेदो नवधा आथर्वणो वेद एकविंशतिधा बाह्वृच्यं वाकोवाक्यमितिहासपुराणानि गाथाः कल्पो नाराशसीरिति । एतावान् शब्दस्य प्रयोगविषयः । एतावन्त प्रयोगविषयमज्ञात्वाऽप्रयुक्ता इति वर्णनं साहसमेवे"ति ।

एव सर्वविधानां सर्वेपा शब्दाना प्रयोगसंभवेनोभयापेक्षा । तथाप्यभ्युपेत्येदं शब्दादिस्थले हकारयोगस्तन्निरसनमिति गृहीत्वोक्ताग्रहायणीशब्दे हायनीशब्दगतस्य हकारस्य निरासे अवशिष्येत शब्दस्वरूपं आग्र-आयनीति, तत्रोभययोगेन आग्रायनी आग्रायणीति वा ह्रस्वे आग्रयणी इति । यद्यपि हकारस्य योगे तन्निरासे वा हकाररूपं व्यञ्जनमेव विवक्ष्यते न तु स्वरविशिष्टं शब्दस्वरूपम् । अतएव हिन्वकेति रूपं सिध्येदन्यथा हिशब्दस्य निरासे 'न्वके'त्येवमापद्येत । एवं सति आग्रहायनशब्दे हकारमात्रनिरासे आग्र आयन इति शब्दद्वययोगे आग्रायणेति आग्रायणीति वेति रूपं भवेत्तत्र ह्रस्वो वक्तव्यः स्यात् । एवं सतीदमाग्रयणेति पदं मृगशिरसो बोधकं प्राचीनेषु वैदिकग्रन्थेषु प्रयुज्यमानं दृश्यते तदुपपत्तिः । यथा याजुषे रुद्राध्याये "आग्रयणश्च मे वैश्वदेवश्च मे" इति । आग्रयणेष्टिरित्यादौ श्रौतसूत्रादिषु 'यदि रथन्तरसामा सोमः स्यादाग्रयणा-

ग्रान्ग्रहान् गृह्णीया'दित्यादिषु। तत्र आग्रयणशब्देनायनाग्रबोधकेन मृगशिरसो नक्षत्रस्य अयनाग्ररूपत्वेन विवक्षणम्। अयनशब्देन प्रकृते देवयानं विवक्ष्यते। देवयानमपि मुख्यं वसन्तादिरूपम्। तत्र वसन्तादिरूपे देवयानेऽग्ररूपं वसन्त-संपातस्थत्वमेवेति मृगशिरसः संपातस्थत्वस्यायमाग्रयणशब्दो ज्ञापक इति।

तत्रोच्यते—सत्यं वैदिकेषु ग्रन्थेष्वाग्रयणशब्दः प्रयुज्यते। विद्यते च तत्र अग्र-अयनेति पदद्वययोगः। विस्पष्टं च तत्र अग्रशब्दस्य पूर्ववर्तित्वम्, अयनशब्दस्य परवर्तित्वम्। परन्त्वर्थः को वा विवक्षितः। यद्ययनस्याग्रमिति विविक्षाऽर्थस्य तदानीमग्रशब्दस्यायनशब्दात् परत्र प्रयोगेण अयनाग्रमिति रूपं भवेन्नत्वग्रयणेति वा आग्रयणेति वा, रेफात्परत्वाभावेन णत्वानापत्तिश्च। तथा च षष्ठीतत्पुरुषं परित्यज्य बहुव्रीहिर्वक्तव्यः, अग्रे अयनं यस्येति वा यस्मादिति वा। तदानी-माग्रयणशब्देन न अयनाग्रमित्यर्थस्य लाभः। येन तस्य शब्दस्य मृगशीर्षपरत्वेन मृगशीर्षस्यापि देवयानाग्रत्वरूपवसन्तसपातस्थत्व स्यात्। एवञ्चोक्तशब्दे अग्र-शब्दस्य प्रथमं प्रयोगात् बहुव्रीहिरसौ ततः पूर्वमयनं स्यात्। देवयानस्याग्रं देवयानस्य प्रारम्भस्ततः पूर्ववर्तिनक्षत्रे स्यादिति तस्य नक्षत्रस्य वसन्तसंपातस्थत्वं स्यान्न तु मृगशीर्षस्येति न तस्य नक्षत्रमालादिता स्यात्। न वा वसन्तसंपात-स्थता स्यात्। अस्या दशायामाग्रयणशब्दस्य न मृगशिरोबोधकताऽपि। तथात्वे आदिमस्याकारस्य दैर्घ्याभावप्रसङ्गः। तदर्थ प्रज्ञादिगणाश्रयणेनाद्यकारस्य दैर्घ्ये आग्रयणेति रूपसिद्धिः स्यान्न परं मृगशिरोनक्षत्रबोधकत्वम्। प्रज्ञादिगणाश्रयणेन ह्रस्वस्य निपातनेन आग्रयणशब्दस्य सिद्धिः। एव चोक्तरीत्याग्रायनसम्बन्धतः प्रवर्तमान आग्रयणशब्दः स्त्रियां प्रवर्तमानः समाननिमित्तात्पूर्णमास्यामपि प्रयुज्येत नक्षत्रेऽपीति। अतएवामरसिंहेनोक्तम् "तस्मिन्नेवाग्रहायणी"ति। पुसि प्रयुज्य-मानः समानेन निमित्तेन आग्रयणरूपमापन्नोऽपि मृगशिरसि प्रयुज्यमानोऽपि न स मृगशिरसो वसन्तसंपातस्थत्वस्य बोधनायालं स्यादिति।

यत्तु आग्रयणशब्दतो भाषिकशब्दविकारप्रथामनुसृत्य "ओराइन्" इति ग्रीकदेशीयपुरातनग्रन्थेषु प्रयुज्यमानस्य सारूप्यापादनम्, तत्र ग्रेत्यत्रत्यगकारस्य लोपे निमित्तानुपलम्भः। आग्रयणशब्दे प्रथमस्य आ इत्यस्योकारभावो ग्रेत्यस्य राभावो यणेत्यस्य इन् भाव इति ओराइन् इति सिध्येत् परन्तु शब्दमध्यवर्ति-गकारलोपोऽनियमितः कल्प्यः स्यात्। तदपेक्षया'रौहिण' शब्दतस्तस्य साधनं युक्तियुक्तं स्यात्। तत्र रौइत्यस्य आकारभाव 'आउ'इत्यादौ सिद्धः। हकारलोपो नियमसिद्धः, इणइत्यस्य इन्भावः। शब्दस्यादावोकारयोगस्य दर्शनादत्र तद्योगे "औराइन्" इति रूपं सिध्येत्। ग्रीकदेशीयानां वर्णनमपि तथासत्यनुगुणं स्यात्।

ग्रीकदेशीयप्राचीनग्रन्थेषु "ग्रोराइन्" इत्यस्य सायुधराक्षसरूपत्वं कल्पितम्।

निघण्टुषु मेघबोधकेषु शब्देषु वृत्राहिशंबरशब्दानामिव रौहिणशब्दस्यापि पाठेन तस्य वृत्रसमानार्थतया राक्षसरूपत्वेन वर्णनस्य युक्तत्वात्। मन्त्रेष्वपि "यो रौहिणमस्फुरद्वज्रबाहुः" "रौहिणं व्यहन्" इत्यादिना इन्द्रविनाश्यासुररूपत्वेन वर्णनस्योपलम्भात्तदुपपद्यते। एवं च तदीयाना क्वान् प्रक्कान् शब्दयोः श्वन् प्रश्वन् शब्दाभ्यां यथा संस्कृतरूपलाभ एवमोराइन् शब्दस्यापि मूलभूतं संस्कृतरूपमपि "रौहिण" इत्युपलभ्येत। राक्षसत्वेन कल्पनाया अप्युपपत्तिः स्यात्। एवं चाग्रयणशब्दोऽग्रेऽयनसम्बन्धेन प्रवर्तमान अयनस्याग्रस्यावधित्वेन यस्य यस्य सम्भवस्तं तमर्थं प्रतिपादयति। ततश्च मृगशिरसोऽपि अयनाग्रस्यावधित्वात्तद्बोधकत्वमाग्रयणशब्दस्य यतस्तदानी रोहिण्या वसन्तसम्पातनक्षत्रत्वेन रोहिण्या मृगशिरसः पूर्ववर्तित्वेन पश्चात्प्रवर्तमानमृगशिरोनक्षत्रस्य वसन्तसम्पातरूपदेवयानाग्रावधित्वात् ततोऽग्रे रोहिण्यामयनप्रारम्भादवधित्व तस्य। रोहिण्यां वसन्तसंपातनक्षत्रत्वं वैशाखामावास्यायां भवेत्। तदानी चन्द्रमसोऽपि तदेव नक्षत्रं भवेत्। दर्शे सूर्याचन्द्रमसोरेकनक्षत्रयोगित्वात्। एव चोक्तरीत्या देवयानप्रारम्भरूपवसन्तसंपातस्याग्रे रोहिण्यां वर्तमानस्यावधित्वाद् मृगशिरसोऽयनाग्रावधित्वेन सम्बन्धेन प्रज्ञादिगणवशत आग्रयणशब्दबोध्यता। ततो नक्षत्राणा आग्रयणशब्द एव तन्नक्षत्रयुक्तकालबोधक स च नक्षत्रयुक्तः कालः पौर्णमासीरूपो यदा विवक्ष्यते तदानीमाग्रहायणी पौर्णमासी तस्मिन्नेव नक्षत्रे भवतीत्यभिप्रायेणामरसिंहेनोक्त 'तस्मिन्नेवाग्रहायणी'ति। आग्रयणसम्बन्धात्पौर्णमासी तत्पदबोध्या तत्कालसम्बन्धादिष्टिरपि आग्रयणशब्दबोध्या। अतएव सा आग्रयणेष्टिशब्देन व्यवह्रियते।

वस्तुतस्तु आग्रयणशब्दो न मुख्यया वृत्त्या मृगशीर्ष बोधयति किन्तूदयावसरीयामवस्थां गृहीत्वादित्यस्यैव बोधक। यद्यप्येषाऽवस्थास्तावसरेऽपि आदित्यस्य स्यात्तथापि अग्रशब्दस्य प्रारम्भार्थत्वेनायनशब्दसाहित्यादयनाग्रत्वेनोदयस्थलीयैवावस्था एतेन शब्देन बोध्यते। सचोदयः सुमेरुकुमेर्वोग्राह्यः, तत्रैव तस्या अवस्थायाः प्रतीतेः। उदयशब्दोऽयधातुयोगेनोर्ध्व गमनमाह, तच्चादित्यस्य। तच्च गमनमादित्ये सम्पूर्णे दृष्टे परस्तात्स्यात्। एवं च संपूर्णो दृष्ट आदित्यो यत्रोदयः सुमेरुप्रदेशे तत्र कलामात्रदर्शनमारभ्य क्रमेण तत्रत्यैस्त्रिभिश्चतुर्भिर्वा परिक्रमैः संपद्येत। तावत्परिक्रमपर्यन्तं स खण्डित एव दृश्यते न पूर्णः। एवं च तस्यां खण्डितावस्थायां न स गन्तेति व्यपदिश्यते। एवञ्चास्यामवस्थायां स आग्रयणशब्देन बोध्यतेऽग्रेऽयनं यस्मादिति व्युत्पत्त्या। भवति हि परस्तात्पूर्णे आदित्ये उदिते तत्र देशान्तरसम्बन्धादिना गतिप्रतीतिः। सा चाग्रयणावस्था-

दित्यस्य सर्वादौ मृगनक्षत्रसविधे दृष्टेति अग्रायणसम्बन्धात्तस्याप्याग्रयणशब्द-बोध्यता। देवतासु अर्थात्सुमेरावादित्यस्योदयावसरे कुमेरावस्तावसरः स्यात्। एवं च सावस्थाऽस्तावसरीया दृश्येत। तथाऽस्यामवस्थायामसौ न पूर्णादित्यरूपः खण्डितबिम्बदर्शनान्न सर्वात्मनोषोरूप इति उभयोर्योगकल्पनया प्रेमादिव्यवहारः। उषसो हि आदित्यपत्नीत्वेन व्यवहारवदादित्यमातृत्वमादित्यदुहितृत्वेन कल्पना। तदुक्तं मन्त्रे "अदितेर्दक्षो अजायत दक्षाद्वदितिः परि" इति।

प्रातः प्रथमत आदित्यादुषसो दर्शनेन परस्तादादित्यसन्दर्शने पूर्ववर्तिन्यास्तस्या आदित्यमातृत्वेन व्यवहारः,मायं च बिम्बदर्शनं पूर्वं परस्ताच्च सायन्तनी सन्ध्यारूपोषाः प्रवर्तत इति तस्या आदित्यदुहितृत्वम्। तस्या एव सन्ध्याया योगाभिप्रायेण प्रजापतेर्दुहित्रभिध्यानकथोदयः। अभिध्याने प्रेमपूर्वकत्वस्यापि सत्त्वेन प्रेमकथावर्णनं ग्रीक्देशीयानम्, वैदिकेष्वकार्यकर्तृत्वेन कल्पना। तत ऊर्ध्वं तस्य शास्तिरपेक्षिता सा रुद्रेणेति कल्पना। यतस्तस्यां खण्डितावस्थायामादित्यस्य प्राच्यां दिशि इन्द्रशब्देन वर्णनाऽस्तावसरे तस्य रुद्रत्वेन वर्णना। खण्डितावस्थायां पूर्णत्वाभावेन पूर्णत्वेनेन्द्रादर्शनात्तस्य सत्त्वाभावे प्राप्ते सजनीयसूक्तेन कार्यमुखेन तदनुमानप्रदर्शनम्। रुद्रश्चेन्द्रविरूद्धदिक्क इति मन्त्रे प्रोच्यते "रुद्राणामेति प्रदिशा विचक्षण" इति। प्रशब्दयोगेन तद्युक्तार्थस्य विरूद्धसम्बन्धः प्रयाजप्रद्यौरित्यादिषु दृष्टोऽत्र दिशोयोगेन प्रदिक् इन्द्रविरुद्धा दिक्। इन्द्रस्य दिक् प्राचीति तद्विरुद्धा प्रतीची दिक् रुद्रस्य, रुद्रस्य दिक् इन्द्रविरुद्धा चेदिन्द्रस्यापि दिग् रुद्रविरुद्धा समानवित्तिवेद्यन्यायेन विज्ञायेत। तदेव गृहीत्वोक्तमन्त्रे उक्तं रुद्राणां प्रदिशा विरूद्धया पूर्वरूपयेत्यर्थः, दिशयेन्द्र एतीति। एवं चास्तावसरे आदित्यस्यैव रुद्रत्वं गृहीत्वा प्रजापतिरूपस्याकार्यकर्तुरुक्तरीत्या आदित्यस्य देवताभिः शास्तिः सा च रुद्रेणेति।

आदित्यस्यैकस्य सत उपाधिभेदेन भिन्नत्वेन व्यवहार इति बहुवारमुक्तमेव। तच्चेदं मृगनक्षत्रसविधे दृष्ट्वा मृगस्य सबाणस्य ऊर्ध्वोत्फालनकल्पनयाऽस्तमिते आदित्ये मृगनक्षत्रं दृष्ट्वाप्ययमेव स प्रेमी प्रजापतिरिति। तत्र बाणस्येव तारकात्रितयस्य योगं दृष्ट्वा शरत्वकल्पना। बाणस्य त्रिभागकत्वं "त्रिसन्धिर्ह्रीषुरनीकं शल्यस्तेजनम्" इति ऐतरेयब्राह्मणे उच्यते। आदित्यस्यान्तिमाऽस्तावसरे दृश्या कला बाणत्वेनोच्यते। अतएव पशुपुरोडाशयागार्थवादे शरभरूपत्वेन तस्योक्तिरैतरेये। शरभशब्दस्य शरवद्भासमान इत्यर्थकत्वमपीत्यादि विस्तरेणान्यत्र निरूपितम्। अस्तावसरीयावस्थाग्रहणात् ग्रीकदेशीयानां कुमेरुसम्बन्धिता प्रतीयतेऽतएव तैर्मृगनक्षत्रस्यास्तावसरे दृश्यस्य वृष्टिप्रदत्वेन वर्णना क्रियते। भवति च कुमेरावस्तमारभ्यारात्रेरवसानं वृष्टियुक्ततेति 'देवानां माने' इति मन्त्रे प्रतिपादितम्।

एवं च मृगनक्षत्रस्योक्ताग्रयणसम्बन्धात्तद्बोध्यत्वेन वैदिकानां ग्रीकदेशीयादिपाश्चात्यपुराणकथानामुपपत्तिर्नेतावता तत्र वासन्तिकसंपातस्थानकत्वस्य प्रतीतिः। प्रत्युतास्तोत्तरवर्तिसायंसन्ध्यायोगितयोषसा साकं सम्बन्धवर्णनत इदं सर्वं कथाजातं रोहिण्यां वसन्तसंपातस्यैव लिङ्गम्। अतएव यजुर्वेदे रोहिणीनाम्नः प्रवृत्तिनिमित्तबोधनावसरे अर्थवाद उच्यते "देवा वै सर्वान्रोहानरोहन् तद्रोहिण्या रोहिणीत्व"मिति। सर्वरोहारोहवर्णनतस्ततः परस्ताद्वसन्तसम्पाताभावः प्रतीयत इति। तथा चैषाग्रयणरूपा खण्डितावस्था कृत्तिकादिसम्पातस्थलेऽपि भवेत्तथापि न तासां तच्छब्दबोध्यता। सर्वादौ मृगसविधस्थल एव तद्दर्शनादाग्रयणयोगान्मृगशिरसो नक्षत्रस्याग्रहायणशब्दबोध्यता। अत एवामरसिंहेन "तस्मिन्नेवाग्रहायणी"ति प्रतिपादितम्। एवञ्चाग्रयणयोगो मृगशिरसि तन्नक्षत्रयोगः पौर्णमास्यामपीति पौर्णमासीनाम्नो नक्षत्रनाम्नश्च समानरूपत्वेन मासबोधने व्यावृत्तिर्न स्यादिति विशिष्याग्रहायणीशब्दतो मासनामनिर्वर्तनाय ठको विधानमिति।

यत्तु वर्षारम्भवर्षावसानयोर्मध्ये द्वादशदिनानामृभुस्वापवचनं तत्र देवा मनुष्यगृहेष्वागच्छन्तीति बुद्ध्या पाश्चात्यपुराणकथासु हरिणादिक्रीडावचनादि, वेदे सुप्तोत्थितानामृभूणां जिज्ञासायां मृगेण शुनो बोधकत्वादिप्रतिपादन मृगनक्षत्रस्य वासन्तिकसंपातस्थत्वसाधकमिति तदपि न युक्तम्। ऋभवो हि किरणास्त आदित्ये पूर्णे कार्यकर्तारोऽपूर्णत्वदशायां तेषां कार्याभावेन विराम इति स्वापकल्पना तेषाम्। सा चादित्यरूपे गृहे। तदुक्तं मन्त्रे "द्वादशद्यून्यदगोह्यस्यातिथ्ये रणन्नृभव. ससन्तः" इति। अगोह्यशब्दस्य गोपनासम्भवेन निमित्तेनादित्यपरता ऐतरेये प्रजापतेस्तनूसंज्ञकमन्त्रव्याख्याने प्रदर्शितम्। खण्डितत्वदशायां पूर्णादित्याभावेनर्भूणां कार्यकरणेऽप्रवृत्तिरादित्ये वर्त्तमानतेति गृहीत्वा तत्स्वापवर्णना आदित्यस्यातिथ्यवर्णना चेति। वृषाकपिसूक्ते इन्द्रस्य देवत्वेन नियन्तृत्वेनामननकल्पनाबीजमपीदमेव। तत्रोक्तरीत्यास्तावसर प्राप्तो गतिराहित्येन पूर्णोऽप्यसावादित्यस्तथापि तत्र तद्गत्यभावेन ऋभूणां कार्यकर्तृत्वाभावेन विरामवचनम्। एवं खण्डितत्वदशायां पूर्णत्वाभावेनापि कार्यकरणाभावः। एवमचिरोदिते पूर्णेऽपि बिम्बे गतेरप्रतीत्या ऋभूणां कार्यकरणाभावः। एवं च पूर्णबिम्बद्वयं मध्यवर्तिखण्डितबिम्बावस्थां च गृहीत्वा द्वादशदिनविरामः ऋभूणामिति कल्पना। प्रतिस्थलं परिक्रमचतुष्टयोपयोगेन परिक्रमस्य च दिनशब्देन व्यवहरणाद् द्वादशदिनपर्यन्तं नूतनपुरातनसम्बत्सरसन्धौ ऋभूणां विरामो वा स्वाप इति वा कल्पनम्। यच्च ऋङ्मन्त्रे स्वापोत्थित्यनन्तरं प्रश्नप्रतिवचने शुनो बोधकत्ववचनं तदपि मृगशिरस्सविधवर्तितारकाभिप्रायेण मुख्यम्। तथाहि तत्र मन्त्रः—

सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो बुभूषत्।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥ इति ।

तत्रादित्यं प्रति पृच्छा उत्तरमपि तेनैवेति उत्तरदातैवादित्योऽत्र मन्त्रे बस्तशब्देनोच्यते। बस्तशब्दः पशुवाची पुमजबोधको मृगशब्दबोध्यः। मृगत्वं च मार्गणीयत्वान्मार्गणीयत्वं च तस्य रात्रौ इति तदेतद् गृहीत्वा पशुपुरोडाशार्थवादे 'गौरमृग' इति विशेषणेन "गौरमृग" इतिवचनमैतरेये। अमृग इति विशेषणान्मृगरूपतापि तस्य भवतीति विज्ञायते। सा च रात्रावित्युक्तमेव। स च बस्त आदित्य ऋभूनवदत् 'श्वा वो बोधक' इति मन्त्रे वचनम्। तत्र श्वशब्देन न वास्तवशुनो ग्रहणं किन्तु वायोः। वायो.श्वशब्देन व्यवहारो "मातरिश्वे"ति वायुबोधकेन शब्देन प्रसिद्धः। वायुश्च सर्वदागतिशाल्यादित्य एव। सुमेरुकुमेर्वोः स्थानतः सविधवर्त्यधस्तनस्थाने आदित्यस्य षाण्मासिकदर्शनापेक्षया न्यूनकालिकत्वेन दर्शनम्। तत्र स्वल्पकाल तद्दर्शनादर्शने भवतस्तद्दर्शनादर्शनयुक्त आदित्यो वायुशब्देनोच्यते। वायुशब्दे निरुक्तकारेण वकारस्याधिकस्य योगो मुख्यः शब्दस्तु आयुरेवेति उच्यते। आयुशब्देन स्वल्पाधिकमिश्रणेन निमित्तेन वायुर्बोध्यते। तस्य तत्र दैर्घ्यस्यानेकदिनसम्बन्धित्वरूपस्य दानप्रार्थनामन्त्रेषु यथा "सविता नो रासतां दीर्घमायुः" इति। तस्यैव वायोरायुष्ट्वं गृहीत्वाऽऽयुषोऽपि आधिक्यप्रार्थनेति। अतएव मन्त्रे उच्यते "आयुः पवत आयवे" इति। तत्रैकत्र देशे तद्दर्शनकाले तद्विरुद्धदेशे तददर्शनं तददर्शनकाले च तद्दर्शनमिति गृहीत्वा आयुद्वयं कल्प्यते। तत्रैक आयुः वायुरपरस्मा आयवे वायवे तत्संगत्यर्थं पवत गच्छति, इति। पूधातोर्गत्यर्थत्वं निघण्टुषु। वायुद्वयं च स्पष्टमेव मन्त्रे प्रतिपाद्यते "द्वाविमौ वातौ वात आ सिन्धोरा परावत" इति। सर्वथा वायोः श्वत्वं स एवर्भूणां सुप्तानां बोधक इति कल्पनोक्तमन्त्रे। वायुद्वययोगेन तत्र विरोधसम्बन्धेन श्व-प्रश्वशब्दाभ्या वचनम्। अतएव यमं प्रति द्वयोः शुनोः पथिरक्षित्वेन वचनम्। एवं चेदं सर्व वर्णनमादित्यपरं सन्नक्षत्रादिषु तत्सत्त्वादिना कल्पितममुख्यमित्युक्तम्।

तथाचोक्तरीत्या द्वादशपरिक्रमासम्बन्धेन द्वादशदिनानि पूर्वस्मिन् परस्मिन्वा अनन्तर्गतानीति अधिकत्वेन वचनादि। तदपि सर्वादौ मृगस्थल उपलक्षितमिति, मृगादितारकासु तत्कल्प्यत इति न तत्सर्वं मृगशिरसो वासन्तिकसंपातस्थत्वसाधनायालमित्युक्तमेव। उक्तरीत्या द्वादशदिनपर्यन्तं संवत्सरबहिर्योगो बहिष्पवमानस्तोत्रे त्रिवृन्नामकस्तोमवशतस्तदीयविष्टुतिवशतश्च विज्ञायत इति अवसरान्तरे प्रतिपादयिष्यते। यच्च मृगशिरस आग्रयणपात्रत्वेन

यज्ञे कल्पनमित्युक्तिः। सा तु विरुद्धैव। तत्र बीजमुच्यते—ग्रहाणां संख्या सप्त, नामानि शुक्रमन्थीप्रभृतीनि शुक्र-मन्थीत्यनयोः सोमसूर्यबोधकत्वेन प्रसिद्धग्रहबोधकत्वमिति सङ्ख्यासाम्याद्ग्रहबोधकत्वे आग्रयणशब्दोऽप्याकाशस्थं मृगनक्षत्रं बोधयतीति।

यतो ग्रहसङ्ख्या सोमयागे पञ्चदशाधिका। तथाहि सवनेषु ग्रहाः क्रमिकाः केचन पुनरुक्ताः। यथा प्रातः सवने—उपांशुः १, अन्तर्यामः २, ऐन्द्रवायवः ३, मैत्रावरुणः ४, आश्विनः ५, शुक्रः ६, मन्थी ७, आग्रयणः ८, उक्थ्यः ९, ध्रुवः १०, वैश्वानरो ग्रहो विकल्पितः ११, ऋतुग्रहौ १२, १३, ऐन्द्राग्नः १४, वैश्वदेवः १५, इति। मध्यन्दिने सवने—शुक्रः १, मन्थी २, आग्रयणः ३, उक्थ्यः ४, मरुत्वतीयास्त्रयः ५, ६, ७, माहेन्द्रः ८, दधिग्रहश्च ९, इति। तृतीयसवने—आदित्यः १, सावित्रः २, वैश्वदेवः ३, पात्नीवतः ४, हारियोजनः ५ इति।

तत्रापि केचन औलूखला उच्यन्ते उलूखलाकारपात्रेण गृह्यन्ते। केचन स्थालीग्रहा उच्यन्ते। केचन उभयतोमुखाः। इति तेषां नानारूपत्वम्। तत्र साकल्येन नवौलूखलाः, चतस्रः स्थाल्यः (अर्थात् स्थालीग्रहाश्चत्वारः) द्वौ ऋतुग्रहौ स्रुङ्मुखाकृती, उभयतोमुखौ इति १५। ऐन्द्राग्नवैश्वदेवमारुत्वतीयमाहेन्द्राणामृतुपात्रेण ग्रहणम्, दधिग्रहोऽग्निहोत्रहवण्या गृह्यते हूयते च। सावित्रवैश्वदेवपात्नीवतानामुपांश्वन्तर्यामयोरन्यतरेण पात्रेण, हारियोजनस्य द्रोणकलशेन ग्रहो होमश्चेति। अत्र शुक्रामन्थिनोरेव केवलमादित्यचन्द्रम.परत्वेन वचनमवशिष्टेषु ग्रहाणां मङ्गलादीनि नामानि न भवन्तीति कथं मृगशिरःपरत्वे आग्रयणस्य साधनं स्यात्। आग्रयणः स्थालीग्रह इत्युच्यते। कथ तत्र मृगशिरसि तत्सम्भवः।

एतावता विस्तरेण विवेचनेन विज्ञायते यद्दीक्षाब्राह्मणे उच्यमाना दीक्षार्थास्त्रय. काला विभिन्नकालिका वर्षादिरूपास्तत्र फाल्गुनपौर्णमास्या वर्षादित्वं पूर्वकालिकमेवं चैत्र्या अपीति वर्णनं न युक्तिमदिति विज्ञानम्। वर्षादित्वं केवलं संपातादेर्वसन्तस्यैवेति पूर्वं विज्ञातं, मकरादित्वं पाश्चात्यमिति वर्णनमयुक्तमिति प्रदर्शितम्। देवयानादेश्चातुर्विध्यस्य पूर्वसिद्धत्वेनैकस्मिन्नेवावसरे त्रयाणां वर्षादीनां संभवः प्रतिपादितः। स एव दीक्षाब्राह्मणे गृह्यते। तत्रैकाष्टकारूपो वर्षादिरुषःकालमारम्य, माघकृष्णाष्टम्या एकाष्टकात्वमुच्यते—'माध्याःपरस्ताद्याऽष्टमी जेष्ठया संपद्यते तामेकाष्टकेत्याचक्षत' इति वचनेन। तत्र संपद्यन्तां नाम साष्टमी ज्येष्ठया। एकाष्टकात्वं कुतस्तस्याः। यतोऽष्टकशब्दोऽष्टावयवक-

समुदाय बोधकः, न त्वष्टम्यां तादृशत्वम्। एकशब्दार्थः प्रधानत्वं मुख्यत्वं वा तद्योगश्च दूरे एव। तस्मादत्रैकाष्टकायोगादेकाष्टकात्वं तच्च मूल आचक्षत इति वचने संप्रदायतः प्राप्तमिति बोध्यते। याजुषे त्रिंशदुषस्तावके सूक्त उषस एकाष्टकाशब्देन व्यवहारः। 'एकाष्टका तपसा तप्यमाने'त्यादिना स्पष्टः। उषस्यप्यष्टकशब्दयोगश्चौपाधिकः। तत्र सुमेरुकुमेर्वोर्विषुववृत्तसंपतितयाम्योत्तरवृत्ते छेदबिन्दुत उभयतः पार्श्वयोश्चतुर्विंशत्यंशपर्यन्तं प्रतिसम्बत्सरमादित्यस्य गमागमौ भवतः। तत्र प्रतिपार्श्वं चतुर्विंशपर्यन्तं गमागमाभ्यां मासषट्कमुपयुज्यते। एवं चैकमासार्थं तत्रांशाष्टकमुपयुज्यते। तत्रोदयात्पूर्वं सवितुर्मासपर्यन्ता स्थितिस्ततः पूर्वं मासपर्यन्तोषसःस्थितिरिति तानंशानुपाधित्वेनोपादायोषसोऽष्टकाशब्देन व्यवहारः। सा माघ्यामष्टम्यां प्रथमेति एकाष्टका तद्योगादष्टमी तच्छब्देन बोध्या इत्यन्यत्र विस्तरः।

फाल्गुनस्य सवत्सरमुखत्वेन वर्णनेन फाल्गुनादिः सावित्रकालाभिप्रायेण चैत्रपूर्णमासस्य तु आदित्योदयरूपवर्षादित्वेन त्रयाणामेकत्र ग्रहणस्य तत्र वर्णनात्। एतावता नक्षत्रियप्रजापतेरनुरोधेन संपातस्यासर्ववृत्तभ्रमेण पञ्चानामेव नक्षत्राणां नियमनस्य सकृद्दर्शनमात्रेणासम्भवेन पुनः पुनस्तत्र प्रवृत्तिः सांपातिकपरिभ्रमांशानां सङ्ख्यानियमनस्यापि अनेकवारदर्शनसाध्यत्वेनानेकेषां पर्यायाणामपेक्षणे एकैकस्य पर्यायस्य सप्तसहस्रवर्षापेक्षया अनेकवारं पर्यायापेक्षणे पर्यायाणां सङ्ख्याया अनियमेन वेदकालस्याप्यनियमनेनावधारणं दुःशकमेवेति दिक्।

आदित्यस्योदयावसरेऽस्तावसरे च खण्डितबिम्बता, तत्रोदयावसरीयखण्डितबिम्बस्य यथा आग्रयणपदबोध्यत्वमेवमुदयावसरीयस्य लोकभेदेनास्तावसरीयस्य च तस्यैतरेये स्तोत्रशस्त्रविपर्यासेन प्रतिपादनं क्रियते। तथाहि तत्रोच्यते—"देवरथो वा एष यद्यज्ञस्तस्यैतावान्तरौ रश्मी यदाज्यप्रउगे तद्यदाज्येन पवमानमनुशंसति प्रउगेणाज्यं देवरथस्यैव तदान्तरौ रश्मी विहरत्यलोभाय तामनुकृति मनुष्यरथस्यैवान्तरौ रश्मी विहरन्त्यलोभाये"ति। "यथा वै स्तोत्रमेवं शस्त्रमिति" "स्तुतमनुशंसती"त्यादिवैदिकवचनतो याज्ञिकव्यवहाराच्च स्तोत्रं पूर्व तत्समानरूपं शस्त्रं तत इति क्रमः सर्वत्र स्तोत्रशस्त्रवचने। परन्त्वसावाज्यप्रउगशस्त्रयोर्विषये विपर्येति। बहिष्पवमानस्तोत्रं प्रथमं तत्समानरूपेण प्रउगेण शस्त्रेणानुशंसनीयम्। एवमाज्यस्तोत्राणि परवर्तीनि तानि समानरूपेणाज्यशस्त्रेणानुशंसनीयानि, परन्तु बहिष्पवमानस्तोत्रमाज्येन शस्त्रेण अनुशस्यते, आज्यस्तोत्राणि च प्रउगशस्त्रेण होत्रकशस्त्रैश्चानुशस्यन्ते सोऽयं विपर्यास उक्तब्राह्मण उच्यते।

तत्र विहरतीत्यनेन विहरणं विपर्यय उच्यते। अत्र कुतोऽयं विपर्यासः कुतो वा विपर्यासोक्तिः किन्निमित्तो वा विपर्यासकल्पनबीजभूतः प्राथमिकः क्रमः कीदृशो वा स इति विचाराः प्रादुर्भवन्ति। नैतेषां विषये ब्राह्मणे किमप्युच्यते। प्रत्युत निमित्तानुल्लेखात्सिद्धवद्भावेन तद्ग्रहणाच्च प्राथमिकः क्रमो निर्हेतुकः स्वाभाविक इति गृहीत्वैव परवर्तिविपर्ययमात्रं ब्राह्मण उल्लिख्यते। तस्य निमित्तं तत्र प्रतिपाद्यते, देवरथकल्पनासामञ्जस्यम्। अतएव तत्र शस्त्रयो रश्मित्वेन तयोर्विपर्यासो लोभाभावायेत्युच्यते। स च लोभाभावो वैपरीत्याभावेन सामञ्जस्यपर्यवसायी। अतएव लोके दृश्यमानस्य रथादेरान्तररश्मिविपर्यासस्य प्रवृत्तिः। वस्तुतो लोके रथादेरान्तररश्मिविपर्यासः प्रत्यक्षसिद्धवाहननियन्त्रणद्वारा दाढर्यमूलको न तु यज्ञे क्लृप्तदेवरथत्वोपपादकस्य आज्यप्रउगयोरश्मित्वकल्पनस्य तयोर्वा रश्मिरूपयोर्विपर्यासस्य वशतः कल्पितो भवति। किञ्च तत्क्लृप्तावपि आन्तरयोरश्मिरूपयोर्विपर्यासेन वस्तुतो देवरथस्य न कोऽप्युपकारः सिध्यति। कल्पनाया अव्यवस्थितत्वेन रथत्वकल्पनाया असत्त्वेऽन्यरूपकल्पनायां वा तस्य विपर्यासस्यालोभसाधकत्वस्योपपादयितुं शक्यत्वात्। तस्मान्नेयं कल्पना साध्वी। किञ्च प्रथमक्रमस्य प्रामाणिकस्य सिद्धौ तद्भिन्नरूपस्य तस्य विपर्ययोक्तिकल्पनसम्भवः। स एव कुतः क इत्यत्र प्रमाणानुपलम्भः। किञ्चात्रैतस्य आनुष्टानिकक्रमस्य विपर्यासरूपत्वे मौलिकाविपर्यस्तक्रमस्यापि कुत्र चन प्रयोगस्यावश्यकता। तदसत्त्वे तु अयं विपर्यस्तत्वेनोच्यमानः क्रम एव मौलिक इति तस्य विपर्ययस्तत्त्वरूपस्यैवाभावापत्तेर्यज्ञे देवरथकल्पनोपपादकत्वस्याप्यभावापत्तेः। तस्माद्विभिन्नमूलनिबन्धनत्वं तस्य वक्तव्यमिति। अहेतुकत्वे तु विपर्यासकल्पनस्यैवानुदयादृश्यक्रमस्यैवाविपर्यस्तरूपत्वं स्यादिति।

यत्तु आज्यनामवशतः क्रमस्य मौलिकत्वम्। आज्यस्तोत्रस्याज्यशस्त्रेणानुशसनस्योचितत्वं नामसाम्यात्। तद्वैपरीत्ये च प्रउगस्यापि विपर्यासोऽर्थ सिद्ध इति। तदपि न मनस्तोषमावहति। अस्तु नाम नामसाम्यं मास्तु विपर्यय इत्यस्यापि संभवात्। मूलक्रमयोगिस्थलानुपलम्भेन विपरीतापादनासंभवात्। तस्मादन्यनिमित्तनिबन्धनत्वं व्यवस्थाप्य विपर्यासादेर्वचनं कर्तव्यम्। ब्राह्मणे च तदनुपलम्भ इति चेदत्रोच्यते—ब्राह्मणप्रामाण्यादत्र विपर्यासो मन्तव्यः। विपर्यासार्थं च मूलक्रमोऽन्यरूपः स्वीकार्यः। स च नामसाम्यनिबन्धन एव। ननु चोक्तं नामसाम्यस्याप्रयोजकत्वमिति। भवेदेतदेवं यदि अहेतुको नामोपनिबन्धः स्यात्। न च तथा। ब्राह्मणान्तरे आज्यशब्दस्य निर्वचनमुच्यते, "यदाजिमीयुस्तदाज्यानामाज्यत्वम्" इति। आजिधावनस्य तत्पदनिर्वचने हेतुत्व-

बोधनात्। तच्च प्रकृते कथं संभवतीति विचार्यम्। स्तोत्रशस्त्राणां शब्दरूपाणामचेतनानामाजिधावनासम्भवात्। यत्त्वर्थवादत्वेन स्वार्थे तात्पर्याभावेन विरोधेऽपि न दोष इति। स्वार्थे तात्पर्याभावेनाप्रामाणिकत्वे आज्यशब्दप्रयोगाधीनक्रमविपरीतक्रमकल्पनाया ब्राह्मणोक्ताया उपपादनासम्भवात्। न च विरोधोक्तिरपि अर्थवादान्तर्गतेति न तत्र क्षोदक्षमार्हतेति। तदयुक्तम्। प्रशंसार्थमुपादीयमानोऽप्यर्थवादः साक्षात्प्रशंसामबोधयंस्तदर्थं प्रकारान्तरमनुसरंस्तदर्थहेतुविशेषनिबन्धनत्वमेवेति संसूचयति। एवं च प्रकृतेऽपि साक्षात्प्रशंसाबोधनमकृत्वा प्रकारान्तरेण प्रशंसां बोधयंस्तस्य हेतुविशेषनिबन्धनत्वं सूचयति इत्येव युक्तम्। प्रशंसायां तस्याविवक्षितार्थत्वमिति वचनमात्रेण तत्परित्यागकल्पनानौचित्यम्। अविवक्षितार्थत्वेन तद्व्याख्याने व्याख्यातॄणां प्रयत्नवैयर्थ्यात्। किञ्च शबरस्वामिभिस्तादृशस्थले नित्यं कञ्चनार्थं गृहीत्वा तदुपपादनस्य वचनम्। वार्तिककृता तादृशस्थले दिक्प्रदर्शनार्थं नित्यार्थपरत्वेन व्याख्यानं तत्सर्वमयुक्तमापतेत्। किञ्चात्र शस्त्रयो रश्मिरूपत्वेन स्तवेन 'विहरतीति' विहरणस्य विधिः, प्रकारान्तरेण तस्याप्राप्तत्वात्। विहरतीति पदस्य विपर्यासार्थकत्वेन कथं स इति विचारः। भाष्यकृता तत्पदस्य संपादनार्थत्वव्याख्यानेन विरोधानुपस्थापनमेव। परन्तु तथा व्याख्यानेनात्र विरोधाभासनेऽपि वचनान्तरेण प्राप्तस्य विरोधस्यानुपपादनं स्यात्। "यथा वै स्तोत्रमेवं शस्त्रम्"इत्यनेन साम्ये प्राप्तेऽत्र प्रकारान्तरस्याश्रयणेन 'विहरती'त्यस्य विरोधकार्थकत्वस्यैवोचितत्वम्। अत एवार्थवादेन विरोधस्यैव विधिप्राप्तस्य प्रशसनं क्रियत इति तस्य सङ्गतिः। तस्मान्मीमांसाभाष्यवार्त्तिककारवचनानुसारेण कथमस्य ब्राह्मणोक्तार्थवादस्य नित्यार्थपरतयोपपत्तिरिति विचारणीयम्। तदर्थमुच्यते—

सत्यं, शब्दानामचेतनानामाजिधावनं न सम्भवति। समानात्स्थानान्नियतावधिदेशपर्यन्तं यत्किञ्चिद्वस्तुलाभफलं संभूय धावनस्याजिपदार्थत्वात्। तत्र फलेच्छया धावनस्य चेतनसम्बद्धस्याचेतनेष्वसम्भवस्तथाप्याजिसम्बद्धार्थप्रकाशकत्वाद् गौण आजिसम्बन्धस्तद्वशतः शब्दात्मकस्तोत्रशस्त्रादेरप्याज्यशब्दव्यवहार्यत्वम्। "यदाजिमीयु"रित्यत्राज्ययनं शब्दप्रवृत्तौ निमित्तमर्थवृत्तीति तेषामाज्यशब्दबोध्यता। अर्थेऽपि "यदाजिमीयु"रित्यत्रास्पष्टता कर्तृपदानुपादानात्, तथापि स्थलान्तरे ब्राह्मणे "देवा वै सोमस्याग्रपेये न समजानत," "तस्मिन्देवा न समजानत ममेदमस्तु ममेद"मिति। "ते सञ्जानाना अब्रुवन्नाजिमस्यायामहै स यो न उज्जेष्यति तस्येदं भविष्यति" इति देवानामाजिधावनस्य वर्णनात्। तथा "अश्वतरीरथेनाग्निराजिमधावत्" इत्यादिना देवतानामाजिधावने वाहननिर्देशा-

द्देवताया वाऽऽजिधावनकर्तृतया ग्रहणम्। आजिधावनदेशश्च तत्र ब्राह्मणे "तेऽग्नेर्गृहपतेरादित्यं काष्ठामकुर्वत" इत्यनेन आदित्यपर्यन्तो गृहपतिमग्निमारभ्य देशो वर्ण्यते। तस्मिन्देशे आजिधावनं देवानाम्। देवाश्च किरणरूपाः। तेषामाजिधावनस्य—

"ईर्मान्तासः शिलिकमध्यमासः संशूरणासो दिव्यासो अत्याः।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः"॥

इति मन्त्रे हंसाइवेत्युपमानाद्दिव्यमज्ममिति वर्णनेन किरणानामाजिधावनमिति स्थलान्तरे निरूपितम्। तेषां किरणानामादित्यास्तमये तद्बिम्बवियोगेन तस्य च बिम्बस्य सहस्रकिरणवत्तया सहस्ररूपस्य लाभार्थं बिम्बपर्यन्तं धावनम्, तच्चादित्यास्तमयमारभ्येति। आदित्यस्यास्तमयेऽग्नौ प्रवेशवर्णनेन अस्तशब्दस्य निघण्टुषु गृहार्थकेषु नामसु पाठेन गृहार्थत्वम्। एव चास्तं गृहं प्राप्तस्याग्निरूपतापन्नस्य गृहपतित्वम्। तमिम गृहपतिमग्निमारभ्य द्वितीयदिने उदेष्यत आदित्यस्य बिम्बपर्यन्तत्वात्तस्यादित्यबिम्बस्यावधित्वेन पूर्वोक्तो देश आजिधावनस्येति। तत्रास्तावसरे कियत्कालपर्यन्त किरणानां सन्दर्शनात्तेषामाजिधावनारम्भः। मध्ये च तमोमये काले ते धावन्त एवेति कल्पना। पुनरुदयात्पूर्वं तेषां किरणानां दर्शनेन त एवेमे आजि धावन्त इति विज्ञानात्तेषां किरणरूपाणां देवानामयमुदयात्पूर्ववर्ती देशोऽत्राजिधावनदेशत्वेन शेषभूतो गृह्यते। किरणाश्चोदयात्पूर्व सवितृकालमारभ्य दृग्गोचरा भवन्तीति मन्त्रे सवितारमुद्दिश्योच्यते "ऊर्ध्वभानु सविता देवो अश्रेत्" इति। निरुक्ते सवितुः कालः "यदा द्यौराकीर्णरश्मिरपहततमस्का भवति स सावित्र' काल" इति प्रतिपाद्यते। सवितुश्च मित्राभिन्नत्वम् "उत मित्रो भवसि देवधर्मभि"रित्यनेन मन्त्रे प्रतिपादनान्मित्रस्य "मित्राय पञ्च येमिरे जना" इत्यनेन पञ्चभिर्नियम्यत्वस्य वचनान्नियन्तारश्च पञ्चादित्योदयात्पूर्ववर्तिनो घटीपञ्चकरूपकालावयवा इत्यन्यत्र विस्तरेण निरूपितम्। तद्वशत उदयात्पूर्ववर्तिघटीपञ्चकरूपकालेनातिवाह्यः किरणैर्देशः किरणानामाजिधावनदेश इति फलति। तस्याजिधावनस्यादित्यमण्डलपर्यन्तत्वेन मण्डलस्यावधिरूपस्याजिधावनदेशत्वाभावान्न तस्मिन्नाजिधावनम्। द्वितीयदिनारम्भश्च संपूर्णमण्डलदर्शनतः प्रवर्तते इति सम्पूर्णमण्डलदर्शनतः पूर्ववर्तिखण्डितबिम्बदर्शनस्य कालो न दिनान्तरीयः। नापि स पूर्वदिवसीयरात्रिसम्बद्धः। तत्र बिम्बदर्शनप्रारम्भेण रात्र्या अवसानात्। एवञ्चायं खण्डितादित्यबिम्बसन्दर्शनकालो न पूर्वपरदिनयोरन्तःपतितो मध्यवर्तीति भवति। आदित्यकिरणविषये चैवं कल्पना वर्तते यदिमे किरणा अन्यत आगत्यादित्ये

प्रविशन्ति ततो निर्गच्छन्ति चेति। अनयोः प्रकारयोः क्रमशोऽरनाभिभावे-नारनेमिभावेन वचनम्। अन्यत आगत्य बिम्बे प्रविशतां तेषामराणामिव नाभौ प्रवेशो भवति। तत्र येनारेण चक्रस्य भूमिसंस्पर्शो रथचक्रस्थले सोऽरो नेमित आगत्य नाभौ संमुखं प्रविशति, यौ चारौ पूर्वोक्तस्य भूमिस्पृष्टारस्योभयपार्श्व-वर्तिनौ भवतस्तौ तिर्यक्त्वेनाभिमुखं गच्छन्तौ नाभौ प्रविशतः। एवमिमे किरणा अपीति तत्त्विध्यमभिप्रेत्य समानार्थकत्रिविधधातुप्रयोग एकस्मिन्नेव वाक्ये मन्त्रेषु। यथा वह्निवर्णने वह्निं प्रत्युच्यते "आजुह्वान ईड्यो वन्द्यश्चे"ति। तत्र सम्मुखमागन्त्रभिप्रायेण ह्वेञ् धातोः प्रयोगः। सम्मुखमागत्य स्तूयमान इति तदर्थः। तथेड्यो वन्द्यश्चेति। तत्रेडनं स्तुतिर्वन्दनमपि स्तुतिः। तत्र वामभागतोऽर्थाद्रात्रिभागत आगत्य तस्मिन्पार्श्वे नमस्कुर्वन्तः स्तुवन्ति इति। यथा कश्चन गन्तु प्रवृत्तो विरक्तः पश्चादागत्य नमस्कारपूर्वं सोऽनुनीयते तद्वत्। विश्वेपा देवानामेहिमायासोमाद्रवसःप्रभृतिविशेषणैरयं भावो व्यज्यते इत्यन्यत्र प्रपञ्चः।

एव सति वामभागतः समागत्य मण्डले प्रविशन्तो वन्दितारस्तैर्वन्द्य इत्यर्थः। दक्षिणपार्श्वतश्च समागत्यार्थाह्निभागत आगत्य बिम्बे प्रविशन्तः स्तोतारस्ते तदभिप्रायेणेड्धातोः प्रयोगः। अग्निञ्चादित्य इत्युक्तमेव। तेषां चैषां किरणा-नामयं विशेषो भवति यद्रात्रिकालीनानां केवलरश्मिरूपत्वं तत्र बिम्बवत्त्वाभावात्। दिनकालिकाना च सबिम्बरश्मिरूपतेति। रश्मयश्च येन मार्गेण गच्छन्ति तस्य छादनाच्छन्दांसीति कल्प्यन्त इति वामभागीयानां रश्मीनां केवलच्छन्दोवैशिष्टचं स्तुतौ। तदेव प्रकारान्तरेणोच्यते केवलैरेव मन्त्रैः स्तव इति। अयं शसनशब्दे-नोच्यते। दक्षिणभागीयानां तु बिम्बविशिष्टच्छन्दोवैशिष्टचम्। इदं स्तुति-स्तोत्रादिशब्दैरुच्यते। तत्र बिम्वस्य सामशब्देन बोध्यत्व ब्राह्मण उच्यते इति साम-विशिष्टर्क्साध्यं स्तोत्रम्। तद्रहितर्ङ्मात्रसाध्यं शस्त्रशब्देनोच्यते इति निष्कर्षः। एवं चैभिर्मध्यभागमर्थात्खण्डितबिम्बमारभ्य स्तुतिः कर्तव्या। तत्रैकेषां बिम्ब-राहित्यमपरेषां तत्साहित्यं भवति, विप्रकर्षादिकं तु सर्व समं भवतीति स्तोत्र-शस्त्रयोः सादृश्यम्, तदभिप्रेत्योच्यते "यथा वै स्तोत्रमेवं शस्त्रम्" इत्यादि। एवञ्च सति मध्यरूपे खण्डितबिम्बसन्दर्शनस्थले प्रारब्धा स्तुतिर्न वा रात्रिसम्बन्धिनी नापि दिनसम्बन्धिनीति। तस्य संसूचनं स्तोत्रशस्त्रनामभिः। एव किरण-सम्बन्धितया क्लृप्तव्यवहारानुरूप्येण यज्ञकर्मानुष्टानेन तत्रापि तथैव व्यवहारः।

तथाहि दिनान्तर उदित आदित्यः पवमान इत्युच्यते पवतेर्धातोर्गमनार्थेषु धातुषु निघण्टौ पाठात्। पवमानो गच्छन्। तदीयं स्तोत्र च दिनान्तरकालतो

बहिर्भूते खण्डितबिम्बदर्शनरूपमध्यस्थाने क्रियते। तस्य च स्थानस्य दिनान्तर-स्थानतो बहिर्भूतत्वेन तद्बोधनाभिप्रायेणैतत्स्तोत्रस्य नाम बहिष्पवमानस्तोत्रमिति। तत्साम्याय शस्त्रस्थले विरुद्धयोगार्थकपदयुतं शस्त्रं वक्तव्यम्। तच्च तादृशं पदं 'प्रउगम्' इति। प्रउगशब्दश्च प्रोपसर्गाद्युज्धातोर्निष्पद्यते। यकारलोपश्च वैदिकः। प्रशब्देन विरुद्धो भावो द्योत्यते। यथा दिशः प्रदिशः, द्यौः प्रद्यौः इत्यादि-स्थले। एवमत्र रात्रिविरुद्धयोगः खण्डितबिम्बदर्शनस्थले पूर्णबिम्बदर्शनस्थले च भवति। तत्र स्तोत्रानुरूप्याय रात्रिविरुद्धसम्बन्धयोगिनो दिनान्तरसम्बन्धा-योगिनो बोधक'प्र'शब्देन युगं तच्छब्दबोध्यमित्यर्थः। तादृशं शस्त्रं वक्तव्यम्। तच्च प्रउगं शस्त्रं तादृशमित्ययं शब्दबोधनाभिप्रायेण मुख्यः क्रमस्तमप्रयुज्य परवर्तिशब्दबोध्यमाज्यनामकमेव शस्त्रमत्र प्रयुज्यते। सोऽयं विपर्यासः, स च यज्ञे देवरथकल्पनया विशद्यते ब्राह्मणे। यथा च लोके रथस्थले पार्श्वद्वययोग्य-श्वद्वयनियन्त्रणाय प्रत्यश्वं प्रतिपार्श्वं रज्जुद्वयबन्धः क्रियते, तावता प्रत्येकाश्व-नियन्त्रणेऽपि गमनानुसारेणैकस्याश्वस्य विनियन्त्रणमपरस्य सुनियन्त्रणमित्याद्यर्थ-मश्वद्वयस्याभिप्रेतनियन्त्रकरज्जुद्वयमध्ये प्रत्येकमश्वसविधपार्श्ववर्तिरज्जुद्वयमान्तरं पार्श्वान्तरस्य बहिष्ट्वेन तत्रत्यरज्जुद्वयस्य बहिष्ठत्वात्, तदान्तर रज्जुद्वय विपर्यस्यते, एकस्य रज्जुरपरस्य रज्ज्वा योज्यते, तदीया च रज्जुः प्रथमस्य रज्ज्वा संयुज्य रज्जुद्वयं प्रत्यश्वं संपाद्यते सारथिभिः। तावताश्वद्वय सुनियन्त्रित विनियन्त्रित च भवति गमनानुसारम्। तावता च गमनस्याभिमतदिक्कतया तदभावरूपव्यामोहाभावो भवति। सोऽयमलोभो रथस्थले आन्तररश्मिविपर्यास-निबन्धनो यथा लोके, एवं यज्ञे रथत्वकल्पनाया रश्मिस्थानीयत्वेन क्लृप्तशस्त्रद्वय-विपर्यासेऽलोभो व्यामोहाभावो भवतीति तदर्थं शस्त्रविपर्यासः कर्तव्य इति ब्राह्मणे बोध्यते। तत्र शस्त्रद्वयाविपर्यासे कथं व्यामोहप्राप्तिः कथं च विपर्यासेन तन्निरास इति नैतद्विशदमुक्तं ब्राह्मणे, रथदृष्टान्तवर्णनेन व्यामोहतदभावयोः सामान्येन तज्ज्ञानं तावता तद्विशेषज्ञानाभावोऽतस्तज्ज्ञानार्थः प्रयत्नोऽपेक्षितः। स चैवं शस्त्रप्रयोगमूलभूता सौरी परिस्थितिरसन्दिग्धरूपेण बोधनीया शस्त्रद्वारा। सा चेत्तया बुद्धा न भवेत्स व्यामोहोऽत्र। यथावद्बोधाभावरूपव्यामोहाभावो विपर्यासस्य फलम्। तत्र दक्षिणपार्श्वीयरश्मिसम्बन्धाभिप्रायेण यथाऽत्र प्रथमेन स्तोत्रेण बहिष्पवमाननाम्नाऽसन्दिग्धदिनान्तरसम्बन्धाभावो रात्रिसम्बन्धाभावश्च बोध्येते, तथा वामपार्श्वीयसम्बन्धाभिप्रायेण शस्त्रतोऽपि दिनान्तरसम्बन्धाभावरात्रि-सम्बन्धाभावयोरसन्दिग्धरूपेण बोधोऽपेक्ष्यते। स च प्रथमशस्त्रस्य प्रउगेति नामवशतोऽसन्दिग्धो न भवति। यद्यपि विरोधार्थेन प्रशब्देन रात्रिविरुद्धसम्बन्ध-

बोधोऽसन्दिग्धस्तथापि दिनासम्बन्धबोधस्य सन्दिग्धतया व्यामोहः। रात्रिविरुद्ध-सम्बन्धश्च दिनासम्बन्धे मध्यमस्थाने दिनसम्बन्धे च समान इति व्यामोहप्राप्तिः। यदा च प्रउगं प्रथमं शस्त्रमनाशस्याज्यं प्रथमं शस्यते तदानीं तस्य व्यामोहस्य निवृत्तिः। न चाज्यशस्त्रवचनेऽपि व्यामोहसत्त्वमेव। आज्यशब्देन दिनरात्र्यो-रुभयोः सम्बन्धस्य प्राप्तिरिति वाच्यम्। शस्त्रबोधकेनाज्यशब्देन व्यामोह-प्राप्तावपि शस्त्रगतमन्त्रैस्तस्य निवृत्त्या दोषाभावः।

आज्यशस्त्रे हि भागत्रयेण त्रिविधा मन्त्राः पठ्यन्ते। प्रथमेन भागेन तूष्णी-शंसनामकमन्त्रपाठः। द्वितीयेन निविन्नामकमन्त्रपाठः। तृतीयेन भागेन सूक्तगत-मन्त्रपाठः। तदभिप्रायेणोच्यते 'तूष्णींशंसनिवित्सूक्तैराज्यशस्त्रं त्रिपर्वकम्' इति। तत्र तूष्णींशंसमन्त्रवशतो व्यामोहनिवृत्तिः। तूष्णींशंसनामकास्त्रयो मन्त्राः, भूरग्निर्ज्योतिर्ज्योतिरग्नोम्, इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रोम्, सूर्यो ज्योतिर्ज्योतिः स्वः सूर्योम् इति। एतैस्त्रिभिर्मन्त्रैः खण्डितादित्यबिम्बवर्णना। आदित्योदय-प्रारम्भेऽग्निज्योतिषोः पर्यायरूपता, मध्यभागे चेन्द्रज्योतिषोः पर्यायरूपता, उदयसमाप्तेः पूर्व मध्यभागोत्तरं च सूर्यज्योतिषोः पर्यायरूपतेति। एवं खण्डिता-दित्यबिम्बसन्दर्शनसम्बन्धबोधनेनैतै रात्रिसम्बन्धाभावो विस्पष्टं बोध्यते। तत एव च दिनसम्बन्धाभावस्याप्यसन्दिग्धतया बोधाद्व्यामोहाभावः। स चोक्तरीत्या शस्त्रविपर्ययनिबन्धन इति ब्राह्मणतात्पर्यमिति दिक्।

भाष्यकारेणोक्तब्राह्मणव्याख्यावसरे विहरतीत्यस्य संपादयतीत्यर्थः कृतः, स न युज्यते। तथा सति रथकल्पनाया आन्तररश्मिकल्पनाया विहरतीति विपूर्वक-हृधातोश्चोपादानं निरर्थकं स्यात्। विपूर्वकहृधातोश्च विपर्यासार्थकत्वं "विहृतं षोळशिनं शंसती"त्यदिषु दृष्टम्। विरोधार्थत्वे विचार उपरिष्टात्प्रदर्शित इति दिक्।

ऐतरेयब्राह्मणे ग्राव्णः स्तुतिसम्बन्धेनाख्यायिकोच्यते। देवाः सर्वचरौ सत्रमनुतिष्ठन्ति स्म। तेषां पाप्मनो विनाशो न जातस्तदानी काद्रवेयोऽर्बुदः सर्पऋषिर्मन्त्रकृत्तानुवाच, भवतामेका होत्रा क्रियाऽकृता, ततः पाप्मविनाशो न जातः। अहं वस्तां क्रियां करवाणि भवतां सत्रे, तेन पाप्मनो विनाशो भवेदिति। देवताभिः सम्प्रतिपन्नेऽस्मिन्नर्थे स काद्रवेयः प्रतिदिनं मध्यन्दिने समागत्य ग्रावस्तुतिं करोति। तथापि सोमो राजा देवानां पाप्मनोऽविनाशेन देवानुन्मत्ताञ्चकार। तदानी देवैः स्थिरीकृतम्, यदयमाशीविषोऽस्माकं राजानमवेक्षतेऽतस्तदीयं विषमत्र सोमे उपसृतं ततो नो माद इति। ततोऽस्याक्षिपिनाहं कुर्म इति स्थिरीकृत्य तथाऽनुष्ठितेऽपि पुनर्देवानामुन्मादः समभूत्। तदानीं पुनस्तैरेवं स्थिरीकृतं यदयं

स्वीयैरेव मन्त्रैः स्तौतीति तन्मन्त्रेऽपि विषसम्पर्केणैव उन्मादोऽतोऽस्य मन्त्रान् स्वीयमन्त्रैः सम्पृक्तान् कुर्म इति, तथानुष्ठिते देवानां पाप्मक्षयः सञ्जातस्तदनुसारेण ग्रावस्तुतिर्मध्यन्दिने कर्तव्या। यो विजानाति एवं तस्यापि पाप्मनो विनाशो भवतीति।

अत्रानेके विचाराः प्रादुर्भवन्ति। को वायमर्बुदः काद्रवेयः, कथञ्चैतस्यार्बुद इति नाम, कथं च स सर्पःसन् स्तुतिमकरोत्, कथञ्चासावृषिर्मन्त्रकृच्च। कथं तदक्षिसम्बन्धात् सोमे दोषः, कथञ्च देवानामुन्मादः, अक्षिपिनाहेऽपि तदीयमन्त्रेऽपि तदीयविषरूपदोषसंक्रमः, कथं मन्त्रपाठमात्रेण सोमे दोषसंक्रमः, कथ च तद्वशतो देवानामुन्मादः, कथं च मन्त्रान्तरसम्पर्कः, कथं तद्दोषतो निवृत्तिः, कथञ्च देवताभिरनुष्ठितमिति तत्सादृश्यात् कर्मणि माध्यन्दिने एतदनुष्ठानमित्युक्तिः। नित्यत्वात् कर्मस्वरूपस्य देवतानुष्ठानतः पूर्व कीदृश स्वरूपम्। यद्ययं न सर्पऋषिः कथ तर्हि ब्राह्मणे तदुक्तिः। कथं तदीयोक्तविधग्रावस्तुतिकरणेन सर्पाणां जीर्णत्वक्त्यागो नवीनत्वक्प्राप्तिरित्यादयः। अर्थवादत्वेनाविवक्षणमिति तत्र न दोष इति। तदपि न युक्तम्। अर्थवादत्वेनाविवक्षणे किमिति तदर्थव्याख्याने प्रवृत्तिः। एव सर्वचरुशब्दोऽत्र देशबोधको यज्ञबोधको वा, पाप्मापि दुरदृष्टं वा अन्यो वेति।

तत्र वेदे आदित्यस्यैवैकस्य वर्णनाद् ब्राह्मणस्यापि वेदत्वेन तत्रोक्ताः कथा अपि आदित्यस्यैव कर्मविशेषमवस्थाविशेषं वा वर्णयन्ति। ताश्च साक्षात्तं वर्णयन्ति साजात्येन वा तथा प्रवर्तन्ते। तत्रोदीयमानादित्यविषयेऽनेकाः कल्पना यत उदेति यत्रोदेति तद्देशद्वयाभिप्रायेण। तत्र यत्रोदेति तत्रामावपां सकाशत उदेति, उषसः सकशत उदेति, उदयाद्रितो जायते, रश्मिर्योज्यते, उत्पत्तिरेषा तत्र तस्य, दत्तोऽसौ हुतो वा यागे, इष्टो वेत्यादयो नानाविधाः कल्पनाः। एवं यत उदेति तद्देशाभिप्रायेण तद्देशीयैरसौ हूयते, तत्र मृतिं प्राप्नोति, तत्रत्यानामुपरि विरक्तो गुप्तभावं गन्तु गच्छति, उषसा वापह्रियते, वरुणेन बद्धो बन्धविमुक्ति क्रमशः कर्तुं प्रवर्तते, कृष्णवर्णतामुपगत इत्यादिका नानाविधाः कल्पना दृष्टिभेदेन। तादृशीमुदयावसरीयामादित्यस्य परिस्थितिमभिप्रेत्यैषा कथा। आदित्य उदयन् कतिपयेन समयेनोदितो भवति। तत्समयश्च देशभेदेन न्यूनाधिको भवति। यथा विषुवति तत्सविधवर्तिनि वा प्रदेशे कतिपयैर्निमेषैरसावुदेति। यथा यथाऽसौ ध्रुवाभिमुखे प्रदेशे उदेतु प्रवर्तते तथा तथा तस्योदये कालाधिक्य भवति। ध्रुवप्रदेशे च पूर्णग्रहणापेक्षया त्रिभिः पर्यायैस्त्रिभिर्दिनैर्वा, अपूर्णस्यापि ग्रहणे चतुर्भिः पर्यायैश्चतुर्भिर्दिनैर्वा सम्पद्यत आदित्यस्योदयः। यथा भुव उत्तरपार्श्वे एवं दक्षिणपार्श्वेऽपि। तत्र ध्रुवप्रदेशे भुव उत्तरपार्श्वे आदित्यस्योदये विलम्बमपेक्ष्यैषा कथा।

तत्र देवाः किरणाः। तेषामपि विषये विविधरूपेण कल्पनाः। अस्तमुपगतस्यादित्यस्य पश्चात् समुदितरूपेण धावन्तस्तमनुनयन्तीव एहिमायासीरित्यादि अनुनयोपयोगिवाक्यजातं प्रयुञ्जाना इवेति। तदभिप्रेत्य वेदे वर्णने तेषा'मेहिमायासः' पदेन वर्णना। तथेमे देवा आदित्यरूपसहस्रस्य सहस्रसंख्याकधनस्य लाभार्थ सम्भूयाजि धावन्तीवेति। यथा लोके आजिधावनस्थले किञ्चन फलं लब्धुं नियताद्देशान्नियतदेशपर्यन्तं पद्भ्यां वाहनैर्वा अश्वादिभिः सम्भूय धावन्ति। तदेतत् स्पष्टं ब्राह्मणे निर्दिश्यते यथा—"तेऽग्नेर्गृहपतेरादित्यं काष्ठामकुर्वत" "देवा वा ओषधीषु पक्वास्वाजिमयुः" "ते सञ्जानाना आजिमयु." इत्यादिना। आजिधावने फलमपि क्वचित् सोमस्याग्रपानम्, क्वचिद्विवाहे वहतुलाभः, क्वचित् सहस्रादिलाभ इत्यादि। एवं देवानां यज्ञकरणमिति। तादृशं यज्ञ निमित्तीकृत्यात्राख्यायामुच्यते—'देवाः सर्वचरौ सत्रं निषेदु'रिति। अत्र सर्वचरुरिति यज्ञनाम। सर्वश्चरुर्हूयतेऽत्र यज्ञे इति सर्वचरुर्यज्ञः। चरुशब्देनोदनस्थाली तत्स्थ ओदनश्चोच्यते। सा च स्थाली अत्रादित्यमण्डलरूपा विवक्ष्यते। आदित्ये नानाविधवस्तुसाजात्येन विविधपादशिरोऽक्षिकुम्भादिरूपैः कल्पना। एवमत्र चरुस्थालीत्वेन कल्पना। तस्या हविष्पूर्णता, हविश्चात्र तेजोरूपम्। तस्याः सर्वस्या यज्ञ उपयोगेन तस्य सर्वचरुशब्देन व्यवहारः। सत्रशब्देन वर्णनादत्र देवानां सर्वेषामविशेषभावेन कर्तृत्वं यज्ञे। आदित्य एकं देशं प्रकाश्यापरदेशप्रकाशनार्थमुदये पूर्वदेशस्थैरसौ हूयते इत्यादिकल्पना पूर्वमुक्ता। तदनुसारेण पूर्वदेशस्थैः सर्वचरुरूपस्यैतस्य होमरूपकर्मानुष्ठानं भविष्यत्यपरदेशप्रकाशनार्थं तच्च तमसो विनाशेनेति। तदत्रोच्यते 'सर्वचरुयज्ञानुष्ठायिनां देवानां पाप्मा तमोरूपस्तद्विघातो न जात' इति।

अयं भावः—उदयन्नादित्यो ध्रुवप्रदेशे सुमेरुकुमेरुरूपे त्रिभिः पर्यायैरुदेतीत्युक्तं प्राक्। तत्र देवताभिरेतस्य सर्वस्य चरोरुपयोगेऽपि न सर्वात्मना तमोविनाशः। यतः पूर्वदेशस्थैरस्तपूर्व विद्यमानं पूर्ण बिम्ब हुतम्। ततः परदेशे उदयप्रारम्भश्चास्मिंश्च देशे परस्तादस्तप्रारम्भस्तत्रोदयस्य समाप्तिः सम्पूर्णबिम्बदर्शने, तथा अस्तस्य समाप्तिरपि कृत्स्नबिम्बादर्शने, मध्यवर्तिखण्डितबिम्बदर्शनवेलायां न सर्वथास्तो वा उदय इति वा। तस्यां दशायां सम्पूर्णबिम्बदर्शननाश्यतमसो न नाशः पूर्णबिम्बस्य तदानीमसत्त्वात्। एवञ्च पूर्वपूर्णबिम्बसम्बन्धेन पूर्वबिम्बसम्बन्धिनो देवाः पश्चादागत्य तत्र सम्बद्धाः। होमवर्णनेन पश्चात्सम्बन्धस्य प्रतीतेः। होमशब्देन त्याग इव स्वीकारस्यापि प्रतीतेः परवर्त्युदितबिम्बसम्बन्धिनामप्यत्र सम्बन्धप्रतीतिः। सर्वोऽयं पश्चात् पुरस्ताद्वा सम्बन्धस्तिर्यक्सम्बन्धः।

सम्मुखसम्बन्धस्तु नोक्तः। तद्वचनाय प्रकृते तमसोऽनपहतिवचनम्। ततस्तेषां पाप्मानपहतिमालक्ष्य काद्रवेयार्बुदवचनम्। तस्य ऋषित्वेन वचनेन सम्मुख-सम्बन्धप्रतीतिः। ऋषीणां द्रष्टृत्वोक्तेः। उच्यते च 'ऋषिर्दर्शना'दिति। सर्प इति वचनान्मध्यदेशसम्बन्धप्रतीतिः। विश्वस्य लोकत्रयकल्पनायां सुमेरोर्द्योत्वेन कुमेरोर्भूत्वेनोभयोर्मध्यवर्तिदेशस्यान्तरिक्षलोकत्वेन वचनम्। एषामपि पुनर्लोक-त्रितयकल्पना। तथा सति भुवो भूलोक उदयस्थलीयः पश्चाच्चान्तरिक्षद्योलोका-वुपरिष्टात्। एवं सुमेरावपि। तत्र भुवो भूलोके आदित्यस्य भूसंसृष्टा गतिः। एवं तदीयाः किरणा अपि तत्र भूसंसृष्टा एव गच्छेयुः। किरणानाञ्च गतिः सर्पणरूपा। यथा सर्पन्तः सर्पादयो गन्तव्यं देशं सम्बद्धा एव गच्छन्ति न पुनर्मध्ये विच्छिद्य विच्छिद्य सम्बन्धं गच्छन्तीति ते सर्पणात् सर्पा उच्यन्ते। एव किरणा-नामपि गन्तव्यदेशे सर्पणरूपा गतिरिति तद्वन्तस्ते सर्पशब्देनोच्यन्ते। प्रकृतेऽयमृषिः सर्परूप इति तस्यापि सर्पणात् सर्पत्वं दर्शनादृषित्वमित्युक्तम्। काद्रवेय इत्युक्त्या तस्य भूसम्बन्धप्रतीतिः।

अयं भावः—आदित्येन दक्षिणोत्तरा गतिं गच्छता विषुवरूपमध्यदेशत उभयतः पार्श्वयोश्चतुर्विंशत्यंशपर्यन्तं गत्वाऽऽगम्यते प्रतिवत्सरम्। सा चैषा गति-रुदयस्थले विषुववृत्तं छिन्दति याम्योत्तरे वृत्ते मीयते। तत्र विषुववृत्तत उत्तर-स्तद्वृत्तभाग उत्तरस्यां दिशीति तत्रोर्ध्वारोहो भवति। दक्षिणभागस्य तद्वृत्तस्य दक्षिणस्यां वर्तमानत्वेन तस्याधोगामितया तत्रावरोह इति कल्पना। आरोहश्च वृक्षे भवतीति तस्योत्तरभागस्योत्तरदिक्कस्य वृक्षत्ववचनम्। तद्गृहीत्वा 'द्वा सुपर्णे'ति मन्त्रे वृक्षत्वं प्रतिपाद्य वचनम्। स चायमुक्तरीत्योर्ध्वाग्र इति शोभनो वृक्षः। यश्चोक्तयाम्योत्तरवृत्तस्य विषुववृत्तच्छेदबिन्दुमारभ्य दक्षिणभागस्तस्याधस्ताद-ग्रत्वेन तस्याधोऽग्रत्वमुपादाय स कुत्सितो वृक्ष इति स कद्रूशब्देनोच्यते, कुत्सितो द्रुः कद्रूरिति। तेनावतरणात् कद्रूशब्दबोध्यता। सा चादित्यस्य कुत्सादिशब्दैः प्रतिपाद्यते। उपसस्तु कद्रूशब्देन। एवंसति दक्षिणदिक्काया कद्र्वा अपत्यं काद्रवेयः। सोऽपि उक्तरीत्या मध्यदेशसम्बद्ध इति तस्य सर्पत्वमुक्तमेव। स च मन्त्रकृत्। अनेनैतस्य पाश्चात्त्यसम्बन्धिता व्यज्यते। आदित्यस्य किरणैस्त्रिविधः सम्बन्धः स च पार्श्वद्वयेन सम्मुखं चेति त्रिविधः। सर्वत्र स्तुतिकरणमित्यभिप्राये-णैकस्मिन्नेव वाक्ये त्रिविधशब्दैर्वचनं बहुषु स्थलेषु। स आग्नेये आजुह्वान ईड्यो वन्द्यश्चेति प्रतिपादितो विस्तरेण। यथासौ वन्दनादिशब्दैरुच्यते एवं धीती-मती-सुष्टुतिशब्दैरप्युच्यते। तत्र दक्षिणपार्श्वीया धीतिर्वामपार्श्वीया मतिः सम्मुखा सुष्टुतिरिति। एवं वामपार्श्वीयाया बोधो मन्धातुना। एवञ्च यथा मतिशब्देन

वामपार्श्वसम्बन्धेन स्तुतिरुच्यते एवं मन्त्रशब्देनापि तस्या वचनम्। तथासति मन्त्रमुक्तरीत्या स्तुतिं कुर्वाणो मन्त्रकृत्। अर्थाद्वामभागतः समागत्यादित्येन सम्बध्नन्नित्यर्थः। वामो भागश्चोदयात् पूर्ववर्ती दक्षिणो भागश्चोदयोत्तरवर्ती। तथाचासौ सर्प ऋषिः काद्रवेयो मन्त्रकृदित्युक्तिः। स च नाम्नाऽर्बुदः। अस्य नाम्नो निर्वचनं निरुक्तकारेणोच्यते। अरणमम्बु तद्दोऽर्बुदः इति। अम्बु-शब्देनोदकनामसु पठितेन उदकमुच्यते। उदकञ्च तेज इत्युक्तम्। एवञ्चाम्बुद-स्तेजःप्रद इत्यर्थः। तेनागत्य पाप्मनोऽनुपहतिं निमित्तीकृत्य ग्राव्णां स्तुतिरुप-स्तुता। तद्वशतः पाप्मनो विनाश इति।

अय भावः—देवाः सर्वचरुरूपं हविर्हुत्वापि सम्पूर्णादित्यमण्डलरूपं तद्वशत. सम्पद्यमानं सर्वपाप्मविनाशं न कृतवन्तः। यतो मध्यवर्तिस्थान उदय-द्रूपखण्डितबिम्बवशतो न सर्वपाप्मविनाशस्तेषाम्। तत्रापि वामभागीयपार्श्व-सम्बन्धस्योदयावसरीयप्राग्वर्तिपूर्णबिम्बवशतः पाश्चात्त्यसम्बन्धो जातस्तावताऽपि परवर्तिकाले खण्डितबिम्बसत्तया पाप्मनोऽविनाशः परवर्तिसम्पूर्णबिम्बस्थलीयः-सम्बन्धोऽप्रवर्तिपाप्मविनाशोत्तर इति खण्डितबिम्बदशास्थस्य पाप्मनो नाशो यज्ञक्रियाविशेषस्याननुष्ठानात्। सम्पूर्णबिम्बोदयात् पूर्वपर्यन्तं होतुः क्रिया। तदभिप्रेत्य सम्मुखसम्बन्धरूपहोतृक्रियाया अननुष्ठानेन पाप्माविनाशो अर्बुदोक्तः। स च व्यापारः सोमाभिषवग्रावस्तुत्यात्मा। तदभिप्रेत्य तेनोक्त"मेका वै वो होत्राऽकृते"ति। "तां वै वोऽहं करवाणी"त्युक्त्या सम्मुखसम्बन्धो बोधितः। ततो देवैः सम्प्रतिपन्ने तस्मिन्नर्थे ता स्तुतिं कर्तुं मध्यन्दिने येन मार्गेणागच्छति स मार्ग "अर्बुदोदासर्पिणी प्रपदि"त्युच्यते। अर्बुदस्योर्ध्वमासमन्तादभिमुखमा-गमनस्य पद्धतिरूपो मार्ग इति तस्यार्थः।

अयं भावः—उदयदवस्थास्थले आ अर्धबिम्बोदयं पूर्वलोकसम्बन्धिताऽर्ध-स्यानुदितस्य पश्चाद्वर्तिनोऽर्धबिम्बस्य परदेशसम्बन्धिता। एवं सति पूर्वपरदेशा-भ्यामसस्पृष्ट उभयोः सन्धानदेशो मध्यदेशोऽन्तरीक्षशब्दाभिलप्यः। स तु अत्यन्तं स्वल्प इति तस्य प्रपच्छब्देन व्यवहारः। अर्बुदस्तु पूर्वदेशसम्बन्धी अत एव सर्पः, तेन स्वदेशत ऊर्ध्ववर्तिनि अन्तरिक्षलोकदेशे सम्मुखमादित्यस्यागन्तव्यमिति तस्या अर्बुदोदासर्पिणीति विशेषणम्। उदयबिम्बस्थले उक्तविधलोकत्रय-सम्बन्धिताऽप्यैतरेये उच्यते—"देवा यज्ञं कुर्वाणास्तानसुरा आगच्छंस्तदानीं त्वरमाणैर्देवैराज्यप्रउगयोः पूर्वभागे निष्केवल्यमरुत्वतीययोर्मध्यभागे वैश्वदेवाग्नि-मारुतयोः परभागे संस्थापनमि"ति। सर्वथेयं प्रपदुदयस्थलीयपूर्वपरदेशा-सम्बन्धिसंकीर्णमार्गरूपेति। स्तुतौ मन्त्रैः सम्पर्कस्तु सम्यक् व्यामोहाभावार्थः।

व्यामोहस्तु सम्यक् पूर्वस्या दिशो ज्ञानाभावात्। इदमपि स्थलान्तरे ऐतरेय-उच्यते--"देवा यज्ञं कुर्वाणा दिशो न प्राजानन्नि"त्यादिना। यश्च तद्विज्ञान-फलः सम्मुखसम्बन्धो न केवलं पूर्वदेशस्थस्यैव किन्तूत्तरदेशस्थस्याप्यपेक्षितः। यतोऽयमन्तरिक्षदेश उभयसम्बन्धी। तदर्थं परदेशसम्बन्ध्यपि व्यापारोऽत्रा-पेक्षित इत्यभिप्रायेण स्वैर्मन्त्रैरर्बुदमन्त्राणां सम्पर्चनमुक्तम्। उभयसम्बन्धित्वे-नैव सम्मुखसम्पर्क इत्यर्थः। अक्षिपिनाहबीजं तु तदानीं पूर्वदेशसम्बन्धिनः पूर्णस्य बिम्बस्यादर्शनं तदेव गृहीत्वाक्षिपिनाह उक्तः। सर्वस्यैतस्य कल्पने सर्पत्व-मेव मूलम्। सर्पो ह्याशीविषो भवति दर्शनेनापि विषं संक्रामतीत्यादिकल्पनया उक्तविधकल्पना। एवञ्चेदं सर्वं वर्णनं देवेषूदयावसरीयं वर्णनमिति। वैषुव-वृत्तस्थलीयबिम्बमध्ययोगः सुमेर्वभिप्रायेण, तद्योगे सम्यक् पूर्वदिग्रूपादित्यबिम्ब-मध्यसिद्धिः। तस्या अत्राख्यायिकया वचनम्।

अयमेव भावः स्मार्तेषु कर्मसु योनिमेखलाविरहितेषु कुण्डेषु अर्थात् स्थण्डिलरूपेष्वग्निस्थानेषु सम्यक् पूर्वदिक्साधकस्थण्डिलसंस्कारेणाभिव्यज्यते। तद्विषये गृह्यसूत्रे "षड्लेखा उल्लिख्ये"ति षड्लेखोल्लेखनं स्थण्डिले कर्तव्यमित्यु-च्यते। तल्लेखोल्लेखनप्रकारश्च परिशिष्टे एवमुच्यते--"दक्षिणेऽष्टौ प्रतीच्या चतुः, उदीच्यां द्वे प्राच्यामर्धमि"त्यङ्गुलानि त्यक्त्वा षड्लेखोल्लेख इति। याज्ञिकानुसारेण दक्षिणत उपक्रमामुदगपवर्गामाधारलेखां विलिख्य तया असंसृष्टे प्रागायते द्वे लेखे लिखित्वा तयोर्मध्ये परस्परमसंस्पृष्टाः प्रागायतास्तिस्रो लेखा विलिखेदिति। सर्वाश्च ताः प्रादेशपरिमिता इति। तत्र कुण्डस्य चतुर्विंशत्यङ्गुलि-मानेन हस्तपरिमितचतुरस्रत्वेन सम्पादनम्। तत्र होमायापेक्षितवह्निस्थापनार्थं पूर्वदिग्विन्दुज्ञानार्थं पूर्वापरदक्षिणोत्तरगतिसाम्यायोक्तविधाङ्गुलिपरित्यागेन लेखालेखः। सोऽपि दक्षिणत उदगन्तु प्रवृत्तस्यादित्यस्य या गतिस्तदनुसारेणादित्य-मध्यबिन्दुरूपपूर्वासाधनार्थं वास्तवपूर्वारूपोक्तकुण्डमध्ययोगार्थं दक्षिणत उदगन्तु प्रवृत्तस्य दण्डकलितन्यायेन पूर्वप्रवृत्तबिम्बस्यावशिष्टा अष्टावङ्गुलयस्तन्मित-दक्षिणभागं कुण्डे परित्यज्य लेखालेखप्रारम्भः। तन्मध्ये दशाङ्गुलं बिम्बं दक्षिणत उदग्गामि तन्मध्य एव वास्तवपूर्वायोगी। तद्बिम्बस्योदग्वर्तितेजोऽभिप्रायवती रेखां परित्यज्य ततः परवर्ति दण्डकलितन्यायेन परस्तात् प्रवर्तमानबिम्बीया-ङ्गुलिद्वयं परित्यज्यते।

एवं सति कुण्डव्यासस्य दक्षिणगता अष्टावङ्गुलयस्तत उत्तरस्यां तेजोऽभि-प्रायवती लेखा व्यङ्गुलान्तरे, ततो द्व्यङ्गुलान्तराले पुनर्दशाङ्गुलाभिप्रायकं रेखा-त्रयं ततः परस्तात् पार्श्ववर्तितेजोऽभिप्रायवतीं रेखां विलिख्य परवर्तिद्व्यङ्गुलभागः

परित्यज्यते परवर्तिबिम्बाभिप्रायकः। तत्र कुण्डस्य व्यासश्चतुर्विंशत्यङ्गुलः। तत्र प्रथमं ८+२+१०+२+२=२४ प्रक्रम्यैवं तस्य एवंरूपो रेखालेखेन



सम्पद्यते—एवं कुण्डव्यासोपयोगो दक्षिणोत्तरः। पूर्वपश्चिमव्यासे पश्चिमायां चतुरङ्गुलपरित्यागः परस्तात् प्रादेशपरिमिते दण्डकलित-न्यायेन पूर्वापरबिम्बे तयोः सन्धिस्थानरूपपूर्वाविज्ञानाय कुण्ड-सम्बन्धार्थञ्च पूर्वस्यामर्धमङ्गुलं परित्यज्य तिसृषु रेखासु रेखालेखः। तदत्र पूर्व-पश्चिमव्याससम्बन्धिपूर्वोक्तमण्डलद्वयसन्धिस्थलरूपं मुख्यपूर्वारूपं बिन्दुस्थलं तस्य दक्षिणोत्तरवर्तिव्यासीयमध्यमबिम्बमध्ये प्रदर्शनाभिप्रायेणात्र कुण्डे पूर्वपश्चिमं प्रादेशमात्रं रेखात्रयं विलिख्य प्रदर्श्यते। तत्र मध्यमरेखायां पूर्वोक्तपूर्वपश्चिमव्या-सीयबिम्बद्वयसन्धिस्थान वस्तुतः पूर्वेति। तदनेन रेखालेखनेन दक्षिणोत्तरगतेः पूर्व-पश्चिमगतेः स्वल्पमन्तरमुपगतं भवति। तत उक्तरीत्या सर्वात्मना पूर्वबिन्दु-प्राप्तिस्थलीयसर्वपाप्मविनाशाभावस्तदर्थमर्बुदेन स्वल्पान्तरस्थलीयपाप्मविनाशार्थं सवनग्राव्ण स्तवरूपहोत्राकर्मवचनोपक्षेपः। स चार्बुदकर्तृकस्तवे मण्डलरूप-सोमाभिषवग्राव्णः सम्मुखस्तवरूपः। अत एवात्राभिष्टव इत्यभिशब्दप्रयोगः। स च विषुववृत्ताभिप्रायेणोदयप्राक्कालिकऋग्रूपः। तस्य चोदयप्राक्कालिकस्य मन् धातुना बोध इति स मन्त्रशब्देनोच्यते। इमे च विषुववृत्ताभिप्रायका इति अर्बुदमन्त्रत्वेन व्यवह्रियन्ते। मन्त्र इत्युक्त्यैव न सर्वथा बिम्बमध्यरूपोदय-स्पर्शितेति तद्वशत एतस्य सोमसम्बन्धः। ओदयं सोमस्थितिरत एव सोम-वशतो देवानां मदो मोहः पूर्वाविज्ञानरूपः। आदित्यबिम्बमध्याप्राप्त्या सः। तदीयमन्त्रसम्पर्कोऽपि दक्षिणोत्तराभिप्रायेण स्वल्पमन्तरमनिवृत्तं स्यादिति तन्नि-वृत्तये स्वीयमन्त्रसम्पर्को देवैः कृतः। पूर्वपश्चिमाभिप्रायेण दण्डकलितन्यायेन बिम्बद्वयमध्यस्यैव सम्यक् पूर्वात्वमिति। तयोरुदयास्तमयस्थलीययोः पूर्णबिम्बयोः परित्यागोऽक्षिपिनाहशब्देनोक्तः। उदयास्तमयस्थलीययोः पूर्णबिम्बयोर्मित्रा-वरुणचक्षुष्ट्वेन व्यवहारः प्रसिद्धः। अर्बुदशब्दस्य व्यक्तिविशेषणोक्तरीत्या-दित्यस्यैव निमित्तविशेषैस्तद्विशेषणकल्पनया रूपकेण प्राप्युचितव्यवहारकल्पने मध्यन्दिन एव समागमनेन ग्रावस्तुतिकल्पनम्। एतावताऽस्या आदित्य-व्यवहाररूपपरिस्थितेः सदातनत्वेन तदनुकारनिबन्धनं न यज्ञानुष्ठाने वैषम्यम्। आदित्यपरिस्थित्यनुकार एव यज्ञानुष्ठाने बीजम्। एतदभिप्रेत्यैवात्र ब्राह्मणे "तदनुकृतिमध्यन्दिने मध्यन्दिने एव ग्राव्णोऽभिष्टुवन्ती"ति वचनम्।

यत्तु ग्रावस्तुतौ उपयुज्यमानानामृचां संख्याविषये नानाविधविकल्पोप-स्थापनम्। यच्च अपरिमितपक्षसिद्धान्तनम्। तदुभयमपि अभिप्रायभेदेन समान-

फलमिति सर्वसंग्रहायापरिमितपक्षाश्रयणम्। यदि ग्रावस्तुत्या पुरुषः स्तुतो मन्यते तर्हि पुरुषस्य शतसम्बन्धिता "शतायुर्वै पुरुष" इत्यादौ प्रसिद्धेति ऋक्ष्वपि सा संख्या प्रयोज्या। यदि देवाः स्तुता मन्येरन् तर्हि देवानां त्रयस्त्रिंशत्संख्याया वेदे "त्रयस्त्रिंशद् वै देवाः", "त्रय एकादशास" इत्यादौ प्रसिद्धया ऋचामत्र त्रयस्त्रिंशत्संख्या प्रयोज्या। वस्तुतस्तु अस्मिन्नुदयावसरे न पूर्णबिम्बत्वमाक्रियासमाप्तेरिति न पुरुषरूपता इति न पुरुषाभिप्रायेण स्तव इति शतसंख्याया अप्राप्तिः। किञ्चादित्यस्योदीयमानत्वेन न देवानां किरणानामपि प्राप्तिः। सकलबिम्बोदयोत्तरं तद्योगात्। अतो न देवाभिप्रायकत्रिंशत्संख्यायाः प्राप्तिः। अत्रार्धोदयबिम्बस्य ग्रावत्वेन ग्रहणेन स्तुतिरिति तस्यैतावत्त्वमिति परिमाणाप्रसिद्ध्याऽपरिमितपक्षेण स्तुतिः। अतस्तस्य सिद्धान्तत्वेन वचनम्। खण्डितबिम्बस्थले पुरुषत्वास्वीकारः "पुरुषं वै देवाः पशुमालभन्त" इति ब्राह्मणे व्यक्तः। अर्बुदस्यागमनमार्गस्यार्बुदोदासर्पिणीनामत्वेन प्रपदो वर्णनं तदपि आदित्यसम्बन्धित्वेनोदयार्थाया अन्तिमर्च एव तत्त्वेन ग्रहणेनोपपादनीयम्। आदित्यस्योदयावसरे यत्रोदयस्तद्भिन्नदेशतो दानमिति कल्पना अन्यत्रोक्ता। प्रत्तिश्च दानम्। तद्रूपत्वं यथा दानार्थाया ऋचः "याज्यया यजति प्रत्तिर्वै याज्या" इत्यत्र प्रतिपादितं तद्वत्।

ऐतरेयब्राह्मणे देवताभिरिन्द्रस्य पञ्चापराधानुद्दिश्य सोमपानतस्तस्य वियोगः कृत इत्युच्यते। ते च पञ्चापराधास्तत्रोक्ताः। विश्वरूपं त्वाष्ट्रमवधीत्। वृत्रमवधीत्। अरुर्मघानवधीत्। यतीन् सालावृकेभ्यः प्रायच्छत्। बृहस्पतेः प्रत्यवधीदिति। तत्र विश्वरूपविषये तैत्तिरीये उच्यते—"विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्रीयोऽसुराणां, तस्य त्रीणि शीर्षाण्यासन् सोमपानं सुरापानमन्नादनम्। स प्रत्यक्षं देवेभ्यो भागमवदत् परोक्षमसुरेभ्यः। सर्वस्मै वै प्रत्यक्षं भागं वदन्ति यस्मा एव परोऽक्षं वदन्ति तस्य भाग उदितस्तस्मादिन्द्रोऽबिभेदीदृङ् वै राष्टं विपर्यावर्तयतीति तस्य वज्रमादाय शीर्षाण्यच्छिनत्" इति। वृत्रविषयेऽपि तत्रैवोच्यते—"त्वष्टा हतपुत्रो वीन्द्रं सोममाहरत्। तस्मिन्निन्द्र उपहवमैच्छत। तन्नोपाह्वयत पुत्रं मेऽवधीरिति। स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्। तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुपप्रावर्तयत् 'स्वाहेन्द्रशत्रुर्वर्धस्वे'ति। स यावदूर्ध्वः पराविध्यति तावति स्वयमेव व्यरमत। यदि वा तावत् प्रवणमासीद्यदि वा तावदध्यग्नेरासीत्। स सम्भवन्नग्नीषोमावभिसमभवत्। स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत। स इमान् लोकानवृणोद्यदिमाँल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वम्, तस्मादिन्द्रो अबिभेदपि त्वष्टा। तस्मै त्वष्टा वज्रमसिञ्चत्तपो वै स वज्र आसीत्तमुद्यन्तुं नाशकत्" इत्यादिना।

अरुर्मघानां विषये भाष्यकृतोच्यते—'ब्राह्मणवेषधारिणोऽरुर्मघनामकानसुरानिन्द्रोऽवधी'दिति। यतीनां विषयेऽपि तेनोच्यते 'यतिवेषधरानसुराञ्छस्त्रेण छित्वा सालावृकेभ्योऽरण्यश्वभ्यः प्रादात्' इति। बृहस्पतेरपि सम्बन्धेन तेनोच्यते बृहस्पतेर्वाक्यं स्वकीयेन वाक्येन प्रत्यवधीत्। सोऽयं प्रतिघातो न युक्तः। तथा चापस्तम्बः स्मरति 'वाक्येन वाक्यस्य प्रतिघातमाचार्यस्य वर्जयेच्छ्रेयसां चे'ति। ऐतरेयं ब्राह्मणं चैवम्—यत्रेन्द्रं देवताः पर्यवृञ्जन् विश्वरूपं त्वाष्ट्रमभ्यमंस्त, वृत्रमस्तृत, यतीन्सालावृकेभ्यः प्रादात्, अरुर्मघानवधीत्, बृहस्पतेः प्रत्यवधी"दिति।

अत्र बहु विचारणीयमापद्यते, किमिमेऽपराधा इन्द्रस्य वास्तवा उत कल्पिता वा। आद्ये इन्द्रस्याजातशत्रुत्वं वर्ण्यते तेन विरोधः। यद्यपि विश्वरूपवधविषये युद्धवर्णना नास्ति तथापि वृत्रवधे बहुविधा तादृशी वर्णना, तस्या 'मायेत्साते' इति मन्त्रोक्त्या विरोधः। निरुक्तकारेणोपमार्थेन युद्धवर्णना भवन्तीतिवचनेनासामञ्जस्यम्। किञ्च वृत्रवधे मन्त्रेषु सोमापानजनितो हर्षो निमित्तमिति वर्ण्यते, तेन 'सोमं मन्यत' इति मन्त्रोक्त्या विरोधः। यतीनां वधोऽयं कुत्रत्यः। वृत्रादिस्थले युद्धादिना वधमात्रमुच्यतेऽत्र वधमात्रवर्णने कर्तव्ये सालावृकेभ्यः प्रदानवर्णनया को गुणः। एवमरुर्मघानां वधोऽपि कस्मिन् देशे। ते ब्राह्मणवेषधारिण इति कथं ज्ञायते। बृहस्पतिप्रतिवधे किन्निमित्तं कथं चेत्यादि। अन्त्ये कि निबन्धनाः कल्पना इति।

तत्र वस्तुसन्तं देवताविशेषरूपमिन्द्रं गृहीत्वा नोक्तापराधादीनां सम्यग् विवेचनसम्भवः। बहूनां पदार्थानामव्यक्तत्वात्। नैरुक्तपक्षे लोकविशेषसम्बन्धेन वायुरूपमिन्द्ररूपं वा गृहीत्वा सैवावस्था वर्णनस्य इति। अत आदित्यरूपत्वमेव सर्वासां देवतानामुपाधिभेदभिन्ने आदित्य एव तत्तद्देवतारूप इत्येकात्मवादमते कथञ्चनोपपत्तिसम्भवः। तथाहि आदित्यो देवेषु प्रकाशमानो देवरूपोऽसुरेषु प्रकाशमानो देवरूपापेक्षया भिन्नरूपः। तादृशप्रकाशनं शतपथे उच्यते—"वसन्तो ग्रीष्मो वर्षास्ते दैवा ऋतवो देवेषु तर्ह्यसौ भवति देवांस्तर्ह्यभिगोपायती"ति। एवञ्च वसन्त-ग्रीष्म-वर्षा-पर्यन्तर्तुत्रये यत्रासावनस्तमितो दृश्यते तत्र देवलोकस्तद्विपरीतदिशि असुरलोको देवविरोधित्वादसुराणाम्। तदभिप्रेत्य तत्रैव ब्राह्मणे देवलोकीयसंस्कारानुरोधेनोच्यते—"शरद्धेमन्तः शिशिर इति त आसुरा ऋतवोऽसुरेष्वेव तर्हि भवति असुरांस्तर्ह्यभिगोपायति" इति। असुरलोकश्च देवलोकविरुद्धदिशीत्युक्तम्, देवलोकश्च भुव उत्तरस्मिन् पार्श्वे यत्रोक्तर्तुत्रयं सातत्येनादित्यदर्शनम्। तादृशश्च मेरोरुत्तरं शृङ्गं सुमेरुरूपं तद्विरुद्धश्च मेरो-

दक्षिणशृङ्गरूपः, कुमेरुरूपस्सोऽसुरनिवासस्तत्रर्तुक्रमो नामानि चान्यादृशानि, न तु देवलोकीयानि। नहि तत्र वसन्ताद्या ऋतव इति शरद्धेमन्तशिशिराणामृतूनां नामानि च क्रमश्च भवन्ति, तस्माद्देवलोकीयसंस्कारानुरोधेनोक्तं 'शरद्धेमन्तशिशिरेषु आदित्यस्य स्थिति'रिति। एवञ्चासुरलोके देवलोके च कालादिव्यवहारो भिन्नैर्नामभिः प्रकारैश्च। "तद्देवानां माने" इति मन्त्रव्याख्याने उक्तम्। तत्र देवलोकाभिप्रायेण दिनं रात्रिरिति कल्पना, असुरलोकाभिप्रायेण दिनं रात्रिरिति कल्पना समानैव कालभेदेन। देवतासु दिने देवताभिप्रायेण रात्रौ आदित्येन देवतासूदितेन रात्रिस्थाने तेजो दीयते तस्य तेजसः सोमशब्देन व्यवहारः स च सम्पूर्णा रात्रिं यावत् सञ्चितः सोमो रात्र्यवसानावसरे इन्द्रेण पीत्वा रात्रिकालिकस्यान्धकारादिरूपवृत्रादेर्विनाशः क्रियते। यथा देवतासु दिनं रात्रिरेवमसुरेष्वर्थात् कुमेरौ रात्रिर्दिनञ्च भवतः। तत्र दिवाभागे विद्यमानेनादित्येन रात्रिभागे तेजो दीयते। तस्य रात्रिभागीयस्य तेजसो न रेतस्त्वेन व्यवव्यवहारः, किन्तु भिन्नशब्देन व्यवहारः। तदुक्तं मन्त्रे—"यदन्यासु वृषभो-रोरवीति सो अन्यस्मिन् यूथे निदधाति रेत" इति। आदित्य एकदेशासूषस्सु भ्राजमानः। तदेव प्रकारान्तरेण भ्राजनमुच्यते 'वृषभ'इत्यादिना, यथा वृषभोगवां यूथे चरन् मदनिबन्धनेन श्वासेन रवेण च युक्तो रोरवीतीत्युच्यते। एवमसावादित्यो गोशब्दबोध्यासूषस्सु भ्राजमान एव रवणं कुर्वाणो भवति। एकदेशीयाभिरुषोभिः सम्बद्धो भवतीत्यर्थः। स तदानीमेवान्यदेशीयासूषस्सु रेतस्तद्रूपं तेजो दधातीति। तत्रान्यदेशीयासूषस्सु भासमानं तेजो दिनभागीयस्यैवादित्यस्येत्यर्थः। रेतः शब्दबोध्यन्व मन्त्रे उच्यते प्रश्नप्रतिवचनाभ्या "पृच्छामि त्वा वृष्णो अश्वस्य रेतः" इति प्रश्नः, "अयं सोमो वृष्णो अश्वस्य रेतः" इति उत्तरम्। एवञ्च रेतः सोमस्तस्य पानमिन्द्रेणोदयावसरे क्रियत इत्येकया प्रतिधापिवत्' इति मन्त्रेण पूर्वं प्रतिपादितम्। तच्च सुमेरावर्थाद्देवलोके, तत्रैवेन्द्रत्वमुदीयमानस्यादित्यस्येति। कुमेर्वभिप्रायेणोदये तत्रोषस्सु वर्तमानेन तेन तदीयं तेजस्तत्रत्यरात्रिकालिकासूषस्सु दीयत इति समानं, परन्तु तन्न सोमशब्देनोच्यते, तथा सति तत्रत्यरात्रौ सम्भृतस्य तेजसः पानमिन्द्रेणोदयावसरे कर्तव्यम्। तत्र चोदयः पश्चिमायामादित्यस्य न पूर्वस्यामिति पश्चिमायामिन्द्रसम्बन्धाभावेन तत्रत्यरात्रिसम्भृततेजस इन्द्रकर्तृकपानासम्भवः। सोमपानं चेन्द्रकर्मेति न तत्रत्यतेजसः सोमशब्देन वचनमिति। दिनावसानप्राप्त आदित्यः पुरुषरूपेणोच्यते इति "पुरुषं वै देवा" इत्यर्थवादे विस्पष्टं प्रतिपादितम्। रूपशब्दस्य निरुक्तकारेण रुच्धातोः सिद्धिरुक्ता। एवं सति रूपं तेजस्तेन परिपूर्णत्वं विश्वरूपत्वं तच्चास्तावसरीयमस्तश्चो-

भयत्रादित्यस्य सुमेरौ कुमेरावपि । तत्र कुमेवावस्तावसरीयो दक्षिणदिक्कः सुमेरावस्तावसरीय उत्तरदिक्कः। विश्वरूपत्वं तूभयोः समानं,तत्रोत्तरदिक्कस्य व्यावृत्तये तस्य विशेषणमुच्यते ब्राह्मणे 'विश्वरूपो वै त्वाष्ट्र' इति । एवं सति त्वाष्ट्रो विश्वरूपो दक्षिणदिक्कास्तावसरीय आदित्यः । तस्य तत्रास्तः पूर्वस्यां भवतीति तत्रेन्द्रसान्निध्यसम्भवः। इन्द्रश्च पूर्वारूपमध्यदिक्कस्तेन दक्षिणदिक्त आगच्छत आदित्यस्योत्तरस्यामर्थात् सुमेरौ प्रवर्तनमिव तस्य मारणमपरस्योत्पादनमिति कल्पनया दक्षिणस्यामस्तं गच्छतो दक्षिणस्या दिशो भूत्वेन ग्रहणाद्भुवश्चाग्निसम्बन्धित्वस्य वेदे प्रतिपादनादग्नेश्च त्वष्टृत्वम् "उभे त्वष्टुर्बिभ्यत" इति मन्त्रे प्रतिपादनादसौ विश्वरूपस्त्वाष्ट्रस्त्वष्टुः पुत्र इति वर्णयितुं शक्यत्वात्तस्य चेन्द्रेणास्तावसरे वध इति गृहीत्वा "विश्वरूपस्त्वाष्ट्र" इति कथा । स च विश्वरूपो देवानां पुरोहित इत्युक्तिर्देवानामुदयावसरीया या दिक् पूर्वा तत्र स्थापितस्तां प्राप्त इति । स चासुराणां स्वस्रीयः । यथोत्तरस्यामुषसो देवभगिनीत्वादिव्यवहार एवमादित्ये तत्पुत्रत्वव्यवहारः । एवं दक्षिणस्यामपि सान्ध्यस्य तेजस उषआदिपदबोध्यस्यासुराणां भगिनीत्वेन व्यवहर्तुं शक्यत्वम्, तत्पुत्रत्वं च तत्रत्ये आदित्य इत्यसौ विश्वरूपोऽसुराणां स्वस्रीय इत्युक्तिः । तस्येन्द्रेण बधे निमित्तमुच्यते प्रत्यक्षं देवेभ्यो भागवचनं परोक्षमसुरेभ्यो भागवचनम् ।

तत्र ब्राह्मणे उच्यते—"परोक्षमुच्यमानप्रकारस्यैव वक्तुरभीष्टता" । एवं रूपेण भेदनीतेरवलम्बनेन राष्ट्रं विपरिवर्तितं स्यादिति तस्य उक्तरीत्यास्ताऽवसरीयस्य विश्वरूपस्य त्वष्टुः पुत्रस्यास्तावसरप्राप्तस्य कुमेरौ स्थलत्रये तस्य रश्मिसम्बन्ध उभयतः पार्श्वयोः सम्मुखं च, तत्र रश्मीनां शिरस्त्वकल्पने तदीय एको रश्मिरस्तस्थलीयपार्श्वसम्बद्धोऽपरो रश्मिश्चोदयस्थलीयपार्श्वसम्बद्ध एकश्चोर्ध्वं सम्मुखं सम्बद्धः । तानि तस्य शिरांसि । तत्रोदयस्थलीयपार्श्वे सोमसम्बन्धात्तत्रत्यं तत्तस्य शिरः सोमपानं, मध्यस्थलीयस्य तस्य रात्रिमध्यसम्बन्धितेति तत्रत्यं तत्तस्य शिरः सुरापानम् । सुराशब्देन निघण्टुषु उदकनामसु पठितेनोदकं बोध्यते, उदकञ्चाव्यक्तं रात्रिगतं तेज इत्युक्तं पुरस्तात् । तत्पिबतीति तत्सुरापानम्, तथा वामपार्श्वीयञ्चान्नादनम् वामपार्श्वीयौषसोऽन्नवत्त्वात् । यद्यपि उषोमात्रस्यैवान्नवत्त्वं वाजिन्यादिशब्दैर्बोध्यते । एवं सत्यत्रापि तस्या अन्नवत्त्वमिति गृहीत्वा वामपार्श्वीयोषसोऽन्नवत्वमुक्तम् । तत्सम्बद्धं च तस्य शिरोऽन्नादनमिति स त्रिशिरा इति व्यवहृतः । अयञ्चास्तावसरीय इति तस्य करद्वयमुत्तरदक्षिणदिग्वर्ति । तत्रैकेन करेणोत्तरदिग्वर्तिना देवसम्बन्धी भाग इति प्रत्यक्षबोधनं, दक्षिणदिग्वर्तिनः परोक्षत्वाद्रात्रिसम्बन्धाच्च परोक्षमसुरेभ्यो भागवचनमित्युक्तिः ।

तस्य च तत्रास्तमये मरणं तदिन्द्रकारितमिति। स चायं विश्वरूपवध इन्द्रकृत इति तस्य दोषः।

एवं विश्वरूपस्यास्तोत्तरं परवर्तितेजसोऽपि उदयदिक्स्थे वह्नौ होम इति कल्पनया वृत्रकथोच्यते। उदयस्य समाप्तिरस्तावसाने इति अस्ते सम्पन्ने उदये च जाते पूर्वारूपमण्डलमध्यबिन्दोरपगमस्तदानीं क्रियमाणो यागो न सम्यक् पूर्वासम्बन्धीति तस्य नेन्द्रसम्बन्धितेत्यभिप्रायेण क्रियमाणस्य तस्य यागस्य वीन्द्रता। इन्द्रेणोपह्वेच्छा तदभावश्च सम्मुखीनत्वाभावनिबन्धनः कल्पितः। तत्र मण्डलविरहितस्यास्तोत्तरवर्तिनस्तेजसो लोपे यागत्वकल्पनयोक्तिः। तस्य हविषोऽग्निरूपाधाराप्राप्तिरग्नेरुपशमनिबन्धना। अग्नावस्तस्योदयस्य वा तत्कालिकत्वेन व्यवहारात्तत ऊर्ध्वं तत्स्थित्यभावेन तदुपशमस्ततोऽग्निरूपाधाराप्राप्तिः। तत्र विद्यमानादित्यस्य सोमत्वं तस्यापि तत्राभावः। खण्डितस्थलेऽस्तोत्तरं वा आदित्यस्यावर्तमानता। तदेव गृहीत्वा ब्राह्मणे उच्यते—"अग्निमप्राप्य अग्नीषोमावभीतिवे"ति। तस्य च होमद्रव्यस्य तेजसो विनाशेन तमसः प्रवृत्तिः। तमश्च सर्वासु दिक्षु अविरतस्वल्पगतित्वेन निष्प्रतिबन्धं प्रवर्तमानं सर्वं व्याप्नुते, तद्दृष्ट्वेन्द्रस्य त्वष्टुश्च भीतिवचनम्। त्वष्ट्रा तापरूपस्य वज्रस्य सम्पादनम्, परन्तु तापस्य गुणरूपत्वेन गुणिरूपाधारं विनोद्यमनासम्भवः। ततः क्रमेण तद्वधः सोऽपि असामानाधिकरण्यादिन्द्रस्थले तदभावेन कल्पितः। सोऽपि वृत्रवध इन्द्रस्यापराधः।

एवमरुर्मघानां विषयेऽपि। अरुर्मघाः के कुत्रत्या इति विशेषतोऽविज्ञानम्। केवल ब्राह्मणे "अरुर्मघानवधीद्" इति वध्यत्वोक्तया परिवर्जने दोषत्वोक्तया च पापत्वकल्पना। तच्च परिवर्जनीयत्वेनैव महापापमिति गृहीत्वा तत्त्वाय ब्राह्मणरूपधरत्वकल्पना। तेषां वध्यत्वस्य युक्तत्वायासुररूपत्वकल्पनेति। वस्तुतस्तु नास्य सर्वस्यात्रापेक्षा। देवताभिः सोमपानतो वर्जने कारणत्वेन विश्वरूपवधादिकं ब्राह्मणे उच्यते। तत्र सोमश्चादित्यासत्त्वस्थलीयतेजोरूपस्तस्य पानं बिम्बोदये संवृत्तं परस्तात्तस्य तादृशतेजोरूपसोमाभावेन तत्स्वीकाररूपसोमपानाभावः। स च देवताभिः कृत इति कल्पना। तत्र हेतुभूतत्वेनैषां विश्वरूपवधादीनामुक्तिः। एवञ्चेमे सोमपानाभावसंभावनापूर्ववर्तिनोऽपेक्ष्यन्ते। तत्र सोमपानाभावसम्भावना चोदयोत्तरमिति तेषां विश्वरूपवधादीनामुदयात् पूर्वकालिकत्वमपेक्ष्यते। अत एव तेषां तद्धेतुत्वकल्पनासम्भवः। तत्र विश्वरूपस्यान्यदेशोयस्योदयदेशेऽस्तगतत्वेन पूर्ववर्तिता। वृत्रस्य रात्रिवर्तितयोदयात् पूर्ववर्तित्वमिति सोमपानवर्जने यथा हेतुत्वकल्पनसम्भवः, एवमरुर्मघवधस्यापि तद्धेतुत्वप्राप्त्यर्थमुदयात् पूर्वभावित्वमेवापेक्षणीयं, तच्च ब्राह्मणादिकल्पनं विनापि वक्तुं शक्यम्। तथाहि अरुर्मघ इति नैतत्

प्रसिद्धं नामान्यत्र तन्नाम्ना व्यवहारादर्शनात्, किन्तु यौगिकम्। योगश्चारुर्मघं येषां ते तादृशा इति। तत्रारुःशब्दस्य तेजोबोधकता। अत एवोषोबोधकेषु नामसु अरुषीति स्त्रीलिङ्गमुषोनामोक्तम्, मघशब्दस्य धननामत्वम्, निघण्टौ धननामसु पाठात्। उषोनामसु चित्रामघेति प्रयोगादिन्द्रस्य मघवेतिनामनि धनार्थकमघशब्द-प्रयोगाच्च। एवञ्चारुर्मघा अरूंषि तेजांसि, अरुस्तेजो वा मघं धनं येषामिति विग्रहः। मानधना इत्यादिषु मानप्रधाना इतिवदरुर्मघा नाम तेजःप्रधाना इत्यर्थः। तेजःप्रधानाश्च उषआदयः। तत्त्वं तु तेषां लोकप्रसिद्धम्। उषस आदित्योदये अभाव इन्द्रकारित इति गृहीत्वा तस्मिन्नुषोवधकारिता। तदुक्तम्— "अपोषा अनसः सरत्संपिष्टादह बिभ्युषी। नियत्सीं शिश्नथद्वृषा" इति। "स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः" इति च। एवञ्चेन्द्रेण उदयात् पूर्वं रात्रौ क्रियमाण उषसो वधोऽरुर्मघवधः। यथोषसो वध इन्द्रकृत एवं सूर्यस्यापीन्द्रेण वध इति वर्णनात्तस्याप्यरुष्प्रधानत्वादरुर्मघत्वम्। एवञ्चोदयात् पूर्वभाविनाम-र्थाद्यत्र देशे आदित्योदयस्तद्भिन्ने देशे तेषामस्तेनादर्शनं मरणमिन्द्रकृतमितीन्द्र-स्यारुर्मघवधकारित्वोक्तिः। एवं चेदं सोमवर्जने हेतुत्वेनोक्तं सङ्गच्छते।

एवं सालावृकेभ्यो यतीनां प्रदानमपि तथैव। अत्र यतिशब्देन न लोक-प्रसिद्धसन्न्यासिनो गृह्यन्ते किन्तु यतयोऽत्र भिन्नरूपाः। तथाहि पूर्वमुक्तं "यदन्यासु वृषभो रोरवीति सो अन्यस्मिन् युथे निदधाति रेत" इतिमन्त्रानुरोधे-नैकत्रोषोभिः सम्बद्धस्यादित्यस्यापरत्र तद्देशीयासूषस्सु रेतोनिधानं, रेतसश्च सोमत्वमिति। सैषा रीतिः सर्वत्र विशेषतः सुमेरुकुमेर्वोः समाना। तत्र सुमेर्वभि-प्रायेण दिने उषोभिः सम्बध्यमानस्तदभिप्रायेण रात्रिस्थलीयासूषस्सु सोमस्या-धानम्। तदपि मन्त्रे निपूर्वक 'धा' धातुना बोधनान्निधिसमानरूपं, निधिर्गुप्तमाहित इति सोमस्यापीदं निधानं गुप्तं रात्रिवर्तिनीष्विति, अत एव तस्य रेतस्त्वेन व्यवहार इत्यपि सम्भावना। तदिदं सुमेर्वभिप्रायेण रात्रौ रात्रिपर्यन्तं वा निहितं तत्र सञ्चितं तत् पुनरुदीयमानेन स्वल्पोदयावस्थायां स्वस्मिन् गृह्यते, तच्च ग्रहणं सोमस्य पानरूपमिति "एकया प्रतिधापिबदिति" मन्त्रव्याख्याने निर्णीतम्।

सर्वमिदं सुमेर्वभिप्रायं कुमेरावप्यादित्यस्यैषैव रीतिः। तत्राप्युदयावस-रीयासूषस्सु प्रकर्षेण भासमानेन तेन तदभिप्रायकरात्रिसम्बन्धिनीषूषस्सु स्वीयं तेजो निधीयेतैव। तच्च तत्र रात्रौ रात्रिपर्यन्तं दीयमानं सोमरूपं तेजस्तु नेन्द्रेण पीयते स्वस्मिन् गृह्यते, यतस्तत्रोदयः पश्चिमायां, न तद्दिक्सम्बन्धितेन्द्रस्येति तेन तस्य रात्रिसम्भृतस्य तेजसः पानायोगः। तद्विषये चैषा कल्पना यत्तत्तेज-स्तमोभ्यो दीयते तमोभिस्तत्तेजो विलीनं क्रियते। अर्थात्तस्य तेजसोऽन्धकारे

विलयो न पुनरादित्यसम्प्राप्तिः। तदिदं तमोभ्यो दानमिन्द्रकृतमिति तस्य सोम-वर्जने निमित्तता। तथाहि अत्र सोमस्योक्तरीत्या तेजसः कुमेर्वभिप्रायकस्य यतिशब्देन वर्णना। तदुक्तं मन्त्रे, तथाहि मन्त्रः—

"परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्टगा अभि।
सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो विराजति"।। इति।

सोम्योऽयं मन्त्रः। तत्रोच्यते—अयं सोमः परा विदूरेऽर्थात् कुमेरुरूप-भूलोके व्यक्तस्तत्रत्यतमसस्सकाशतोऽर्धद्वाभ्या अवसाने उदित उदयेन स्पष्टः, अरुषस्तेजोयुक्तोऽरुणवर्णतेजोयुतो वा। अरुःशब्दस्य तेजःपरताऽरुणवर्णतेजःपरतापि। अतएव भाष्यकृता "त्र्यरुषीणा चतुःशतम्" इत्यत्र त्र्यरुषीशब्दस्य त्रिभागारुणा इत्यर्थः कृतः संगच्छते। उषसां त्रिभागारुणत्वं "त्र्यरुणप्सव" इति विशेषणादपि व्यक्तमित्यन्यत्र प्रतिपादितम्। एवञ्चारुषः शब्दस्योक्तार्थत्वं तादृशः सोमः। दिवः कविः। अत्र दिव इत्यनेन सुमेरुरूपद्योलोकस्य वचनम्। तस्यायं कविः। कवनीयः शब्दनीय एव केवलं न तु दृश्य इत्यर्थः। अत एव रात्र्यभिप्रायानां स्तुतिवचनानां शस्त्रशब्देन व्यवहारः, शस्त्रं शंसनीयं वचनीयमेवेति। किञ्च सोमसंस्थानामग्निष्टोमादीनां मध्ये उक्थ्यनामक-संस्थायामुक्थ्यत्वेन वचनम्। उक्थ्यत्वं च वचनीयत्वमेव रात्रिसम्बन्धात्। अत एव 'एकया प्रतिधापिबदिति' मन्त्रे त्रिशत्सरस्त्वं त्रिशदुक्थ्यपात्रत्वेनेति याज्ञिकैर्व्याख्यायत इति पूर्वमुक्तं संगच्छते। एवं चात्र कविशब्देन कवनीयः शब्देन वचनीय एव केवलं न तु दृश्य इत्यर्थः। किञ्च सुमेरुस्थानां कुमेरुस्थ आदित्यः सोमशब्दाभिलप्यमानो न दृश्यो भवति यथा एवं तत्रत्यानामपि रात्रिगतस्य तेजस आदित्यासन्निधानेन न दृश्यत्वं, तदेवाभिप्रेत्य तद्विनाशकल्पना। अत एव तत्र रश्मीनामृषित्वेन वचनाददर्शनेनातीतानां मृतत्वकल्पनया तेषां कविशब्दबोध्यत्वमुक्तम् "ये वै न ऋषयः प्रेतास्ते कवय" इति। वृषा वर्षकस्तेजसः प्रदाता। त्रिपृष्ठः। भुवि लोकत्रितयं पृष्ठस्थानीयं तस्यार्थात्तत्रत्यलोकत्रयं स्पृशन् सम्बन्धेन प्रकाशयन्। अचिरमुदेत् प्रवृत्तत्वादनिविष्टगा अप्रविष्टरश्मिः, सहस्रणीतिः सहस्राणामनन्तानां रश्मीनां तद्रूपस्य वस्तुनो नेता प्रापयिता, यतिः पूर्वप्रवृत्तस्य द्युलोकस्थस्य प्रकाशनस्य नियमनकर्ताऽत एव यमशब्दवाच्यः। परायतीः, द्युलोकापेक्षया परा विदूरे भुवीत्यर्थः, यतीर्गच्छतीः, भुवि प्रकाशमाना इत्यर्थः। पूर्वीः पूर्वाञ्चना उषसो भूलोकवर्तिनीरर्थात् कुमेरुस्था उषसस्तासु विराजति शोभते, तत्र दृष्टान्तः रेभो न। द्यवि उदित आदित्यो यथोषस्सु विराजत एवमिति। अथवा परायतीः कुमेर्वभिप्रायेण परा दूरं सुमेरावित्यर्थः, यतीर्गच्छतीस्तत्रत्या

उषसो यथा रेभो विराजत एवमसौ पूर्वीरुषसो विराजतीत्यर्थः। एवं द्युलोके उदित आदित्यो यथा उषसोऽनु विराजत एवमसौ भूलोकेऽर्थात् कुमेरौ उदित आदित्योऽपि तत्रत्याः पूर्वीरुषसोऽनुविराजते इति वर्णनाद् भुवि समुद्यन्नादित्यो यमो यतिरित्यादिशब्दैः प्रोच्यते, सोमस्यैवं वर्णनात्सोम एव यतिरिति भवति। स च पूर्वोक्तरीत्या तत्रत्यरात्रौ तत्रत्यासूषस्सु त्रियमाणप्रकाशरूपोऽपि तस्योपाधिभेदेनानेकत्वं मत्वा यतय इति बहुवचनोक्तिः। ते च सोमास्तत्रत्यरात्र्यादिकालीनास्तमस्सु विलीयन्ते नेन्द्रेण पीयन्त इत्युक्तम्। तदेव गृहीत्वा "द्वासुपर्णेति" मन्त्रे प्रोच्यते "तयोः समानवृक्षवर्तिनोः सुपर्णयोः सूर्याचन्द्रमोरूपयोर्मध्येऽन्य एकः सूर्यरूपोऽर्थात्सुमेरुगत आदित्यःपिप्पलमुदकं तेजोरूपं स्वादु शोभनं प्रकाशकरत्वादत्ति भक्षयति स्वात्मनि विलापयति। अन्यश्च कुमेरुस्थः सोमोऽनश्नन् तेजः सोमात्मकं तत्तेजोरूपमुदकं स्वात्मनि अविलापयन्नेव केवलं प्रकाशते" इति। एतेन तेषां सोमानामिन्द्रेणापीतानां तमस्सु विनाशः स तु इन्द्रकारित इति कल्पना। तमसां वृकत्वकल्पना "अरुणो मासकृद्वृक" इत्यत्र प्रतिपादिता।

किञ्च ब्राह्मणे यतीना सालावृकेभ्यः प्रदानमुच्यते, सालावृका भाष्यकृता सलावृक्याः पुत्रा इत्युच्यते ते चारण्याःश्वानः। तत्र तन्मातुः सलावृकीति वचनं कुतः। यथापरत्रान्येषां प्राणिनामुल्लेखावसरे तन्मातृपुत्रा इति विशिष्य नोल्लेखः, एवमत्रापि वृकवचने मातृविशेषपुत्रा इति वर्णनस्यायुक्तत्वम्। सत्यप्येवं विशिष्य सलावृक्याः पुत्रा इति निर्देशनैषा सलावृकीशब्दबोध्या माता लौकिकमातृपदार्थतो भिन्नरूपा। सा च रात्रिरूपा। तस्याः सलावृकीत्वं विनाशकरवृकरूपत्वेन। तच्च तच्छब्दतो विज्ञायते, यथात्र 'स'शब्देन षोऽन्तकर्मणीति धातोर्निष्पन्नेनान्तो बोध्यते तं सं लाति अर्थाद्भक्ष्यस्येति सलास्तादृशी वृकीति। आरण्यशुनां भक्ष्योपर्याक्रमणं सर्वात्मना तद्विनाशनं लोकप्रसिद्धमिति, तत् सादृश्यादत्र रात्रौ सलावृकीत्वव्यवहारः। तत्पुत्राश्च रात्रिकालीनानि तमांसि। अत एव वृत्रस्य दानवशब्देन दनुपुत्रत्वाद्वचनं वेदे ऐन्द्रसूक्त उच्यमानं सङ्गच्छत इत्यन्यत्र विस्तरः। तमसां सालावृकत्वं तेभ्यो यतीनां दक्षिणदिक्कानां तेजसां प्रदानमेवेन्द्रकर्तृकमिति ब्राह्मणे वर्णना, यतीन्सालावृकेभ्यः प्रादादिति वर्णनम्। किञ्च ताण्ड्यब्राह्मणे इन्द्रेणैव यतीनां वधः कृत इत्युच्यते। तेषां मध्ये त्रयोऽवशिष्टाः। पृथुरश्मिः, रायोवाजः, बृहद्गिरिरिति त्रयोऽवाशिष्यन्त। तेऽब्रुवन्को न्वस्मान् भरिष्यतीति, इन्द्रेणोक्तमहमेव युष्माकं भरणकर्तेति। ततस्तैः सामत्रयं सम्पादितम्। पार्थरश्मम्, रायोवाजीयम्, बार्हद्गिरमिति। इन्द्रेण तेभ्यश्च पृथुरश्मये क्षत्रं तेजो बलं प्रदत्तम्। बृहद्गिरये ब्रह्मचर्यम्। रायोवाजाय पशवः प्रदत्ता इत्युच्यते। तदप्युक्तरीत्या

यतिग्रहणेनोपपद्यते। तथाहि—तत्र यतीनां मध्ये पृथुरश्मिः सुषुम्णो रश्मिर्योऽतिदूरं गत्वा प्रकाशकस्तत्रान्धकाररूपवृकसम्बन्धाभावात्तस्यावशेषः। आदित्यस्यैको रश्मिश्चन्द्रमआदिविदूरस्थलं गत्वा तस्य प्रकाशकः। नहि तस्यान्तरालवृत्त्यन्धकारः प्रतिबन्धकः। तदुक्तं 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व' इत्यादिना। तस्य विदूरं गत्वा प्रकाशकत्वाद्रात्रौ प्रकाशो दृश्यमानतारकारूपेण वर्तमान इति तस्मै क्षत्रं बलं तेज इति यावद्ददौ। बृहद्गिरिरपि तत्रावस्थितः। द्वितीयो बृहद्गिरिः सोऽपि यतीनां मध्येऽवशिष्टस्तस्यापीन्द्रेण परिपालनपूर्वं तस्मै ब्रह्मचर्य प्रदत्तम्। स च दक्षिणस्यां भुवः पार्श्वे वर्तमानो गिरिरर्थान्मेरोः शृङ्गं कुमेरुरूपः। तस्यापि सालावृकैरनाक्रम इति। तस्य बृहद्गिरित्वेन वचनं मन्त्रे "यत्सानोः सानुमारुहद् बृहद् बृहत एदरिः। भूर्यस्पष्टकर्त्व"मित्यत्र प्रतिपाद्यते। अत्र बृहतः सानोर्बृहत्सान्वारोहणमुच्यते, तच्च सोमानुष्ठायिनो यजमानस्येति भाष्यकृता व्याख्यायते। तच्च सान्वारोहणं सोमलाभार्थम्। स च सोमो बृहति सानुनि लभ्यः। स च यागार्थः। तत्र पूर्वोक्तरीत्या सोमपदार्थस्तेजोरूपस्तस्येन्द्रेण पानेन वृत्रादीनां विनाश इति वर्णनात् सोमपानमिन्द्रस्यैवेति नियमनात्तच्च त्रिकद्रुकेष्विति प्रतिपादनात् रात्रिसम्बन्धितेज इति पूर्वं निर्णीतम्। तच्च रात्रिसंभृतं तेज इन्द्रेण स्वल्पकलामात्रोदयेन युगपत्पीयत इति 'एकये'ति मन्त्रप्रतिपादितं पूर्वं विस्तरशो वर्णितम्।

आदित्यमण्डलस्य सोमपानपात्रत्वमिन्द्रं प्रति उच्यते "इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो" इत्यनेन। इद चोदयस्थलीयं यत्र यत्रादित्यस्य पूर्वस्यामुदयस्तत्र सर्वत्र सम्भवति तथापि यत्र प्रतिदिनमुदय आदित्यस्य तत्र स्वल्पकालसाध्योदयादिवर्णनार्थं न वेदे इन्द्रस्य वर्णनं सोमपानादिरूपं किन्तु यत्र बहुकालसाध्यतया अत्यन्तमुत्सुकभाव आदित्योदयं प्रति तादृशस्थलीयवर्णनाभिप्रायेणेद वर्णन मन्त्रेषु, प्रतिदिनं स्वल्पकालसम्पत्स्यमानोदयेऽपि अनुरूपं भवतीति तत्रापि प्रवर्तत इति न तावता तन्मात्रार्थं तस्य वर्णनस्य प्रवृत्तिः। तादृशी चात्यन्तमुत्कण्ठितत्वेनौत्सुक्यपराकाष्ठोदयं प्रति सुमेरुकुमेर्वोरिति तद्वर्णनार्थैव प्रवृत्तिः। एवं सति तत्रान्वेषणपूर्वं सोमलाभार्थं सानोः सान्वारोहः स सुमेरुकुमेर्वभिप्राय एव। अत एव सानुनो बृहदिति विशेषणं मन्त्रे। स चादित्यस्यैवेति अत्र यजमानशब्देनादित्यस्यैव ग्रहणम्। अत एव सान्वारोहणस्य तेन कर्तव्यकार्यस्य विस्पष्टार्थत्वं तत्र मन्त्रे "भूर्यस्पष्टकर्त्वं"मित्यनेन प्रतिपाद्यते। तच्च कर्त्व प्रकाशनं विश्वस्य। तदपि मन्त्रान्तरे कर्तुशब्देनोच्यते प्रकारान्तरेण "मध्या कर्तोर्विततं सञ्जहार" इत्यनेन। इदं विश्वप्रकाशनं कर्म कुर्वाणोऽसावादित्यो मध्ये एव असम्पूर्णतयैव विस्तृतं प्रारब्धं कर्म सञ्जहार राज्यवसरे इति,

तस्यातीव सामर्थ्यशालिता विस्तृतस्यापि कर्मण इच्छावशतः स्वल्पकालेनदमेतावत् विस्तृतमुपसञ्जहारेति एवमसौ महानुभाव इति। एवं चेदं कर्त्वमादित्यस्यैव मन्त्रे प्रतिपादितं, तत्साधनार्थः समारोह उक्तरीत्या सुमेरुकुमेर्वोरेवेति। तत्र प्रकाशात्मनस्तेजोरूपस्य सोमस्य रात्रिं यावत् सम्भृतस्य पानमुदयावसरे स चोदयः पूर्वस्यां दिशि यत्र तत्रेति तादृश उदयः सुमेरौ भवतीति पूर्वमुक्तम्। कुमेरौ तु पश्चिमायामुदय इति तत्रत्यस्य नोदयावसरे इन्द्रेण पानं किन्तु यतिरूपस्य तस्य सालावृकायार्थात्तमसे प्रदानमित्येवापराधितेन्द्रस्येति प्रमाणमेव। तत्रैवं सति-बृहन् सानुरत्र कुमेरुरूप एव तस्य रात्रौ न तमसाक्रान्तिः। किन्तु तत्र मासद्वय-व्यापि बार्हस्पत्यतेजस्सदृशं शुक्रादिशब्देनाभिलप्यमानं तेजः प्रवर्तते तेन तमोरूपेण सालावृकेण सर्वात्मना नाक्रमणादेषोऽवशिष्ट इति वर्णना। यथा सुमेरुस्थले तदभिप्रायेण सोमवर्णनावसरे ऐतरेये दुहितृपाख्यानवर्णने उच्यते "प्रजापते रेतसः प्रथममुद्दिप्तो भाग आदित्यो द्वितीयवारमुद्दिप्तो भागो भृगुरङ्गारादीनामङ्गिर आदिरूपत्वमुक्त्वा येऽवशान्ताः पुनरुद्दीप्ता इव ते सर्वे बृहस्पतिरभवदि"ति वर्णनेन तत्र रात्रिकाले तमसावरणेऽपि यद्भासमानं तेजस्तस्य तत्र बृहस्पति-रूपत्वमुक्तमेवमत्रापि कुमेर्वभिप्राये रात्रौ भासमानस्य तेजसः सत्त्वं तद्वशतोऽस्य बृहद्गिरेस्तमसानाक्रान्त्या सालावृकतो मुक्ततेति। तस्यैतस्य बृहद्गिरेरिन्द्रेण "ब्रह्मचर्यम्" प्रदत्तम्। पूर्वोक्तस्य तेजसः सुमेरौ बृहस्पतिशब्दाभिलप्यस्यैतरेये ब्रह्मशब्दबोध्यता "ब्रह्म वै बृहस्पतिः" इत्यादिनोक्ता यथा, एवमत्राप्येतस्य शुक्रशब्दाभिलप्यस्य कुमेरुगततेजसोऽपि ब्रह्मत्वेन ग्रहणेन तस्य ब्रह्मणश्चरणं स्थितिस्तदेव ब्रह्मचर्य तद्रूपं प्रसिद्धं ब्रह्मचरणार्थं व्रतं तत्तस्मै बृहद्गिरये प्रदत्तम्। तत्र तद्वर्तमानमपीन्द्रेण दत्तमितिकल्पना। एवं बृहस्पतेः प्रतिवधः, भाष्यकृता स तदीयवचनप्रतिघातरूप इत्युक्तम्। आदित्यरूपस्यैकदेवस्य स्तवो वेदे इति कल्पनयेन्द्रादयोऽपि नादित्याद्विभिन्ना इति गुरोराचार्यस्य बृहस्पतेर्वाक्यप्रतिघात-रूपः प्रतिवधो न सम्भवति। नहि "बृहस्पतिः पुरोहितो देवानां" "बृहस्पति-पुरोहिता वै देवा" इति वर्णनेन बृहस्पतेर्देवानां वा मनुष्योचितव्यवहारः प्राप्तो भवति। एतेन व्याकरणमहाभाष्यगतः शब्दानां विज्ञाने प्रतिपदपाठः कर्तव्य इति पक्षे उपक्षिप्ते तस्याशक्यताप्रतिपादनाय "बृहस्पतिरिन्द्राय प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच न चान्तं जगामे"ति व्यवहारो व्याख्यातः। वेदे आदित्य-स्यैवैकस्य वर्णनेनेन्द्रादीनां तदभिन्नत्वात्तादृशव्यवहारस्याप्राप्तेः।

एवं सतीदं बृहस्पतिसम्बन्धितयेन्द्रस्य प्रतिघातवर्णनं रूपणेनान्यथै वक्तव्यम्। तत्रैतरेयब्राह्मणोक्तप्रजापतिदुहित्राख्याने उच्यते "यदङ्गाराः पुनर-

वशान्ता उददीप्यन्त तद्बृहस्पतिरभवदि"ति। तेन विज्ञायतेऽन्धकारप्रवृत्तेरूर्ध्वं भासमानं तेजो बृहस्पतिरिति। किञ्च पूर्वोक्तरीत्या बृहतो महतः सानुनोऽर्थात्सुमेरुशृङ्गस्य पतिः पाता रक्षकस्तेजसः प्रदानेनेति। तच्च तत्रत्यं तेजो ब्रह्म तस्य बृहस्पतित्वं ब्राह्मणे "ब्रह्म वै बृहस्पति" रित्यनेनोच्यते। एवं च सुमेरौ रात्रिमध्ये दृश्यं तेजो बृहस्पतिः। तस्य मधुरूपस्याव्यक्तस्य तमसि वर्तमानस्याहरणकर्तृत्वस्योक्तिः संगच्छते। तदुक्तं मन्त्रे—

"अश्ना पिनद्धं मधु पर्यपश्यन्मत्स्यन्न दीन उदनि क्षियन्तम्।
निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणाविकृत्य" इति॥

एतस्य निरुक्तकारेणार्थ उच्यते—अशनवता मेघेनापिनद्धं मधु पर्यपश्यन्मत्स्यमिव दीन उदके निवसन्तं निर्जहार तच्चमसमिव वृक्षादिति। एतस्य दुर्गाचार्येणार्थो व्याख्यायते—अश्ना अशनवता व्यापनवता मेघेन अपिनद्धमात्मनो मध्यमपिनीय नद्धं बद्धं विवृतं व्यवहितमदृश्यमन्यैः। बृहस्पतिर्मधु उदकं पर्यपश्यत् सर्वतोऽपश्यत्। कथं? 'मत्स्यं न दीन उदनि क्षियन्तं' मत्स्यं न इव दीने उदनि उदके उपक्षीयमाणप्राये क्षियन्तं निवसन्तम्। यथा मत्स्यबन्धोऽल्पे उदके जिघृक्षुर्मत्स्य परिपश्येच्छक्योऽयं ग्रहितुमिति एवं पर्यपश्यत्। 'निष्टज्जभार चमसं न वृक्षात्'। तच्च मधु दृष्ट्वा निर्जभार निर्जहार निर्हृतवान्, कथं? चमसं न वृक्षात्, यथा कश्चित् कुशल. शिल्पी वृक्षमध्याच्चमसं यज्ञपात्रं निर्हरेत् निष्पादयेदेवं निर्जहार बृहस्पतिः। विरवेण विकृत्य भीषणेनातिमहता रवेण शब्देन सक्षोभ्य मेघं त्रस्तसर्वाङ्गसन्धिबन्धनं कृत्वा विक्लवं तत एवं विह्वलीभूतं विकृत्य समन्ततो विशकलीकृत्य एवं निर्जहार मधु यो बृहस्पतिः सोऽस्माकमिदमपि करोत्विति।

एवञ्च सुमेरौ रात्रौ दृश्य तेजो बृहस्पतिः। अत एव तमसि निमग्नस्यात एवादृश्यस्य मधुरूपस्याव्यक्तस्योदकरूपस्य तेजसो दर्शनं तन्निस्सारणं च तस्योपपद्यते। तमसो'ऽश्ने'ति विशेषणेन सर्वतो व्याप्त्या दीर्घतमोभावः सूचितः। स च प्रकृते सुमेरावित्युक्तम्। मधुनस्तेजःपरत्वं बहुषु स्थलेषु वेदे उच्यते यथा—"विष्णोः पदे परमे मध्व उत्सः" "घृतस्य धारा अभिचाकशीमि" "हिरण्ययो वेतसो मध्य आसाम्। तस्मिन्सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधुदेवताभ्य" इत्यादौ। तत्र प्रबलेन तमोरूपमेघेनापिनद्धमत एव दीनं मधु छिन्नप्रवाहं मधु उदकमिव तस्मिन्नुदके क्षियन्तं निवसन्तं मध्वेव पिनद्धमदृश्यं मत्स्यं ध्रुवमत्स्यमिव उज्जहार, यथा ध्रुवमत्स्यमुज्जहारैवं मध्वपि उज्जहार। यथा बृहस्पतिना स्वीयेन विगतरवेण विगतश्रुतिमताऽर्थाद्रश्मिरहितेन तेजसा यथा ध्रुवमत्स्यः

प्रकाशित एवमव्यक्तमुदकमपि प्रकाशितम्। तत्र दृष्टान्त उच्यते यथा वृक्षात् पूर्वोक्तरीत्या याम्योत्तरवृत्तार्धरूपाद् वृक्षाद्यत्रान्तं प्राप्त आदित्योऽस्तं गतस्तस्माददृश्याञ्चमसं सोमपानपात्रं मण्डलरूपं विरवेण रश्मिरहितेन तेजसोद्ध्रियते तद्वदिति। एवं सति न सर्वथाऽसम्बद्धोपमानवर्णनं स्यात्। एतावता स तत्रत्यो रात्रौ दृश्यस्तेजोविशेषो बृहस्पतिः स देवानां परस्ताद्दृष्टिविषयत्वमागमिष्यतां पुरोहित इति 'बृहस्पतिर्देवानां पुरोहित' इत्युक्तिः। तेन स इन्द्रस्यापि गुरुः। तद्विरुद्धरवोपादानात्तेन बृहस्पतेः प्रतिवधो विरुद्धघातरूपस्तं कृतवान्।

अयं भावः—तस्य बृहस्पतेः विरवत्वं श्रुतिराहित्यं रश्मिराहित्यादथवा विशिष्टश्रुतित्वं तद्देशत उदयदेशं प्रत्यागच्छद्भीरश्मिभिः। इन्द्रस्तूदयन्नादित्यस्तस्यरश्मिरूपाः करास्तु उदयदेशान्निर्गता दक्षिणोत्तरयोर्दिशोः प्रसृमराः। एवं सति बृहस्पतेः करा आगच्छन्त इन्द्रस्य करास्तु ततो गच्छन्त इति परस्परयोः कररूपश्रुत्योस्तद्रूपशब्दस्य विरुद्धत्वम्। तत्रेन्द्रस्य रश्मिरुदयकालिक इति विस्पष्टभाः, बृहस्पतेस्तु अविस्पष्टभा इति पूर्वेणैतस्य वध इवेति रश्मीनां करत्वमिव कर्णश्रुत्यादिशब्दैर्बोध इति इन्द्रस्य दीर्घश्रुत्तमशब्दार्थविवेचने विस्पष्टमुक्तम्। सोऽयमिन्द्रेण बृहस्पतेः प्रतिवधः। तमिन्द्रः कृतवानिति तस्यापराध इवेति गृहीत्वोदिते आदित्येऽन्यतस्तेजसोऽग्रहणेन सोमपानाभावः स तु देवैरुक्तरूपापराधपञ्चकवशात इति कल्पनयोक्तं वर्णनमिति दिक्।

एवमैतरेये ब्राह्मणे बहुषु स्थलेषु वहुषु पदार्थेषु वज्रत्वमुच्यते। यथा— "घृतेन हि वज्रेणेन्द्रो वृत्रमहन्"। "वज्रो वा एष यद्यूपः", "वज्रो वै यूपः"। "यदपोनप्त्रीया वज्रः"। "यत्त्रिष्टुब् वज्रः", "स वाग्वज्रः"। "वज्र एव वाक्", "वाचा वज्रेण" "आगूर्वज्रः", "वज्रो वै वैश्वानरीयम्"। "वज्रो वा एष यत् षोडशी", "वज्रो वै षोडशी"। "वाग्घि वज्रो", "वाक् षोडशी" इत्यादिषु। तत्रेदं चिन्त्यते, वैदिकग्रन्थाभिमतं वज्रस्य किं रूपमिति, कथञ्च उक्तस्थलेषु तत्तत्पदार्थानां वज्रत्वमिति। शब्दव्युत्पत्त्या वर्जनेन निमित्तेन वज्रत्वम्, वर्जनीयो हि वृत्रादिरसुरः। अत एवेदं वज्रमुपयुज्य वृत्रो हत इन्द्रेणेत्युक्तिर्बहुत्र वेदे, ब्राह्मणेऽपि। निरुक्तरीत्या देवतात्रयवादे इन्द्रोऽन्तरिक्षदेवता वायुरूपिणी तया घात्योऽसुरो वृत्रो मेघं विना नान्यरूपः सम्भवतीति तद्घातसाधनत्वं वज्रस्य वक्तव्यम्। किञ्च निरुक्तकारेण दैवतकाण्डे उच्यते "आत्मैवैषामायुधमात्मैवैषां वाहनमात्मैवैषां सर्वं देवस्य देवस्य" इति। तेन वचनेनेन्द्राभिन्नत्वं वज्रस्य। इन्द्रस्य वायुरूपत्वे वज्रोऽपि तद्रूप इति। एवं "घृतेन हि वज्रेणेन्द्रो वृत्रमहन्" इत्यत्र घृतस्य वज्ररूपतोच्यमाना कथमुपपद्ये-

तेति। एवमपरापरपदार्थानां विषयेऽपीयमाशङ्का भवत्येवेति। तदर्थं चेदादित्याभिन्नत्वं सर्वासां वैदिकदेवतानाम्। एकस्य सूर्यरूपस्यैवात्मनो वेदे स्तव इति इन्द्रोप्यादित्याभिन्नस्तदभिन्नो वायुरप्यादित्याभिन्न इति इन्द्राभिन्नो वज्रोऽप्यादित्याभिन्न इति प्राप्नोति। तदानी घात्यो वृत्रोऽन्धकाररूप एव भवितुमर्हति। तस्य वज्रेण तेजसा हननमुपपद्यते। अन्यरूपत्वे तु तदसम्भव एवेति वेदे वर्णनं निरालम्बं स्यात्। घृतेनेत्यत्र घृतशब्दस्तेजःपरः। 'घृ क्षरणदीप्त्योरिति दीप्त्यर्थात्तस्माद्धातोस्तच्छब्दस्य साधनात्। एवं सति घृतेन वज्रेणेत्युक्तिः संगता भवति। अवश्यं च तेजोरूपत्वं वज्रस्य वक्तव्यम्। अत एवेन्द्ररूपादित्याभिन्नत्वेन तद्विनाश्यानां वृत्रशंबरनमुच्यादीनामसुराणामन्धकाररूपत्वं वक्तव्यं भवति। तथा सत्येवेन्द्रेण तद्विनाशवर्णनस्योपपत्तिः। नहि तेजसा वस्तुसतामसुराणां विनाशः सम्भवति। किञ्चेन्द्रस्य सोऽसुरविनाशः काल्पनिक इति स्पष्टं मन्त्रेषु। तदुक्तं "मायेत्साते यानि युद्धान्याहुर्नाद्य शत्रुर्न नु पुरा विवित्से" इति। अत्र युद्धस्य मिथ्यात्वेन काल्पनिकत्वमुक्तम्।

एवं सति युद्धस्य काल्पनिकत्वे तत्र विनाश्यानामपि काल्पनिकत्वमर्थसिद्धम्। तदिदमन्धकारस्य वृत्रादित्वपक्षे सम्यगुपपद्यते। नहि तेजस्तमसोर्विनाश्यविनाशकभाव उच्यमानो वस्तुसन् भवति। किन्तूभयोरसामानाधिकरण्येन विरोधकल्पनया परस्परशत्रुत्वकल्पनाद्वारा असामानाधिकरण्यस्य विनाशकल्पनयोपपादनम्। न तु वस्तुसन् विरोधो न वा शत्रुकल्पना नतु वा विरोधिनाशेन तदसामानाधिकरण्यस्योपपादनकल्पना। एव सर्वमिदं कल्पितमिति वृत्रादिवधादिकमवस्तुसदिति आदित्यैकदेवत्वपक्षे तेजसा वृत्रादिविनाशकल्पनाऽवस्तुत्वात्साजात्यनिबन्धनत्वेनोपपद्यते। वस्तुसत्त्वे त्वेतद्बहुविधमसमञ्जसमापद्येतेति। अत एव वृत्रस्य जगद्व्याप्त्या तेजःप्रतिबन्धकत्वकल्पना, तेजसश्च प्रवाहादिवैशिष्ट्यकल्पनयाऽब्रूपत्वम्। तद्रूपाणामपां प्रतिबन्धाद् वृत्रस्य मेघरूपत्वम्। तथा सति शम्बरनमुचिप्रभृतीनां वृत्राभिन्नत्वमिन्द्राभिन्नादित्यविनाश्यत्वात्। वृत्राभेदाच्च मेघत्वम्। अत एव निघण्टुषु मेघनामसु वृत्रशम्बरनमुच्यादीनां पाठः संगच्छते। एवं सति नमुचेर्विनाशे इन्द्रेणापां फेनेन तस्य वधवर्णनस्य मन्त्रगतस्योपपत्तिः। "अपां फेनेन नमुचेः शिर इन्द्रोदवर्तय" इति मन्त्रः। अपां तेजोरूपत्वे तत्फेनोऽपि तेजोरूप इति स्पष्टम्। अत एव ब्राह्मण उच्यते—इन्द्रनमुच्योर्युद्धे सन्धिः। स च न शुष्केन नार्द्रेण वस्तुना, न दिवा न रात्रौ नमुचेर्वध इन्द्रेण कर्तव्य इति। तं सन्धिं पालयता इन्द्रेणापां फेनेन नमुचेः शिरसश्छेदनं कृतम्, तच्चोषःकाले। स च कालो न दिवारूपो न रात्रिरूपोऽपां फेनश्च नार्द्रं

वस्तु न वा शुष्क इति तत्रैव ब्राह्मण उच्यमानं संगच्छते। इन्द्रेण वधे वज्ररूपमायुधमुपयुज्यते इति प्रसिद्धयाऽपां फेनस्य वज्ररूपत्वं भवति। एवं वज्रस्तेजोरूप इति भवति। तच्च कुलिशेति वज्रनाम्नापि सिद्धयति। निघण्टौ वज्रनामसु कुलिशशब्दः पठ्यते। तस्य नाम्नोऽपरापरव्युत्पत्तिवत् कुलिषु शेते तिष्ठतीति कुलिश इति व्युत्पत्तिः। कुलिशब्देन रश्मय उच्यन्ते। तेषां रश्मीनां कंकतिकायाः केशविवेचनभागस्येव दन्तशब्देन व्यवहारः। अत एव यजुर्वेदे वाचो मुखगताया यथा दन्तैः परिवृतत्वमेवं वाचः कुलीदन्तैः परिवृतत्वमुच्यते। अयं हि तत्रत्यो मन्त्रः "ओष्ठापिधाना न कुलोदन्तैः परिवृता पविः" इति। एवञ्च रश्मीना कुलित्वे तेषु विद्यमानत्वं तद्युक्तत्वं तेजःपिण्डरूपस्य मण्डलस्य भवतीति वज्रो मण्डलरूपो भवतीति। अत एव वज्रस्य वर्तुलत्वेन लोकप्रसिद्धिरप्युपपद्यते। एवञ्च सति तेजस एव वज्ररूपत्वं तच्च तमो वर्जयतीति तमोवर्जनेन तेज एव वज्रः। अत एव घृतेन वज्रेणेत्युक्तिर्वृत्रहनने ब्राह्मणे। अत एव फेनेन नमुचेर्वधवर्णनस्योपपत्तिः। तेजसः स्थानवैशिष्ट्येन वज्रत्वोक्तिर्यथा "वज्रो वै यूप" इति यूपस्थानीयतेजसो वज्रत्वमिति तदर्थः। यूपश्च क्रान्तिवृत्तविषुववृत्तपातबिन्दुस्थले संपतितदक्षिणोत्तरवृत्तगत उपर्युक्तस्थानत उदीच्यामवाच्यां च यश्चतुर्विंशांशपर्यन्तो भागः। तस्य यूपशब्देन व्यवहार्यता यूपब्राह्मणे उच्यते। तत्र देवताभिर्यागमनुष्टाय स्वर्गे लब्धे स्वर्यद्भिस्तैर्यूपस्यान्यथात्वमर्थात् पूर्वमूर्ध्वाग्रत्वमासीत्तदवाचीनाग्रत्वं सम्पादितं व्यामोहाय। एवं व्यामोहोत्पादकत्वादस्य यूपतेति। मनुष्यादीनां कृते देवताभिर्यूपस्याधोऽग्रत्वं सम्पादितं तच्च दक्षिणस्या यदुक्तवृत्तस्य मध्यतोऽधोवर्ती भाग इति ग्रहणेन समञ्जसं भवति। एवञ्च तस्मिन् भागे आदित्यस्य तत्रत्यदिने आरोहावरोहौ मासषट्केनैकैकस्मिन् पार्श्वे भवतः। तत्र यदाऽदित्येनैकपार्श्वे उक्तपार्श्वगतोक्तभाग आरोहावरोहौ मासषट्केन क्रियेते तस्मिन्नेवावसरेऽपरस्मिन् पार्श्वगतोक्तवृत्तभागेषु तमसाक्रान्तिः। अत एव तत्र रात्रिप्रवृत्तिः। रात्र्या अर्धमारभ्य यानप्रारम्भो विभिन्नदिशि। यानचातुर्विध्यस्योक्तत्वेन तत्रत्योक्तक्रान्तिवृत्तभागस्यावरोहमारभ्य यानप्रवृत्तिः। एवं सति तत आरभ्य दिनान्तरप्रवृत्त्या तत्यानप्रारम्भीयं स्थलं तत अवरोहस्थलम्, अवरोहान्त्यभागे विसारि उषोरूपतेजोयुक्तं स्थलमिति वज्रस्य भागत्रये पूर्वपूर्वापेक्षया परपरस्य स्थूलत्वम्। तदुक्तमाज्यशस्त्रे सूक्तस्य प्रारम्भीयर्चः प्रथमार्धे प्रथमपादान्ते विच्छेदविधानावसरे ऐतरेयब्राह्मणे स्पष्टमुक्तं वज्रस्योक्तरीत्या त्रिभागत्वमिति। एवं तत्रत्यं ब्राह्मणम्—"आरम्भणतो वै वज्रस्याणिमा अथो दण्डस्याथो परशो"रिति। तत्रोक्तप्रारम्भभागोऽणु-

रितिप्रारम्भेऽणुरित्युक्तिर्ब्राह्मणे। तदानीं तेजसोऽतिस्वल्पत्वेन तथात्वमणुत्व-मित्यर्थः। ततः परवर्तिभागोऽधोमुखं प्रवर्तमानं तेजो दण्ड इवेति दण्डभागात्मकस्य तेजसः पूर्वापेक्षया स्थूलत्वेन स्पष्टत्वेन तथोक्तिः। तत उषःकाले तस्या-समन्तात्प्रसारित्वेन परशुरूपत्वमिति दण्डतोऽपि स्थूलतोक्तिः। तादृशप्रसारित्वेन तेजसस्तद्वैशिष्ट्येनोषसः परशुत्वेन रूपणम्। तदुक्तं—"पर्शु ह नाम मानवी साकं ससूव विंशति"मिति। अत्र पर्शोर्मानवीति विशेषणादपरापि पर्शुर्भवतीति विज्ञायते। "ह"शब्दप्रदानेन तस्य काल्पनिकं पर्शुत्वं विज्ञायते। सा यथा मानवी पर्शुर्युगपद्विंशति सूते। एवमपरापि साकं विंशतिजनिका स्यादेव। तदिदं सर्वं यूपसम्बन्धीति यूपस्य वज्रत्वाभिधानम्। अथवोक्तयूपे उक्तरीत्या प्रथमं वर्तमानं तेजः सूक्ष्मत्वेनाणु, ततो रश्म्याद्यात्मना प्रवर्तमानं पूर्वापेक्षया स्थूल रश्मीनां शलाकिकाद्याकारतया दण्डरूपम्। तत उदीयमानबिम्बस्य विस्पष्टतरत्वात्स्थूल-तरत्वं तस्य च बिम्बस्यार्धोदितस्यार्धवृत्ताकारतया परशुत्वेन रूपणेन तस्य परशु-रूपस्य भागस्य दण्डतोऽपि स्थूलत्वोक्तिः। एवं सत्यस्योदयतो बिम्बस्योभयतः पार्श्वयोरुदयदेशेऽस्तमयदेशे चोदयादस्तमयाच्च पूर्वपरवर्तिदण्डदशकरूपकाल-पर्यन्तं भासमानमुषःसंज्ञकतेजोजनकतया तस्याः परशोर्युगपद्विंशतिप्रसवनकर्तृत्व-मुच्यमानं संगच्छते। आदित्यस्यासमन्तात् प्रतिपार्श्वं पूर्वोक्तयाम्योत्तरवृत्तगतांश-दशकपर्यन्तं तेजःसम्बन्धितया तदुत्पादकत्वोक्तिः।

अयं भावः—उक्तयाम्योत्तरवृत्ते गमनागमनावसर आदित्येन तदीय-मंशाष्टकमेकमासेनातीयते। एवं सति तद्वृत्तगतैकान्त्यबिन्दुतोऽपरबिन्दुपर्यन्तं येऽष्टाचत्वारिंशदंशास्तेषां गमनागमनाभ्यां द्विरुपयोगेन तद्द्विगुण्यं षण्णवतिरूपं तावता वत्सरे मासद्वादशकं पूर्यत एवं मासद्वादशकृते यदि षण्णवत्यंशा उपयुज्यन्ते एकमासकृते कियन्त इत्यनुपातेन प्रतिमासमंशाष्टकोपयोगो विज्ञायते। सुमेरु-कुमेर्वोरुदयात् पूर्वमेकमासपर्यन्तः सावित्रः कालः प्रकृष्टः प्रकाशस्ततः पर-स्ताच्चोपमः कालो मासपर्यन्तः। अत एवौषससूक्ते उषसां त्रिंशद्योजनातिक्रम-स्त्रिंशत्पदयुक्तता त्रिंशत्स्वसृकतोच्यमाना संगच्छते। तत्रोषसः सूर्योदयसविधो भागोऽरुणो भवति स च तत्कालस्य तृतीयभाग इति तदर्थं स्थूलमानेनांशद्वयं सावित्रञ्चाष्टकमंशानामिति अंशदशकव्यापिता तेजसां, तदेव गृहीत्वा प्रतिपार्श्व-मंशानां विंशतिं तेजसा भास्वरां गृहीत्वा परशोरादित्यार्धमण्डलरूपाया युगपद्विंशति प्रसवकर्तृत्वेन वा वचनम्। एवञ्च मण्डलार्धमेव परशुः। तस्याऽपरभागा-पेक्षया स्थूलत्वेन ब्राह्मणोक्त'मथो परशो'रितिवर्णनं संगच्छते। एवं सति पूर्वोक्तयाम्योत्तरवृत्तभागस्य तेजोवैशिष्ट्येन यूपपरत्वमिति तस्य वज्रत्वोक्तिः।

एवं वाचो वज्रत्वमपि तथा। तत्र वाचः सत्त्वमादित्यस्यासत्ताकाले- ऽर्धान्नाप्राविद्युक्तम्। अर्थात्तात्कालिकतेजोवैशिष्ट्येन तस्या वज्रत्वोक्तिः। सा च वाक् अविशेषात् सर्वरात्रव्यापिन्यपि प्रकाशयुक्तत्वरूपविशेषकार्यकारि- त्वेनोदयात् पूर्वं षोडशांशपर्यन्तं तेजोव्याप्त्या षोडशिनीत्युच्यते। उक्तयाम्यो- त्तरवृत्तगतसावित्रोषसोः सम्बन्धिनोंऽशाः षोडश, तावत्पर्यन्तं तेजःसम्बन्धस्य प्रवृत्तेः। एवं 'वज्रो वा एष यत् षोडशी' इत्यस्याप्युपपत्तिः। एवं 'वाक् षोडशी'ति व्यवहारोऽप्युपपन्नः। एवं त्रिष्टुभो वज्रत्वमप्युक्तरीत्यैव। तथाहि उक्तरीत्या सावित्रमंशाष्टकं ततः परस्तादक्षरत्रययोगेन सम्पन्नत्रिष्टुभो वज्ररूपतेति।

अयंभावः—ब्राह्मण उच्यते, पूर्वं छन्दांसि चतुरक्षराण्यासन्। कथं चतु- रक्षरत्वमिति छन्दःस्वरूपविचारे प्रोच्यते। अमुष्मिन्लोके सोम आसीत्तस्यानयनार्थं देवैश्छन्दांसि प्रार्थितानि। तदानीं जगती प्रथममुत्पत्य मध्येमार्गं श्रान्ता स्वीयानि त्रीण्यक्षराणि विहायैकाक्षरा भूत्वा प्रत्यागच्छत्। ततोऽनुष्टुबपि ऊर्ध्वं पतित्वा- ऽर्धाधिकं पन्थानं गत्वा श्रान्ता सती स्वमेकमक्षरं हित्वा त्र्यक्षरा भूत्वा प्रत्यावर्तत। ततो देवैर्गायत्री प्रार्थिता सा सोमरक्षकान् भीषयित्वा पद्भ्यां मुखेन च सोमं छन्दो- ऽन्तराभ्यां त्यक्तान्यक्षराण्यप्यानीतवती। तानि चाक्षराणि स्वाक्षरैर्योजयित्वा गायत्री अष्टाक्षराऽभवत्। ततस्त्रिष्टुभा जगत्या च प्रार्थिता सा त्रिष्टुभा संयुक्ता। एवं सति गायत्र्यष्टाक्षरा त्रिष्टुभस्त्रीण्यक्षराणीति मिलित्वा त्रिष्टुबेकादशाक्षरा संवृत्ता। तदेवं गायत्र्यामक्षरत्रययोगेन त्रिष्टुभ उक्तरीत्या तेजोयोगात्तिष्टुभो वज्ररूपत्वम्। अयमर्थोऽवसरान्तरे विवेचयिष्यते विस्तरेण। अपोनप्त्रीयाया ऋचोऽपि वज्ररूपत्वमिति तेजसो वज्ररूपत्वं तत्सम्बन्धात् स्थानेष्वपि वज्ररूपता, तेजोऽभिव्यक्तिर्मण्डल इति मण्डलमादित्यस्य वज्ररूपम्, इन्द्रादित्ययोरभे- दान्मण्डलरूपं वज्रमपीन्द्राभिन्नम्। अत एव तस्य रेखाभिरंकने वृत्ताकारत्वं शिष्टै- र्विलिख्यत इति प्रसिद्धम्। परशुरूपत्वमपि तत्र कल्पितम्। गदाद्यायुधकल्पनाऽपि तत्र सम्भविनीति देवतास्वरूपनिर्णये प्रदर्श्यतेति।

स्तोत्रशस्त्रयोरानुरूप्याय 'स्तोत्रमग्रे शस्त्रा'दिति विधिना च प्राप्तक्रमस्य विपर्यासः, बहिष्पवमानस्य प्रउगेणाज्येनाज्यानामनुशंसनस्य परित्यागेन तद्वि- परीतस्य बहिष्पवमानस्याज्येनाज्यानां प्रउगेणानुशंसनस्य देवरथस्य सम्यक्त्वा- येति प्रतिपादितं देवरथ इति विचारे। तत्रापि पुनर्विचारो बहिष्पवमानस्याज्येना- नुशंसने कथं देवरथस्य सम्यक्त्वमिति। तत्र बहिष्पवमानस्तोत्रं सामयुतं, साम- सम्बन्धश्चादित्यसम्बन्धादादित्यसम्बन्धश्च दिनारम्भोत्तरमिति अस्य स्तोत्रस्या- दित्योदयोत्तरभाविता अपेक्ष्यते। आदित्योदयः सम्पूर्णबिम्बदर्शनोत्तर इति ततः

परस्तादेतस्य स्तवो युक्तः। किञ्चादित्योदयात् पूर्वं दिनाप्रवृत्त्या रात्रिस्थितिरिति रात्रिसम्बन्धेन नायं बहिष्पवमानस्तोत्रकालः, प्रत्युतेममारभ्य शंसनं प्रारम्भणीयमस्यां दशायां बहिष्पवमानस्तोत्रमुदयात् पूर्वमुच्यमानं दिनप्रारम्भात्प्राक् काले इति तस्य दिनबहिर्योगवशतो बहिः शब्दयोगेन तन्नाम बहिष्पवमानेति। एवं सति तद्यथा दिनप्राक्काले स्तूयते एवमनुशंसनमपि रात्रेरूर्ध्वमर्थाद्रात्रेरवसानोत्तरमेव शंसनीयम्। रात्रिश्चावसिता सम्पूर्णबिम्बदर्शने। एवं सति परवर्तिकालः स न रात्रावन्तर्भूतः। अस्तमयद्विम्बदर्शनेऽपि सम्पूर्णबिम्बादर्शनात्। एवञ्चासौ कालो न दिनेऽन्तर्भूतो नापि रात्राविति ततः स्तोत्रशस्त्रयोः प्रारम्भेणानुरूप्यमुभयोरेकस्थानतः प्रारम्भात्। तयोस्तादृशभावबोधनमुभाभ्यां स्तोत्रशस्त्राभ्यां क्रियते।

तत्र स्तोत्रनाम्ना रात्र्यनन्तर्भावता प्राप्ता, एतत्स्तोत्रनाम्ना दिनानन्तर्भावो बोध्यते, बहिःशब्दयोगात्। तेन च दिनबहिर्भावो बोध्यते। तत्र पवमानो हि गच्छन्नादित्यः। पू धातोर्निघण्टौ गत्यर्थकेषु 'पवति' इति पाठेन गमनार्थता बोध्यते। पवमान इत्यनेन गमनवत्ताऽऽदित्यस्य। स च दिनप्रारम्भदेशतः पूर्वमिति तस्य बहिष्पवमानता, तदीयं च स्तोत्रमिति। स्तोत्रे ऋचस्तासां संख्यातद्रूपस्तोमच्छन्दस्तासु सामयोगः, तत्पाठकानां स्थानं पाठकास्तत्पाठे यदि किञ्चन वैशिष्ट्यं तदिति सर्वमपेक्ष्यते। प्रकृते च स्तोत्रे प्रत्येकमुक्तदिनबहिर्भावो बोध्यते। यथा'ऽत्रैकं साम तृचे क्रियते स्तोत्रीय'मिति वचनतस्त्रित्वं प्राप्तमेवमृगिति वचनाच्छन्दोवैशिष्ट्यमपि प्राप्तम्। यतो मीमांसकैर्ऋग्लक्षणं 'पादबद्धा अर्थोपेता मन्त्रा ऋच' इत्युच्यते। तत्र पादाश्छन्दो विना न भवन्तीति तद्वैशिष्ट्यमपेक्षणीयम्। छन्दश्चात्र गायत्रम्, गायत्रच्छन्दसश्च प्रातःसवनसम्बन्धिता ब्राह्मणे उच्यते। प्रातःसवनं च प्रातः कालिकमिति प्रातःशब्देनोदयात् पूर्ववर्तिनः कालस्य बोधनम्। एवं सत्यत्र गायत्रच्छन्दस्क-ऋचां सम्बन्धेन दिनबहिर्भावो बोधितः। स्तोमार्थमृचां समूहनप्रकारेणापि दिनबहिःसम्बन्धः सूच्यते। तथाहि अत्र स्तोत्रे स्तोमस्त्रिवृन्नामकः। त्रिवृच्छब्दस्यार्थस्त्रिरावर्तनं स्तोत्रीयाणामृचाम्। एवं चर्क् नवकं त्रिवृत् पदार्थः। आदित्यबिम्बस्यादर्शनमारभ्य सम्पूर्णदर्शनार्थं कियांश्चन कालोऽपेक्षितो भवति, स च विषुवादिस्थले स्वल्पो ध्रुवस्थानादिस्थलेऽधिको भवति। आधिक्यपराकाष्ठा ध्रुवस्थले सुमेरौ तद्विरुद्धे च कुमेरौ भवति। तदाधिक्यं तत्र पूर्णत्वेन ग्रहणेन परिक्रमत्रयरूपम्, तत्रत्यपरिक्रमस्य विषुवसंस्कारानुरोधेन दिनशब्देन ग्रहणमिति दिनत्रयेण पूर्णं बिम्बं तत्रोदितं भवति। एवं चोदयार्थमपेक्षणीयं दिनत्रयं न रात्रावन्तर्भूतं नापि दिने। एवं पूर्णबिम्बस्य यत्र कुत्रापि ग्रहणे दिनत्रययोगस्यापेक्षितत्वेन दिनत्रयमात्रेणोदयादिस्थलीयस्यैव तस्य ग्रहणमिति

नियमनासम्भवेन दिनराश्यनन्तर्भावो न सम्यग्बोधितः स्यादिति तदर्थमत्र दिन-प्रारम्भीयं राश्यवसानीयं मध्यवर्तिबिम्बञ्च गृहीत्वा तद्वचनेनोक्तकालिकस्य बोधः स्यादिति अत्र स्तोमः। स च त्रिवृत्स्तोमः। तस्यर्म्नवकमर्थं इति प्रोक्तमेव। तत्र सुमेर्वादौ पर्यायस्य परिक्रमस्य वा ऋक्शब्दबोध्यत्वमन्यत्रोक्तमिति ऋग्नव-कार्थं बिम्बत्रयसम्बन्धोऽपेक्षितः सोऽत्र दिनावसानीयं बिम्बमेकं मध्यवर्तिबिम्ब-मुदयद्वास्तमयद्वा तद्द्वितीयं, दिनप्रारम्भीयं च तृतीयमिति बिम्बत्रयग्रहणेन तन्मध्य-बिम्बरूपस्य दिनराश्यनन्तर्भूतस्य सम्यक् ग्रहणं भवति। तत्र प्रत्येकार्थमृक्त्रय-मिति ऋग्नवकमित्यर्थः। तस्य त्रिवृत्स्तोमत्वेन वचनमिति तन्नामतस्स दिन-बहिर्भावो बोधितो भवति। तत्प्रकाररूपविष्टुत्यापि स बोध्यते।

तथाहि त्रिवृत्स्तोमस्य विष्टुतित्रयमेकोद्यती द्वितीया परिवर्तिनी तृतीया कुलायिनी। तत्रोद्यत्याख्यविष्टुतेः स्वरूपं ताण्ड्यब्राह्मणे उच्यते यथा—'तिसृभ्यो हिंकरोति स प्रथमया। तिसृभ्यो हिंकरोति स मध्यमया। तिसृभ्यो हिंकरोति स उत्तमया। उद्यती त्रिवृतो विष्टुतिरिति'। अत्र पर्यायत्रयं बिम्बत्रयापेक्षया। प्रति-बिम्बमुद्यमनमूर्ध्वगमनं तदपेक्षया प्रथमपर्याये प्रतिबिम्बं प्रथमया ऋचाऽर्थाद्बिम्ब-त्रयवशात्प्रथमात्रितयेन प्रथमपर्याये गानम्। तत्र बिम्बस्यैकैकपर्यायातिक्रमणमभि-प्रेत्य 'तिसृभ्य' इत्युक्तिः, गानाभिप्रायेण च परस्तात्प्रथमयेति तृतीयावचनं, गाने ऋचः करणत्वात्। हिंकरोति उद्गायति उद्गानमूर्ध्वातिक्रमणमित्यभिप्रेत्य 'तिसृभ्यो हिकरोती'त्युक्तम्। उद्गानशब्दे गाधातोर्गमनार्थस्य ग्रहणेनोद्गानमूर्ध्व-गमनमाक्रमणमित्यर्थः। एवं द्वितीयपर्याये मध्यमया प्रतिबिम्बं मध्यमपर्यायाभि-प्रायेण मध्यमात्रितयेन गानम्। एवं तृतीयपर्याये प्रतिबिम्बं योऽन्तिमः परिक्रमः स उत्तमशब्देन गृहीत्वोत्तमात्रयेण गानमित्ययं प्रकार उद्यत्याख्यो विष्टुतेस्त्रि-वृत्स्तोमस्य।

एतावतैतेन मध्यबिम्बस्य ज्ञानार्थं पूर्वपरवर्तिबिम्बद्वयस्य गानावसरे ग्रहणं, तत्त्रयाभिप्रायेण पर्यायत्रयेण गानं प्रतिपर्यायं च परिक्रमप्रकार इति बोधितम्। अतएवास्या विष्टुते'रभिक्रामन्ती'शब्देन वचनम्। यथा वृक्षारोहे क्रमेणाभिक्रमण-मग्रं प्रत्येवमेतयाऽत्रात् परवर्तिस्थानात्परवर्तिस्थानं परिक्रमरूपमभिक्रामन्ती भवतीति। अस्यां च विष्टुतौ पापवसीयसो विधृतित्वमुच्यते। तच्च मध्यमबिम्बे पापस्य तमसो वसीयसः कल्याणरूपस्य तेजसः सम्बन्धात्। तावतोदयादिस्थलीय-त्वमेतस्य स्तोमस्य विज्ञातं भवति। प्रतिबिम्बमारोहाभिप्रायेणैषोद्यती विष्टुति-रुक्ता। त्रिवृतःस्तोमस्य द्वितीयविष्टुत्या एकैकस्य बिम्बस्य क्रमिकमारोहत्रयं समाप्यापरस्यैवं क्रमेण बिम्बत्रयारोहाभिप्रायेणैषोच्यते। पूर्वस्यां तु त्रयाणामपि

बिम्बानां युगपदारोहाभिप्रायेण प्रवृत्तिरिति प्रतिबिम्बं प्रथमाया ग्रहणेन प्रथमात्रयेण प्रथमादिपर्यायत्रयमुक्तम्। तत्रोच्यतेऽत्र विष्टुतौ प्रथमः पर्यायः 'तिसृभ्यो हिंकरोति स पराचीभि' रिति। प्रथमबिम्बीयपरिक्रमात्रयेणोर्ध्वारोहोऽत्रोद्गानं तेन ताः परिक्रमाः प्रथमबिम्बीयास्ताभ्यो हिंकरोतीत्युक्तम्। तासां क्रमेणैकैकस्या अतिक्रमणेनातिक्रान्ता सा परा विदूरं गता भवतीति सा पराचीशब्देनोच्यते। तादृश्योऽत्र पर्याये तिस्रो भवन्तीति ताभिर्गानाभिप्रायेणोच्यते 'पराचीभि' रिति। एवञ्च प्रथमपर्यायेण प्रथमबिम्बस्य रात्र्यवसानकालिकस्याभिक्रमणमुक्तं, द्वितीये पर्याये मध्यमस्याभिक्रमणं, तत्रापि परिक्रमाणां क्रमशः पराञ्चनमिति तृतीये पर्याये तृतीयस्य दिनप्रारम्भीयस्य बिम्बस्याभिक्रमणं बोध्यते। तत्रापि क्रमिकपरिक्रमासम्बन्धेन पराचीत्वमुक्तम्। अयमस्य स्तोमस्य विष्टुतेः प्रकारो बिम्बावर्तनाभिप्रायक इति अस्याः परिवर्तिनीति नाम। अत्र प्रतिबिम्बं यथावद्रूपेण ग्रहणेन सा समा भवतीति परस्तात्तत्र ब्राह्मणे प्रतिपादितम्।

तृतीयो विष्टुतेः प्रकारः कुलायिनी। तस्याः स्वरूपमुच्यते पर्यायाणां 'तिसृभ्यो हिंकरोति स पराचीभि'रिति। प्रथमबिम्बारोहणाभिप्रायेण यथावद्रूपत्वमुक्तं, द्वितीयपर्याये प्रथमवर्तिन्याः परिक्रमायाः परित्यागेनोत्तरबिम्बाभिप्रायकपरिक्रमायाः प्रथमाया ग्रहणेन परिक्रमात्रयात्मकः पर्याय उच्यते। प्रथमबिम्बीयप्रथमपरिक्रमायाः परित्यागेन द्वितीयादिमारभ्य परिक्रमात्रयग्रहणं क्रमिकमुच्यते। तत्र प्रथमबिम्बीया या मध्यमा परिक्रमा सेदानीं प्रथमा संपन्ना, तद्बिम्बीया या अन्तिमा परिक्रमा सात्र पर्याये द्वितीयस्थानं गतेति योत्तमा तस्या मध्यमात्वमुच्यते। तदुक्तं 'तिसृभ्यो हिकरोति या मध्यमा सा प्रथमा योत्तमा सा मध्यमा या प्रथमा सोत्तमेति'। एवं परवर्तिबिम्बीयप्रथमपरिक्रमाया अत्र मध्यमे पर्याये उत्तमास्थाने वचनमिति। तृतीये तु पर्याये प्रथमबिम्बीयतृतीयपरिक्रमामारभ्य परिक्रमात्रयग्रहणं, तत्र तद्बिम्बीया अन्त्या एका, परबिम्बीयं परिक्रमाद्वयं क्रमिकमिति पर्यायः। तस्य स्वरूपमुच्यते 'तिसृभ्यो हिकरोति योत्तमा सा प्रथमा या प्रथमा सा मध्यमा या मध्यमा सोत्तमा' इति। एषा मध्यमबिम्बस्थानसंपादिकेति कुलायिनीत्युच्यते।

एवं चात्र त्रिवृत्स्तोमेन तद्विष्टुत्या चोक्तमध्यमबिम्बकालस्य बोधनमिति। एवमेतासु गायत्रं साम गीयते। गायत्रं च साम गायत्रीछन्दस्कायामृचि गानेन प्रदर्शितम्। साम च गीतिरूपमित्युक्तं, गीतिश्च स्वराणामारोहावरोहविशेषरूपा। सा चैकस्यामृचि सामवेदे प्रदर्श्यते, स्तोत्रकाले च तिस्र ऋचोऽपेक्ष्यन्ते। तत्र यस्यामृचि यद्गानं प्रदर्शितं सा तस्य साम्नो योनिभूताऽऽश्रयरूपा ऋगुच्यते। तत्र प्रदर्शितस्य गानप्रकारस्य स्तोत्रावसरे तिसृषु ऋक्ष्वतिदेशः करणीयः। एवं च

गायत्रसाम्नोऽत्र गेयत्वम्, गायत्रसाम्नः प्रातःसवनसम्बन्धित्वेनोक्तविधप्रातःकालिकता बोधिता भवति। एतस्य बहिष्पवमानस्तोत्रस्यान्यस्तोत्रगानस्थानतो भिन्ने वेद्या बहिर्भागे गानादस्य बहिःसम्बन्धाद्बहिष्पवमानता। तदर्थमुपयुक्तैर्ऋत्विग्भिस्तस्मिन्बहिर्देशे गानार्थं गन्तव्यम्। ते च पञ्चर्त्विजः, अध्वर्युः प्रस्तोता उद्गाता प्रतिहर्ता ब्रह्मेति। तेषां गमने विशेष आश्वलायने उच्यते 'प्रह्वा' इति। तेषां परस्परसम्बद्धत्वमपेक्ष्यते, तद्यथा परस्परसम्बन्धविच्छेदो न स्यात् तथा। सम्बन्धविच्छेदे प्रायश्चित्तमुक्तं ताण्ड्यब्राह्मणे। ताण्ड्यब्राह्मणे 'प्रक्वाणा' इति विशेष उच्यते। प्रक्वाणाः क्वाणेन स्वनेन रहिताः। तदर्थो भाष्यकृतोच्यते प्रक्रमे पदध्वनिरहिताः। ब्राह्मणे उच्यते 'यज्ञो मृगधर्मा तस्य शान्त्यै अप्रत्रासाय' 'प्रक्वाणाःत्सरन्ति' इति। भाष्यकृतोच्यते—यथा मृगव्याधानां पदध्वन्युपलब्ध्या मृगा विज्ञाय भीत्या पलायिता न भवेयुरेवं शनैः पादनिक्षेपेणेति, मृगरूपो यज्ञो न भीतः स्यादिति। वस्तुतो यज्ञस्यादित्यस्य मृगरूपत्वं मार्गणीयरूपत्वं रात्रिसम्बन्धात् तमसाऽऽवृतत्वेन तद्विज्ञानाभावान्मार्गणीयत्वेन मृगरूपत्वकल्पना। निरुक्तकारेण मृगशब्दस्य मार्गणीयत्वार्थकत्वमुक्तम्। अतएव पशुपुरोडाशार्थवादब्राह्मणेऽश्वस्योत्क्रान्तमेधत्वेनात्यार्जने तस्य गौरमृगभाव उक्तः। गौरित्यनेन गन्तृत्वं तच्चास्ततः पूर्वं ततः परं च भवति, तत्रास्ततः परस्य तस्य व्यावर्तनायामृग इति विशेषणमुक्तम्, तेन गौः कीदृशोऽमृगोऽमार्गणीयोऽस्तमप्राप्त इत्यर्थ इति। एवं च रात्रौ वर्तमानस्यादर्शनान्मार्गणीयत्वं भवतीति तस्य मृगरूपतोक्ता। आदित्यश्चास्तगमनावसरे स्वीयं तेजोऽग्नौ निदधातीत्युक्त्या तस्य तेजोराहित्येन कृष्णरूपता। अतएव यजुर्वेदे 'यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीनि'ति तस्य कृष्णरूपतोक्ता सङ्गच्छते। एवं सति तस्य मृगरूपत्वेनादर्शनेन तदीयः स्वनो न भवति। स्वनशब्देन वागुच्यते यथा तदीया वाक् न भवति ज्ञाता एवमृत्विग्भिरपि निःस्वनैर्गन्तव्यमिति।

वस्तुतस्तु सर्पन्तीति वर्णनेनैषां सर्पवद्भूसम्बन्धिता व्यज्यते, तां व्यञ्जयितुं आश्वलायने प्रह्वत्वमुक्तम्। एवं च सर्पन्ति इति सर्पणेन बहिरिति वर्णनेन शब्दराहित्यवर्णनेनोक्तोदयत्कालसम्बन्धिता व्यज्यते। यथैवं स्तोत्रेण तन्नामादिना आदित्यस्य दिनरात्रिबहिर्भावो बोध्यत एवं शस्त्रेणाप्यसौ बोध्यते। तच्च शस्त्रमत्र आज्यशस्त्रं, तस्य भागत्रयं साम्प्रदायिकैरुच्यते 'तूष्णींशंसनिवित्सूक्तैराज्यशस्त्रं त्रिपर्वकम्' इति। तत्र तूष्णींशंसेन तन्नाम्ना तदीयमन्त्रेण च स भावो व्यज्यते। तथाहि तूष्णींशंसशब्देन प्रथमतस्तस्य वागसम्बन्धो बोध्यते। स च पूर्णबिम्बस्य यथा एवं खण्डितबिम्बस्थलेऽपि वाचोऽसम्बन्धस्तूष्णींशंसेति

कर्मनाम्ना बोध्यते इति तन्नाम उदयदस्तमयद्बिम्बकालबोधकम्। तत्र कर्मणि प्रयुज्यमानमन्त्रतोऽप्युक्तः कालो बोध्यते। तत्र तूष्णींशंसस्थले मन्त्रत्रयं प्रयुज्यते यथा 'अग्निर्ज्योतिर्भूः, इन्द्रो ज्योतिर्भुवः, सूर्यो ज्योतिः स्वरि'ति। यद्यपि मन्त्रपाठावसरे "भूरग्निर्ज्योतिर्ज्योतिरग्नौ, इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रौ, सूर्यो ज्योतिर्ज्योतिः स्वः सूर्योमि"ति पठ्यते, तथापि तूष्णींशंसस्य द्वेधा वचनं, त्रिपदत्वेन षट्पदत्वेनेति। तत्र त्रिपदत्वेन मन्त्रार्थकत्वं गृहीत्वा पूर्वोक्तं मन्त्रत्रितयं, षट्पदत्वे तु प्रतिमन्त्रं भागद्वयम्। सर्वथाऽत्र भागत्रये अग्निर्ज्योतिरिरिति प्रथमः पर्यायः, इन्द्रो ज्योतिरिरिति मध्यमः पर्यायः, सूर्यो ज्योतिरित्युत्तमः पर्यायो भवति। तत्पर्यायत्रयं भूरादिशब्दयोगेनाभिव्यज्यते। एवञ्चात्र मन्त्रे पूर्णबिम्बाभावो द्योतितो भवति। एवं च तूष्णींशंसशब्देन आज्यपर्वबोधकेन तत्र प्रयुज्यमानमन्त्रतोऽपि खण्डितबिम्बकालेऽस्य प्राप्तिरिति बोध्यते। एवं सति तस्य शस्त्रस्य स्तोत्रसादृश्यं भवति, यथा बहिष्पवमानस्तोत्रं दिनप्रारम्भात्पूर्वं प्रयुज्यत एवमाज्यशस्त्रमपि रात्रिप्रारम्भपूर्वकाले प्रयुज्यते इति स्वोचितकालपूर्वकालिकत्वेनोभयोः स्तोत्रशस्त्रयोः सादृश्यमुपपद्यते। तदर्थमेव नामसादृश्येन आज्यस्तोत्रोत्तरत्वमाज्यशस्त्रस्येति प्राप्तक्रमवैपरीत्येन प्रयोगो देवरथदाढर्यापादक इति 'देवरथो वा' इत्यत्रोक्तब्राह्मणे प्रकृते क्रमविपर्यास उच्यमानः संगतो भवतीति प्रतिपादितम्।

एवं च स्तोत्रशस्त्राभ्यामसौ खण्डितबिम्बकालस्तत्काले तयोः प्रयोग इति बोधितं भवति। तत्र स्तोत्रेण स्तोमस्य विष्टुतिप्रकारेण यथोद्यतो बिम्बस्य सम्बन्धिनावारोहावरोहौ प्रतिपादितौ, यथोद्यत्या विष्टुत्या ऋग्रूपाणां परिक्रमाणां परित्यागावधित्वबोधनेन परिक्रमाणामवरोहो बिम्बस्यारोहश्च तिसृभ्यः पञ्चम्या पराचीभिरिति बोधितौ, एवं शस्त्रेणापि आरोहावरोहौ सूचनीयौ। तत्र तूष्णीशंसेन मन्त्रेण यथोभयं प्रतिपादितमेवं सूक्तेनापि सूचनार्थं तद्गतानामृचां क्रमो विपर्यस्यते। तत्राज्ये शस्त्रे सूक्तं 'प्रवो देवायाग्नय' इति। तत्रत्यानामृचां शंसनावसरे क्रमः प्रथमा पञ्चमी चतुर्थी षष्ठी तृतीया द्वितीया सप्तमीत्येवं तत्रत्यर्चां पाठक्रमोऽनुस्रियते। तद्विपर्यासे बीजं ब्राह्मणे प्रतिपाद्यते। तत्र प्रथमया मध्यवर्ती अवकाशः सूच्यते। अयं भावः—

आदित्येन स्वीयगन्तव्यमार्गे स्वल्पस्वल्पकालशः क्रम क्रियते। वस्तुतस्तु नादित्यस्य गमनं किन्तु पृथिव्यास्तत्तस्मिन्नारोप्य तस्य गमनमिति व्यवह्रियते इति पूर्वमुक्तं ब्राह्मणवचनेन। तत्पृथिव्या गमनं ज्योतिर्गणितसाध्यमपि स्वतन्त्रेण अनुमानेन ज्ञातुं शक्यं, यथा आदित्यस्यातपे कालविज्ञानार्थं क्रियमाणे नियतपरिमाणच्छायास्तम्भेन शंकुना स्वल्पेनातपप्रतिबन्धेन प्रवर्तमानच्छायायाः

स्वल्पस्वल्पशश्चलनं दृश्यते तद्वत इदं छायाचलनमातपचलनेन तत्प्रतिबन्धकसञ्चलननिमित्तमन्यथैवेति तदेव छायाचलनं रात्रौ तमसः क्रमिकप्रवृत्तावपि तथा भवतीति यजुषि विश्वरूपवधकुपितेन त्वष्ट्राऽभिचारार्थगृहीतहविषो हवने ततो निष्पन्नवृत्रस्य विषये इषुमात्रं सर्वतो विवर्धितुमारेभे, तत इन्द्रश्च त्वष्टा च बिभ्यतुरिति। तत्रेषुमात्रविवृद्धया स एवार्थो बोध्यते। एवं चादित्ये आरोपितगत्या तस्य गतिमत्ता, सा चेषुमात्रमेवेति क्रमिकमेव तद्गमनं, परन्तु तत्र दण्डनिपातन्यायेन गन्तव्यमार्गे मानमिति कल्पनया कुमेर्वभिप्रायेणान्तिममस्तप्रारंभात्पूर्वं दृश्यं पूर्णं बिम्बं ततोऽस्तमयद्बिम्बं तन्मध्यवर्तिनमवकाशं मर्यादारूपं गृहीत्वा प्रथमया सूक्तगतयाऽन्तरिक्षं बोध्यते। प्रथमा च ऋक् सूक्ते—

प्र वो देवायाग्नये बर्हिष्टमर्चास्मै।
गमद्देवेभिरास नो यजिष्ठो बर्हिरासदत्॥ इति।

यद्यप्यनेन सूक्तेनाग्निः स्तूयते तथापि तत्रत्यमन्त्रेषु ते ते विशेषाः केनचन पदेन वर्णनेन वा सूच्यन्ते। यथा अत्र मन्त्रे प्रथमपादेन 'प्र वो देवायाग्नये' इत्यनेन पृथक्वाक्यभूतेन अग्नेःस्तुतिवचनमुच्यते। तत्र प्रशब्देनोपसर्गेण योग्यक्रियाध्याहारः सा चात्र योग्या क्रिया स्तुतिः। वच्मीत्यादिना स्तौमीति वा कल्पना। स्तुतिकरणतः पूर्वदेशेऽवस्थायेति अवकाशसूचनम्। किञ्चात्र 'व' इति पदं प्रोच्यते वो युष्माकं सम्बन्धिनमिति शेषः। तादृशश्च देवो अग्निः स्तोतव्यत्वेनोच्यते। शस्त्रस्य रात्रिकालिकत्वेन देवस्याग्नेर्दिनसम्बन्धित्वेन तत्रासत्ता तस्य सूच्यते। एवं च पूर्व पूर्णं बिम्बमतीतं परस्ताद्वर्तिनो देवस्य परवर्तिदिनसम्बन्धिनः प्रवृत्तिस्तत्र मध्यवर्तिनि अवकाशत इदमुच्यते युष्माकं सम्बन्धिनं देवमग्निं प्रस्तौमि। एतद्विशेषप्रतिपादनाय ब्राह्मणे प्रथमपादे विहरणं भेदकरणं तच्च विरोधरूपमुच्यते। तस्य प्रकारान्तरेण समर्थनं क्रियते वज्रस्य अणुत्वसंपादनायेदं विहरणम्। तदुक्तमारम्भणतो वै वज्रस्याणिमेति। ततः परस्ताद्वरीयस्त्वं वज्रस्य परभागस्येति तादृशत्वसंपादनाय तदिति। एवं सति दण्डनिपातन्यायेन बिम्बेन माने पूर्वबिम्बस्यावसानं परबिम्बस्य च प्रारम्भ उभयोर्मध्यवर्त्याकाशरूपोऽवकाशो बोध्यते। ब्राह्मणे प्रकारान्तरेणोच्यते 'प्र वो देवायाग्नय'इत्यत्र वर्तमानः प्रोपसर्गोऽन्तरिक्षस्य द्योतकः। यतः 'सर्वाणि भूतान्यन्तरिक्षमनुप्रयन्ती'त्यत्र प्रशब्दस्य प्रायणाधिकरणत्वात्प्रशब्दबोध्यता तस्येति। तदुक्तं ब्राह्मणे 'अन्तरिक्षं वै प्रान्तरिक्षं हीमानि भूतान्यनुप्रयन्ति अन्तरिक्षमेव तत्कल्पयन्त्यन्तरिक्षमप्येतीति'। एवञ्चात्र प्रशब्दयोगादन्यदीयस्य देवरूपस्याग्नेःस्तवादयं पूर्वोत्तरमध्यवर्तिदेशोऽनेन बोध्यत इति प्रथमा सूक्तगता प्रथमं

शस्यते। ततो दण्डनिपातन्यायेन मध्यवर्तिनो बिम्बस्याभिप्रायेण तद्बोधिकाया ऋचो द्वितीयस्थाने वचनं, यद्यपि सूक्तपाठक्रमेणैषा पञ्चमी। तस्यामादित्यस्य वैशिष्ट्यबोधकपदसद्भावः। तच्च पदद्वयं 'दीदिवांसमपूर्व्य'मिति पदद्वयम्। दीदिवांसमित्यनेन दीप्तिमत्ता बोध्यते सा चादित्यस्य। तत्तु कलामात्रसंपर्कितया रात्रिसम्भृततेजस आदानादत एवादित्यता तस्य। तच्च तेजआदानं सुमेरावेवादित्यस्य न तु कुमेराविति। तस्य केवलं तत्र प्रकाशमानत्वमेवेत्युक्तं 'द्वा सुपर्णे' त्यत्र 'अनश्नन्नन्योऽभिचाकशीती'त्यनेन। यदि दीदिवांसमित्यनेनादानेन न दीप्तिमत्ता किन्तु दीप्तिशालित्वमात्रमुच्यते तर्ह्येतत्कुमेरावपि समं स्यादिति ततो व्यावर्तनाय द्वितीयमपूर्व्यमिति पदम्। तस्य पूर्व इति व्यवहारयोग्यं पूर्व्यम्। कुमेरौ तस्य पूर्वाञ्चनवशतः पूर्वशब्दबोध्यतेत्यन्यत्रोक्तम्। तादृशं नेत्यपूर्व्यमर्थात्सुमेरावुदयार्थं व्याप्रियमाणमित्यर्थात्। एवं सति अनेन पदद्वयेन पूर्वोक्तावकाशोत्तरवर्तिबिम्बरूपादित्यस्य बोधनमनेन मन्त्रेणेति शंसनेऽस्या द्वितीयस्थाने वचनम्। तादृशत्वमुक्तपदद्वयस्य, तद्योगादयं द्वितीयस्थाने प्रयोगार्हं इति मन्त्रो ब्राह्मण उच्यते 'दीदिवांसमपूर्व्यमि'ति। "असौ वै दीदाय योऽसौ तपते तस्माद्धि न किञ्चन पूर्वमस्तीत्येतमेव तत्कल्पयत्येतमप्येति" इति। तद्बिम्बस्थले प्रथमदृश्यमग्निं संसूचयत्तत्पदघटितमन्त्रस्य तृतीयस्थाने पाठो यद्यप्यस्या अध्ययने सूक्ते चतुर्थीत्वमिति, स च मन्त्रः—

स नः शर्माणि वीतयेऽग्निर्यच्छतु शन्तमा।
यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥ इति।

स सुमेरावुदयस्थानिकोऽग्निर्नो रात्रिकालिकेभ्योऽर्थात्कुमेरौ वर्तमानेभ्यः शन्तमा सुखकराणि शर्माणि गृहाणि वीतय उपभोगाय यच्छतु ददातु। यतोऽग्नेरस्माकमस्तोत्तरसम्बन्धीनि वसु वसूनि धनानि प्रुष्णवत्पोषयुक्तानि भवन्ति, तादृशमग्निं प्रतिपादयत्येषा ऋगिति तस्याः सूक्ते चतुर्थस्थाने उच्यमानाया अपि शस्त्रे तृतीयस्थाने वचनम्। तदुक्तं ब्राह्मणे 'स नः शर्माणि वीतय इति शंसत्यग्निर्वै शर्माण्यन्नाद्यानि यच्छत्यग्निमेव कल्पयत्यग्निमप्येति' इति। अत्र शर्मशब्दस्यान्नाद्यवस्तुबोधकत्वमुच्यते ब्राह्मणे, तत्प्रदत्वमग्नेर्विशेषस्तं बोधयन्त्येषा तृतीयस्थाने वक्तव्येत्युक्तम्।

एवञ्च आकाशमादित्यमग्निं चेति उदयाभिप्रायकं क्रमिकावस्थाबोधकं त्रयमुक्त्वास्ताभिप्रायेणावरोहक्रमप्रतिपादनार्थमुच्यते परस्तात्, यथोदयावसरीयतादित्यस्याग्नेश्चेत्येवमस्तावसरीयता दक्षिणस्यां सोमस्येति सोमप्रतिपादने विशिष्टामृचं सूक्ते षष्ठीं शंसने अवरोहाभिप्रायेण चतुर्थीत्वेनोच्यते। अत्रार्चिषो-

ऽस्मानस्तावसरीयान् ब्रह्मन्नविषे हे बृहन्व्याप्नोषीति प्रस्तावसर भासमानत्वं दक्षिणस्यां सोमस्य। सोमश्च दक्षिणदिक्क आदित्य इत्युक्तं पुरस्तात्तद्बोधकं चात्र मन्त्रे ब्रह्मपदमिति। ब्राह्मणे उच्यते 'चन्द्रमा वै ब्रह्म चन्द्रमसमेव तत्कल्पयतीति'। चन्द्रमःशब्देन सोमरूपस्यादित्यस्य ग्रहणं न तु चन्द्रमसो ग्रहस्येति। यथारोहे आदित्याग्नी उक्तावेवमवरोहे सोमः परवर्ती वायुश्चेति वायुप्रतिपादिकामृचं सूक्ते तृतीयां शंसने पञ्चमस्थाने पठनं प्रतिपाद्यते—

स यन्ता विप्र एषां स यज्ञानामथा हि षः।

अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ।। इति।

अत्र यन्तेति पदम्, तच्च यमनं दक्षिणस्यामिति तद्युक्ता ऋक्, तदुक्तं ब्राह्मणे—"स यन्ता विप्र एषामिति शंसति वायुर्वै यन्ता वायुना हीदं यतमन्तरिक्षं न समृच्छति वायुमेव तत्कल्पयती"ति। तत्र आरोहे यथान्तरीक्षं स्थानं पूर्वमुक्तमेवमवरोहे द्यावापृथिव्योर्द्वारा मध्यवर्त्याकाशरूपस्यान्तरिक्षं संसूच्यते 'ऋतावा यस्य रोदसी' इत्यनया। अत्र रोदसीपदेन परस्परनिरोधनरूपान्तरीक्षकार्यसंपादकद्यावापृथिव्योर्वचनम्। तदुक्तं ब्राह्मणे "द्यावापृथिव्यौ वै रोदसी द्यावापृथिवी एव कल्पयतीति"। इदमारोहादिकं सर्वं यथा स्तोत्रे सामरूप आदित्ये एवमिदमवरोहादिकमपि सर्वमादित्यरूपे संवत्सर इति तत्प्रतिपादिकामन्तिमामृचमाह—

नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु।

द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ।। इति।

अत्र सहस्रवत्त्वादिगुणयोगेन संवत्सरगतं स्तोत्रशस्त्रबहिर्भावं दिनरात्र्यनन्तर्गतत्वेन बोधयतीति सूच्यते। ब्राह्मणमपि अमुमेवार्थं गृहीत्वा ब्रवीति 'संवत्सर एव सहस्रवांस्तोकवान्पुष्टिमान्संवत्सरमेव तत्कल्पयति संवत्सरं समस्तमप्येतीति'। अनयाऽऽज्यशस्त्रसमापनमित्युच्यते ब्राह्मणे "उत्तमया सूक्तपाठेऽन्तिमया परिदधाति समापयती"ति। एवं च शस्त्रगतसूक्तेनापि दिनरात्रिबहिर्भावः स्तोत्रस्येव शस्त्रस्यापि प्रतिपाद्यते तृष्णीशंसेनेव सूक्तेनापीति। एतस्मिन् सूक्तेऽध्यात्मकल्पनापीममेवार्थं प्रतिपादयतीति ब्राह्मणे उच्यते।

वेदस्यार्थविषयेऽनुक्रमणिकाकारोल्लिखितमतस्य यथाऽऽत्यन्तिक उपयोग एवं तत्र तत्र निरुक्तकारीयं व्याख्यानं भाष्यान्तरकारादीनां व्याख्यानपद्धतेरपि तदा तदा विस्पष्टभावेनोल्लिखिताया ब्राह्मणभागेष्वर्थवादादिष्वनुसृतकल्पनानां मन्त्रेष्वपि क्रियमाणानां प्रश्नपूर्वकविवरणादीनामर्थस्वभावस्य चानुसारेण यथायथमर्थकरणे उपयोगितैवमुक्तस्य ब्राह्मणभागस्य रूपकेण क्रियमाणभागस्य विवरण-

मप्यर्थविज्ञानायोपकारीति तदा तदा तेषां प्रकाराणां मन्त्रप्रदर्शनमन्त्रार्थगतानुपपद्यमानभागानां व्याख्यानार्थमनेकमन्त्रादीनां प्रदर्शनं व्याख्यानकरणेन प्रदर्शितम्। इदानीं कश्चन वैदिकभाग एव कल्पनोपयोगितया प्रदर्श्यते। इदं प्रदर्शनं दिक्प्रदर्शनरूपमिति ब्राह्मणान्तरीयभागादीना ग्रहणाद्यर्थः प्रयासः सुकरः स्यादिति प्रयत्यते। तत्र यजुर्वेदे त्रिसुपर्णानुवाकेऽन्तिमे खण्ड उच्यते। तच्च खण्डमेवम्—

"तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग् होता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद् ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायंप्रातरत्ति तत्समिधं यत्प्रातर्मध्यन्दिनं सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि ये ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्य गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्य सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम" इति।

अत्र सर्वात्मना सामानाधिकरण्येनोच्यमानानामात्मा यजमान इत्यादीनामाञ्जस्येनाभेदो नोपपद्यत इति तेषां रूपणेन योगाश्रयणादिना वा स उपपादनीय इति तदर्थमेक प्रकृतमपर ताद्रूप्यादिना कल्पितं रूपं भावनार्थमिति गृहीत्वा अन्ते ब्रह्मणो महिमानमेतीति फल वेदनस्योच्यत इति भावनाया उपासनार्थत्वं गृहीत्वा भाष्यकृतोच्यते—'य एवं वेदेत्यनेन ज्ञानस्य ब्रह्मणो महिमप्राप्त्यर्थकत्वोक्त्या ज्ञानमत्र ब्रह्मसाक्षात्काररूप तत्साधनाय सन्न्यास एव कर्मणामपेक्षणीयोऽन्तरङ्गत्वाज्जिज्ञासोः सन्न्यास एव युक्तो न तु कर्मानुष्ठानम्। तर्हि अनुत्पन्ने तत्त्वसाक्षात्कारे कर्माण्यननुष्ठीयन्तामित्याशङ्कां निवारयितुमत्र तत्त्वज्ञानिव्यवहाराणां लौकिकानां सर्वेषां यागरूपत्वमुच्यत" इति। कदाचन यज्ञस्यैव व्यवहारकल्पना यज्ञाङ्गेषु तत्कल्पनं, तच्च न सम्भवति तदुक्तं तत्र भाष्ये "नहि यागस्य यागाधिकारशङ्काऽस्ति" इति। एवं च भाष्यकारेणात्र रूपणं सम्मतम्। तत्र रूपणाधारता कस्य, विषयता च कस्येति विचारणीयम्। तत्र भाष्यकृता मन्यते तत्त्वज्ञानिनो ये लौकिका व्यवहारास्तेषु यज्ञाङ्गत्वकल्पनमिति। अस्माभिस्तु मन्यते सूर्याचन्द्रम-

सोमेंहिमप्रापकेषु यज्ञाङ्गत्वं कल्प्यत इति। सूर्याचन्द्रमसोर्महिम्नोः पृथक्त्वे तत्प्रापका अपि पृथगेव भवन्ति। तत्र सूर्याचन्द्रमसोः पृथक्त्वात्तत्प्रापका यज्ञा अपि पृथग् भवन्ति। तत्र देवानां महिमानं गत्वाऽऽदित्यस्य सायुज्यप्राप्तिः, पितृणां महिमानं गत्वा चन्द्रमसः सायुज्यप्राप्तिरिति वर्णनेनैको यज्ञो देवेषु, अपरः पितृष्विति भवति।

तत्र शतपथानुसारेण "वसन्तो ग्रीष्मो वर्षास्ते दैवा ऋतवो देवेषु तर्ह्यसौ भवति, शरद्धेमन्तः शिशिरस्त आसुरा ऋतवोऽसुरेषु तर्ह्यसौ भवति असुरांस्तर्ह्यभिगोपायती"ति वर्णनेन ऋतुत्रये वसन्ताद्ये सुमेरुशृङ्गे आदित्यस्यानस्तमितभावेन सत्त्वे स देवलोकः, शरदादिषु असुरेषु सत्त्ववर्णनेन तदानीं स मेरोर्दक्षिणदिक्के शृङ्गे वर्तमान इति स कुमेरुरसुराणां निवास इति देवलोकीया दृष्टिः। असुराणां दक्षिणा यथा दिगेवं पितृणां सा दिक्। तल्लोकानुसारा च दृष्टिः, ऋतुत्रयं तत्र दिनमादित्यश्च स्याताम्, परस्तान्मासषट्के तत्र रात्रिः, रात्रौ चर्तुद्वयं, तच्च वृष्टिपूर्णमित्येषा पितृलोकीया दृष्टिः। पितृलोकीययज्ञानुष्ठानेन पितृलोके मृतस्य चन्द्रमःसायुज्यप्राप्तिरिति वर्णनेन दक्षिणदिक्कश्चन्द्रमा इत्येवं भवति। अर्थाद्देवलोकीय उत्तरदिक्क आदित्यः सूर्य इति। अतएव स्थलान्तरे उक्तं 'सोमो वै वाजस्तस्य चन्द्रमास्तृतीयं योऽयं पवते स तृतीय'मिति। आदित्यस्य चन्द्रमःशब्दबोध्यता पूर्वं निर्णीता। अतएव तयोः परस्परं विभिन्नधर्मतया विरोधकल्पनेति निर्णीतं पुरस्तात्। एवं सति दक्षिणे मृतस्य चन्द्रमःप्राप्तिरुत्तरे मृतस्य सूर्याभिन्नादित्यप्राप्तिरुच्यते।

एतावता देवलोकीयदृष्टयभिप्रायेण यज्ञे तत्स्वरूपमुच्यते, यज्ञे यागकर्ता यजमानो भवति। अत्रापि यज्ञस्य देवलोकीयस्य यजमान आत्मा भवति। अत्रात्मत्वेन सूर्यो भवति गृहीतः। तस्यात्मत्वं मन्त्रे उच्यते 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति। समानन्यायेन दक्षिणलोकीययज्ञाभिप्रायेण तत्रत्यात्मनि यजमानकल्पनेति। देवलोके यथा सूर्ये आत्मत्वकल्पना नैवं तत्र दक्षिणलोके सूर्ये आत्मत्वकल्पना। अतएवास्यवामीये सूक्ते उच्यते 'भूम्या असुरसृगात्मा क्व स्विदि'ति। तत्रत्यात्मनो विषये पृच्छोपनिबद्धा। अतएव तत्र परवर्तिनि मन्त्रे 'देवानामेना निहिता पदानि' इति पूर्वोत्तरमन्त्रगतानामर्थानां देवानां विषये गुप्तत्वं देवैरविज्ञातत्वमुच्यमानं सङ्गतं भवति। एवं सति समानन्यायेन यथा देवलोके सूर्य आत्मा, तथा पितृलोकेऽसुरलोके वा चन्द्रमा आत्मा। यद्यपि उभयरूपत्वमादित्यस्यैव तथापि उपाधिभेदेन भेदकल्पनेति बहुश उक्तमेव। यज्ञेऽर्थाद्दक्षिणदिक्के उत्तरदिक्के वा आत्मा यजमानः। अर्थादात्मनि यजमानत्वेन कल्पनेति।

ततो द्वितीयं वाक्यं 'श्रद्धा पत्नी'। श्रद्धा सत्यधात्री सत्यस्य संपादिका पत्नीत्वेन कल्प्यते। उभयत्रेदं समम्। निघण्टौ सत्यबोधकेषु नामसु 'श्रदि'त्यस्य पाठात् श्रत् सत्यं तस्य धात्री संपादिकेति। सत्यशब्देन सत्यमेव नासत्यमित्यर्थेनासत्यप्रतिक्षेपमुखेन सत्यमुच्यते, असत्यप्राप्ती रात्रिकाले तस्य प्रतिक्षेपः क्रियते न असत्यं किंतु सत्यं तच्च रात्रिकालिकं तेजः, तत्र रात्रिप्रारम्भकालिकस्य सान्ध्यस्य तेजसः पत्नीत्वेन कल्पना। तामादाय श्रद्धा पत्नीति।

'शरीरमिध्मम्'। शरीरं स्वरूपमर्थात्सूर्याचन्द्रमसोः, तदिध्मम्। एधनीयमभिज्वलनीयमित्यर्थः।

'उरो वेदिरिति'। अत्र वेद्यामुरस्त्वकल्पना। यतः सूर्याचन्द्रमसोरुरोऽप्रसिद्धं प्रसिद्धश्च वेदिपदार्थः। तत्प्रसिद्धिर्मन्त्रान्तरसाहित्येन। तच्च पूर्वमुक्तं 'षष्टिश्चाध्वर्यो'रिति मन्त्रव्याख्याने। 'एतावती वै पृथिवी यावती वेदि'रिति वचनेन वेद्या भुवः परान्तत्वस्य 'इयं वेदि'रिति मन्त्रेण प्रतिपादितत्वमिति पूर्वमुक्तम्। एवं च या वेदिस्तत्रोरस्त्वकल्पनमित्यर्थः। एतावता यत्र वेदिग्रहणं तत्र सति संभवे उरोग्रहणम्। उरोग्रहणं च यत्र तत्र वेदिग्रहणमिति अर्थनिर्णायकमेतादृशं वचनम्। पूर्वत्रापीयं रीतिः।

'लोमानि बर्हिः'। बर्हिषि लोमत्वकल्पना, लोमसु वा बर्हिःकल्पनोभयत्र समा। लोमसु तेजस्त्वकल्पनाया रश्मिषु वा केशत्वकल्पनायाः शोचिष्केश इत्यादौ सिद्धया लोमार्थकशब्दस्थलेऽपि तेजःकल्पना बर्हिःशब्दार्थकपदार्थान्तरेऽपि लोमत्वकल्पनाद्वारा तेजस्त्वकल्पनेति परम्परयापि बोधकम्। यथोच्यते 'आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः' इति दशविधकुशमध्ये दूर्वाणामपि ग्रहणात्कुशानां बर्हिष्ट्वेन तेषु लोमत्वकल्पनाद्वारा तेजोरूपरश्मिकल्पनेति गृहीत्वा आदित्यं प्रत्युच्यते,—हे आदित्य तवायने सविधस्थलागमनेऽर्थादुदये एवं परायणे विदूरमस्तरूपं गमनं तत्र दूर्वाणां रोहणं रश्मीनामित्यर्थे पर्यवसानम्। रश्मिग्रहणेनैव पुष्पिणीत्वं सूपपन्नम्। पुष्पं च पुष्पस्थानीयं मण्डलं तद्युक्तत्वात्।

'वेदः शिखा'। शिखायां वेदत्वकल्पना। शिखाऽर्चीरूपा। एवं च परस्परग्रहणेन परस्परार्थनिर्णयः। अतएव 'यस्समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये' इत्यत्र समिधा समिध्यमानेन शरीरेण। समिध्यमानं शरीरमित्यर्थः। ददाति स्वात्मानं जुहोति, अस्तमुपयन्नादित्यः स तु स्वात्मानं स्वरूपं स्वशरीररूपं जुहोति इति कल्पना। अतएव पुरुषसूक्ते सर्वहुत इति सर्वं स्वात्मरूपमपि जुहोतीत्यभिप्रायेण सर्वहुत इति पदं सार्थकम्।

यत्तु कर्मणि क्विपं मत्वा सर्वैर्हूयमानादित्यर्थकरणं तत्तु न प्रकृतानुगुणम्। अत्र हि मन्त्रे सर्वस्मात् हुतादात्मनः पृषदाज्यं संभृतमित्युक्तिः, सा सम्यक् संगच्छते। हुतादर्थादस्तं गतात्पृषदाज्यस्य संभृतिः सम्भरणं संपादनं पृषदाज्यस्य। पृषदाज्यशब्दस्यार्थं उच्यते 'पृषदाज्यं सदध्याज्ये' इति। तस्यैकत्रास्तमतास्तस्मादादित्यादपरदेशे उदयेन पृषदाज्यता। आज्यं तेजस्तच्च घनीभूतं दधिसदृशं मण्डलरूपमित्यर्थः, एवमादिवचनसम्भवात्। किञ्च पृषच्छब्दस्य बिन्दुसदृक्षभासमानतारकादिपरत्वम्। अतएव 'स्थूलपृषतीमनड्वाहीमालभेते'त्यत्र स्थूलपृषतीशब्दार्थस्य स्वरेण निर्णयः स व्याकरणाधीन इति बोधितं भाष्ये। यदि कर्मधारयः समासस्तदानीं तदङ्गोपरि बिन्दवः स्वल्पा वा भवन्तु महान्तो वेत्यविवक्षितमिति केवलं तस्याः स्थूलत्वं विवक्षितम्। यदि बहुव्रीहिः स्थूलानि पृषन्ति यस्यामिति पृषतां स्थूलत्वं विवक्षितं धेनुः कृशा वा भवतु स्थूलावेत्यविवक्षितमिति सन्देहे स्वरवशतो निर्णयो व्याकरणाधीन इति व्याकरणमध्येयमिति भाष्य उक्तम्। एवं च पृषच्छब्देन बिन्दवस्तत्स्थानीयानि नक्षत्रादीनीत्यर्थं आज्यसम्बन्धात्। आज्यशब्देनाजिधावनस्थलीयमाज्यं तेज इति पूर्वं निर्णीतम्, अत्रापि परस्तादुच्येत। एवं च पृषत् बिन्दुरूपनक्षत्रयुतं तेज आजिस्थानापन्नमस्तोत्तरभावीति तच्च सर्वमण्डलरूपसर्वशरीरहोमोत्तरमिति संगच्छते।

एवं च समिधा स्वशरीररूपेण हूयमानेन। हूयमानं शरीरमित्यर्थ उक्त एव। आहुती आहुत्या प्रकाशेन प्रकाशमित्यर्थः। अत एवात्र परस्तादुच्येत 'यद्विज्ञानं तज्जुहोती'ति। एवं सति विज्ञानं प्रकाशस्तद्रूपया आहुत्येत्यर्थः। एवं वेदेन बर्हीरूपेणार्चिषा तद्रूपमर्चिरित्यर्थः। तयोर्ददातीत्यर्थस्य परस्परसाहित्येन निर्णयः। अतएव 'वेदेन संमार्ष्टी'ति विधानं, वेदपदार्थश्च उपविष्टवत्सजानुसदृक्ष इति व्याख्या तत्पदार्थस्वरूपं च याज्ञिकं सङ्गच्छते। उपविष्टस्य वत्सस्य जानुनो ग्रन्थिभागोऽवशिष्टश्चोरुजङ्घाभागौ विरुद्धदिक्कौ पार्श्वगतौ भवतः, एव मण्डलस्योभयपार्श्वनिर्यद्रश्मियोगेन उपविष्टवत्सजानुसादृश्यम्। मार्जनसाधनत्वं रश्मिद्वारा तमस इति संगतं व्याख्यानम्। मण्डलतो निर्गच्छन्तो रश्मयः पूर्वोक्तरीत्या शिखास्तासां वेदत्वमिति वर्णना। एवं च वेदपदेन शिखायाः शिखापदेन वा वेदरूपस्यार्थस्य बोधद्वारा रश्म्यादिबोध इति। शिखाया अर्चिरर्थत्वं सप्तशिख इत्यादौ व्यक्तम्। एवं सति शिखासु वेदत्वकल्पना वेदे वा शिखात्वकल्पना तद्द्वारा तेज आदिपरत्वनिर्णयो वर्ण्यत इति।

'हृदयं यूपः'। अत्रापि परस्परं रूपणम्। यद्धृदयं स यूपो यूपो वा हृदयमिति। तत्रैतरेये यूपस्य वर्णनप्रसङ्गे याम्योत्तरं वृत्तं यद्वैषुवदिने विषुववृत्तक्रान्तिवृत्तच्छेद-

बिन्दुद्वारा गच्छति तस्य यूपरूपता। तस्योर्ध्वाग्रस्याधोऽग्रत्वसंपादनान्मोहोत्पाद इत्यादि विस्तरेण निरूपितम्। तस्मिन्हृदयरूपणं हृदये वा तन्निरूपणमित्यनेन हृदय्या आप इत्यादिषु निर्णय इति तत्र परस्परापेक्षारूपणे उभयत्रेदं सममेवेति विशिष्य वचनाभावः।

'काम आज्यम्'। काम इत्यनेन उषसा मण्डलसंयोगात्मा समरसभाव एवाज्यमिति बोध्यते। तदुक्तं मन्त्रे—

'अपोषा अनसः सरत्संपिष्टादह बिभ्युषी।
नियत्सीं शिश्नथद्वृषा'॥

इत्यत्र 'सीम्' एनामुषसं 'वृषा' आदित्य इन्द्ररूपो वा 'निशिश्नथत्'। नितरां शिश्नेन समताडयदिति। अयमर्थ उर्वश्या वचनेन स्पष्ट उच्यते उर्वशी-पुरुरवसोर्वाकोवाकसूक्ते 'त्रिः स्ममाह्नः श्नथयो वैतसेन' इत्यादिना। उर्वशी उषा एवेति तत्पदनिर्वचनतो विज्ञायते। तन्निर्वचनं निरुक्तभाष्ये उच्यते 'ऊरुभ्यामश्नुते ऊरुर्वा वशोऽस्या' इति। उषसि ऊरुत्वकल्पनात्तस्याश्चोषसो मण्डलस्योभय-पार्श्वयोः सम्बन्धेनोरुद्वययोग इति। ततः परवर्तिबिम्बस्य साजात्येन स्त्रीन्द्रियत्व-कल्पना, तद्वशत उषसःस्त्रीत्वमन्यथोषोरूपतेजोमात्ररूपस्य तस्य स्त्रीत्वेन निर्देशे बीजाभावः। तत्र पुमिन्द्रियकल्पना तद्योगकल्पना चेति पुरस्तादुक्तमिति। तं सम्पर्कं गृहीत्वा कामत्वेन वर्णना तत्रैवाज्यत्वेनापि कल्पना। अतएव 'निकामे निकामे नः पर्जन्यो वर्षतु' इति वर्णनं संगच्छते। निकामो नीचैः कामः, भूलोकदृष्ट्या स च तत्रास्तोत्तरीयः। अस्तस्याधस्ताद्वर्तित्वमुदयस्योर्ध्ववर्तित्व-कल्पना सुमेराविव तत्रापि। एवं सत्यस्तस्याधोवर्तितया तत्रत्यः कामोऽधोवर्ती। तत्रोच्यते निकामे निकामे प्रतिकामं तत्रापि उपाधिभेदेन भेदकल्पना। तत्र पर्जन्यो वृष्टो भवतु इति। भवति हि तत्रास्तादूर्ध्वं सर्वां रात्रिं यावद्वृष्टिरिति 'देवानां माने' इत्यत्र निरूपितम्। एवं सति कामवर्णने आज्यवर्णने काम आज्यमिति वर्णनेन मन्त्रार्थबोधे उपयोगः।

एवं 'मन्युः पशुः'। आदित्यस्योभयत्र मन्युरूपत्वं मन्युसूक्त उच्यते— 'मन्युरिन्द्रो मन्युरेवास देव' इत्यादिना। आदित्यस्य हवीरूपत्वं पशुरूपत्वमिति पुरुषं वै इत्यत्र प्रतिपादितम्। स च देवयज्ञे यथा मनुयज्ञेऽपि तथेति होतृजपेऽक्षर-पंक्तियज्ञवर्णनावसरे उक्तम्।

अग्निस्तपोरूप इत्युच्यते 'तपोऽग्निरिति'। सर्वत्रादित्यतो निःसरत-स्तेजसः प्रतिबन्धस्थले उष्णत्वावभासनात्तपोरूपत्वमग्नेः। स्पष्टं चेदं निरुक्ते, अग्निरप्यादित्यरूप एव। यत आदित्यतो निर्गतस्य तेजसो दिनमध्ये सूर्य-

कान्तमण्यादिना पुञ्जीभावस्य करीषे पातने ततो वह्नेर्ज्वलनं प्रसिद्धं, अयमेवा-दित्योऽग्निरूप इति। किञ्चाग्निं प्रत्युच्यते 'देवांस्त्वं परिभूरस्यावह देवा-नि'ति, 'अग्ने नेमिररां इव देवांस्त्वं परिभूरसि' इत्यनेनारनेमिभावेऽरा यथा नेम्या सम्बद्धा एवमादित्यतो निर्गताः किरणा आकाशे प्रतिबन्धस्थले पुञ्जी-भवन्तो वह्निरूपा इति वह्नेर्देवानां परितो वचनमयमप्यर्थः पूर्वमुक्त एव। 'दमःशमयिता' दमो हि दमनात्मा दण्डनस्वरूपस्तस्य शमरूपत्वम्। एवं सति शमः शान्तिरुष्णत्वादेरभावोऽर्थादस्तादिना, किंवा शमो मरणं तस्य संपादको यः स दमस्वरूपः शमयिता विनाशक इति। रुद्रस्य प्रजापतिरूपादित्यदमनकर्तृत्वं बोध्यते दुहित्रुपारोहकथायां ब्राह्मणे इति स दमः शमरूपो वेति। एवं सत्येषां वाक्यानां परस्परसम्बन्धेनैकवर्णनेनापरप्रतीत्यार्थबोधे उपकारकत्वम्। भाष्यकृता तत्त्वज्ञानिनोऽङ्गेषु यज्ञादिकल्पनेति खण्डे भागद्वयकल्पनेन पूर्वभागेनेत्युच्यते।

'दक्षिणा वाक् होता'। अत्र दक्षिणाशब्दो दक्षिणां दिशं प्रदक्षिणा-ऽऽवर्तमानत्वेन दक्षिणापरिक्रमयुक्तत्वं चाह। एवं दक्षिणदिक्स्था वाक् होतृरूपिणी। वाचो मण्डलासत्त्वदशायां सत्त्वं तच्च रात्रिकालिकमित्युक्तम्। रात्रौ विद्यमानाया वाचश्चतुर्थं पदं मनुष्या मनष्यलोक इति वर्णनेन भूलोकस्त-त्सम्बन्ध्यग्निर्होतेति। सर्वमेतत्पूर्वं निरूपितमिति सुमेर्वभिप्रायेण। कुमेर्वभिप्राये दक्षिणा दक्षिणदिक्स्था वाक् तत्रापि होतृत्वकल्पनोक्तरीत्यैव। तत्रापि सुमेराविव लोकत्रयकल्पनाया'स्तिस्रो भूमीर्धारयंस्त्रीनुत द्युनि'त्यादिना पूर्व-मुक्तमेवेति। अनेन यज्ञ उभयत्र देवलोकेऽसुरलोकेऽपि देवयज्ञे वा तद्विरुद्धे आसुरयज्ञेऽपि वा वाचो वागभिन्नस्याग्नेर्होतृत्वमित्यर्थः।

'प्राण उद्गाता'। प्राण ऊर्ध्वं गच्छन्नादित्य एवोद्गातृशब्दबोध्य ऋत्विक्। उदयादूर्ध्वंगच्छन्नादित्यस्तद्रूप इत्युभयत्र समम्।

'चक्षुरध्वर्युः'। उदयात्पूर्वमस्तोत्तरं च संपूर्णमादित्यबिम्बं चक्षुःसाजात्या-च्चक्षूरूपम्। अतएव तस्य चक्षूरूपत्वं 'चक्षुर्मित्रस्य वरुणस्याग्ने'रित्यादिनोच्यते। तद्रूपत्वाभावेन भगस्थले तस्यान्धत्वेन वर्णनेति। तस्य चक्षूरूपस्यादित्यस्या-ध्वर्युत्वेन वचनम्।

एवं 'मनो ब्रह्मा'। मनसो ब्रह्मरूपत्वम्। मनश्चोदयात्पूर्वकालिकमौषसं तेजः। अतएव सूर्याविवाहवर्णने उच्यते 'मनो अस्या अन आसीदि'ति। मनोरूपमस्याः सूर्याया अनः शकटं यानसाधनमासीदित्युच्यते। उषसि शकटत्वकल्पना 'अपोषा अनसः सरत्संपिष्टादह बिभ्युषी'त्यत्र। 'अनो मनस्मयं सूर्यारोहत्प्रयती पति'मित्य-त्रानोमनसोरभेद उच्यते। देवतासु यानवाहनायुधादीनां स्वरूपाभेद इति

पूर्वं निरूपितम्। एवं चौषसः प्रकाश एव ब्रह्मार्त्विक्रूपः। अतएव भग-पूषसवितॄणां देवयज्ञे ब्रह्मर्त्विक्रूपत्वे तैः प्राशित्रभागदर्शनचर्वणग्रहणैस्तेषां चक्षुषो दन्तानां हस्तस्य वा राहित्येन विकलाङ्गत्वादिवर्णनं संगच्छते तत्पूर्व-मुक्तम्। उभयत्रापि सममेवेदम्।

एवं 'श्रोत्रमग्नीत्'। श्रोत्रमित्यनेन श्रुतिभावापन्नं तेज उच्यते, श्रुतिविषये दीर्घश्रुत्तममित्यत्र प्रतिपादितम्। तस्याग्नीत् अग्निसमेधनकर्तृ-ऋत्विक्रूपतोच्यते।

'यावद्ध्रियते सा दीक्षा'। यावत् पर्यन्तं ध्रियते तूष्णींरूपत्वेनावस्थितिः। भाष्यकृतोच्यते भोजनं विना स्थितिरिति। तत्रादित्यस्य उदयास्तावसरे खण्डितबिम्बावस्थाया गत्याद्यभाववर्णनेन केवलं स्थितिरित्युच्यते। गत्यादिकं स्वरूपेण निष्पन्ने भवति, स्वरूपं च उदयोत्तरमिति उदयावस्थायां केवला स्थितिरिति गृहीत्वोच्यते यावद्ध्रियते स्थीयते। धृङ अवस्थाने इति धातोः रूपम्। अस्तावसरेऽप्येवमेव। सावस्थितिर्बन्धशब्देनाप्युच्यते। तस्या अवस्थितेर्दीक्षारूपत्वोक्तिः। तस्या दीक्षाया दिनसङ्ख्याविषये अनेके पक्षाः कर्मसूच्यन्ते। तत्र द्वादशदीक्षाः सत्रविषये. सापीमामवस्थिति-मभिप्रेत्यैवोच्यते। तत्रोदयतोऽस्तमयतो वा बिम्बस्य सुमेरुकुमेर्वोः पर्याय-चतुष्टयेन दिनचतुष्टयेन वा पूर्णता भवति। एवं सति उदयस्थानप्राप्तस्य उदयेऽ-प्रवर्तमानस्य पूर्वस्य पूर्णस्य बिम्बस्य कृते दिनचतुष्टयमुदयतो दिनचतुष्टयमु-दयोत्तरं पूर्णस्य बिम्बस्य कृते दिनचतुष्टयमिति द्वादशदिनपर्यन्तमुदयावसरे बिम्बत्रयार्थमपेक्षितं, तदानीं किरणैरसम्बन्ध इति गृहीत्वा ऋभूणामादित्यगृहे द्वादशदिनपर्यन्तमातिथ्यग्रहणे 'स्वाप' इत्यादि वर्णनं संगच्छते। इयमवस्थितिर्बन्ध-रूपिणी, यथा बद्धो नान्यत्र गन्तुं पारयत्येवमत्रादित्यस्यान्यत्रागमनेन बद्धत्वमिति गृहीत्वा अग्नेर्वर्णने उच्यते 'त्रिधा बद्धो वृषभो रोरवीति' इति। एवं सति उक्त-रीत्या द्वादशदिनपर्यन्तं दीक्षा इत्यादयो व्यवहारा इति धृतिरेव दीक्षेत्युक्तम्।

'यदश्नाति तद्धविः'। अश्नाति व्यक्तं तेज आत्मनि विलापयति तत्तेजो हविरित्यर्थः। एतेन व्यक्तस्योषआदेस्तेजसो होम इति फलति।

'यत्पिबति तदस्य सोमपानम्'। अव्यक्तस्य तेजसोऽप्त्वेन वर्णनात्तदव्यक्त-तेजोरूपमुदकं यत्पिबति स्वात्मनि विलीनं करोति तत्सोमपानमिति। एतेन तेजोरूपत्वं सोमस्य, तस्य स्वात्मनि विलयः पानम्। तेजोग्रहणेन तेजस्विनेन्द्रेण वृत्रादयो विनाश्यन्ते इति वृत्रादीनां तमोरूपत्वमिति भवति। अतएवेन्द्रेण त्रिकद्रुकेषु सोमपानम्, युद्धादीनां वस्तुतोऽभावः, वृत्रेणापां निरोधः, इन्द्रेण वृत्रं हत्वाऽपामु-न्मोक इत्यादीनां वर्णनानामपपत्तिः, प्रदर्शितं चैतत्पूर्वम्।

'यद्रमते तदुपसदः'। रमणं समरसभाव उदयाद्यवसरीयः कल्पितस्ता उपसदः। तन्नामकेष्टित्वम्। तदुक्तमेव पूर्वम्। 'यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यः'। सञ्चारः प्रकाशनार्थं नानादेशसम्पर्कः। उपवेशः धृतिः। उत्थानमुदयस्तस्य प्रवर्ग्यत्वम्।

'यन्मुखं तदाहवनीयम्'। आहवनीये मुखरूपणम्। 'या व्याहृतिराहुतिः'। यस्य विशेषेण आ समन्ताद्धरणं तेजसः सा आहुतिशब्दवाच्या। एवं च तेजस आदानं दानं आहुतिशब्देनोच्यते। 'यदस्य विज्ञानं तज्जुहोति'। प्रकाशप्रदानमेव होमः। 'यत्सायं प्रातरत्ति तत्समिधम्'। सायं प्रातश्चोदयास्तावसरीयबिम्बस्य खण्डितभावेनापेक्षिकतेजस्वितया दर्शनात्प्रज्वलत्समित्काष्ठरूपत्वकल्पनया सायं-प्रातरस्तोदयावसरे यदत्ति प्रकाशयति खण्डितं रूपं सा समिदिति समित्काष्ठ-रूपमित्यर्थः। अत एव वृषाकपिसूक्ते 'नवं चरुमादेधस्यान आचितमि'ति एधोयुक्तस्यानसो वर्णनं सङ्गच्छते। अनःशब्देनोषा गृह्यत इति पूर्वमुक्तम्। तच्चानः काष्ठपूर्णमिति वर्णना। अनःशब्देनोषोग्रहणे तत्र काष्ठपूर्णत्वस्य प्रकारान्तरेणासम्भवः। यदि मण्डलस्यैवोक्तरीत्या खण्डितस्य काष्ठरूपत्वं समिद्रूपत्वं गृह्येत तदा तेन युक्तं शकटमेधोयुतमिति वर्णनसम्भवेनोक्तरीत्या मण्डलस्यैव सायंप्रातरस्तावसरे उदयावसरे च खण्डितस्य प्रकाशनेन तद्रूपस्य समित्त्वमिति। अयमर्थो 'विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः। शतं महिषान् क्षीरपाकमोदनमि'त्यादिनाऽप्युच्यत इति तन्मन्त्रव्याख्याने विस्तरेणोक्तम्।

'यत्प्रातर्मध्यन्दिनं सायं च तानि सवनानि'। अत्तीति पूर्ववाक्यतः सम्बध्यते। एवं च प्रातर्मध्यन्दिनं सायं यदत्ति पिबतीति तानि त्रीणि सवनानि सवनेषु पीयमानरूपसोमसम्बन्धीनीति। त्रिकद्रुकेषु सोमपानवर्णनादि च पूर्व-मुक्तमेव।

'ये अहोरात्रे ते दर्शपूर्णमासौ'। अहोरात्रयोर्दर्शपूर्णमासत्वम्। दर्शपूर्ण-मासयागौ पर्वदिने अनुष्ठीयेते। पर्वदिनं पक्षान्तदिनं तत्र दिनस्यैवोभयरूपता वक्तव्या, अत्र तु दिनरात्र्योरुभयरूपत्वमुच्यते तत्कथं संगच्छेत। भाष्यकृताऽत्र न किमपि विशिष्य विवरणं क्रियते। एवं सत्यहोरात्रयोर्दर्शपूर्णमासत्वमनुपपद्य-मानमनुमत्यादिस्थले प्रतिपादितरीत्योपपद्यते इति एतद्वचनमनुमत्यादिस्थलीय-व्याख्यानस्योपपादकमिति अनुमित्यादिवर्णनावसरे यद्वक्तव्यं तदुक्तं पुरस्तात्।

'येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि'। ये चार्धमासमासप्रभृतयो विशेषा विषमाः प्रकारा अर्थाद्दिनरात्रयोस्तेषां चातुर्मास्यसम्बन्धिता। चातुर्मास्य-शब्देन चतुर्षु मास्सु सम्भवन्ति आदित्यस्य गतिभेदवशतः कर्माणि, तदनुकार-

निबन्धीनि अनुष्ठेयानि साकमेधशुनासिरीयप्रभृतिपर्वयुतानि कर्माणि। कर्मविवेचनप्रसङ्गे तद्विषयको विचारः प्रदर्शयिष्यते।

'ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः'। ये च संवत्सरपरिवत्सरादिनिबन्धना विशेषास्तेषामनुकारेणानुष्ठेयानि कर्माणि अहर्गणरूपाणि कर्माणि। संवत्सरसंव्यवहारार्थाः काश्चन विशिष्टाः संज्ञा व्यवह्रियन्ते। यथा 'संवत्सरः परिवत्सर इद्वत्सर इदावत्सरोऽनुवत्सर' इति। एषां क्रमेण समुदायो युगशब्देन व्यवहृतो वेदाङ्गज्योतिषग्रन्थे। तच्चोक्तं 'पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्। दिनर्त्वयनमासाङ्गं व्याख्यातं लगधोऽब्रवीदि'त्यादिना। युगशब्दस्य युग्मबोधकता द्वित्वसङ्ख्यायुतार्थबोधकता प्रसिद्धा। तच्च दिनरात्रादिरूपकालावयवगतसङ्ख्याबोधकं तदन्यपदार्थगततद्बोधकं वेदे। यथा 'आ धा ता गच्छानुत्तरा युगानि, जुजुर्वान्दशमे युगे, युगे युगे विदथ्यं गृणद्भ्य' इत्यादिषु। एतस्य संवत्सराधिककालरूपकृतादिविशेषपरत्वविषये विचारःपूर्वमुक्तः। किञ्च युगस्य सविशेषणभावेन वचनं वेदे, यथा 'उत्तरा युगानि, पूर्वं युगमि'त्यादि। तत्र पूर्वोत्तरशब्दयोर्न कालबोधकत्वं किन्तु दिक्सम्बद्धार्थबोधकत्वमिति 'अग्निः पूर्वेभि'रित्यस्य व्याख्यानावसरे प्रदर्शितं पूर्वम्। किञ्चेमान्यपीद्वत्सरादिपदानि न केवलक्रमिकसंवत्सरबोधकानि। तथा सति आवृत्त्यैव तदर्थलाभे विशिष्टनामभिर्व्यवहारो निर्युक्तिकः स्यात्।

वस्तुतस्तु संवत्सरशब्द एव मुख्यस्तदवयवर्त्वादिकालविशेषात् सर्वसाधारणः। परे तु संवत्सरे विशेषवशतो व्यवह्रियन्ते परिवत्सरादिशब्दाः। यथाहरादिविषये दृष्टिभेदेन भिन्नो व्यवहारः। दैवं दिनं दैवी रात्रिः। आसुरं दिनं आसुरी रात्रिः। तदुक्तं पुरस्ताच्छतपथव्यवहारेण 'वसन्तो ग्रीष्मो वर्षास्ते दैवा ऋतवो देवेषु तर्हि भवति देवांस्तर्ह्यभिगोपायती'त्यादिना। देवेषु तावत्कालवृत्त्या तत्र दिनव्यवहारः, परवर्ति-ऋतुत्रये असुरेषु वृत्त्या तेषु दिनव्यवहारः। एवं च परवर्ति-ऋतुत्रये देवानां रात्रिव्यवहारोऽसुराणां यथा दिनव्यवहारः, एवं दैवदिनेऽप्यसुराणां रात्रिव्यवहारः। स च द्यावापृथिव्योरभिप्रायेण। तत्र द्योशब्देन उत्तरदिग्वर्तिभुवः पार्श्वे सर्वोच्चं स्थान सुमेर्वाख्यमेवं पृथिवीशब्देन दक्षिणदिग्वर्तिभूपार्श्वे सर्वोच्चं स्थानं कुमेर्वाख्यं गृह्यत इति पुरस्तादुक्तमेव। तदनुसारेण उक्तर्तुमासादिरूपावयवयुतसंवत्सरलक्षणाक्रान्त्या संवत्सरेऽपि द्वैविध्यम्। तत्रेदादिशब्दविषये सन्निकृष्टविप्रकृष्टार्थबोधनाभिप्रायकता। यथा 'इत्' इत्यनेन सन्निकृष्टं 'तदि'त्यनेन विप्रकृष्टं बोध्यते, यथा अर्वावत्परावदादिशब्दैस्तत्र तत्र वेदे बोधः। यत्रोभयं सहैव विवक्षितं तादृशेषु

'तदित्समानमाशाथे' 'तवेत्तत् सत्यम्' 'त्वामच्छा चरामसि तदिदर्थं दिवे दिवे' इत्यादिषु यथा। तथा चेच्छब्देन सविधवर्ती संवत्सर इद्वत्सरशब्देन बोध्यते। स च भूस्थः। तत्रैव दृष्टिभेदेन इदावत्सरशब्देन संवत्सरस्य बोधः। एवं परिवत्सर-शब्देन द्योस्थः संवत्सरो बोध्यते, अनुवत्सरशब्देन तत्रैव दृष्टिभेदेन स एव। अतएव तत्र पञ्चके युगशब्देन बोधः। नात्र संवत्सरपञ्चकस्य क्रमिकस्य ग्रहणं विवक्षितमिति वाच्यम्। युगशब्दस्य स्वार्थत्यागापत्तेः। इदादिविशेषणे तात्पर्याभावप्रसङ्गाच्च। एवं चेद्वत्सरः कुमेर्वभिप्रायः इदावत्सरोऽपि तत्रैव, अतएव तन्नाम्नि आ इत्यस्याधिकस्य वचनमिदावत्सर इति। इत् सविधे स्थाने आ समन्ताद्वत्सर इति तदर्थात्। द्योरर्थात्सुमेर्वभिप्रायेण परिवत्सरशब्दः। तत्रैव अनु तदनुसारेण वत्सरोऽनुवत्सरः। संवत्सर इति तु सर्वसाधारणम्। अतएव दिनर्त्वयनमासाङ्गमिति साधारण्यं सर्वेषामिति बोधकं विशेषणम्। तत्र द्योलोके ऋतवः षट्, भूलोके ऋतवः पञ्च। तदभिप्रायेणा'स्यवामीय'सूक्ते "पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परेऽर्धे पुरीषिणम्। अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितमि"ति पञ्चषट्ऋत्वभिप्रायको व्यवहार इति पुरस्ताद्विस्तरेण निवेदितम्। एवं तत्रैकत्र वामावर्ताः पर्याया अपरत्र दक्षिणावर्ताः। विभिन्नेऽवसरे परस्परविरोधेन दिनरात्रियोगः। ऋतुचिह्नानां विभिन्नेऽवसरे प्रवृत्तिः। यथैकत्र दिने वर्षाकालोऽपरत्र रात्रिव्यापी वर्षाकालः। एकत्र केवलं प्रकाशनं नान्यत आदानमपरत्र प्रकाशनमन्यतस्तदादानं चेत्यादयो विभिन्नाः प्रकारा इति वत्सराणां भेदेन व्यवहार इति तदेतत्सर्वं साकल्येन संक्षेपेणोच्यते 'ये संवत्सराः परिवत्सराश्च ते अहर्गणरूपा' इति सौरीं परिस्थितिं गृहीत्वा तदनुसारेणानेकदिनसाध्या अहीनसत्रादिरूपा अहर्गणाः सोमयागविशेषाः। आनुष्ठानिकेषु संवत्सरेषु कालवाचकशब्दानां योगेन तत्क्रमानुरोधेन च प्रात्यहिकसोमयागप्रवृत्तिरिति गवामयनादिषु व्यक्तं, परिदर्शयिष्यते च परस्तात्।

'सर्ववेदसं वा एतत्सत्रम्'। एवं चादित्यस्य तत्सम्बन्धिनां च किरणानां या एताः क्रियास्ता यज्ञरूपास्तदनुसारेण लोके क्रियमाणानां वैदिकीनां क्रियाणां यज्ञरूपत्वम्, तत्र चैकयजमानकत्वानेकयजमानकत्वभेदेनाहीनसत्रादिभेदभिन्नत्वम्। तदिदं सत्रमनेकयजमानकं सर्वस्वप्रदानपर्यन्तम्। यत एतस्य यज्ञस्याहराद्यवसाने-ऽवसानरूपत्वात्तत्र यजमानस्यादित्यादेरस्तावसरे मरणकल्पनया स्वरूपदानपर्यन्त-त्वमिति गृहीत्वोच्यते—एतत्सत्रं सर्ववेदसं सर्वस्वदानस्वरूपम्।

यज्ञे च सर्वान्ते क्रियमाणेष्टेरवभृथशब्देन व्यवहारोऽत्र च यजमानस्वरूप-

स्यापि होमेऽवभृथः को वा स्यादित्यभिप्रायेणोच्यते—'यन्मरणं तदवभृथ' इति। अत्रादित्यादेर्यजमानस्यास्तावसरेऽदर्शनं मरणं स एवावभृथ इत्युच्यते, लोके सर्वस्वारादियज्ञे यजमानस्य यन्मरणं स एवावभृथ इति।

'एतद्वै जरामर्यमग्निहोत्रं सत्रम्'। एवंरूपयज्ञरूपं सत्रं जरामरणपर्यन्तमनुष्ठेयम्। अग्निहोत्रम्। अग्नये हूयतेऽग्नौ हूयत इति व्युत्पत्त्याग्निहोत्ररूपमुभयविधमादित्यक्रियारूपं तदनुसारिमानुपकवैदिकक्रियारूपम्।

'य एवं विद्वानुदगयने प्रमीयते देवानामेव तन्महिमानं गत्वादित्यस्य सायुज्यं गच्छति'। उक्तविधदैवासुरोभययज्ञाभिप्रायेणोच्यते—यो हि आदित्यादिरूपो यजमान उदगयने सुमेरावस्तं गच्छति, अस्तस्य मरणत्वेन कल्पनया तत्र प्रमीयते स देवानां महिमानं प्राप्नोति। उत्तरस्यां सुमेरौ देवानां निवासात्तत्रास्तरूपमरणप्राप्तस्य देवमहिमप्राप्तिरादित्यरूपत्वमेव भवतीति।

"अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोति"। उक्तरीत्या दक्षिणस्या कुमेरावस्तगतस्यादित्यस्य मरणे पितृमहिमप्राप्त्या चन्द्रमःसायुज्यसलोकताप्राप्तिरित्युच्यते। तेन दक्षिणस्याम-स्तमितस्य चन्द्रमोलोकत्वप्राप्तिरिति वर्णनेन दक्षिणे चन्द्रमःसम्बन्धित्वाद्दक्षिणदिक्क आदित्यश्चन्द्रमा इति। एवं सुमेरुरूपोत्तरदिक्कः स सूर्यरूप इति भवति। तदेव गृहीत्वा परस्तादुच्यते—"एवं वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति"। उक्तरूपौ सूर्याचन्द्रमसोर्महिमानौ भवतो दक्षिणोत्तरदिक्सम्बन्धिनौ। यश्चैवं विजानाति सोऽपि ब्राह्मण उक्तविधं सायुज्यं प्राप्नोति।

"तस्माद्ब्रह्मणो महिमानम्"। तस्मादुक्तविधसूर्याचन्द्रमसोर्महिमातो ब्रह्मणो महिमप्राप्तिः। ज्ञातुर्ब्राह्मणस्यापीति।

एतावतैतेनानुवाकेन दक्षिणदिक्सम्बद्ध आदित्यश्चन्द्रमःशब्दबोध्यः, उत्तरदिग्गतस्य सूर्यशब्दव्यवहारः, दक्षिणस्यां मरणेन चन्द्रमोलोकप्राप्तिः पितृमहिमप्राप्तिः। उत्तरदिक्सम्बन्धिमरणे देवानां महिमप्राप्तिः सूर्यसायुज्यप्राप्तिः। आत्मनः सूर्यस्य यागकर्तृत्वम्, श्रद्धायाः सान्ध्यस्य तेजसः पत्नीत्वव्यवहारः, मण्डलस्येध्मरूपत्वम्, वेद्या उरोरूपत्वम्, लोम्नां बर्हिस्त्वम्, वेदस्य शिखारूपत्वम्, यूपस्य हृदयरूपत्वम्, आज्यस्य कामत्वं, मन्योः पशुरूपत्वमग्नेस्तापरूपत्वम्। दमस्य शमयितृत्वं विनाशकरत्वं, दक्षिणस्या वाचो होतृत्वं, प्राणस्योद्गातृत्वं, चक्षुषोऽध्वर्युरूपत्वम्, मनसो ब्रह्मरूपत्वमग्नीधः श्रोत्ररूपत्वं, यावत् स्थितिः सा दीक्षा, यदश्नाति तद्धविः, पानस्य सोमरूपता, रमणस्योपसद्रूपत्वं, संचारस्योपवेशनस्योत्थानस्य च प्रवर्ग्यरूपत्वम्। आहवनीयस्य मुखरूपत्वम्, आहरणस्य

आहुतित्वं प्रकाशनस्य होमरूपत्वम्, सायं प्रातरशनं समित्। सायंप्रातर्मध्यन्दिने चाशनं सवनानि। अहोरात्रयोर्दर्शपूर्णमासरूपत्वमृतूनां पशुयागरूपत्वम्, संवत्सर-परिवत्सरादीनां संवत्सररूपत्वं चाहर्गणरूपत्वम्। सर्वदक्षिणाकमिदं सत्रम्। अग्निहोत्ररूपदक्षिणायने मरणे चन्द्रलोकप्राप्तिरुदगयने मरणे सूर्यलोकप्राप्ति-रित्यादयोऽर्था निरूपिता येऽर्थविज्ञाने वेदस्योपकरिष्यन्ति। तत्र केचन परस्पर-रूपणयुतत्वेन प्रकाशकाः केचनान्यतररूपेण तद्बोधका इति। इत्येवमर्थविज्ञाने बहूलमुपकारका इति।

सामवेदीये तलवकारब्राह्मणे साम्नश्चतुर्विधत्वमुच्यते यथा—"तदाहुः कति सामानि। चत्वारीति ब्रूयात्। चत्वार्यु ह वै सामानि स्वारं निधनवदैळमृक्-समम्। चतस्रो दिशश्चतुष्पादाः पशवः। चत्वारि च्छन्दांसि यज्ञवाहा गायत्री त्रिष्टुब्जगत्यनुष्टुप्। तान्यु ह वै त्रीण्येव, स्वारं निधनवदैळम्, यदृक्समं स्वार-मेव तद्। त्रिषवणो यज्ञस्त्रयः प्राणापानव्यानास्त्रय इमे लोकाः। ते उ ह द्वे एव स्वारं चैव निधनवच्च। या हीळा निधनमेव तद्। द्वाविमौ लोकावाविस्तमाविव द्वौ प्राणापानौ द्विपात् पुरुषः। तदु ह वा एकमेव। यद्धि निधनं येळा यदृक्समं स्वारमेव तदिति। तदेतदेकमेव साम स्वारमेव। य एवायं पवते तद्। याश्च ह वा अमुरुपरि पतन्ति याश्वाधः सर्पन्ति ता एतमेव स्वारं प्राणमुपजीवन्ति। स य एतदेवं वेद सर्वमायुरेति। स यो हैवं विज्ञाञ्जाति कल्पयत्यजाम्येवास्य तत्क्लृप्तं भवति। तत्पर्युपर्यजाम्येव चिकल्पिषेत्। अमिथुनं तदप्रजननं यज्जामि। यथा पुमांसौ वा सह शयातां स्त्रियौ वा। किं पुमांसौ सह शयानौ प्रजायेतां किं स्त्रियौ तौ चेन्मिथुनीकर्तारं न लभेयाताम्। अथो यदेवाजामि तन्मिथुनं तत्प्रजननम्, आत्मा वै स्वरः प्रजा निधनं पशव इळा जायर्क्समम्। समानौ वा आत्मा च जाया च। त एतमात्मनोभयतः प्रजाः परिगृहीता अपरावापाय नास्य वित्तं परोप्यते य एवं वेद" इति।

अस्मिन्ब्राह्मणे साम्नां चतुर्विधत्वमुक्त्वाऽपरेषां प्रकाराणां स्वाररूपे एव सामन्यन्तर्भावं प्रदर्श्य स्वाररूपस्यादित्यरूपतोच्यते। एवं सति सामादित्यरूप-मेव। तस्यायं भावः—साम्नो हि गानरूपता। गानं च स्वराणामारोहावरोहादि-रूपमिति स्वारं स्वरसम्बन्धिरूपमित्युच्यते। ते चारोहावरोहादिविशेषयोगिनः स्वरा ऋक्षु भवन्ति। अत ऋक्समता तस्य। वस्तुतस्तु ऋचोऽपि स्वररूपत्वमेव। ये तु व्यञ्जनवर्णास्तानि स्वराणामेव स्थानकरणादिवैशिष्ट्येन स्वराणामेव विकृतानि रूपाण्यर्थाभिव्यक्त्युपकारकाणि। अर्थवत्त्वं स्वराणामेव, ते च स्वरा ऋग्रूपा एव। ते चाकारादिस्वरा एव क्रुष्टादिगानस्वरतामापद्यन्ते। गानमेव च

सामेत्युक्तम्। एवंचर्क् समरूपं सामापि स्वररूपमेवेति ऋक्समस्यातिरिक्तत्वाभावः। ऋच्यन्ते इळाशब्दयोगितया साम्न ऐळरूपता। साम्नोऽन्तिमभागस्य निधनशब्देन व्यवहरणात्सामवेदे निधनवतो भेदस्यैवैळमिति विशेष इति तस्य निधनवतो भेदापेक्षया नातिरिक्तत्वम्। अतो द्विरूपमेव साम स्वारं निधनवच्चेति। नास्त्यैळं नाम पृथग्विभेदो निधनवत्येवैळस्यान्तर्भावात्। वस्तुतो निधनरूपताप्युक्तरीत्या स्वरस्यैवेति स्वाररूपमेकविधमेव साम स्वाररूपमेव, नास्ति निधनवन्नामातिरिक्तो भेदः। तदुक्तं तत्र "यद्धि निधनं येळा यदृक्समं स्वारमेव तदिति। तदेतदेकमेव साम स्वारमेव। य एवायं पवते तद्" इति। किञ्च स्वारशब्देन स्वराणां सम्बन्धितोच्यते। सा चारोहावरोहादीनामित्युक्तं प्राक्। ते चारोहावरोहादयः स्वररूपा एवेति स्वरस्यैव सामरूपता। स्वरश्चादित्यरूप एव। तच्छब्दव्युत्पत्तेः। स्वयं राजनात्स्वरः स आदित्य एवेति। स्वृधातोरुपतापार्थादुपतपतीति स्वररूपत्वं तदप्यादित्य एवेति। आदित्यस्य स्वररूपत्वं स्वररूपत्वात्सामरूपत्वमप्यादित्यस्यैव। तदुक्तं ब्राह्मणे 'तदेकरूपमेव साम स्वाररूपमेव योऽयं पवते तदि'ति। योऽयं पवत इत्यनेन सर्वत्रादित्यस्यैव वचनं ब्राह्मण इत्यादित्यरूपत्वं साम्नो विस्पष्टम्। अपि च तत्रैव ब्राह्मण उच्यते 'आत्मा वै स्वरः प्रजा निधनं पशव इळा जाया ऋक्सममि'ति। तदप्यादित्याभिप्रायेणैव संगच्छते। ऋक्षु "सूर्य आत्मा जगतस्तस्थुषश्च"ेति स्थावरजङ्गमात्मनो विश्वस्य सूर्य आत्मोच्यते इत्यर्थादात्मा सूर्य आदित्यः स्वर इति भवति। सूर्यस्य चोदयोऽस्तमयश्चोत्पत्तिरूपो विनाशरूप इति निधनमुच्यते, अस्तमये च किरणा एव दृश्यन्ते इति रश्मीनां निधनरूपता, रश्मीनां प्रजारूपत्वमपि तस्मिन्ब्राह्मणे उच्यते। किञ्च ऋग्वेदे उच्यते "बहुप्रजा निर्ऋतिमाविवेश" इति। स चादित्यो रश्मिपोषपुष्टो बहुप्रजा भवति। उदयावसरे च तस्य रश्मिराहित्यमिव। अतएव तस्य विष्ण्वभिन्नस्य शिपिविष्टशब्देन वचनम्। शिपिविष्टोऽप्रतिपन्नरश्मिरिति तद्व्याख्यान निरुक्ते। किञ्चास्तगमनोत्तरं रश्मीनां दर्शनेनास्तावसरे स रश्मिरहित इति भवति। एवं च बहुप्रजा रश्मियुत इति रश्मीनां प्रजात्वम्।

एवं सत्यस्तरूपनिधनावसरे केवलानामेव रश्मीनां दृश्यत्वेन प्रजा निधनमित्युक्तिः। "पशव इळा" इत्युक्तिरपि आदित्यपरत्वे एव संभवति। "इळा अन्नम्" इळायाः पशुत्वोक्त्या पशूनामप्यन्नरूपता। उषसश्च तद्रूपत्वम्। अत एव तस्या वाजिनीति नाम। उपःकाले तदा तमसो विनाशेन सर्वविश्वप्रकाशनेन भोग्यविश्वरूपान्नयोगस्तस्याः। अन्नशब्देन भोग्यतोच्यते, अतएव 'विशो वै क्षत्रियस्यान्न'मित्याद्युक्तिः संगच्छते। किञ्चेळाया अग्निपत्नीत्वमग्नि-

श्चादित्याभिन्न इलीळापि तत्पत्नी उषोरूपैव। एवं च पशूनामिळात्वमन्नत्वं तद्युक्तत्वमुषसः सा चोषा आदित्याधीनेति आदित्यस्यैव तदभिन्नस्वाररूपस्यैळारूपनिधनयोगितेति ऋक्समस्य जायात्वोक्तिरपि तथैव। ऐतरेयब्राह्मणगतस्य ऋक्सामयोर्वाकोवाक्यमपि तथासति उपपद्यते। एवं चर्चि साम्नोऽध्यासादृचो जायात्वादृक्समस्य जायात्वम्। एतदेवाभिप्रेत्योक्तब्राह्मणे 'एकमेव साम स्वारमेवे'त्युक्तम्। स्वारस्यादित्यरूपतोक्तेति आदित्यस्य सामरूपतेति दिक्।

याज्ञिकानि कर्माणि श्रौतानि वेद्यपेक्षाणि, तत्र वेद्या आकारप्रकारविषये वेदे मन्त्रब्राह्मणादिषु कश्चन प्रकार उपनिबध्यते। तस्यैव प्रकारस्य समासव्यासाभ्यां सूत्रादिषु विस्तारो दृश्यते,परन्तु तत्र मौलिकानां नियमानां हेतुस्वरूपाविज्ञानं तदुपपत्त्यभावश्च यथा कथंचन समाधानेन दृढीक्रियते।

तत्र कर्मसु याज्ञिकैर्मीमांसकैश्चोच्यते वेदिद्वयं भवति। एका प्राकृती वेदिरपरोत्तरा वेदिरिति। प्राकृती वेदिरिष्टयादिषूपयुज्यते उत्तरा वेदिश्च सोमयागादिषु। तथैव ग्रन्थेषूच्यते याज्ञकर्मसूपयुज्यते च।

ब्राह्मणे त्वेतदपेक्षयाऽपरोऽपि प्रकार उच्यते। यथा शतपथ उच्यते "द्वे वेदी भवतः। द्वौ वाव लोकावित्याहुर्देवलोकश्चैव पितृलोकश्च। उत्तरान्या भवति दक्षिणान्योत्तरो वै देवलोको दक्षिणः पितृलोकः। उत्तरयैव देवलोकमवरुन्धे। दक्षिणया पितृलोकम्'' इति। अत्र पूर्वोक्तवेदिद्वयेन न निस्तारः। यतस्तत्र वेद्या विभाजने इष्टयादिकतिपयानां सोमयागात्पूर्वमनुष्ठेयानां कर्मणां कृते उपयोगिनी सा प्राकृती वेदिः। सोमयागाद्यनुष्ठानोपयोगित्वेन सा परा वेदिः। तस्याः प्राकृत्यपेक्षया परत्वाभिप्रायेण तत्रोत्तरेति वेदिविशेषणम्। अनुष्ठानस्थले पश्चाद्भागेऽर्यादनुष्ठानोपयोगिदेशस्य पूर्वापरनाह्या प्राकृती वेदिस्तस्याः पूर्वस्या पूर्वापरनाहैव सोत्तरा वेदिर्भवति। नह्यत्र दक्षिणोत्तरसम्बन्धेन वेद्या द्विरूपत्वम्। ब्राह्मणे तु दक्षिणोत्तरदिक्सम्बन्धेन वेद्या द्विरूपत्वमुच्यते। किञ्च पूर्वोक्तप्राकृत्यादिवेदिद्वये दैविकान्यपि कर्माण्यनुष्ठीयन्ते पैतृकाण्यपि कानि चनानुष्ठीयन्ते। तावतोभयोपकारकत्वमुभयोर्वेद्योरिति ज्ञायते। ब्राह्मणोक्तवेद्योर्हि मध्ये उत्तराया देवलोकप्राप्त्यादिफलकत्वं देवतोपकारद्वारा विज्ञायते, दक्षिणायाः पितृलोकप्राप्त्यादिफलकत्वं पितृभ्युपकाराद्विज्ञायते, तत्पूर्वोक्तवेदिद्वयाभिप्रायेण विरुद्धम्। किञ्च यज्ञेषु प्राकृत्यादिवेदिद्वयस्यैवोपयोगः प्रोच्यते नोक्तविधदक्षिणोत्तरदिक्सम्बन्धभिन्नयोर्ब्राह्मणोक्तयोर्वेद्योरिति कथमिदमुपपद्येत।

अथ पूर्वयोरेव वेद्योर्दक्षिणोत्तरदिक्सम्बन्धमात्रेण ब्राह्मणोक्तोभयविधत्वेन तस्योपपत्तिस्तर्हि उभयविधयोरपि प्राकृत्युत्तरवेद्योरुभयविधत्वं प्रसज्यत इति

ब्राह्मणे दिक्सम्बन्धेनोभयविधत्वं वेद्या अनुपपन्नं भवेत्। किञ्च वेद्याः स्वरूप-विधानावसरे उच्यमानप्रकारस्य तत्रत्यानां सांकेतिकपदानामर्थाः सङ्ख्यादिकं च निरालम्बनमिव भासते। तथाहि शतपथब्राह्मणे उत्तरवेद्या विधाना-वसरे उच्यते—

"तद्य एष पूर्वार्ध्यो वर्षिष्ठः स्थूणाराजो भवति। तस्मात् प्राङ् प्रक्रामति त्रीन् विक्रमांस्तच्छङ्कुं निहन्ति सोऽन्तः पातः ॥१॥ तस्मान्मध्यमाच्छङ्कोः। दक्षिणा पञ्चदश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति सा दक्षिणा श्रोणिः ॥२॥ तस्मान्मध्यमाच्छङ्कोः। उदङ् पञ्चदश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति सोत्तरा श्रोणिः ॥३॥ तस्मान्मध्यमाच्छङ्कोः। प्राङ् षट्त्रिंशतं विक्रमान् प्रक्रामति तच्छङ्कुं निहन्ति स पूर्वार्धः ॥४॥ तस्मान्मध्यमाच्छङ्कोः। दक्षिणा द्वादश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स दक्षिणोंऽसः ॥५॥ तस्मान्मध्यमाच्छङ्कोः। उदङ् द्वादश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स उत्तरोंऽसः ॥६॥ एषा मात्रा वेदेः" इति। भाष्यकारेणैतस्य व्याख्या क्रियते यथा—सौमिकवेदिकरणं निरूप्यते। तदुक्तं कात्यायनेन "औपवसथ्यात्पूर्वेऽहनि पौर्वाह्णिक्या प्रचर्य वेदिं मिमीत" इत्यादि। तदेतदाह "तद्य एष पूर्वार्ध्यो वर्षिष्ठः स्थूणाराजो भवति तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमांस्तच्छङ्कुं निहन्ती"ति। य एष स्थूणाराजः पूर्वार्ध्यः पूर्वार्धमर्हतीति पूर्वार्ध्यः। प्राचीनवंशस्य पूर्वभागे आहवनीयपुरोदेशे वर्तमानः पृथुः स्तम्भोऽस्ति सोऽन्तःपातः। ऐष्टिकवेदेर्महावेदेश्चान्तरालसंचरः। तस्मात्स्तम्भात्प्राङ् प्रक्र-मान्प्रक्रामति त्रीन्। तत्तत्र प्रतीयमानेऽवकाशे शङ्कुं निहन्यात्स्थापयेत्। ॥१॥ दक्षिणश्रोणिप्रमाणमाह—'तस्माच्छङ्कोर्दक्षिणे'ति। मध्यमशङ्कोर्दक्षिणतः पञ्च-दशप्रक्रमावसाने शङ्कुं स्थापयेत् सा दक्षिणा श्रोणिमर्यादा भवति। ॥२॥ एवमुत्तरश्रोणिवाक्यमपि 'तस्माच्छङ्कोरुदङि'त्यादि ॥३॥ आयामस्य पश्चा-द्भागावधि प्रदर्श्य प्राचीनावधिमाह तस्मान्मध्यमाच्छङ्कोः प्राङ् षट्त्रिंशतं विक्रमान् प्रक्रामतीति ॥४॥ अथ दक्षिणोत्तरावंसौ दर्शयति—'तस्मान्मध्यमा-च्छङ्को'रिति। तस्मात्पुरोदेशस्थान्मध्यमाच्छङ्कोः श्रोणितः सकाशादंसयोरी-षन्न्यूनत्वादुभयतो द्वादश प्रक्रमाभिधानम् ॥५, ६॥ इत्थं सर्वतो मितायां वेदिमात्रायां न्यूनाधिकत्वशङ्कामाशङ्क्य स्वयमेव व्यवच्छिनत्ति 'एषा मात्रा वेदेरिति' इति।

अत्र पूर्वार्ध्य-वर्षिष्ठ-स्थूणाराजशब्दानां न सम्यक् तात्पर्यविज्ञानम्। यद्यपि भाष्यकृता पूर्वार्ध्यशब्दस्य पूर्वार्धमर्हतीति व्युत्पत्तिप्रदर्शनं कृतं तावता पूर्वार्धपदार्थो न विवृतः। अथ मूले मध्यमशङ्कोः पूर्वस्यामायामावधिः शङ्कुः पूर्वार्धशब्देनोक्त इति

स पूर्वार्ध इति कथनं विनापि ज्ञायते। तदर्थस्यास्य स्थूणाराजस्य पूर्वार्ध्यत्वमिति। तदापि स पूर्वस्यामायामावधिभूतः शङ्कुः कुतः पूर्वार्धशब्देनोच्यत इति निमित्ताविज्ञानम्। एवं च पूर्वार्ध्यशब्दस्यापि सम्यगर्थविवरणाभावः। वर्षिष्ठत्वं किं कृतं? यदि स्थौल्यनिबन्धनं तत्तु स्थूणाराज इति वर्णनेनैव प्राप्तम्। स्थूणाराजः कः कुतो वा। किञ्च तस्मात्स्थूणाराजात् त्रयाणा पदानां प्रक्रमाभिधानं कुतः? कुतः पुनः प्रक्रमत्रयान्तनिहितशङ्कोर्मध्यमत्वं, तस्योभयतःपार्श्वयोः पञ्चदशानामेव प्रक्रमाणामतिक्रमो न न्यूनाधिकानाम्। एवं तस्मान्मध्यमाच्छङ्कोः किमिति षट्त्रिंशत्प्रक्रमप्रक्रमणं, किमिति नात्राधिक्यं न्यूनत्वं वा सङ्ख्याया भवति। तत्रापि पुनः प्रतिपार्श्वं मध्यमशङ्कोर्द्वादशानां प्रक्रमाणामतिक्रमः। एवंव न न्यूना नाधिका वा मात्रा वेदेरिति अनेकविधसंशयप्राप्तौ ब्राह्मणवचनात्तथेति वचनं न संशयनिरासकम्। किञ्चात्र वेदेः किमिति स्त्रीत्वेनोल्लेखो नान्यलिङ्गेन, यतस्तत्र लिङ्गाभिव्यञ्जकाभावेन लिङ्गविशेषोल्लेखस्य निमित्तविशेषनिबन्धनत्वस्य संभवः। अथ वैयाकरणरीत्या शब्देषु गुणानां सत्त्वादीनामुपचयापचयसाम्यनिबन्धनो लिङ्गव्यवहारस्तत्रापि तेषामुपचयादीनां निर्णयस्य विज्ञानं दूरापेतम्। यदि प्रयोगात्तन्निर्णयस्तर्ह्यन्योन्याश्रय इति। एवं चोक्तवेदिमानप्रदर्शनोत्तरं तद्ब्राह्मणस्थस्य पश्चाद्भागे आधिक्ययुतत्वादिविषयार्थवादोऽपि व्याख्यातः। सति स्त्रीत्वे ततस्तद्वशतो लौकिकयोषासाम्यात्तस्याः पश्चाद्वरीयस्त्वादिना प्रशस्यत्वमित्येषां संशयानां निराकरणं दुःसंपादमिति।

तत्र "णुरपि विशेषोऽध्यवसायकर" इति न्यायेन समर्पकप्रकारान्तराभावेऽन्यैस्तस्याप्रदर्शने चोच्यमानः प्रकारोऽत्रादरणीय एव। तथाहि ऋग्वेदानुक्रमणीकारप्रदर्शितस्यातिप्राचीनस्य वैदिकमतस्यानुसारेणैषां प्रश्नानां निराससम्भवः। तथा चादित्यस्यैव मन्त्रभाग इव ब्राह्मणभागेऽपि वर्णनम्। आदित्यक्रियानुकारयुता च सर्वा यज्ञकृतिरिति प्रकृते वेदिविषयेऽपि तथैव वर्णना। यज्ञश्च सर्वो दानात्मा दानं चादित्यस्यैवेति उक्तं पुरस्तात्। दानं चात्र होमरूपमपि। होमस्य चाधारपर्यन्तत्वम्। होमस्य चाधार आहवनीयाग्निरूपः। आहवनीयाग्नित्वं चोदयतः सूर्यस्येति शतपथ उच्यते। तथाहि तत्रोच्यते "असौ वा आदित्य आहवनीय" इत्यनेन। वेद्यां चाहवनीयाग्नेः स्थानं पूर्वस्यां दिशि पर्यन्तभागे। एवं च वेदिराहवनीयाग्नेः पश्चाद्वर्तिनी भवति। तत्राहवनीयस्यादित्योदयस्थानवर्तित्वेन तत्पश्चाद्वर्तिनी वेदी रात्रिभागे प्राप्ता। रात्रेर्भागश्चाहवनीयाग्निसान्निध्याय रात्र्या अवसानस्थलीय इत्यर्थात्प्राप्तम्। एवं च यत्र रात्रिसद्भावस्तदवसाने वेदिप्राप्तिः। रात्रिसद्भावश्च सर्वत्र भूवो मध्यवर्तिनि भागे पार्श्वद्वयेऽत्युच्चादि-

स्थलेऽपि। तच्च पार्श्ववर्त्यत्युच्चं स्थलं सुमेरुकुमेरुरूपमिति प्रसिद्धमेव। सुमेरोरुत्तरदिग्वर्तिता कुमेरोश्च दक्षिणदिग्वर्तित्वमिति। तत्र राञ्यवसान-स्थलीया वेदिर्भवितुमर्हतीति तदभिप्रायेण वेदिद्वयं भवेत्। अतएवोक्तं 'द्वे वेदी भवत' इति, "दक्षिणान्या उत्तरान्येति" च। 'उत्तरया देवलोकमवरुन्धे दक्षिणया पितृलोक'मिति। संगतं च सौमिकी वेदिरिति वर्णनं च। उक्तं च त्रिसुपर्णानुवाके "यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपान"मिति। तत्र व्यक्तस्य तेजसो-हविष्ट्वमव्यक्तस्य तस्य सोमत्वमिति तत्र प्रदर्शितम्। अत एव तत्रोक्तं यत्पिबति तदस्य सोमपानमिति। तेजसश्चापृत्वेन वर्णनेति प्रदर्शितं पुरस्तात्।

किञ्चेन्द्रस्यादित्यत्वेन तद्विनाश्यो वृत्रोऽपि तमसो भिन्नो न भवति। एवं सति वृत्रविनाशेनापा प्रवर्तनं तेजः प्रवर्तनमेवेति। किञ्च त्रिकद्रुकेषु इन्द्रस्य सोम-पानमुच्यमानं संगच्छते, तच्च सोमपानमुदयावसरे स्वल्पोदयमात्रेणै'त्येकया प्रतिधे'त्यनेन मन्त्रेण प्रतिपादितं पुरस्तात्। अत एव मन्त्रे "इद ते पात्रं सनवित्त-मिन्द्र पिबा सोममेना शतक्रतो" इत्यस्मिन्नादित्यरूपपात्रस्य सोमपानपात्रत्वमुच्य-मानं संगच्छते, सोमपानसम्बन्धिनी वेदिश्चोत्तरा वेदिरिति याज्ञिकव्यवहार उपपद्यते। उत्तरस्या वेद्याः सोमवेदित्वे दक्षिणस्या अपि तथात्व निरुक्तं भवति। अत एवोत्तरवेद्यां सोमयागो देवोद्देश्यकस्तत्फल वृष्ट्यादिक देवैर्दीयत इति वर्णना, दक्षिणदिक्कवेद्या दीयमानस्य वृष्ट्यादे फलत्वमिति। उत्तरा वेदिरेव सोमवेदिरत एव उत्तरदिक्संबन्धादेव तस्या उत्तरशब्देन व्यवहार उक्तब्राह्मणस्यार्थः। अत एव तत्तद्वेदिसम्बन्धेन देवलोकावरोधः पितृलोकावरोधः फलमुक्तं संगच्छते। याज्ञिकैः प्राकृती वेदिरुत्तरा वेदिरिति प्रयोगे नान्यदेशसम्बन्धित्वमुत्तरशब्दस्यार्थः किन्तु उत्तरदिक्सम्बन्ध्येवेति बोध्यम्। तत्रोत्तरवेद्या. प्रतिपादन ब्राह्मणे सोम-प्रकरणात्। समानन्यायेन दक्षिणस्या वेद्या अपि तथात्वं वेदनीयम्। सा च रात्र्यवसाने प्रवर्तमाना वेदिः कुत आरभ्य प्रवर्तत इत्येतस्य निर्णयबोधकविशेषण-वैशिष्ट्येनोच्यते "तस्य एष पूर्वार्ध्यो वर्षिष्ठः स्थूणाराज" इति।

अथ भाव.—उत्तरदिनप्रारम्भो मुख्यो यथाऽऽदित्यमण्डलदर्शनत एवमुषः कालमारभ्यापि उत्तरदिनप्रारम्भो भवति, तस्योषःकालस्य आदित्योदयसन्नि-कृष्टपूर्ववर्तिसवितृकालत. पूर्ववर्तित्वम्। अत एव मन्त्रे उच्यते "वि नाक-मख्यत्सविता वरेण्योऽनुप्रयाणमुषसो विराजती"ति। तत्रोषसः प्रयाणमागमनमनु सविता व्यख्यदिति वर्णनेनोषःकालः पूर्वः सवितुश्च कालः परवर्तीति भवति। किञ्च सवितुः कालः प्रभातकालस्तस्योषःकालत्वमपीत्यभिप्रेत्य स्वनयदानस्तुतौ "वधूमन्तो दश रथासो अस्थु" रिति दशानां रथानां वधूमत्त्वोक्तिः। वधूश्चोषा

एव। किञ्च सवितुर्मित्राभिन्नत्व"मुत मित्रो भवसि देव धर्मभि"रित्यनेन प्रतिपादनान्मित्रस्य च मन्त्रेषु पञ्चभिर्नियमनस्य "मित्राय पञ्च येमिरे जना अभिष्टिशवसे" इत्यत्र प्रतिपादनात् नियन्तारः पञ्च कालावयवा घटीरूपा एवेति पूर्वं निर्णीतं, ते च कालावयवा रथशब्देनोच्यन्ते। तथा सति यथा पञ्चदण्डरूपाः कालावयवा मित्रस्य नियन्तारः। अर्थात्पञ्चकालावयवसंबन्धित्वं मित्रस्येति। तद्यथा मित्रस्यैवमुषसोऽपि पञ्चकालावयवसम्बन्धित्वम्। अत एवोषसस्त्रिंशद्योजनसम्बन्धित्वं सदृशीरद्येति मन्त्रे "हित्वी शिरो जिह्वया वावदच्चरत् त्रिंशत्पदान्यक्रमी"दित्यत्र त्रिंशत्पदसम्बन्ध उच्यमानः संगच्छते, त्रिंशदुषःस्तावकं च सूक्तं संगतं भवति। ते च त्रिंशत्सङ्ख्याका दैनन्दिनवृत्तसम्बन्धिनोंऽशरूपा भागा उच्यन्ते। तेषां च त्रिंशत्संख्यया दण्डपञ्चकं विवक्षितं भवति। प्रतिदण्डमंशषट्कयोगस्यानुपाततः प्राप्तिः। यथा सपूर्ण वृत्तं षष्टयधिकत्रिशतभागैरंशरूपै र्व्याप्तम्। एकेन वृत्तेनैकं दिनं षष्टिदण्डात्मकैर्भागैर्व्याप्तम्। एवं च सति दण्डात्मकभागानां षष्टया यदि षष्टयधिकत्रिशतभागा वृत्तीया अतीयन्ते तर्हि एकेन दण्डात्मकेन भागेन कतीत्यनुपातेन षट्संख्या लभ्यते, तथा च षड्भिरंशात्मकभागैर्वृत्तीयैः कालात्मको दण्डरूपो भाग संपद्यते। अतएव त्रिंशदुषस्तावके सूक्ते पञ्चोषसः पृथगुक्त्वा प्रत्युषसं पञ्चस्वसृयोग उच्यमानः संगच्छते। एवञ्चैका मुख्या स्वसॄणां पञ्चकं चेति पण्णामुषसां समूहो बोधितो भवति, ते च समूहाः पञ्चेति साकल्येन त्रिशत्संख्यासंपादनं तत्सूक्तगतमुपपद्यते। एवं चोषसा दण्डपञ्चकयोगिता परवर्तिनः सवितुर्मित्राभिन्नस्य दण्डपञ्चकयोगितेति उभयं मिलित्वा दण्डदशकयोगः। एतस्य सर्वस्योपःकालत्वं मत्वा दण्डानां रथशब्देन ग्रहणेन स्वनयदानस्तुतौ "वधूमन्तो दश रथासो अस्थु"रिति वर्णनसङ्गतिरिति पूर्व प्रतिपादितम्। एवं चोषःकालमारभ्य दिनान्तरप्रवृत्तिरिति सिध्यति, एवं च भेदेन व्यवहारे औषसाः पञ्चदण्डाः सावित्राः पञ्चदण्डा इति भवति। सावित्रकालस्य वेदिरूपता "षष्टिश्चाध्वर्यो" इति मन्त्रव्याख्यानावसरे विस्तरेणोक्ता। तदत्र दिनान्तरयोगतो वेदिप्रवृत्तिबोधनाय ब्राह्मण उच्यते "य एष" इति।

अयं भावः—भुवो हि विभिन्नदेशसम्बन्धेन दिनरात्रादीनां नानारूपत्वं भवतीति निरूपितं, तद्विशेषपराकाष्ठा भुवः पार्श्वद्वये सर्वोच्चयोः सुमेरुकुमेरुप्रदेशयोरित्यपि पूर्व निवेदितम्। तयोस्तत्सम्बन्धिप्रदेशानां व्यवहारावसरे तत्रोत्तरदक्षिणशब्दाभ्यां व्यवहारवत्पूर्वपश्चिमादिशब्दैरपि व्यवहारस्य "पूर्वेभिर्ऋषिभिः, प्रत्यङ् देवानां विश" इत्यादिषु पूर्व निरूपितम्। तदनुसारेण भुवो दक्षिणेऽर्धे

कुमेरुप्रभृतिदेशेष्वादित्यादीनां पूर्वाञ्चनेन पूर्वादिशब्दवत्पूर्वार्धशब्देन व्यवहारात्पूर्वार्धो भुवो दक्षिणपार्श्वीयार्धस्तमर्हति तत्रैव तस्य दर्शनात्तद्योग्यतेति पूर्वार्ध्यः। वर्षिष्ठः सर्वापेक्षया वर्षीयान् वृद्धतमः स्थूणाराजः। अयं भावः—आदित्ये तदीयरश्मिषु च स्थूणात्वेन स्थूणासादृश्याद्व्यवहारो वेदे "सहस्रस्थूणं बिभृथः" इत्यादौ रश्म्यभिप्रायेण तद्व्यवहारः। "एतां स्थूणां पितरो धारयन्ती"त्यादावादित्याभिप्रायस्तद्व्यवहारः। तत्र रश्म्यपेक्षया महत्त्वेन पूर्वपूर्वापेक्षया वृद्धत्वेनात्र स्थूणाराजशब्देनादित्यव्यवहारः, स्थूणानां राजेव राजेति स्थूणाराज आदित्य इति यावत्। तस्य तत्रार्धे दिनावसानीयतया पूर्वार्ध्यो वर्षिष्ठस्थूणाराज इति वचनम्। अपरार्धे दिनप्रारम्भीयतादशायां तत्रार्धे दिनावसानीयता। दिनप्रारम्भश्चोषःकालतोऽपीति भव उत्तरपार्श्वे सुमेरुरूपे देवानां निवासस्थाने उषःकालप्रारम्भावसरत्वाद्दक्षिणार्धरूपे कुमेरौ दिनावसानावसरस्तदानीन्तनो य आदित्यस्तस्य स्थानतः पूर्वस्यां दिशि तद्गन्तव्यमार्गे त्रीणि पदानि त्रिपदन्यासस्थानमतिक्रम्य तत्स्थाने शंकुर्निखेयोऽर्थात्तत्स्थानकल्पना करणीया आदित्याभिप्रायेण। तदनुसाराय च भूमौ वेदिनिर्माणस्थाने पूर्वार्धान्त्यस्थाने रोपितो यो बृहन्स्तम्भस्ततस्त्रीणि पदानि अतिक्रम्य शंकुर्निखेयः, अयं मध्यमः शंकुः।

अत्र पदत्रयातिक्रमणस्यायं भावः—उषःकालः सुमेर्वादिस्थले त्रिशत्पर्यायरूपत्रिशद्दिनकः। विषुवस्थानसविधवर्तिषु यत्रादित्यस्य प्रतिदिनं दर्शनादर्शने भवतस्तत्रादित्येन गन्तव्यदैनंदिनवृत्तीयांशरूपा भागास्त्रयस्त्रिशदिति पूर्वमुक्तमेव। तत्रोषसां त्रिरूपत्वं प्रथमभागदशके तमोबाहुल्यात्कृष्णवर्णप्रायता, मध्यमभागदशके तमसो न्यूनत्वेन श्वेतवर्णताऽन्तिमभागदशकेऽरुणवर्णता। अत एवोषसां "अरुणप्सव" इति विशेषणं तद्वर्णने। अत एव च स्वनयदानस्तुतौ "चत्वारिंशद्दशरथस्य शोणा" इति दशरथस्य शोणाश्चत्वारिंशदिति वर्णनं, तत्र सावित्रास्त्रिंशद्भागा उषसश्च तृतीयभागीया दशेति मिलित्वा चत्वारिंशद्भागा दशरथस्य शोणाः शोणवर्णा आदित्योदयसान्निकट्यात्। तत्र घटीरूपदण्डरूपकालमानस्य रथशब्देन व्यवहारात्। सावित्रं घटीपञ्चकमुषसो घटीपञ्चकमिति तद्दशकाभिप्रायेण दशरथ इति वर्णनात्। एवं चोषसोऽन्तिमदशकस्यारुणवर्णस्यात्र ग्रहणं तद्दशके प्रथमभागप्राप्त आदित्य उक्तस्थूणाराजरूपस्ततो भागत्रयाभिप्रायेण पादत्रयातिक्रमः। तत उषसोऽवशिष्टा भागाः षट्, सावित्राश्च त्रिंशदिति षट्त्रिंशद्भागाभिप्रायेण वेद्या आयामाभिप्रायेण पूर्वोक्तशङ्कुतः षट्त्रिंशत्पदातिक्रमणे शङ्कुनिधानं परस्तादुच्यते। तस्य पूर्वार्धशब्देन वचनम्।

वस्तुत इदं स्थानं मुख्यदिनप्रारम्भरूपसूर्योदयस्थानमिति तस्य पूर्वार्धीय-दिनावसानस्थानमित्यतेस्य पूर्वार्धमर्यादारूपत्वेन वचनमेव पूर्वार्धं इति। एवं चोष-सोऽन्तिमभागीयद्वितीयादिभागत्रयातिक्रमणाभिप्रायेण विक्रमत्रयोत्तरं शङ्कुन्यास इति। उक्तरीत्या पदत्रयप्रक्रमान्तस्योत्तरदिनारम्भरूपत्वेन पूर्वदिनतोऽस्य बहिर्भाव उत्तरदिनस्यान्तःप्रवेश इत्यभिप्रायेणात्रोक्तं 'सोऽन्तःपात' इति। स शङ्कुस्तद्रूप आदित्योऽन्तःपात इत्यन्तर्गत इति अर्थादुत्तरदिनान्तर्गत इति एतस्मादवधिभूतान्मध्यमाच्छङ्कोः। उभयतः पार्श्वयोः श्रोणिभागसत्त्वेनास्य मध्यमत्वम्। तस्माच्छङ्कोर्दक्षिणा चोत्तरा च प्रतिपार्श्वं पञ्चदशपदान्तपर्यन्तं श्रोणिशब्दव्यवहार्यो भागः। स तु दक्षिणोत्तरसम्बन्धाद्दक्षिणा श्रोणिरुत्तरा श्रोणिरिति व्यवह्रियते।

अत्र पञ्चदशपदातिक्रमणस्यायं भावः—आदित्यमण्डलस्यावस्थितिदेशतस्तदीया रश्मयः प्रतिपार्श्वं पञ्चदशांशपर्यन्तं दृष्टा भवन्ति। अत एव तस्य षोडशकः पुरुष इति षोडशत्वेन व्यवहारः। तत्र सुमेरौ उदयस्थलत आदित्यो याम्योत्तरवृत्ते चतुर्विंशत्यंशान्तं यावदूर्ध्वमारोहति तावता मासत्रयमतिवाह्यते, ततो मासत्रयेणावारुह्यास्तमेति। ततोऽधोवर्तिनि उक्ते वृत्तभागे चतुर्विंशत्यंशपर्यन्तमवारोहति ततः पुनरारोहति उदयस्थलं यावत्तावता रात्रिसम्बन्धिमासषट्कमतिवाह्येत। एवं रात्रावातिबाह्यानां तेषां याम्योत्तरवृत्तभागानां मासषट्कसम्बन्धेन प्रतिमासमष्टावंशा उपयुक्ता भवन्ति। तत्र रात्रिप्रारम्भे प्रथमो मासः प्रकृष्टप्रकाशः सावित्रोऽर्थात्तदभिन्नवारुणः। तत्कृते प्रथममंशाष्टकं ततः परो मासः सान्ध्याया उषस इति ततः परवर्ति अंशाष्टकमुषस इति षोडशांशा उपयुक्ताः। ततः परस्तान्मासद्वयं तमोमयी रात्रिरिति तदर्थं द्विरावृत्तमंशाष्टकम्। तत्र प्रथमं रात्र्यर्धपर्यन्तं, द्वितीयं चांशाष्टकमुदयावसरीयोषःकालप्राप्तिपर्यन्तं, तत उषोऽर्थमंशाष्टकं सावित्रं चांशाष्टकमिति तत आदित्यस्योदयः। एवं सति उषःकालप्राप्तिदशायां तदीयाः किरणा उदयस्थानसम्बद्धा भवन्ति इति। तदीयरश्मीनामुषःकालपर्यन्तं व्याप्तिः। अर्थादुदयस्योषःकालप्रारम्भस्थानतः षोडशांशविप्रकृष्टत्वम्। तत्रोषःकालमारुढेन ततोऽवशिष्टा उदयपर्यन्ताः पञ्चदशांशा व्याप्यन्ते। किरणानां च करशब्दव्यवहार्यता मध्यस्थितबिम्बाभिप्रायेण, तेषां कर्णादिशब्दबोध्यता क्षेत्रमानस्थले गाणितिकप्रसिद्धा। कर्णशब्दः श्रुतिशब्दसमानार्थः। श्रुतिशब्देन श्रुधातुनिष्पन्नप्रत्ययान्तरयुक्तस्यापि ग्रहणम्। अत एवेन्द्रस्य दीर्घश्रुत्तमं दीर्घश्रवसमिति विशेषणोपपत्तिरिति पूर्वं प्रतिपादितम्।

एवं श्रोणिशब्दोऽप्युक्तधातुतो निष्पन्नस्तादृशकिरणबोधकः। तद्व्याप्ति-

स्चोक्तयाम्योत्तरवृत्ते पञ्चदशांशपर्यन्ता यथा सुमेरावेवं कुमेरावपीति तद्बोधनार्थमत्र मध्यमशङ्कुतो दक्षिणोत्तरा पञ्चदशांशपर्यन्तता श्रोणेरिति गृहीत्वा दक्षिणा श्रोणिरुत्तरा श्रोणिरिति व्यवहारः। श्रोणिशब्दस्य स्त्र्यवयवविशेषेऽपि प्रवृत्तिरिति श्लेषेण तद्विवक्षणेन वेद्याः स्त्रीत्वेन व्यवहारः। मध्यमस्थानशङ्कुतो वेदेर्व्यासः षट्त्रिंशस्थानपर्यन्त इत्युक्तम्। स तु दैनंदिनवृत्तगत इति तस्य मध्यमशङ्कुतः प्राङ इति प्राचीनिर्देशात्। तस्य च पूर्वोक्तमध्यविन्दुतः षट्त्रिंशदंशस्थानप्रक्रमान्तो बिन्दुरुदयस्थानप्राप्त इति तत्र निखातबिन्दोर्वेद्या आयामस्यावधित्वम्। तत्र पूर्वावधिं वेद्याः प्राप्तस्यादित्यस्योदयस्थानप्राप्त्यै याम्योत्तरवृत्तगततत्स्थानतो द्वादशांशा एवावशिष्यन्ते, सावित्रा अष्टावंशा औषसाश्चत्वार इति द्वादशांशपर्यन्तमेव तत्र व्याप्तिरिति तां तादृशी व्याप्तिं बोधयितुं तस्मान्मध्यबिन्दोरुदयसन्निकटवेद्या आयामावधिबिन्दुरूपाद्दक्षिणोत्तरोक्तरूपद्वादशांशपर्यन्तानां प्रक्रमाणामन्ते शङ्कुन्यासेनांशव्यवहारः। सोऽपि भुजसमानार्थ इति क्षेत्रमानबोधकता, श्लेषेण शरीरावयवबोधकता, वेद्यां पूर्वोक्तरीत्या स्त्रीत्वकल्पनेन तदीयांसबोधकत्वम्। एवं च पर्यवसाने वेद्याः श्रोणिस्थानेऽशत्रयाधिक्यमंसस्थानेंऽशत्रयन्यूनतेति फलितप्रकारस्य स्त्रीरूपणेन प्रशंसनं क्रियते परवर्तिब्राह्मणभागेन। तत्रादौ वेद्याः श्रोणिमानप्रशंसोच्यते ब्राह्मणे—"अथ यत्त्रिंशत्प्रक्रमा पश्चाद्भवति त्रिंशदक्षरा वै विराट् विराजा वै देवा अस्मिँल्लोके प्रत्यतिष्ठंस्तथो एवैष एतद्विराजैवास्मिँल्लोके प्रतितिष्ठति। अथो अपि त्रयस्त्रिंशत्स्युः। त्रयस्त्रिंशदक्षरा वै विराट् विराजैवास्मिँल्लोके प्रतितिष्ठति"।

तत्र वेद्याः श्रोणिमानमुभयतस्त्रिंशत्प्रक्रमात्मकमुक्तम्। तत्र प्रक्रमस्य पदरूपत्वं, पदञ्चाक्षररूपमिति श्रोणिमाने त्रिंशदक्षराणि भवन्ति। एवं सति क्षेत्रमानेऽक्षरमित्येकं मानमंशात्मकभागरूपं संपन्नम्। अक्षरसङ्ख्याविशेषेण छन्दांसि मीयन्ते। प्रकृते च त्रिंशद्भिरक्षरैर्विराट्नामकं छन्दो भवति। विराजः पादविषये नानारूपत्वं, तत्र त्रिपादपि विराड् भवतीति प्रतिपादमेकादशाक्षरसङ्ख्यायोगेन त्रिंशदक्षराऽत्र विराडेव। त्रिंशदक्षरेरेव देवानां किरणानां भूमौ स्थितिरिति विराजा देवा भूमौ प्रतिष्ठां लब्धवन्त इति यजमानेनापि वेद्याः पाश्चात्ये भागे त्रिंशत्प्रक्रमत्वसम्पादनेन प्रतिष्ठाफलं लभ्यते इत्युक्तम्।

देवानां विराजा भूमौ प्रतिष्ठालाभ इति वर्णनस्य त्वयं भावः—देवाः किरणास्ते आदित्ये वर्तमानाः प्रकाशनरूपं कार्यं कुर्वन्ति तदधीनाः। यदा त्वादित्यस्यास्तेनादर्शनेनासत्त्वं तदानीं केवला एव भूमिं प्रकाशयन्तीति तेषां भूमौ प्रतिष्ठा। सा चादित्यस्य प्रकाश्यभूभागतः पञ्चदशांशपर्यन्तं विप्रकर्षे एव न तु ततोऽधिक-

विप्रकर्षे। तच्चोदयात्पूर्वमेवमस्तोत्तरं चेति उभयपार्श्वसंग्रहेण त्रिशर्दशपर्यन्तं भवतीति तावता विराट्छन्दस्कत्वसंपत्त्या विराजा प्रतिष्ठाप्राप्तिरित्युक्ता। तत्साजात्याद्यजमानेनापि प्रतिष्ठालाभः फलं, वेद्याः श्रोणिभागे त्रिशत्प्रक्रमपर्यन्तं विप्रकर्षसाधनादिति। तेन च्छन्दसां क्षेत्रमानरूपता। तत्रापि अक्षराणामंशरूप-क्षेत्रमानरूपत्वमादित्यगत्यनुकारश्च कर्मसु इति भवति। आदित्यस्याक्षररूपत्वं तस्य एकांशव्यासत्वमित्यपि सिध्यति। अत्रोषःस्थलं प्राप्तस्यौषसाष्टांशमाने तदारोहणेनैकांशन्यूनतयाऽवशिष्टाः सप्तांशा औषसाः सावित्राश्चाष्टावंशा इति पञ्चदशांसव्याप्तिः पञ्चदशप्रक्रमैर्गृहीत्वा प्रतिपार्श्वं दक्षिणोत्तरा श्रोणिमानं त्रिशत्प्रक्रमात्मकमुक्तम्। अथौषसाः सर्वेऽशा अष्टौ सावित्राश्चाष्टौ इति षोड-शांशग्रहणं, तच्चादित्यस्य दक्षिणोत्तरपार्श्वभागीयमिति मध्ये आदित्यस्य बिम्ब-स्यैकोऽशं इति साकल्येन ग्रहणे प्रतिपार्श्वं षोडशेति पार्श्वद्वयाभिप्रायेण द्वात्रिशदंशा मध्यवर्तिबिम्बस्यैकोंऽश इति ग्रहणे त्रयस्त्रिशदंशा भवन्ति। तस्य ग्रहणेन ब्राह्मणे उक्तम्—"अथो अपि त्रयस्त्रिंशत् स्यु"रिति, तदानीमपि विराट्त्वं न हीयत इति प्रतिपाद्यते। ब्राह्मणे "त्रयस्त्रिशदक्षरा वै विराडि"त्युक्तम्। तदर्थश्च भाष्ये उक्त "न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामि"ति ब्राह्मणोक्त्योक्त-विराजः पादत्रय एकाक्षराधिक्येऽपि न विराट्त्वहानिरिति।

एवं वेद्या व्यासमानस्य षट्त्रिशत्प्रक्रमरूपस्य बृहतीरूपत्वात्तेन छन्दसा देवताभिः स्वर्गलोकप्राप्तिः कृतेति यजमानेनापि तदनुसारेण स्वर्गो लोको लभ्यत इति आदित्यगत्यनुकारः कर्मस्वित्येवार्थः सिद्धो भवतीति। अयं च वेदि व्यासस्या-रम्भतः परमोऽवधिराहवनीयरूप इत्युच्यते ब्राह्मणे "सोऽस्य दिव्याहवनीयो भवतीति"। अत्रैतस्य दिव्याहवनीयबोधनादाहवनीयस्य च दिनप्रारम्भीयादित्य-मण्डलरूपत्वेन दिवि द्युलोके दिनप्रारम्भो बोध्यते। एवञ्चैषा द्युलोकस्थली-योत्तरदिक्का वेदिरिति भवति। समानन्यायेन दक्षिणदिक्कापि वेदिस्तादृशीति सिद्धं भवति। तेन पूर्वोक्तस्य 'द्वे वेदी भवत' इति ब्राह्मणस्योपपत्तिः। केवलं दक्षिणदिक्कवेदिस्थले तत्साधनवाक्येषु प्राङस्थाने प्रत्यङशब्दः, पूर्वार्ध इत्यस्य स्थाने परार्ध इति वोत्तरार्ध इति वा योजनीयमिति विशेषः। पूर्वस्यां स्थितस्य वेद्या आयामस्यावधेः प्रतिपार्श्वं द्वादशप्रक्रमयोगेन साकल्ये चतुर्विंशतिः सङ्ख्या संपद्यते, गायत्रीछन्दसोऽक्षरसङ्ख्यापि तावतीति। तत्र ब्राह्मणे "पूर्वार्धो वै यज्ञस्य गायत्री" इत्यनेन यज्ञस्य प्रारम्भीयः पूर्वार्धभागस्य गायत्रीरूपत्वमुक्तं, तच्च सोमयागे प्रातःसवनं प्रथमं तच्चोदयतः पूर्वं प्रवर्ततेऽत एव तत्र शस्त्रद्वयमध्ये होतुराज्यं शस्त्रं पूर्वं भवति। तत्र च शस्त्रे तूष्णींशंसादिभागत्रयम्। तूष्णींशंसस्य

स्तोत्रे बहिष्पवमानस्तोत्रस्य यज्ञरूपदिनर्बाहिभागता प्रातरादिकालिकीति पूर्व-मुक्तम्। प्रातःसवनस्य गायत्रीसम्बन्धित्वादत्र पूर्वार्धे गायत्री भवति यज्ञस्येति गृहीत्वोक्तं 'पूर्वार्ध एव गायत्री'ति। पश्चाद्भागे श्रोणिस्थलेंऽशापेक्षयाधिक्यस्य प्रशस्तयोषित्साजात्येन प्रशंसा ब्राह्मणे "पृथुश्रोणिरिति योषां प्रशंसन्ती"ति। तस्य प्राशस्त्यं प्रजननोपयोगीति प्रशंसा।

तृतीयो भागः

वेदश्रुत्यादिपदार्थविषयेऽपि कल्पनाभेदेन नानाविधा वादाः प्रवृत्ताः। सर्वप्रथमस्तु इदानीं व्यवह्रियमाणो गद्यपद्यात्मा ऋगादिशब्दैर्व्यवह्रियमाणो ग्रन्थविशेषो वेद इति। तद्विषये च स पूर्वमविभक्तावस्थो व्यसनेन त्रिरूपत्वं चतूरूपत्वं वा प्राप्तः। स च त्रयीशब्देन व्यवह्रियते चत्वारो वेदा इति वा। तेषां च यज्ञे उपयोग इति कृत्वा वेदानां यज्ञार्था प्रवृत्तिरिति प्रसिद्धिः। यज्ञे चान्तत ऋत्विक्चतुष्टयेन कर्माणि क्रियन्ते, तत्र प्रत्येकमृत्विजा क्रियमाणकर्मप्रतिपादनादिभेदेन हौत्रो वेद अध्वर्युवेद उद्गातृवेद इति त्रिधा व्यवहारः पूर्वोक्तानामेव वेदानाम्। चतुष्टयपक्षे ब्राह्मो वेद इति। ब्राह्मणग्रन्थेष्वप्येवं प्रसिद्धिः। अतएवैतरेये उच्यते "यदृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति। अथ केन ब्रह्मत्वं क्रियते" इति आशङ्क्योत्तरमुच्यते "त्रय्या विद्ययेति ब्रूयात्" इति। तस्यार्थविषये व्याख्यातॄणां व्याख्याभेदः। कैश्चिदुच्यते त्रयी विद्या नामोपयुक्तवेदत्रयमेव तेनैव ब्रह्मत्वं कर्तव्यमिति। एवं सति चतुष्टयपक्षीयश्चतुर्थो विभागोऽथर्ववेदो नाम स त्वगृहीत इति मत्वा तैरुच्यते आथर्वणवेदस्य त्रय्यामेवान्तर्भाव इति। अतएव ब्राह्मणे "त्रय्या विद्यये"ति उत्तरमुक्तम्। तस्यायं भावः—यज्ञे ब्रह्मणः कार्यं सर्वेषामृत्विजां तदीयकार्येषु न्यूनतातिरिक्तत्वादिदर्शनं तन्निबन्धनकर्मवैकल्यपरिहार इति, तच्चोक्तानामृत्विजां साकल्येन कार्यविज्ञानं विना दुष्करं तदर्थं वेदत्रयविज्ञानापेक्षा तस्य। एवं स तत्कार्यं विज्ञाय तत्र वैकल्यं विज्ञाय तत्परिहारं तत्रत्यप्रायश्चित्तादिना कुर्यादिति नापरवेदापेक्षा। एवं सत्ययं चतुर्थो वेद आथर्वणो नाम नातिरिक्तोऽपेक्ष्यत इति तस्योक्तत्रय एवान्तर्भावः। तद्वेदे हि द्विरूपत्वं दृश्यते ऋग्रूपत्वं गद्यरूपत्वं चेति। तत्रर्ग्रूपस्यर्ग्वेदेऽन्तर्भावो गद्यरूपस्य यजुर्वेदे इति नास्ति अतिरिक्तो वेद आथर्वणो नामेति। अतएव मीमांसकैर्ऋग्वेदादीनां स्वरूपाणि प्रतिपादितानि—'पादबद्धा अर्थोपेता मन्त्रा ऋचो गीतिषु सामाख्या प्रश्लिष्टं यजुः' इति। एवं सत्यृग्रूपत्वमृग्वेदे प्रश्लिष्टभागस्य यजुर्वेदेऽन्तर्भाव इति नातिरिक्तश्चतुर्थो वेद इति।

अपरैरुच्यते ब्राह्मणोक्तत्रयीविद्येत्यस्य न वेदत्रयग्रहणमर्थः किन्तु आथर्वणवेदस्यैव त्रयीविद्येति नाम। अतएव ब्राह्मणे न केवलं त्रय्येति प्रतिपादितं किन्तु "त्रय्या विद्ययेति" विद्यापदसाहित्यनेन वचनम्। न च प्रत्येकं वेदस्य वेदपदसमानार्थत्वेन विद्यापदेन ग्रहणमिति त्रयीविद्याशब्देनोक्त-

वेदत्रयस्यैव तत्र ग्रहणमिति वाच्यम्। सत्यपि प्रतिवेदं विद्याशब्दबोध्यत्वे तथाप्यत्र त्रयीविद्याशब्दो न यौगिकार्थो ब्राह्मणे किन्तु संज्ञार्थप्रतिपादको रूढार्थः। संज्ञाया अपि प्रतिपादनं वाक्येन समानार्थेन क्रियत इति निरुक्ते प्रोच्यते। तदनुसारेण रूढार्थाभिप्रायेणैव ब्राह्मणे त्रयी विद्येति ग्रहणम्। अतएव तत्र शङ्कायां व्यारब्धा त्रयी विद्या भवतीति वचनेन रूढार्थस्यैव द्योतनम्। अतएव तत्र विपदप्रयोगः। अन्यथा "आरब्धा त्रयी विद्येति" ब्रूयात्। विपद-प्रयोगेण त्वयमर्थो बोध्यते त्रयी विद्या आथर्वणो वेदो व्यारब्धा विशेषेण भिन्नत्वेन आरब्धा वर्तते संपन्ना वर्तते इति तदर्थः। अन्यथा हौत्रादिकर्मत्रये उपयोगाभि-प्रायेणोपयुक्ता विद्येति ब्रूयात्। तत्रर्गादिवेदत्रयग्रहणाभिप्राये आङ्पूर्वस्य रभ् धातोरुपयोगार्थे लक्षणा वक्तव्या स्यात्स एव दोषो भवेत्। धातूनामनेकार्थत्वा-श्रयणेऽपि सैव गतिः स्यात्। तस्माद् ब्राह्मणे शङ्कायामुक्तं व्यारब्धा त्रयी विद्येति रूढाभिप्रायम्। एवं चोत्तरेऽपि त्रयी विद्येति रूढाभिप्रायमिति आथर्वणवेदस्यैव तेन ग्रहणमिति तेनैव ब्रह्मत्वकरणमिति तदर्थः। न च त्रयी विद्येति त्रयीति वा प्रसिद्धिस्तर्हि निर्मूला अयुक्ता स्यादिति वाच्यम्। सा प्रसिद्धिः केवलयज्ञोप-योगाभिप्रायेण। आथर्वणे यज्ञोपयोगातिरिक्तानामर्थानां प्रतिपादनादिति।

एवं च व्यसनेन चतुर्धात्वमापादितोऽपि पुनर्व्यसनेनानेकशाखत्वमापन्नो वेद-वृक्षः। तदुक्तं निरुक्तकारेण "साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृत-धर्मभ्य उपदेशेन मन्त्रान् संप्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि चेति"। एवं च शाखाभेदव्यसनेऽशक्तिरेव निमित्त-मिति स्पष्टम्। अशक्तिवशतः सर्ववेदग्रहणासम्भवे नित्योपयोगं कादाचित्कोपयोगं च निमित्तीकृत्य वेदभागविभाजनम्। तत्र नित्योपयोगभागः साधारणः सर्वत्र। असाधारणस्तु कादाचित्कोपयोगभागः। अतएव शाखाभेदेऽपि बहुलांशसाम्य-बहुलांशवैषम्ययोश्चोपपत्तिः। व्यसनेनानेकविधत्वं पुराणेषु महाभाष्ये व्याकरण-भाष्यकारेण च सङ्गृहीतं नामतो यथा "साङ्गाः सरहस्या एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदो नवधा आथर्वणो वेद एकविंशतिधा बाह्वृच्यमि"ति।

ते चेमे शाखाभेदा इदानीं के चनैवोपलभ्यन्ते। स्वरूपतोऽनुमानतः केचन नामतः। अपरेषां नामान्यपि विकरालकालकवलितानि न विज्ञायन्ते। तत्र तेषा-मनुपलम्भेऽनेकानि निमित्तानि, तन्मध्ये सम्यङ्नियमापरिपालनमपि बलवत्तरं निमित्तमध्ययनेषु इति चरणव्यूहग्रन्थे प्रतिपाद्यते। तदुक्तं तत्र "सामवेदस्य किल सहस्रभेदा आसन्ननध्यायेष्वधीयानास्ते शक्रेणाभिहताः प्रणष्टा" इति। एवमशक्त्या-दीनामपि निमित्तत्वमस्त्येव। तत्र वेदशब्देन भागद्वयस्य ग्रहणं मन्त्रभागो ब्राह्मण-

भागश्चेति। अत एवापस्तम्बेनोच्यते "मन्त्रब्राह्मणयोर्वेदनामधेय"मिति। आरण्यकगाथानाराशंसीकल्पादीनां भागानां यथायथब्राह्मणभाग एवान्तर्भावः।

तस्यैतस्य वेदस्य नित्यत्वविषये विवदन्ते वादिनः। तत्र मीमांसका ब्रुवते—इमे वेदा नित्या एव उत्पादे कारणानपेक्षत्वात् असम्भवाच्च कारणापेक्षणस्य, शब्दात्मकानामेषां कारणापेक्षणे पुरुष एव कारणं संभवेत्। तस्य कारणत्वं वर्णोत्पादात्पदोत्पादादर्थसम्बन्धाद्वाक्यविरचनात्स्वातन्त्र्येण वा कर्तृत्वेन प्रसिद्धेरिति। तत्र वर्णानां नित्यत्वेन तदुत्पादने पुरुषस्यानपेक्षा। न च वर्णानामुत्पाद्यत्वमुत्पन्नो गकारो विनष्टो गकार इति प्रतीत्या तस्योत्पत्तिविनाशवत्त्वस्यानुभविकत्वादिति वाच्यम्। गकार उत्पन्न इत्यनुभवे ध्वनिर्वर्णश्चेति द्वयं प्रतीयते उत्पत्तिश्चैको धर्मः स चैकेनैव धर्मिणा सम्बध्येत। सकृदनुभूयमानायास्तस्या उभयसम्बन्धासम्भवात्। स चोत्पत्तिरूपो धर्म एकोऽवभासमानः कारणव्यापारविषयत्वेनानुभूयमाने संप्रतिपन्ने ध्वनावुपक्षीण इति वर्णेन साकं तदुत्पत्तिरूपधर्मसम्बन्धे प्रमाणाभाव इति वर्णोऽनुत्पन्न एवावशिष्यत इति न तत्र तदुत्पत्तिद्वारा पुरुषापेक्षा। न च ध्वनिवर्णयोर्भेदाभाव इति वाच्यम्, ध्वन्यवभास्यत्वेन वर्णस्य भेदात्। न हि अवभास्यावभासकयोरैक्यं भवति स्वयंप्रकाशपदार्थं वर्जयित्वा। वर्णश्च न स्वयं प्रकाश इति तस्य न ध्वनिना साकमभेदः। प्रसिद्धश्च ध्वनेरभिघातेन साकं कार्यकारणभावः। दण्डाद्यभिघातस्थले तस्य कार्यकारणभावग्रहात् वर्णस्य च तत्राभावात्। न च ध्वनिमात्रेण वर्णाभेदं ब्रूमः किन्तु ध्वनिविशेषेण साकम्। ध्वनिर्द्विविधः सवर्णोऽवर्णश्च तत्र अवर्णध्वनेर्वर्णभेदेऽपि सवर्णध्वनिर्वर्णाभिन्न इति वाच्यम्। ध्वनिसामान्ये क्लृप्तेनावघातस्य कारणत्वेनोपपत्तौ विशेषकार्यकारणभावकल्पने गौरवात्। न च विशिष्यैव कार्यकारणभावो नास्त्येव सामान्येन कार्यकारणभाव इति वाच्यम्। ध्वनिसामान्याभावस्यैकेनैवाभिघाताभावेनोपपत्तौ यावद्विशेषाभावसाधनार्थं यावद्विशेषकारणाभावकल्पने गौरवात्। कूटादिकल्पना त्वतिगौरवग्रस्ता।

एतावता ध्वनिसामान्यं प्रति क्लृप्तस्यावघातस्य कारणस्य ध्वनिरूपकार्यविषयत्वेन ज्ञायमानाया उत्पत्तेस्तत्सम्बन्धित्वेन तस्योत्पन्नत्वविज्ञानेऽपि वर्णस्योत्पन्नत्वाभावेन तद्द्वारा पुरुषस्यानपेक्षणात्। एवं च उत्पन्नो गकारो विनष्टो गकार इति प्रतीतिर्ध्वन्यभिप्राया न तु वर्णाभिप्रायेति वर्णस्य नित्यत्वमव्याहतम्। अतएव स एवायं गकार इति प्रत्यभिज्ञाप्युपपद्यते। सैवेयं गुर्ज्जरीतिवद्वर्णभेदेऽपि साजात्यनिबन्धना तत्प्रतीतिरिति चेन्न, प्रामाणिकभेदसत्त्वे तथा तस्या उपपादनेऽपि प्रकृते भेदे अनित्यत्वे वर्णानां प्रमाणाभावेन व्यक्त्यैक्यनिबन्धनायास्तस्या

वर्णनित्यत्वेनैवोपपादनीयत्वम् । एवं च वर्णानामुत्पस्यभिप्रायेण तद्द्वारेण पुरुषानपेक्षणम् ।

वर्णानुपूर्वीरूपपदतासंपत्त्यर्थं तद्द्वारा पुरुषापेक्षणमपि न भवति । एकवर्णस्थले वर्णस्य पदतासंपत्त्यर्थं यथा पुरुषानपेक्षणमेवमनेकवर्णस्थलेऽपि पदतासम्पत्त्यर्थं पुरुषानपेक्षणात् । वर्णा एवैकार्थबोधरूपोपाधिना पदत्वमाप्ता इति तत्रापि पुरुषानपेक्षणात् । वर्णस्यैवार्थबोधकत्वं पदत्वं चेद्घटपटेत्यादिष्वर्थभेदबोधो न स्यादिति वाच्यम्, पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्त्यवर्णानुभवस्यैव तादृशार्थभेदबोधे कारणत्वाद्घटपटस्थले च प्रत्येकं तादृशरूपस्य भिन्नत्वेन अर्थभेदबोधस्योपपन्नत्वम् । एवं च पदतासंपत्त्यर्थमपि न पुरुषापेक्षा । नापि पदेन सहार्थस्य सम्बन्धबोधार्थमपि पुरुषापेक्षा, स्वभावत एव पदानामर्थेन सम्बन्धात् । तदुक्तं जैमिनिना—"औत्पत्तिकस्त्वर्थेन सम्बन्धस्तत्प्रमाणं बादरायणस्यानपेक्षितत्वात्"। अतएव व्याकरणशास्त्रे वार्त्तिकेनोच्यते—शब्दस्यार्थसम्बन्धस्य च नित्यत्वे व्याकरणशास्त्रं मन्दप्रयोजनमिति प्राप्ते उच्यते धर्मनियमार्थत्वं शास्त्रस्येति । नित्ये शब्दार्थसम्बन्धे शास्त्रेण धर्मनियमः क्रियत इति । शास्त्रपूर्वके शब्दप्रयोगे धर्मो भवति नान्यथेति । एवं च अर्थबोधानुकूलशक्तिरूपेऽर्थसम्बन्धेऽपि पुरुषानपेक्षा, नापि वाक्यविरचनार्थमपि पुरुषापेक्षा । पदानामेव वाक्यार्थबोधकत्वात् । पदतोऽर्थोपस्थितौ अर्थसम्बन्धस्यापि वाक्यार्थरूपस्य तत एव बोधे तदर्थं वाक्यशक्तेरनपेक्षणात् । अतएव विस्मृतौ पदस्मरणद्वारा वाक्यार्थबोधस्यानुभिवकत्वमुपपद्यते । न हि पदार्थसम्बन्धापेक्षया वाक्यार्थोऽतिरिक्तो नाम । वाक्यशक्तिकल्पने च आनुपूर्वीविभेदेन तेषामेव पदानामनेकरूपत्वेन वाक्यानां तावत्सु शक्तिकल्पनस्य गौरवग्रस्तत्वात् । अविज्ञातचरवाक्यतः पदार्थविज्ञस्य वाक्यार्थबोधस्य दृष्टत्वेन वाक्ये शक्तिकल्पनस्यानुपयोगात् । एवं च वाक्यविरचनद्वाराऽपि पुरुषानपेक्षा ।

नापि स्वातन्त्र्येण कर्तृतया वैयासिकं भारतमित्यादिवत्पुरुषापेक्षा । वेदे कर्तुरनुपस्थितत्वात् । न च कर्तुरनुपस्थितिर्नाभावात्कर्तुः किन्तु कालविप्रकर्षेण उत्सन्नदेशस्थितकूपारामादिवत्संप्रदायविच्छेदात्, संप्रदायाविच्छेदादेव वेदे कर्तृस्मरणस्यावश्यापेक्षणे तदभावेन कर्तुरभावानुमानम् । काठकं कौथुमं तैत्तिरीयमित्यादयः शब्दा न कर्त्रर्थतद्धितान्ताः, किन्तु प्रोक्तार्थप्रत्ययान्ता इति । न तैरपि कर्तृविज्ञानमेवं पञ्चभिः प्रकारैर्वेदे पुरुषसम्बन्धस्य वक्तुमशक्यत्वेन प्रकारान्तरस्य चासत्त्वेन न पुरुषनिर्मिता वेदा इति वेदानां नित्यत्वमिति कारणाभावात् ।

अपरे ब्रुवते ध्वन्यभिन्ना एव वर्णास्तत्र ध्वनीनामुत्पादविनाशावेव वर्णात्मकशब्दस्योत्पत्तिविनाशाविति न वेदानां नित्यत्वम्। अनित्यत्वेन कारणापेक्षणे पुरुषातिरिक्तस्य तत्र कारणाभावात् पुरुष एव तत्र कारणम्। तावतापि न तत्राप्रामाण्यम्। अस्मदादीनां वेदकर्तृत्वस्यासम्भवेन सर्गादौ ईश्वरेणैव तत्तदृष्यादिरूपधारणेन तदुत्पादात्। न च लौकिकशब्दवत्पुरुषगतभ्रमप्रमादादिदोषसंक्रान्तिस्तत्र। ईश्वरस्य नित्यनिर्दोषत्वेन पुरुषदोषसङ्क्रान्तेस्तत्राभावेनेश्वरप्रामाण्याद्वेदानां प्रमाणत्वात्।

अपरैरुच्यते "यस्य निश्वसितं वेदा" इति वचनेनेश्वरेणापि वेदविरचने विशेषप्रयत्नाभावादीश्वरस्यापि वेदविषये न स्वातन्त्र्यम्। सुप्तप्रतिबुद्धन्यायेनेश्वरेण गतकल्पीयस्यैव वेदस्यास्मिन् कल्पे उपदेश इत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य कर्तृत्वस्यात्रासम्भवेन नित्यत्वं वेदानाम्। "धाता यथापूर्वमकल्पय"दित्यनेनेश्वरेण गतकल्पीयस्यैवाविकृतस्योपदेशनमिति न तस्य तत्र स्वातन्त्र्यम्। शब्दविषये प्रयोगमात्रेण कर्तृत्वप्रयोक्तृत्वयोरविज्ञानम्, समानयैव रीत्या कर्तापि प्रयोक्तापि प्रयुनक्ति शब्दानिति न प्रयोगमात्रेण तद्विज्ञानसम्भवः। तस्मात्प्रमाणान्तरेण अर्थविज्ञानपूर्वकशब्दप्रयोक्ता तत्र कर्तृत्वेनाध्यवसीयते। यस्तु शब्दविज्ञानपूर्वकमेव शब्दप्रयोक्ता स प्रयोक्तैव शब्दानां न कर्तेति। कालिदासादिग्रन्थस्य कालिदासवदेव अस्माभिः प्रयोगेऽपि नास्माकं तदीयग्रन्थे कर्तृत्वं यतोऽस्माकं तदीयशब्दविज्ञानपूर्वकमेव तदीयशब्दप्रयोगकरणमिति शब्दपूर्वकत्वेनास्माकं तत्र न पदानां निःसारणे योजने वा स्वातन्त्र्यमिति न वयं कर्तारस्तत्र। कालिदासस्तु अर्थं विज्ञाय तदनुकूलशब्दप्रयोगं कुरुत इति तस्य तत्र कर्तृत्वमिति स स्वेच्छानुसारेण तत्र शब्दं निःसारयेद्योजयेद्वा। एवमीश्वरेणपि गतकल्पीयस्यैव वेदस्योपदेशनेन न तस्य तत्र स्वातन्त्र्यमिति तस्य तत्र कर्तृत्वाभावेन पुरुषसम्बन्धरहिता एव वेदा अत एवैतेऽपौरुषेया इत्युच्यते। अपरेषु अस्मदीयेषु ग्रन्थेषु धर्मान्तरीयेषु ग्रन्थेषु कर्तृविस्मरणाभावेन पौरुषेयत्वमिति दिक्।

अपरे पुनर्ब्रुवते सर्वोऽयं वेदापौरुषेयत्वसाधनेऽस्थाने प्रयासः। वेदोऽपौरुषेय इत्यस्य भिन्नाभिप्रायकत्वात्। तथाहि वेदः श्रुतिरित्यभिन्नार्थम्। श्रुतिशब्दश्च नानार्थो भवति, श्रुतिशब्दः कर्णेन्द्रियबोधको भवति च ऋग्वेदादि वाङ्मयबोधकः तद्द्वारा च कीर्त्यादिबोधकः। भवति च भू-मितौ क्षेत्रविज्ञानायोपयुज्यमानव्यक्तमर्यादारेखाबोधकः। यथा समत्रिभुजादिक्षेत्रे तत्स्वरूपविज्ञानाय समप्रमाणं रेखात्रयं त्रिकोणं विलिख्यते, तत्र विद्यमानरेखात्रयस्यापि भूजकर्ण-

शब्दाभ्यां तदर्थशब्दैश्च बोधो गाणितिकप्रसिद्धः। तन्मर्यादारेखया सम्बद्धक्षेत्र-विज्ञानमेवं वेदे प्रयुज्यमानानामेषामेतदर्थकानां वा शब्दानामुक्तरीत्या भुजाद्यर्थकत्वं बहुषु स्थलेषु। यथेन्द्रं प्रति विशेषणमुच्यते "दीर्घश्रुत्तमम्" इति। अत्र श्रुत्शब्दः श्रुतिसमानार्थकत्वेन प्रयुज्यमानो न कर्णेन्द्रियबोधकः। तथा सति एतेन शब्देन नेन्द्रे स्तुतिर्भासिता स्यात् प्रत्युत क्षेप एव विज्ञातो भवेत्। श्रुतेर्दीर्घत्वं प्रलम्बत्वम्। तदेव दीर्घश्रुत्त्वं लम्बकर्णसमानार्थं स्यात्। स च शब्दः कर्णयोर्दीर्घत्वं गृहीत्वा रासभे उपयुज्यते, लोके अत्र दीर्घश्रुच्छब्देनापि तदेव गृहीत्वा ये दीर्घश्रुतस्तेषामयमिन्द्रो दीर्घश्रुत्तमोऽतिशयेन लम्बकर्ण इत्यर्थस्तमपा बोध्येतेति नेन्द्रे स्तुतिप्रतीतिर्भवेत्। नापि श्रुतिविषयतया कीर्तिपरः। ये दीर्घश्रुतः दीर्घकीर्तियुता अनेकविधयशोभाजस्तेषां मध्य इन्द्रः सुदीर्घकीर्तियुत इत्येवं वर्णनेन स्तुतिप्रतीतावपि बहुविधा लक्षणा कर्त्तव्या स्यात्। किञ्च तावतेन्द्रस्येतरदेवापेक्षया को विशेषःस्यात्। तेऽपि देवास्तादृशो दीर्घश्रुत्तमा इति। अथेन्द्रस्यैव तत्त्वं नान्येषां देवानामिति। तदपि न युक्तम्, देवतासु वैषम्यकल्पनायोगात्। तस्मादत्र श्रुतिसमानार्थः श्रुच्छब्द उक्तया रीत्या व्यक्तमर्यादारेखापरस्तत्समानरूपरश्मिपरः। आदित्यस्य सहस्रकररूपेण वर्णने उक्तविधकेन्द्रसम्बन्धिरेखारूपरश्मियोगेनैव सहस्रकरवर्णना, नहि तत्र केवलं यथा कथंचिद्रश्मियोगेन सहस्रकरत्वं तस्य। अतएव रश्मीनामरात्वेनोपमितिसम्बन्धेन सहस्रारचक्रशब्देनापि तस्य वचनं भवति। एवञ्चारसमकल्पान् केन्द्रस्थानविम्बयोगिनो रश्मीन् गृहीत्वैव तस्य सहस्रकर इत्यादिशब्दैर्वचनम्।

एवं च श्रुत् शब्देनापि श्रुतिसमानार्थेनोक्तविधा रश्मय एव विवक्ष्यन्ते। तथा चोक्तविधप्रलम्बरश्मिभाजो ये तेषां मध्येऽतिशयेन प्रलम्बरश्मियुत इन्द्र इति दीर्घश्रुत्तमशब्देन बोध्यते। तादृशाश्च तिर्यक्प्रसारिणः किरणाः संपूर्णमण्डलदृश्ये आदित्ये न भवन्ति सन्तोऽपि वा नोपलभ्यन्ते। अतएव संपूर्णमण्डलदृश्यादित्ययोगिनि दिने सम्मुखत्वेनैक एव किरण उपलभ्यते नापरे तिर्यक्प्रसारिणः किरणा इत्यभिप्रेत्य ऋभुसूक्ते त्रयाणामृभूणामृभुविभ्ववाजानां मध्ये ऋभोरेवैकस्य दिवाकार्यमुच्यते "आनिम्रुचः शकृदेको अपाभरदिति"। एकस्यैव ऋभुरूपस्य रश्मेरस्तावधिकार्यकर्तृत्वमुच्यतेऽपरयोस्तु अस्तोत्तरमेकस्योदयात्पूर्वमपरस्येति कार्यवर्णना तस्मिन्नेव मन्त्रे "वाजो देवानामभवत्सुकर्मा, वरुणस्य विम्वा" इति। तदेवापरस्मिन्मन्त्रे तत्रोच्यते "श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनया भृतमि"ति। दिनस्य प्रारंभात्पूर्वमस्तोत्तरं च तयोः कार्यकरणं बोध्यते। आदित्ये रश्मियोगस्त्रिधेति पूर्वं प्रतिपादितं बहुशः। तत्रैकस्सम्मुखीनोऽपरौ द्वौ

तिरश्चीनाविति। एवं सति सम्मुखीनरश्मियोगिदिवाभागे मण्डले संपूर्णदृश्ये तिरश्चीनरश्मिरूपश्रुत्युपलम्भाभावेन न श्रुतियोगिता भवति। यथा पूर्णे मण्डले दृश्ये नोक्तविधश्रुतियोगिता एवं सर्वात्मना किरणादर्शनरूपभास्वराभास्वरतेजो युक्तायामुषसि तत्कालेऽपि तादृशकिरणानुपलम्भेन तद्योगित्वाभावः। तदेवमपि प्रकारान्तरेणोच्यते पुरुषः श्रुतिविषयो न भवेत् श्रुतिर्वा पुरुषसम्बन्धिनी न भवेत्। एव मेवदोषसो विषयेऽपि उषाः श्रुतिविषयो न भवेत् श्रुतिर्वोषः सम्बन्धिनी न भवेत्, तदेव गृहीत्वोच्यत श्रुतिरपौरुषेयीति। पुरुषशब्देन च भासा परिपूर्ण आदित्य उच्यते। तादृशः स दिवाभागे इति पशुपुरोडाशार्थवादे पुरुषं वै देवाः पशुमालभन्तेत्यत्र प्रतिपाद्यत इत्युक्तम्। एवं च श्रुतिस्तिरश्चीनो रश्मिरिति वा तिरश्चीना रश्मय इति वा ते पौरुषेयाः पुरुषसम्बन्धिनो न भवन्तीत्यपौरुषेया श्रुतिरिति वा अपौरुषेयाः श्रुतय इति वोच्यन्ते।

स्त्रीणां श्रुत्यसम्बन्धवर्णनाऽपि उक्तोषोऽभिप्रायेण। उषसि स्त्रीत्वस्य आदित्यपत्नीत्वादेर्वेदे वर्णनेन तस्या उक्तरीत्या सम्मुखीना-सम्मुखीनकिरणयोगाभावेन सापि श्रुतिसम्बन्धिनी श्रुतिविषयो न भवतीति। भारते "स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा" इत्यनेनापि उषसः श्रुतिविषयत्वाभाव एव बोध्यते। एवं शूद्रस्यापि श्रुतिगोचरत्वाभावोऽपि। यथा पुरुषसूक्ते "पद्भ्यां शूद्रो अजायते"त्यत्र। भुवो दक्षिणोत्तरपार्श्वीययोः सुमेरुकुमेर्वोरुदितस्यादित्यस्य पदत्वेन वर्णना, ते द्वे पदे दक्षिणसव्यशब्दबोध्ये ऐतरेयब्राह्मण उच्येते। "दक्षिणं पादमवनेनिजे, सव्यं पादमवनेनिजे" इति। ते च द्वे पदे सुमेरुकुमेर्वोरुदितादित्यरूपिणी दिने भवतः। ते द्वे पदे गृहीत्वा पुरुषसूक्ते पद्भ्यां शूद्रोऽजायतेत्युक्तिः। शूद्रशब्देन च शु आशु द्रवतीति शीघ्रगमननेन निमित्तेनादित्यस्योदितस्य शूद्रशब्दाभिधेयत्वम्। रात्रौ तमसा सर्वपदार्थावरणेन मनोविनोदनस्य हित्वैकां निद्रामपरस्य कस्यापि पदार्थस्याभावेन कालस्य सुदीर्घत्वेनोपलम्भः। स च रात्रिभागे गच्छतः सूर्यस्य मन्दगतित्वेन विलम्बितकालतेति गृहीत्वा मन्दगतिरिति व्यवह्रियते। दिवाभागे च मनोविनोदका अनेके पदार्था दृश्या वर्तन्त इति तत्सम्बद्धव्यापारविनोदितचेतस्कानां कालस्य न विलम्बितत्वप्रतीतिरिति शीघ्रमवसितं कालमभिप्रेत्यादित्यस्य शीघ्रगतिमत्त्वमुच्यते। तदेतच्छीघ्रगतिमत्त्वरूपं शूद्रत्वं गृहीत्वा तस्य शूद्रत्वेन व्यवहारःपुरुषसूक्ते 'पद्भ्यां शूद्रो अजायत' इति। अत्र पादावेव शूद्ररूपावित्यर्थः। यथा 'ब्राह्मणोऽस्य मुख'मित्यत्र मुखमेव ब्राह्मण इत्यर्थ एवं पद्भ्यां शूद्र इत्यत्र पादावेव शूद्ररूपावित्यर्थः। एवं सति दिवाभागीयसंपूर्णमण्डलभास्वरादित्यस्योक्तरीत्या श्रुतिविषयत्वाभावं गृही-

त्वोच्यते शूद्रो न श्रुतिविषय इति। एवं द्विजबन्धवोऽपि अतिरश्चीनाः सर्वे रश्मयोऽपि न श्रुतिशब्दभाज इति श्रुतिविषया न भवन्तीत्येवार्थः। एवंरूपरश्मीनां श्रुतिशब्दव्यवहार्यत्वं गृहीत्वा प्राच्यामुदीयमानखण्डितमण्डलरूपेन्द्रोऽपि भुव उभयपार्श्वयोः प्रलम्बितिरश्चीनरश्मियुत इति दीर्घश्रुत्तमः। न हि तादृशावस्थाकादित्यस्यापेक्षयाग्न्यादिस्थानापन्नस्य तस्य तादृशप्रलम्बिकिरणयोगित्वम्। यद्यप्यग्नेः प्रलम्बकिरणयोगित्वं तावताऽपि न तस्येन्द्रवत्सुदीर्घप्रलम्बिकिरणयोगितेति इन्द्रविशेषणे तमप्प्रयोगः। अग्नेः प्रलम्बकिरणयोगित्वं चित्रश्रवस्तममिति विशेषणेन बोध्यते। चित्रं श्रवो येषां तेषां मध्येऽग्निश्चित्रश्रवस्तमः अतिशयेन चित्रं श्रवो यस्येति तादृशः। चित्रश्रवःशब्देनानेकविधवर्णोपेतं ग्रहनक्षत्रतारादिकं तद्युक्तं श्रवःश्रुतिर्यस्येत्यर्थः। चित्रशब्दस्योक्तेन निमित्तेन ग्रहादिरूपवसुविशेषणता ब्राह्मण उच्यते तदुक्तं "चित्रावसो स्वस्ति ते पारमशीमहीति" मन्त्रांशव्याख्याने उच्यते रात्रिर्वै चित्रावसुः। पुरा ब्राह्मणा अभैषुरित्यादिना रात्रिसकाशतो निर्विघ्नेन पारप्राप्तिकामना अनेन बोध्यते। रात्र्याश्चित्रावसुत्वं विचित्रवर्णग्रहनक्षत्रतारकादिरूपधनयोगित्वात्। वसुशब्दप्रयोगस्थले चित्रशब्दस्य केवलं विचित्रवर्णबोधकत्वं तद्रहितस्थले तु तद्वर्णयुक्तधनबोधकत्वम्। तदेव गृहीत्वा वह्निविशेषणे चित्रं विचित्रवर्णग्रहतारकादिधनयुक्तं श्रवः श्रुतिस्तिरश्चीनः कर्णो यस्य तादृशस्तेषां तादृशां मध्ये तमपा तदतिशययोगीति प्रतिपादितम्। एवं चाग्नेः श्रुतियोग इति विस्पष्टम्। एतदभिप्रायेण मन्त्रद्वितयं प्रश्नप्रतिवचनभावेनोच्यते।

तथाहि "कुहश्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते। ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा॥ इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः। मित्रो न यो जनेष्वा यशश्चक्रे असाम्या"॥ इति। अत्र प्रथममन्त्रेण प्रश्न उच्यते इन्द्रस्य श्रुतिः कुत्रातीता। श्रुतो नाम अतीतश्रुतिविषयः। कुत्र वा अद्य प्रवृत्तेऽह्नि मित्रो नामादित्योदयात्पूर्वस्मिन्नव्यवहित आदित्य एव। स यथा श्रूयते वर्तमानश्रुतिविषयो भवति एवमसाविन्द्रः कस्मिन् जने जनेषु वा वर्तमानश्रुतिविषयो भवति। इन्द्रस्य श्रुतिरुक्तरीत्या तिरश्चीनो रश्मिर्वर्तमानो भवति। कुत्र वा जने लोके वा असौ भासमानो भवतीति प्रश्नः, अयमिन्द्र ऋषीणां क्षये निवासस्थाने वा वर्तमानो भवेद्। अथवा गिरा वाचा गुहायां वा चर्कृषे कृतो वा। अर्थादसौ रात्रौ वर्तमानो वा भवेदिति। उत्तरमस्मिन्निह श्रुतिविषय अद्य स्तवे वज्री तद्युक्त ऋचीषम ऋचा सम इति।

अयं भावः—इन्द्रस्तु आदित्योदयार्थं सुमेरावपेक्ष्यमाणपरिक्रमत्रये मध्य-

वर्तिपरिक्रमसमखण्डितबिम्बरूपस्तस्य खण्डितरूपेणैवोभयोर्लोकयोः सत्त्वम्। अत-एवेन्द्रस्य आखण्डल इति नाम आ समन्तात् खण्डरूपेण लाति गृहीतो भवतीत्या-खण्डलः। परिक्रमस्य ऋग्रूपत्वं वर्णितम्। तत्सम इति गृहीत्वेन्द्रबोधकं विशेषणं मन्त्रे ऋचीषम इति, निरुक्तकारेणोच्यते "ऋचीषम ऋचासम" इति। स्तवे वज्री असौ इन्द्र ऋचासम इति। तादृश इन्द्र इहास्मिन् लोके देवलोके सुमेरुरूपे इत्यर्थः।

यद्यपि अत्र देवलोकादिबोधकं किमपि पदं नास्ति केवललोकाभिप्रायेणेहेति पदं प्रयुक्तम्। इहेति पदमिदमःसर्वनामतो निष्पन्नं सन्निकृष्टार्थबोधकात्। सन्निकर्षः सर्वत्र भवितुमर्हतीति न लोकविशेषनिर्णयः। केवलं प्रश्ने कुह कुत्र कस्मिन् लोके इति लोकस्य कस्य चन ग्रहणं, तथोत्तरे इहेत्यनेनापरलोक-ग्रहणस्य प्रतीत्या लोकभेदप्रतीतिः। एवं च प्रश्नविषयो यः कोऽपि लोको भवितु-मर्हति एवमुत्तरेऽपि यः कोऽपि लोको विषयो भवेत्। केवलं प्रश्नप्रति-वचनाभ्यां लोकभेदप्रतीतिः सा यत्र कुत्रापि संभवेत्। तथापि प्रश्ने ऋषीणां क्षय इति वर्णनेनेदं वर्णनं कुमेर्वभिप्रायं विज्ञायते। वेदे च सुमेरुस्थानां देवत्वेन कुमेरुस्थानामृषित्वेन वर्णनस्य 'अग्निः पूर्वेभिर्ऋषिभिरि'त्यादिषु प्रति-पादनात्। तत्र च गिरा गुहायां वा कृत इति वर्णनेन सुमेरुप्रदेशे तस्य रात्रि-सम्बन्धितायाः प्रतीतेः। न च सान्निध्याद् गुहापि ऋषीणां क्षयगतैव विज्ञायत इति वर्णनस्यावसरो यतस्तत्रर्षिक्षये गुहायां चाधिकरणे विकल्पाभिप्रायकवा-शब्दग्रहणस्यासंल्लग्नकतापत्तेः। एवं चेदं विकल्पार्थकवाशब्दवचनं च क्षयस्य गुहायाश्च वैयधिकरण्यबोधकम्। एवं च प्रश्नविषयो लोकोऽत्रर्षिलोक उत्तर-विषयश्च सुमेरुलोक इति। किञ्चात्रोत्तरे इन्द्रस्य विशेषणं वज्रीति। तच्च साभिप्रायमसुरविनाशायेति। एवं चर्षीणां क्षयव्यधिकरणे गिरो गुहायां विद्यमानतमोरूपासुरविनाशार्थं तत्। तच्च सुमेरावेव प्रकृते सम्भवतीति सुमेरोरेवोत्तरे ग्रहणम्। किञ्चात्र न केवलं वज्रीति विशेषणत्वेनोच्यते किन्तु कार्यविशेषे। तच्च कार्यं स्तवरूपम्। अर्थात् स्तवे स्तोत्रे वज्रीति। स्तोत्रं च देवलोकाभिप्रायेण प्रवर्तते, देवतायास्तत्र प्रतीतेः देवरूपत्वमिन्द्रस्य सुमेरौ स्तुताविति, तत्र वज्री विनाशकवज्ररूपायुधवत्तयेति प्रतीत्योत्तरे देव-लोकस्यैव ग्रहणम्। ऋचीषम इति विशेषणमपि उदयावसरीयपरिक्रमारूप-ऋगभिप्रायम्। तत्र मध्यवर्तिपरिक्रमरूपकं साम्यस्योक्तेरिति। तत्रोच्यते य इन्द्रो मित्र इव जनेषु लोकेष्वसामि असंपूर्णं यशस्तेजश्चक्रे आ समन्तात्।

अयं भावः—तेजसः परिपूर्णत्वं संपूर्णबिम्बोदयोत्तरं ततः प्राक् चासंपूर्णं तेजस्तच्च सावित्रकालवर्तिना मित्रेण यथा क्रियते दीयते एवमुदयदवस्थाव-

तेन्द्रेणापि संपूर्णमण्डलस्य तदानीमप्यसत्त्वात् असामि असम्पूर्णमेव तेजो दीयते। इन्द्रस्य त्वयं विशेषस्तेन दीयमानं च तेज उभयोर्लोकयोर्यत्रासावुदयन् यत्र चासावस्तमयन् स्यात्। अतएव जनेष्वित्यव्यक्तरूपेणोल्लेखः। आ इति पदं च प्रयुक्तम्। मित्रेण तु यत्रोदयस्तत्रैवासम्पूर्णतेजसः प्रदानमिति विशेषः। यशःशब्दस्य च तेजोबोधकत्वम्। अतएव यजुषि यशोऽवरुरुत्समानानां मखस्य देवतानां च प्रयास उक्तः। तत्र मखेन तद्यशो लब्धमित्यादिकमुच्यते।

एवं चात्र प्रश्नेन प्रतिवचनेन च तिरश्चीनरश्मिरूपस्य श्रुतित्वं स्पष्टम्। अतएवेन्द्रस्य दीर्घश्रवस्तममिति विशेषणं सूक्ते। महाहस्तीति विशेषणेनापि स एवार्थ उच्यते। यथोच्यते "आतून इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय। महाहस्ती दक्षिणेन" इति। चित्रग्राभस्य ग्राह्यस्य धनस्य दक्षिणस्यां दिशि रात्रौ दृश्यस्य महता हस्तरूपेण तिरश्चीनेन दक्षिणदिक्स्थेन रश्मिना संगृह्याण सम्यगानीयास्मभ्यं प्रयच्छेति तात्पर्यं, तस्य च धनस्य विशेषणमुच्यते क्षुमन्तमिति। क्षुशब्दस्यान्नबोधकेषु नामसु निघण्टावुक्तेः, क्षुमत् अन्नवच्चित्रं वसु संगृहाणेत्युक्तिः। उषसा प्रकाशेन प्रतीयमानस्य तमसाऽऽवृतस्य सर्वस्य पदार्थजातस्योपभोग्यस्यान्नत्वेन वचनम्। अतएवोषसो नामसु निघण्टौ पठ्यते 'वाजिनी वाजिवती'ति चेति। एवं च तिरश्चीनरश्मे रश्मीनां वा श्रुतित्वेन ग्रहणम्। तत्प्रतीत्यवस्थाकानि कर्माणि श्रौतानीत्युच्यन्ते। श्रौतानां कर्मणां वेद्यामनुष्ठानम् वेदिश्च सावित्रे काले। सवितुश्च काल उदयात्पूर्ववर्ती यत्र रश्मिसन्दर्शनम्। अतएव मन्त्रेषूच्यते। "ऊर्ध्वं भानुं सविता देवो अश्रेत्" इति। निरुक्ते "यदा द्यौराकीर्णरश्मिरपहततमस्का स सावित्रः काल" इति। होतृस्थानतोऽध्वर्युस्थानपर्यन्तत्वं वेदेः। अतएव वेदे एतावती वै पृथिवी यावती वेदिरित्युच्यते। तदर्थस्तु पूर्व प्रतिपादित एव। एवं चैषा श्रुतिः तिरश्चीनरश्मिरूपा सा पूर्णं उदितबिम्बरूपे नानुभूयत इति तस्याः पुरुषसम्बन्धाभावाभिप्रायेण श्रुतिरपौरुषेयीति वचनम्। स्त्रीशूद्रयोः श्रुत्यविषयत्वोक्तिरपि तादृशश्रुतिरूपतिरश्चीनरश्म्यसम्बन्धाभिप्रायिकेत्युक्तमेवेति दिक्।

इयं चोक्तरूपा श्रुतिरुभयत्र सुमेरुकुमेर्वोर्भवतीति उभयत्र श्रौतानां कर्मणां सत्त्वमित्युभयत्र यज्ञरूपश्रौतकर्मप्रवृत्तिः। अतएवोभयविषयज्ञवर्णना वेदे। तत्रैको दैवयज्ञ इति व्यवह्रियतेऽपरो मानुषो यज्ञ इति। तदभिप्रायेण "पुरुषं वै देवाः पशुमालभन्त" इत्यादिवर्णनम्। मानुषयज्ञाभिप्रायेण च होतृजपे "सुमत्पद्वग्दे" इति वचनमित्युक्तम्। किञ्च प्रयाजदेवतानां मध्ये 'दैव्या होतारा' इति प्रयाजदेवता वर्ण्यते। तत्र निरुक्ते प्रयाजदेवताविषये "अथ किन्देवताकाः

प्रयाजा" इत्युपक्षिप्यानेकदेवतात्वमुक्त्वा "आग्नेया इति तु स्थितिः" इत्युक्तम्। मन्त्रे उच्यते "प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वन्तं हविषो दत्त भागम्" इति आग्नेये वचनमपीहानुकूलम्। एवं सति सर्वाः प्रयाजदेवता अग्निरूपा एवेति। तत्र दैव्या होताराविंत्यनेन प्रतिपाद्यमानयोर्द्वयोर्होत्रोरप्याग्नेयत्वम्। तथा सति एकेनैव ग्रहणेनोपपत्तौ द्वयोर्ग्रहणमसमञ्जसम्। उक्तरीत्या यज्ञस्य द्वैविध्ये तद्द्विवचनं सार्थकम्। प्रतियज्ञभेदं होतुरपेक्षणात्। तत्र दैव्येति विशेषणेन देवतायागसम्बन्धी दैव्य इति प्रतीतिः। देवतायागस्तु द्विविधः देवताकर्तृको यागो देवतोद्देश्यको यागश्च। तत्र देवताकर्तृको यागः सुमेरौ देवतोद्देश्यकश्च यागः कुमेरौ। एकत्र दैव्यो देवताकर्तृकयागसम्बन्धीत्यर्थः। अपरत्र देवतोद्देश्यकयागसम्बन्धीत्यर्थः। सोऽपि दैव्य एवेति विशेषणं सार्थकम्। होतृद्वयाभिप्रायेण द्विवचनमुक्तरीत्या यागद्वयसाधकम्। किञ्च वेदे "वेद्या वेदिराप्यते" इति वचनेन "द्वे वेदी भवत" इत्यादिनापि उक्तविधयागद्वयसत्त्वं प्रतीयते। तत्र शतपथब्राह्मणे उक्तम्—"द्वे वेदी भवतो द्वावेवलोकावित्याहुर्देवलोकश्चैव पितृलोकश्च। उत्तराऽन्या भवति दक्षिणान्योत्तरो वै देवलोको दक्षिणः पितृलोक उत्तरयैव देवलोकमवरुन्धे दक्षिणया पितृलोकमिति"। किञ्च आग्नेये मन्त्रे स्पष्टमेवोच्यते। तथाहि मन्त्रः—

यथा यजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान्।
एवानेन हविषा यक्षि देवान्मनुष्वद्यज्ञं प्रतिरेममद्य॥

अत्राग्निं प्रत्युच्यते हे अग्ने यथा त्वं पृथिव्या होत्रं पृथिवीसम्बन्धि अर्थात् कुमेरुस्थयज्ञे, यो मनुयज्ञ इति व्यवह्रियते, होत्रं होतृकर्मायजः कृतवानसि। यथा वा त्वं दिवो होत्रमर्थात्सुमेरुस्थयज्ञे, यो देवयज्ञ इति, अर्थाद्देवकर्तृके यज्ञे त्वं होत्रमयजः। एवमेवानेन प्रकृतेन हविषा देवान्यक्षि यज मनुष्वदिमं यज्ञमद्यास्मिन्दिने प्रतिर वर्द्धयेति। अत्र भाष्यकृता पृथिव्या दिव इति षष्ठ्यन्तयोरुक्तरीत्या भूलोकद्योलोकाभिप्रायकत्वमगृहीत्वा यज्ञकर्तृत्वेन पृथिवीरूपद्योलोकरूपयजमानबोधकत्वमुक्तम्। एतावतोभयविधो यज्ञोऽत्र प्रतीयते। तत्र होतृत्वं चाग्नेरिति दैव्या होताराविति द्वित्वनिर्देशो दैव्येति विशेषणयोगश्च पूर्वोक्तास्मद्रीत्या सार्थकम्।

एवं चोभयविधयज्ञानुसारेणोभयत्र श्रुतियोगेन तदीयकर्माणि श्रौतानि भवन्ति। सत्यप्येवं सुमेरुसम्बद्धानां श्रौतत्वेन व्यवहारः, सन्निकृष्टत्वाच्छ्रुतेः प्रत्यक्षाच्चेति। तानीमानि कर्माणि ब्राह्मणादिषु प्रतिपाद्यन्ते। तेषां च देवयज्ञानुकारश्च तत्र तत्र ब्राह्मणे प्रतिपाद्यते। तेषां चैषां मानुषयजमानैरनुष्ठानार्थ

श्रुतिमूलकोपलभ्यत्वात्तत्प्रतिपादकानां श्रुतित्वेन व्यवहारस्तत्प्रतिपाद्यत्वात्कर्मसु श्रौतत्वम्। तत्प्रतिपादकग्रन्थानामपौरुषेयत्वविषयको विचारः पूर्वमुक्तः। यद्यप्यसावपौरुषेयत्वसाधनप्रकारो मन्त्रब्राह्मणयोरिवापरेषु श्रौतसूत्रादिग्रन्थेषु धर्मान्तरीयकुराणवायवलप्रभृतिग्रन्थेषु चोक्तरीत्या वर्णोत्पादपदोत्पादार्थसम्बन्धार्थबोधप्रणाल्या वेदवदेवापौरुषेयत्वं प्राप्तं तावतापि पुरुषाख्यावशतो न तेषामपौरुषेयत्वम्। आश्वलायनं कात्यायनं आपस्तम्बमित्यादिना तत्कर्तृत्वस्य तत्रोपलम्भात्। धर्मान्तरीयग्रन्थेष्वपि ईशपुत्रमहम्मदादिषु तत्कर्तृत्वस्य प्रतीतेर्न तेषामपौरुषेयत्वप्राप्तिः।

एवं च कुमेरुस्थश्रुतिसम्बद्धकर्मणामपि श्रौतत्वेऽपि तदीयश्रुतेर्विप्रकृष्टत्वात्स्मृतिवशतस्तेषामुपलम्भात्स्मार्तत्वेन व्यवहारः। अतएव स्मार्तानामपि कर्मणां श्रौतत्वप्रवाद उपपद्यते। अतएव स्मृत्यधिकरणे वैदिकैर्मन्वादिभिः स्मर्यमाणत्वात्तन्मूलभूतश्रुतिप्रत्यक्षत्वं तेषामिति वचनमुपपद्यते।

ये च विदेशीया ग्रीक्प्रभृतिदेशीया ये च पारसीकप्रभृतयस्तेषां पुराणादिग्रन्थेषु उपलभ्यमानानां व्यवहाराणां कुमेरुदेशीयत्ववशतः साजात्यं सुमेरुदेशीयतो विरोधश्चोपलभ्यमान उक्तरीत्योपपद्यते।

यथा ग्रीकदेशीयपुराणग्रन्थेषु उषस ओरायन इत्यस्योपरि प्रेमप्रभृतयः कथास्ताः सर्वाः कुमेरावस्तासरीयत्वेनोपपद्यन्तेऽतएव तैर्मृगनक्षत्रदर्शनाद्वृष्टिप्रारम्भदर्शनेन तस्य वर्षाकरार्थकेन 'इम्ब्रिकर' 'अंभोरासु'नाम्ना व्यवहारः। सुमेरौ तस्य दर्शनवेलायां वृष्टेरप्राप्त्या कुमेरुस्थत्वेनैव तस्योपपत्तिः। तद्दर्शनं च रात्रिप्रारंभे, तदानीं वृष्टिकरत्वस्य कुमेर्वभिप्रायेणैव संभवः। कुमेरौ रात्रिप्रारम्भमनु वृष्टिप्रवृत्तिरिति 'देवानां माने' इति मन्त्रतः स्पष्टमिति पूर्वमुक्तम्। एवं चेमे कुमेरुदेशत एव देशान्तरं प्राप्ता भवेयुर्न सुमेरुदेशतः। अतएव तेषां के चन व्यवहाराः सुमेरुदेशीयव्यवहारैः समा अपि भवन्तीति। कुमेरुदेशतो विनिर्गमश्च ब्राह्मणादिषु मनुकथातो विस्पष्टः। तत्रोच्यते, मनोः पादावनेजनार्थमपामुपहारे तत्र मत्स्योपलम्भस्तेन मनोः स्वरक्षार्थं प्रार्थना रक्षणप्रकारश्च स्वल्पजलाशयक्रमेण महाजलाशयप्राप्त्येति वर्णितः। तादृशक्रमेण क्रमवृद्धस्य तस्य समुद्रे परित्यागवेलायां तेन मनुं प्रति वचनं, 'यथा त्वया मम संरक्षणं कृतं तथाऽहमपि त्वां संरक्षिष्यामि' तत्प्रकारोऽपि तत्रोक्तः। कालविशेषं सामान्येनोद्दिश्यास्मिन्काल ओघ आगन्ता ततस्त्वां तारयिष्यामि, केवलं त्वयैकां नावं विरच्य तत्र पदार्थानां बीजानां संरक्षणं कृत्वाऽवस्थातव्यमिति। यदा चौघ आगतस्तदानीं मत्स्येनागत्य मनुं प्रति उक्तं नौकां मदीये शृङ्गे बधानेति

ततस्तां बद्धां नौकां गृहीत्वैतस्ततः परिभ्रमन्नसौ हिमवतः पर्वतस्य शृङ्गमाससाद, तत्र तेन मनुरुक्तो नौकामिमां वृक्षे बधान क्रमेणौघेऽपगते निवृत्तःस्या आपत्तित इति। मनुना तथानुष्ठितं निवृत्तश्चौघापत्तित इति। अत्र विचारकाणां भारते प्रसिद्धहिमवतो ग्रहणं हिमवच्छब्देनेति भ्रमाद्विचारसंकरः। मनुश्च दक्षिणदेशस्थमेरुशृङ्गे वसन् तत्रौघागमने भुवो दक्षिणपार्श्वीयसर्वोच्चमेरुशृङ्गत उत्तरस्यां दिशि हिमवत्सन्निधिप्राप्तेरसम्भवः। यतः स ओघो जलप्रलयः प्रादेशिको न तु सर्वभूव्यापी। अस्यां दशायां प्रादेशिके प्रलये नौकाद्वारा भुवः पार्श्वान्तरवर्तिहिमवत्सदृक्षात्युच्चपर्वतप्राप्तेर्नौकया असम्भवः। तस्मादिदं वर्णनं भुवो दक्षिणपार्श्वीयस्यैवोच्चस्य हिमवतः पर्वतस्याभिप्रायेण। अतस्तादृशभुवो दक्षिणपार्श्ववृत्तिहिमवत्पर्वतस्यैव शृङ्गं नौकापसर्पणशब्देन व्यवह्रियमाणं स्यात्।

अवश्यं च मनुर्भुवो दक्षिणपार्श्वीयमेरुशृङ्गे निवसन् यत ऐतरेयब्राह्मणे उच्यमानकथातो विज्ञायते। सा च कथा ग्रीक्देशीयकथास्वपि भवेत् यतो मूलं तस्योभयत्र समम्। ऐतरेये दुहित्रारोहकथायामुच्यते-रुद्रेण बाणेन विद्धः प्रजापतिरुर्ध्वमुदप्रपप्तत्। तस्य रेतः प्रवर्तमानं मरुतश्च्यावयितुमसमर्था वैश्वानरेणाग्निना प्राच्यावयन्। तत्र प्रथममुद्दीप्तं तदादित्योऽभवत् द्वितीयमुद्दीप्तं भृगुरभवत्तं वरुणो न्यगृह्णात्तस्मात्स भृगुर्वारुणिरिरिति तद्प्रजापते रेतो दुष्टं मा भूदित्यभिप्रायेण देवैर्मादुषमित्युक्तं तत्परोक्षेण मानुषं संवृत्तमिति देवानां परोक्षप्रियत्वादिति।

अत्र प्रजापतेर्दुहितृपारोहः पूर्वोक्तरीत्या देवेष्वस्तावसरीयखण्डितबिम्बस्थलो न भवति किन्तु देवेषूदयावसरीयः कुमेरुरूपपार्श्वान्तिरेऽस्तावसरीयखण्डितबिम्बस्थलः तदानीमेव तस्य दुहितृपारोहत्वम्। अस्तावसरीयायाः सन्ध्यायाः सन्ध्यारूपोषस एव दिवो दुहितृत्वसंभवः। यतः पूर्वमादित्यरूपस्य जनकस्य सत्ता ततः पश्चाज्जायमानाया उषसस्तज्जन्यत्वसंभवः। प्रातःकाले चोषाः पूर्ववर्तिनी ततः परस्तादादित्यबिम्बोदयेन तस्यैव जन्यत्वात्पुत्रत्वं पूर्ववर्तिन्या उषसश्च तन्मातृत्वमेव भवेत्। दुहितृपारोहश्चोच्यते इति अस्तावसरीयत्वेनैव सम्भवति। यद्यपि देवेष्वस्तावसरेऽपि दिवो दुहितृत्वकल्पना संभवति परन्त्वत्र कथायां न सा विवक्षिता। तत्कथानुरोधेन सविधवर्तिनि मृगशिरसि आग्रयणप्रयोगस्यान्यथानुपपत्तेः। स चाग्रेऽयनसम्बन्धादिति तत उदयो वक्तव्यो भवेदुदये च नोषसो दिवो दुहितृत्वव्यवहार इत्यगत्या स भुवो दक्षिणपार्श्वीयमेरुशृङ्गे कुमेरुरूपेऽस्तावसरीयः। अस्तावसरे खण्डितबिम्बदर्शनेनोषसा योगं गृहीत्वा सा कल्पना।

अतएव तत्र कुमेर्वभिप्रायेण ग्रीक्देशीयपुराणेषु ओरायनरूपस्य सायुधराक्षसस्य कल्पनम्। ओरायन्शब्दश्च रौहिणशब्दतो भाषिकशब्दप्रथातः सञ्जयत इत्युक्तं प्राक्। रौहिणशब्दस्येन्द्रविरोधिबोधकत्वं निघण्टुषु वृत्राहिशंबरसमानार्थत्वेन वचनादित्यप्युक्तं पूर्वम्। एवं चास्तावसरीयां दुहित्रुपारोहकल्पनां तत्सम्बन्धेन प्रजापतिरेतसो देवैः परोक्षेण मादुषमित्युक्तस्य मानुषत्वमित्यादिना मनोस्त-च्छृङ्गनिवास इति। तां च कथां पुरस्कृत्य प्रेमादिवर्णना। ग्रीक्देशीयपुराणादिषु वर्णनात्तेषां भुवो दक्षिणपार्श्वीयता तत्रत्यमूलस्थानतस्तेषां विनिर्गम इति ज्ञापयति। अन्या अपि तादृश्यस्तत्रत्याः कथा भवेयुस्तदीयपुराणग्रन्थेषु।

उक्तकथानिबन्धनहरिणहरिणीसंप्रयोगानुकारेण क्रीडनं शर्मण्यपुराणगत-मपि कुमेरुशृङ्गसम्बन्धमेव बोधयति तेषाम्, न सुमेरुशृङ्गीयताम्। यतः सा क्रीडोभयोर्वत्सरयोर्मध्यवर्तिषु दिनेषु पवित्रत्वेन गृहीतेषु देवा मनुष्यगृहे आगच्छन्ति तेषां प्रीत्यै सति वर्णनतः मृगकथायाश्च देवेष्वस्तावसरीयत्वस्या-सम्भवेन कुमेरावस्तावसरीयत्वेन वक्तव्यतया तेषामप्युक्तरीत्या कुमेरुसम्बन्धित्व-स्यैव प्राप्तिः। तेषामपि अपरास्तादृश्यः कथा भवेयुः। किञ्च दशदिनत्वे-नैव संवत्सरमध्यवर्तिदिनानां व्यवहारोऽपि कुमेरुसम्बन्धित्वं तेषां सूचयति। सुमेरुशृङ्गीयाणां तादृशानि द्वादशदिनानि संवत्सरमध्यवर्तिनीति व्यवहारः। अतएव दीक्षासु द्वादशदीक्षावर्णनं संगच्छते। कुमेरुस्थैस्तु दशैव दिनानि मध्यवर्तीनीति मन्यते स्म। अतएव पूर्वोक्तरीत्या कुमेरुस्थानां श्रौतानां क्रियाणां सुमेरुसम्बद्धैः स्मार्तत्वेन वचनम्। स्मार्तासु क्रियासु दशदिनानामेव पवित्र-त्वाभिप्रायेण नवरात्रकल्पना, सा चोदयावसरेऽस्तावसरे चेति शारदं नवरात्रं वासन्तिकं च नवरात्रमिति स्मार्तमनुस्रियते। न हि तस्य नवरात्रस्य वेदे वर्णना पुराणादिषु तदुपलम्भः स तु स्मार्त इति पूर्वोक्तमेव साधयति।

पारसीकास्तु सर्वात्मना देवविरोधमनुसरन्ति। वेदेषु वसन्ते वत्सर-प्रारम्भः पारसीकानां शरदि वत्सरप्रारम्भः, नवरात्रसमारोहस्तु तेषां नवरोजा इत्यनेन प्रसिद्ध एव। शारदं चायनं सर्वादौ भाद्रामावास्यायामिति आदित्योदयतः पूर्वं तैः पितृपक्षस्वीकारः, सुमेरुस्थैस्तत्रादित्यास्तमयतः पूर्वं तत्स्वीकारात्। सुमेरुस्थानां यज्ञोपवीतं त्रिवृतिसूत्रात्मकं, तेषां पटरूपं, सुमेरुस्थानां स्कन्धा-लम्बितं पारसीकानां कट्यालम्बितमिति। तस्य वर्णकतदीयग्रन्थे पूर्वणिमिति विशेषणात्प्राक्शब्दसमानार्थतेति। सर्वं कुमेर्वभिप्रायकत्वेनैव संभवति।

एवं चोक्तवर्णनतः सर्वं इमे कुमेरुसम्बन्धिनस्तत्र हिमप्रलये निर्गता देशान्तरं प्राप्ता न तु सुमेरुतस्तेषां विनिर्गमेन देशान्तरप्राप्तिरिति, नेमे भारती-

यानामार्याणां पूर्वपुरुषा इति। तेषां पुराणग्रन्थेषु मन्त्रसदृक्षं वर्णनं दृश्यमानं सुमेरुकुमेर्वोः समानपरिस्थितिनिबन्धनं तत्। नत्वेकमूलस्थानिकत्वनिबन्धनम्। अतएव तैः सोमस्यैव वर्णनात्तेषां पुराणग्रन्थेषु, सोमश्च कुमेरुस्थ आदित्य इति पुरस्तात्प्रतिपादितम्।

यत्तु उपनयने वटोः प्रजापतिसारूप्येण कमण्डलुमेखलादिधारणं तत्सर्वं स्मार्तमुक्तरीत्या श्रौतमेवेति तद्वशतो न वैदिकानामेकत्र स्थितिकल्पनसूचनम्। यत्तु वैदिकेषु सुसूक्ष्मगणितसाध्यविशिष्टज्ञानाभाव इति तत्तु उत्तरायणदक्षिणायनयोर्विप्रकर्षदेशभागगणनस्य विष्णोश्चतुर्णवतिभागानामुत्तरदक्षिणसम्बन्धितयानुरूपप्रतिकूलभावेन वेपनवचनात्, अग्नेस्त्रयस्त्रिंशदधिकशतत्रयाधिकसहस्रत्रयमितदेवैः सपर्यावचनात्, दैनन्दिनवृत्ते आदित्येन गन्तव्यानां वृत्तगतानां नवनवत्यधिकषष्टिसहस्रभागानां संख्यानात्, वात्सरिकसांपातिकगतेः पञ्चसु नक्षत्रेषु नियमने संपाद्यभागानां स्थूलभावेनाष्टोत्तरशतभागरूपतया सूक्ष्ममानेन सप्ताधिकशतभागरूपेण संख्यानात्, तद्वशतः संपातस्यासर्ववृत्तपरिभ्रमस्य नियमनात्, तदनुसारेणाक्षस्थानानां तावत्संख्याकांशपर्यन्तंपरिचलनादिबोधनाद्विपरीतमेव।

यत्तु प्रथमावस्थायां मन्त्रादिभागस्यासंपन्नत्वेन तदानीं स्वल्पवाक्यानां कथाभागस्य च संप्रदायतः प्राप्तिः पश्चात्तदनुरोधेन मन्त्रप्रादुर्भावेन मन्त्रेषु तादृशपूर्वोक्तविशेषाणां सत्त्वेऽपि पूर्वोक्तस्वल्पवाक्यादिसम्प्रदायावस्थाकाले तादृशवैशिष्ट्याविज्ञानमिति कल्पनं तदपि तादृक्स्वल्पवाक्येष्वपि "त्रयश्च त्री च शता त्रयश्च त्री च सहस्रा त्रयश्च त्रिंशच्च। तावन्तोऽभिषाचस्तावन्तो रातिषाचस्तावतीग्नास्तावतीः पत्नीः। तावन्त उदरणे तावन्तो निवेशने" इत्यनेन देवसङ्ख्याबोधनेनोत्तरायणादीनां बोधकनिर्विन्निगमदर्शनेन विरुद्धमिति।

वेदे कालपरिमाणानि बहुशो निर्दिश्यन्ते, अयनानि निर्दिश्यन्ते ऋतवो बोध्यन्ते मासा उच्यन्ते पक्षोल्लेखो दिनरात्र्योरपि निर्देशः। तत्र कालपरिमाणेषु संवत्सररूपमेव कालपरिमाणं सर्वतो महदुपयुक्तम्। तदपेक्षया महतां युगकल्पादीनां प्रमाणानां वेदे क्वचनैवोल्लेखः। यत्रोल्लेखस्तत्र सन्देहाक्रान्तिः। यथैतरेये ब्राह्मणे "कलिः शयानो भवति सञ्जिहानस्तु द्वापरः। उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्" इत्यनेन कृतादिनामोल्लेखः स इदानीं लोकप्रसिद्धकालपरिमाणाभिप्रायक इति सन्देहास्पदम्। यत्तु ओषधिसूक्ते त्रियुगमिति पदस्य संवत्सरापेक्षया महतः कालपरिमाणस्य बोधकत्वमिति वचः। तन्न, तत्रत्यस्य उक्तपदस्य कालबोधकत्वाभावेन महाकालाबोधकत्वात्। उक्तं पदं द्वौ त्रय

इति संख्याद्वयबोधनाय प्रवृत्तं, तेनावयवद्वारा पञ्चसङ्ख्याबोधनमिति पुरस्तात्प्रतिपादितम्। "आ घाता गच्छानुत्तरा युगानी"त्यत्रापि उत्तरदिग्वर्तीनि दिनरात्र्यात्मकयुगानि युगपदस्यार्थो न तु संवत्सराधिककालबोधकता तस्य। भाष्यकारेणोत्तरा युगानीत्यस्य तादृशपरिमाणबोधकतोक्ता, सा परं विरुद्धेति अन्यत्र प्रपञ्चः। निरुक्तकारेण "आगमिष्यन्ति तान्युत्तरा युगानि" इत्यव्यक्तमेवोक्तम्। तट्टीकाकृता दुर्गाचार्येण तत्रोक्तम् 'उत्तराणि युगानि आगमिष्यन्ति तेऽपि कालाः साम्प्रतं न वर्तंत' इत्याभिप्रायः। कलियुगान्ते तादृशः संकरः। नचेदं कलियुगं वर्तत इत्युक्तं ततो युगपदस्य तादृशमहापरिमाणकालबोधकत्वमित्यत्र सन्देहः। एवमेव युगशब्दयुक्तेष्वन्येषु स्थलेषु। यत्र परं संवत्सरापेक्षयाधिकः कालो विवक्ष्यते तत्र प्रायेण संवत्सरावृत्त्यैव तद्बोधो यथा विश्वसृजां सत्रे सहस्रसंवत्सरमितिपदेन बोध्यते। तत्र संवत्सराणां सहस्रवारमावृत्तिः। मीमांसकैरेतादृशस्थलेषु संवत्सरशब्दस्य संवत्सरतो न्यूनकालबोधकत्वस्य तादृशस्थलेषु सिद्धान्तनम्। तथा सति तस्यैव कालस्य तावद्वारं तत्रावृत्तिर्बोधिता स्यात्। एवमेवेतरत्रापि। एवं च संवत्सरापेक्षया अर्वाक्तनकालपरिमाणानां बोधस्तु बहुशः। तत्रायने निर्दिश्येते ऋतवो निर्दिश्यन्ते मासा उच्यन्ते पक्षोल्लेखः दिनरात्र्योरुल्लेखः क्षणादिकालस्याप्युल्लेखः। यद्यपि तैत्तिरीयसंहितायां कृतत्रेताद्वापरशब्दा उच्यन्ते परन्तु तेषां लोकप्रसिद्धयुगपरत्वे सन्दिग्धता। यतो लोके तानि युगानि कृतत्रेताद्वापरकलिशब्दैश्चत्वारि भवन्ति। अत्र तु कृतादिषु कृतत्रेताद्वापरास्कन्दाभिभूरूपं पञ्चकं निर्दिश्यते। नहि युगेषु पञ्चकं प्रसिद्धम्। एतावता तत्र युगपरनिर्देशस्य सन्दिग्धतैव। एषैव गतिर्वाजसनेयिसंहितागतवाक्यस्य। तत्रापि चतुर्थ आस्कन्द उच्यते इति तैत्तिरीयवाक्याभिमतस्य तत्र सम्मतत्वेनोक्तदोषतादवस्थ्यात्। तैत्तिरीयब्राह्मणे परं कलिचतुर्थानां निर्देशः क्रियते। तत्रापि वाजसनेयिसंहितावत्कृताद्युद्देशेन पुरुषविशेषरूपा मानुषाः पशवो निर्दिश्यन्ते। तत्रास्कन्दस्य यः पशुः सभास्थाणुरूपस्तस्यैव कलये निर्देशेन कल्यास्कन्दयोरभिन्नता प्रतीयते। तथा सत्यास्कन्दोत्तरवर्तिनोऽभिभूरित्यस्यापि विवक्षणे चतुष्टवव्याघातेन कृतादिशब्दानां प्रसिद्धयुगपरत्वस्य सन्देहात्। तथाऽग्निष्टोमे "ये वै चत्वारः स्तोमाः कृतं तद्। ये पञ्च कलिः स" इत्यादयो निर्देशा अपि व्याख्याताः।

एवं सप्ताहस्य तत्सम्बन्धिसप्तानां दिनानां तन्नाम्नां चानुल्लेखः। एवं सतीयं सप्ताहादिकल्पना किन्निबन्धना किन्निमित्तश्च तत्र दिनक्रमस्तन्नाम्नां च क्रम इति। किंहेतुकश्च स इति विचारणीयम्। तत्र प्रथमत

एवं विचारणीयं किमिति सप्ताहरूपं परिमाणं प्रवर्तते। मासपूरणायेति वचस्तु न शोभनम्। यतस्तेन मासानां सम्यक् पूरणाभावात्। मासास्त्रिंशद्दिनैः प्रवर्तन्ते, तत्र सप्ताहस्य चतुर्ग्रहणे मासदिनसङ्ख्यान्यूनता, पञ्चवारं ग्रहणे मासे दिनसङ्ख्याधिक्यापातः। ततश्चेदं सप्ताहरूपं प्रमाणं न मासपूरणायोपयोगि। यथाकथं चन न्यूनत्वेनाधिक्येन वा पूरणोपयोगित्ववचनं चेत् किमिति सप्ताहरूपमेव प्रमाणमादरणीयं नाष्टाहादिरूपं, प्रत्युत षड्हप्रमाणस्यादरणे तु मासः सम्यक् पूर्यतेति तदेव किमिति नाश्रितमिति सन्देहस्य दुरुत्तरत्वमेव स्यात्।

अथ यदि दिननामवशात इदं प्रमाणं ग्रहापेक्षम्, सूर्यादयश्च ग्रहत्वेन प्रसिद्धास्तन्नामभिर्ग्रहनामभिर्दिनव्यवहारात् दिनानां च माससाधकत्वान्मासपूरकता तन्मानस्य नत्वष्टाहादीनामिति। तदपि न युक्तम्। ग्रहापेक्षया मासपूरकत्वेनापेक्षणे ग्रहाणां नवत्वप्रसिद्धया तदपेक्षस्य नवाहमानस्यैव तादृशत्वेन स्वीकारस्योचितत्वात्। अथ यद्युत्तरयो राहुकेत्वोर्ग्रहयोरदृश्यत्वेन तौ परित्यज्यावशिष्टाभिप्रायं सप्ताहकल्पनमिति तदपि यथा कथंचनागतिकगतिपरम्। यतो नामप्रदाने दृश्यत्वादृश्यत्वयोरकिञ्चित्करत्वात्। किञ्च ग्रहापेक्षया सप्ताहमानकल्पने तत्रत्यदिनानां नामपरिकल्पने ग्रहेष्वसन्तं क्रमं परिकल्प्य दिनक्रमः कल्पितः स्यात्। न हि ग्रहाणां स्वरूपतः कोऽपि क्रमोऽस्ति। यदि आदित्यमण्डलस्यासमन्ताद्भ्रमणकक्षानुसारेण कक्षागतं क्रमं ग्रहेष्वारोप्य ग्रहक्रमकल्पनेति तथा सत्यादित्यस्य भ्रमणकक्षावधित्वेन कक्षाभावात्कक्षाक्रमाभावेन तत्र तन्नाम्नोऽक्रमिकं ग्रहणमापद्येत। यदि भ्रमतां ग्रहाणां पृथिव्यभिप्रायेण कक्षाक्रमं गृहीत्वा ग्रहेषु क्रमकल्पनेति चेत्तदपि न, तत्र पृथिवीमभिप्रेत्य कक्षाः चन्द्रबुधशुक्ररविमङ्गलगुरुशनीनां कक्षाः क्रमिका भवन्तीति सोमादिक्रमेण वारनामकल्पनापेक्षणीया स्यात्। दृश्यन्ते तु तानि नामानि क्रमान्तरयुक्तानि। तस्मात्सप्ताहे न ग्रहापेक्षत्वं, न तत्कक्षाक्रमनिबन्धनस्तत्रत्यदिनक्रम इति मासपूरकत्वविनिगमनाविरहः सप्ताहमाने इति।

यत्तु दिनस्य चतुर्विंशतिभागान् प्रकल्प्य प्रतिभागं होराशब्देन व्यवहारः। होराणामधिपतयो ग्रहाः क्रमेण कल्प्यन्ते। दिने होराश्चतुर्विंशतिरिति दण्डकलितन्यायनावृत्त्या ग्रहसम्बन्धोऽधिपतित्वेनेति ग्रहाणां त्रिरावृत्त्या एकविंशतिहोरासम्बन्धे जाते होरात्रयमवशिष्यते। तत्र चतुर्थ्यां आवृत्त्याः प्रारम्भे प्रथमग्रहत्रितयस्यावशिष्टहोरासम्बन्धे यश्चतुर्थो ग्रहः क्रमिकः स परवर्तिदिनीयप्रथमहोरासम्बद्धो भवति। अनेन क्रमेण प्रथमहोराधिपतिस्तद्दिनाधिपतिरित्येवं क्रमेण ग्रहाणां होराधिपतित्वनिबन्धनो दिननामक्रम इति। तदपि न सम्यक्, यतो

ग्रहेषु प्रथमतः क्रमसत्त्वे तदनुरोधेनावृत्त्या दिनप्रथमहोराधिपतित्वनिबन्धना दिननामप्रकल्पना भवेत्। तस्मिंश्चासति तत्कल्पनायोगाभावात्। अथ यदि पूर्वोक्तं भुवमपेक्ष्य कक्षाक्रमं ग्रहेष्वारोप्योक्तरीत्या होराधिपतिज्ञानेन वारनामक्रम इति, भवति च शनिकक्षामारभ्य कक्षाक्रमग्रहणेन वारनामक्रम इति तदपि न। कक्षानुरोधी क्रमः शनिकक्षामारभ्य ग्रहीतव्यो नान्यकक्षामारभ्येत्यत्र विनिगमकाभावात्। प्रत्युत सन्निकृष्टत्वादुपस्थितचन्द्रकक्षानुरोधेन क्रमग्रहणे रविशनिशुक्रगुरुबुधमङ्गलचन्द्रमसां नामभिर्वारक्रम आपद्येत। न हि विदूरवर्तिशनिकक्षामारभ्य कक्षाक्रमनिबन्धनैवाधिपकल्पना, न सविधवर्तिचन्द्रमःकक्षानुरोधेनेत्यत्र किमपि विनिगमकम्।

यद्यपि सूर्यसिद्धान्ते "मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः। होरेशाः सूर्यतनयादधोऽधः क्रमशस्तथा" इति प्रतिपादितम्। तथापि होरारूपकालमानस्याप्रसिद्ध्या तदीयाधिपतिवशात उक्तक्रमस्य दिननाम्नां सूर्यसिद्धान्तानुसारेण यथाकथंचन सम्मतत्वेऽपि ग्रहाभिप्रायेणैव क्रमो दिननाम्नां दिनानां चेत्यत्र बलवत्तरप्रमाणाभावः। अतएव दीक्षितनामकैर्ज्योतिर्विद्भिरेतस्य क्रमस्यैतन्निबन्धनत्वमस्वीकृत्येमानि नामानि क्रमश्चार्येषु अन्येषां सकाशतः प्राप्त इति प्रतिपादितम्, खाडायनानां (Khalian) स क्रम इति। होराधिपाश्च शनिमारभ्यैव तैः कुतः स्वीकृता इति न विज्ञायत इत्युक्तम्। एवं च सप्ताहकालमानस्वीकारस्तन्नामानि च किंनिमित्तानीत्यविज्ञातमेव। किञ्च शनिमारभ्योक्तरीत्या होराधिपकल्पने सप्ताहे प्रथमदिनत्वं शनेरेवोचितम्। यतः सः प्रथमदिनप्रारम्भीयहोराधिपः। एवं प्रथमत्वं शनिवारस्य, तत उक्तरीत्या क्रमिका रविप्रभृतयो वाराः स्युः। परन्तु वारक्रमे रविमारभ्यैव सप्ताहगणना प्रसिद्धा सर्वेषाम्। एवं सति पूर्वप्राप्तशन्यादिगणनायाः किन्निमित्तः परित्याग इत्यस्याप्युचितोत्तरत्वाभावः। एवं सतीयं सप्ताहकल्पना सप्ताहे दिनक्रमकल्पना दिनानां नामानि च ग्रहातिरिक्तनिबन्धनानीति तद्विषये निमित्तमन्वेषणीयमेव।

तच्च निमित्तं वारेति नामतो विज्ञायते। वारशब्दश्च मण्डलाकारावृत्तिनिबन्धनः। वेदे मण्डलाकारावृत्तिर्वारशब्दतो "वारमव्ययम्, परिवाराण्यव्यया, परिवारेभि"रित्यादौ बहुश उपलभ्यते। तदावृत्तिनिबन्धनश्च वृधातोर्वरणार्थाद्वारशब्दः। सा च मण्डलाकारावृत्तिरादित्यस्य। अतएव "परिवारेभिरर्षती"ति वारेभिर्गमनमादित्याभिप्रायेणोच्यमानं संगच्छते। एवं च सुमेरुकुमेर्वोश्चादित्यादीनां प्रदक्षिणाप्रदक्षिणमण्डलाकारावृत्तिपरो वारशब्दः। न हि तत्र तादृश्या-

वृत्त्या दिनरात्रात्मकवासराभिधायको वारशब्दः सम्भवति। तत्रोदितस्यादित्यस्यानेकावृत्तिपर्यन्तं सातत्येनानस्तमितभावेन दर्शनात्। अदर्शनेऽपि तादृशीनामावृत्तीनां यावद्रात्रिप्रवृत्त्या दिनवासरादिशब्दानां तत्र वत्सरपरत्वम्। विषुववृत्तस्थजनदृष्ट्या तत्र सूर्यदर्शनान्वितकालस्य तददर्शनान्वितकालस्य मासषट्कशब्देन व्यवहार इति तत्र षाण्मासिकं दिनं षाण्मासिकी रात्रिरिति व्यवहारः। तत्र च सुमेरुकुमेर्वोः प्रतिवारं दिवसकल्पनाया अभावः। एवं च तत्र प्रवर्तमानानां वाराणामुक्तविधावृत्त्यात्मकानां परस्परतो व्यावृत्तये सङ्ख्याभिर्व्यवहारो वेदे। यथा "चत्वारिंश्यां शरद्यन्वविन्दत्, चत्वारिंशद्दशरथस्य शोणा" इत्यादौ।

एवं सङ्ख्याभिर्वारव्यवहरणे यावदादित्यदर्शनं यावच्च तददर्शनमेकाशीत्यधिकद्व्यशीत्यधिकत्र्यशीत्यधिकशतपर्यन्तं वा यावदुभयं चतुःषष्ट्यधिकपञ्चषष्ट्यधिकशतत्रयपर्यन्तसङ्ख्याकल्पनं क्लेशसाध्यम्। मध्ये ऋतुकल्पनया यावदृतु षष्टिसङ्ख्याया आदित्यस्यादर्शने तमोमयकाले विंशत्यधिकशतपर्यन्तं सङ्ख्यानां कल्पनेऽपि क्लेशो दुर्वार एव। अत एवाक्लेशेन यावद्वत्सरं गणनसुकरा सप्ताहकल्पना वत्सरोपकारिणी। एवं सति तस्याः साक्षाद्वत्सरेणैव सम्बन्धो न मासेनेति तेन मासपूर्तौ वैषम्यदोषस्याप्राप्तिः। एवं रीत्या नापरापराष्टाहादिकल्पनानामप्यवसरः। यतस्तैर्मानैः कल्पितैरपि संवत्सरेण विषमसम्बन्धापातात्। यथाष्टाहनवाहमानयोश्चतुष्षष्ट्यधिकशतत्रयावृत्त्यात्मकं संवत्सरेण साकं न समः सम्बन्धः संभवति। अष्टाहमानस्य पञ्चचत्वारिंशद्वारं संवत्सरे आवर्तनेऽपि न संवत्सरपूर्तिः, परस्तादावृत्तिचतुष्टयस्यावशेषणात् तस्यासंग्रहापत्तिः। उक्तमानस्य षट्चत्वारिंशावृत्तिकल्पने वत्सरान्तरीयावृत्तिचतुष्टयग्रहणापत्तेरिति तस्य संवत्सरेण विषमः सम्बन्धः। नवाहमानस्याप्येषैव गतिः। तस्य मानस्य चत्वारिंशद्वारसावृत्त्या वत्सरस्य षष्ट्यधिकशतत्रयावृत्तिसङ्ग्रहेऽपि परवर्तिनीनां चतसृणामावृत्तीनामसङ्ग्रहः। तदर्थमेकचत्वारिंश्यास्तन्मानस्यावृत्तेः प्रारम्भे वत्सरान्तरीयावृत्तिसंग्रहापात इति विषमः सम्बन्धः संवत्सरेण नवाहात्मकता तन्मानस्येति तत्परित्यागः। सप्ताहमानस्य तु द्विपञ्चाशदावृत्त्या सांवत्सरिकचतुःषष्ट्यधिकशतत्रयात्मकानां सर्वासामावृत्तीनां सङ्ग्रहेण तदेव मानं संवत्सरपूरकत्वेन सुकरत्वेनादरणीयं भवेत्। तथा चेदं मानं वत्सरपूरकं न मासपूरकम्। तत्र त्रिंशद्दिनात्मकमासकल्पनाया अभावात्। एवं चेदं मानं सप्तभिर्वारैर्व्यवह्रियमाणं संवत्सरपूरकं वारसम्बन्धादिति। तेषां चैषां सप्तानां वाराणामुक्तमानावयवत्वेन गृह्यमा-

णानां परस्परतो व्यावृत्त्यर्थं नामकल्पने तत्रत्यं कञ्चन विशेषं गृहीत्वैव तत्कल्पनमुचितम्। तादृशास्तत्रत्या विशेषा वारनामभिर्बोध्यन्ते, तेषां परस्परतो व्यावृत्तिश्च प्रतिपाद्यते।

तथाहि प्रथमो वारः सर्वतः प्रकृष्टप्रकाशादित्यनाम्ना व्यवह्रियते। स चादित्यः सुमेरौ सूनुशब्देन व्यवहृतो वेदे इति तस्य तन्नाम्ना व्यवहारः। पाश्चात्त्येष्वपि अयमेव सूनुशब्दो विकारमाप्तःसन् (Sun) शब्देन व्यवहृतः प्रथमवारनाम्ना। अतएव समानेऽप्युच्चारणे (सुनु Son, Sun) शब्दयोरर्थाभिप्रायेणाक्षरविन्यासो विभिन्नो भवति। तथा च मुख्यं सूनुत्वमादित्यस्यैवेति तद्बोधनाभिप्रायके सूनुशब्दे उकारसमरूपत्वेन 'U' इत्यस्याक्षरस्य विन्यासे स्थितिः, उकारस्य विकाररूपतया 'O' इत्यक्षरस्य मानुषकपुत्रबोधके सूनुशब्दे आश्रयणम्। एवं च तेषां व्यवहारतोऽप्युत्तरदिग्गतस्य सुमेरुस्थस्यादित्यस्याभिप्रायेण प्रथमावृत्तिस्तदीयनाम्ना व्यवह्रियते इति। स चासौ सप्ताहमाने सुमेरुगतप्रकृष्टप्रकाशादित्यनाम्ना व्यवहृत इति। यथा सुमेरौ प्रकृष्टप्रकाशादित्यनाम्ना व्यवहृतः प्रथमवारः, एवं सप्ताहे द्वितीयवारनाम कुमेरुगतप्रकृष्टप्रकाशादित्यनाम्ना व्यवह्रियते। कुमेरौ चादित्यः सोमशब्देन व्यवह्रियते। अतएव तस्य शतपथब्राह्मणे सोमशब्दबोध्यत्वमुच्यमानं संगच्छते। तत्रोच्यते "सोमो वै वाजस्तस्य चन्द्रमास्तृतीयं योऽयं पवते स तृतीय" मिति। अत्रायंशब्देनादित्यस्य ग्रहणम्। एवं च कुमेरुस्थ आदित्यःसोमशब्देन व्यवह्रियते इति सप्ताहे द्वितीयवारनामत्वेन तदीयं नाम व्यवहृतम्। आदित्यस्यैकस्य सतोऽपि धर्मभेदेन तद्भेदं मत्वा भिन्नत्वेन व्यवह्रियते। धर्मभेदश्च सुमेरावेतस्य पूर्वस्यामुदयः पश्चादस्तमयः प्रदक्षिणः परिक्रम इति। एवं तस्य तत्रोपरिष्टादूर्ध्वान्दिशमभिप्रेत्यारोहश्च भवति, कुमेरावेतस्य विपरीतभावः। तत्र तस्य पश्चिमायामुदयः पूर्वस्यामस्तमयोऽप्रदक्षिणपरिभ्रमः। यद्वशात आदित्यादेर्वामत्वेन व्यवहारः। यथा "अस्य वामस्ये"त्यादौ। उषसमभिप्रेत्यापि तथा व्यवहारो यथा "सह वामेन न उष" इत्यादौ। यदभिप्रायेणादित्यप्रभृतीनां "प्राञ्चं यज्ञमकृणुत" "प्राची उषाः" "पूर्वेभि"रित्यादौ प्राङ्पूर्वप्रथमादिशब्दैर्व्यवहारः। अतएव पारसीकानां "फ्रते मज्दा ओ वरन् ऐव्य ओं धनेम्" इत्यस्मिन् "पूर्वेणि"मिति विशेषणमुपपद्यते। पूर्वेणिमित्येतस्य प्राक्शब्दसमानार्थतामविज्ञाय तद्पदस्यार्थो न विज्ञायत इति केन चनोक्तम्। एवं दक्षिणस्याश्च दिशोऽधोवर्तित्वेन स आदित्यस्तत्रावारोहन् भवति। अत एवैतरेये दक्षिणदिग्गतस्य तस्याधोऽधःपातोऽधिकः स्यादिति देवानां भीतिरुक्ता "ते देवा आदित्यस्य अधः पातादबिभयु"रिति।

एवं धर्मभेदेन भिन्नोऽयमादित्यस्तत एवोत्पन्न इति सोमनाम्ना व्यवह्रियते। कुमेरुस्थस्य तस्य मनुनाम्नापि व्यवहारो वेदे। तदभिप्रायेण पाश्चात्त्येषु मनुशब्देन द्वितीयो वारो व्यवह्रियते। तत्रापि शब्दे सूनुशब्दवदुकारभ्रंशेनाकारस्योकारभावे (Mon) इति द्वितीयवारनामव्यवहारः।

तृतीयवारे च सुमेरावादित्यापेक्षया न्यूनदीप्तिकत्वेन इतरापेक्षयाधिक्येन भासमानाया उषसो नाम्ना व्यपदेशः। उषसश्च मङ्गलेति नाम "सुमङ्गलीरियं वधू"रित्यादौ व्यक्तम्। किञ्चैतरेये सोमयागे प्रायणीयेष्टावदित्या देवत्वकथनार्थमर्थवाद उक्तस्तत्र देवानां दिग्व्यामोहे तैरदितिर्दिग्विज्ञानाय प्रार्थिता तयोक्तं "मयैव प्राचीं दिशं विजानाथ" इति। तस्या देवत्वं नादितिनाम्नोक्तं किन्तु पथ्यास्वस्तिनाम्ना। तेन नाम्ना देवताभेदकल्पनाव्यावृत्त्यर्थमेषैवादितिः पथ्या इत्यभिप्रायेण "आदित्यः प्रायणीय" इति यागस्यादितिदेवताकत्वं प्रतिपादितम्। सा चोषा इति तत्र परवर्तिना "पथ्यां ह्योषोऽनुसञ्चरति" इति वर्णनेन विज्ञायते। तत्रैतच्छब्देनादित्यो गृह्यते, तस्य पथ्यानुसारिता तत्रोच्यते, व्यक्ता चादित्यस्योषोऽनुसारितेति पथ्याशब्देनोषा एव गृह्यते। सा च तत्र यागे स्वस्तिशब्देन विशेष्यते "पथ्या स्वस्ति"रिति। स्वस्तिशब्दस्य मङ्गलार्थत्वेन मङ्गलार्थत्वेनोषा व्यवह्रियते इति तृतीयवारस्तन्नाम्ना व्यवह्रियते। इयं कल्पना पाश्चात्त्येषु तृतीयवारनाम्ना व्यक्ततरा। तेषु तृतीयवारनाम न मङ्गलेति किन्तु (Tues) 'त्युस्' इति। यच्च तेषु तन्नाम्नो मूलप्रतिपादनावसरे द्युशब्देन व्यवहृतं तद्भाषामूलभाषायामिति तदीयकोशतो विज्ञायते। द्युशब्दो भ्युस् शब्दो वा भाषाविकारप्रणाल्योषसो बोधक इति। ततश्च तृतीयवारनाम उषसो मङ्गलनामाभिप्रायं, तदेव तैरपि (Tues) शब्देन व्यवह्रियत इति तृतीयवारनाम उषसोऽभिप्रायकमिति चतुर्थवारनामतोऽपि प्रमीयते। तदुत्तरत्र प्रतिपादयिष्यते।

चतुर्थ च वारनाम कुमेरुगताया उषसो नामाभिप्रायेण। तत्रत्योदयादिकालिकी सन्ध्या नोषोनाम्ना व्यवह्रियते वेदनशब्देन तत्र तस्या व्यवहारः। वेदे विदथवेदनशब्दैस्तद्व्यवहारो विस्पष्टतरः। वेदनशब्दस्थधातोर्विद् इत्यस्य बुधधातोश्च समानार्थत्वेन बुधशब्देन चतुर्थो वारो व्यवह्रियते। एवं च यथा सुमेरुस्था सन्ध्या वोषा वा मङ्गलेति तृतीयवारनाम्ना व्यवहृता तथा चतुर्थवारनाम्ना कुमेरुगतसन्ध्या समाननाम्ना बुधेत्यनेन तस्या व्यपदेशः। बुधस्य सोमपुत्रत्वव्यवहारः प्रसिद्धः पुराणेषु। सन्ध्यायाश्च स्वतःस्त्रीत्वाभावेनोपाधिवशतःस्त्रीत्वस्येव पुंस्त्वेनापि व्यवहार उपाधितो भवति। अतएव तत्र पुंस्त्वेन ग्रहणेन पुत्रत्वव्यवहारः। सोमश्चादित्यस्तत उषस उत्पत्तिमुपाधिवशतः स्त्रीत्वेन तस्या यथा दिवो दुहितृत्वेन व्यव-

हारः सुमेरावभिप्रेयते एवं कुमेरौ सोमरूपादित्यसकाशत उत्पत्तिमत्तत्सान्ध्यस्य तेजसः पुंस्त्वेन ग्रहे तत्पुत्रत्वेन व्यवह्रियते सोमपुत्रो बुध इति। नैतावतायं व्यवहारो ग्रहाभिप्रायकः। एवं च सोमपुत्रो बुधः कुमेरुवर्ति सान्ध्यं तेजस्तस्याप्यादित्यापेक्षया न्यूनदीप्तित्वेनेतरापेक्षयाधिकदीप्तित्वेन तच्चतुर्थवारनाम्ना व्यवह्रियते। एवं च यथा प्रकृष्टप्रकाशयोरुभयलोकाभिप्रायेण सूर्यचन्द्रनामभ्यां व्यवहार एवमुभयलोकाभिप्रायेणोषोबोधकनामभ्यामेव तृतीयचतुर्थवारनामव्यवहारः। तदिदं कुमेरौ बुधो वेदननाम्ना व्यवह्रियते इति पाश्चात्यचतुर्थवारनामतो व्यक्तम्। तेषां तद्वारनाम (wednes) इति। तच्च 'वेदन' शब्दतो निष्पन्नमिति भाषातो भाषान्तरगमने शब्दानां विकारनियमाभिप्रायेण विज्ञायते। वेदनशब्दश्चोक्तरीत्योषोनामेति तत्समानरूपमिदमपि उषोनामैव भवितुमर्हति। तत्र प्राचीनसारूप्यपरिपालनाभिप्रायेण तन्नामविकृतडकारयुक्तं विलेखने (wednes) इति, उच्चारणे पुनर्डकारपरित्यागेनोच्चारणं सौकर्यमूलकं तेषाम्। तदिदं डकारानुसरणं प्राचीनपरिपाट्यविस्मरणाभिप्रायकं यथा (night) नाईडिति रात्रिबोधके नामनि नक्तशब्दस्यानुवृत्तिबोधनाभिप्रायेणानुच्चारितं तैः ककाराभिप्रायेण (gh) इत्यस्यानुवर्तनं नोच्चारणे। एवं सा संज्ञा शब्दापभ्रंशाभिप्रायेण (sighn) साइन इत्यत्र (gh) इत्यस्यानुसरणं लेखने, उच्चारणे सौकर्यानुसारेण परित्यागः। एवं प्रकृतेऽपि चतुर्थवारनाम्नः दकाराभिप्रायको डकारस्तैरनुस्रियते तद्वशत इदं नाम वेदनसमानार्थकमिति भवति।

एवं च वेदनशब्देन यथा कुमेरुगतसान्ध्यतेजोऽभिप्रायेण चतुर्थवारनामोक्तमेवं तृतीयवारनाम्नापि सुमेरुगता सन्ध्यैव मङ्गलनाम्ना व्यवह्रियत इति। पुंस्त्वं चोपाधिकमित्युक्तमेव। ततः पञ्चमवारनाम बृहस्पतिरिति सुमेरुगतस्योषोऽपेक्षया न्यूनस्येतरापेक्षया विशिष्टस्य तेजोविशेषस्यापेक्षया। तच्च बृहस्पतित्वं तेजस आदित्योषसोरपेक्षयातिरिक्तस्य। तदुक्तमैतरेयब्राह्मणे प्रजापतिकथायाम्। तत्र प्रजापतिना दुहितृसंगमापराधकरणाद्देवै रुद्रमुत्पाद्य तद्द्वारेण तस्य वेधे कारिते स प्रजापतिरूर्ध्वमुत्प्लुतस्तदीयं धावमानं सरोरूपतां गतं रेतस्तेजोरूपं तस्य देवैर्वैश्वानराग्निसाहित्येनोद्दीपने प्रथममुद्दीप्त आदित्यो द्वितीयमुद्दीप्तो भृगुर्ये चाङ्गारादयस्त अङ्गिर आदयोऽभवन्। यच्च शान्तं पुनरदीदेत् तस्य स बृहस्पतिरभवदित्युक्तिः, तदुक्तं तत्र "यदङ्गाराः पुनरवशान्ता उददीप्यन्त तत्सर्वं बृहस्पतिरभव"दिति। एवं चादित्योषसोरभावकाले भासमानं तेजो बृहस्पतिरिति सुमेरौ तस्य विशेषस्यापेक्षया पञ्चमवारनामाभवत्तदीयनाम्ना। यथा सुमेरौ प्रकृष्टप्रकाशमादित्यन्तन्न्यूनप्रकाशामुषसं विहायावशिष्टं

तेजो बृहस्पतिशब्देन व्यवह्रियत एवं कुमेरावप्युभयोः सोमसन्ध्ययोरभावेऽवशिष्टं तेजस्तत्र शुक्रवेनप्रभृतिनामभिर्व्यवह्रियते। तदेव गृहीत्वा षष्ठो वारः शुक्रनाम्ना व्यवह्रियते। पाश्चात्त्येषु 'फाय'नामापि शुष्कसमानार्थतया प्रवर्तमानं रात्रिकालिकतेजोऽभिप्रायकमेव भवेत्। पूर्ववर्तिवाराणां नाम्नां सुमेरुकुमेरुसम्बन्धेन प्रवृत्तानां मध्ये इदमपि तादृशस्यैव नाम भवेदिति। किञ्च बृहस्पतेर्देवपुरोहितत्वेन वर्णनेन सुमेरुसम्बन्धिता यथा एवं शुक्रस्याप्यसुरपुरोहितत्वेन वर्णना, देवविरोधिदेशत्वेनासुराणां देवानां सुमेरौ निवासे तद्विरोधिनि अर्थात् कुमेरावसुराणां निवासात्तत्सम्बन्धिन एवेदं नाम वक्तव्यमिति। अत्रोभयत्र सुमेरुकुमेर्वोरादित्यस्य पूर्वोक्तषट्सु वारेषु स्वरूपेणैव ग्रहणं कृतं न तु क्रियावैशिष्ट्येन। पूर्वरीत्या षण्णां षड्विधविशेषाभिप्रायेण ग्रहणात्।

सप्तमस्य वारस्य नाम्नोऽभिप्रायेण समानरूपक्रियाभिप्रायकमुभयत्र सुमेरुकुमेर्वोरेकरूपं नाम शनैश्चर इति गृह्यते। तच्चैतत्तस्य शनैश्चरत्वं मन्दगतित्वं यज्ञेषु प्रयुज्यमानाश्वलायनश्रौतसूत्रप्रदर्शितमन्त्राद्विज्ञायते। तथाहि तत्र सूत्रे दर्शपूर्णमासयोर्होतुः कर्मकथनावसरे होत्रा स्वस्यादित्यभावनया तदीयगत्यनुकारप्रदर्शनार्थं स्वस्मात्स्थानादुत्थायाध्वर्युणोदेष्यदादित्यरूपेण सम्बन्धार्थं गच्छता प्रयुज्यमानमन्त्रेण क्रियया च आदित्यस्य शनैश्चरत्वं प्रतिपाद्यते। अयं हि तत्र तस्य मन्त्रः—"षष्टिश्चाध्वर्यो नवतिश्च पाशा अग्निं होतारमन्तरा विचृत्ताः। सिनन्ति पाकमतिधीर एति"॥ इति। अनेन मन्त्रेण विशिष्टसङ्ख्याकाः पाशा अग्निं होतारं चान्तरेण च्छिन्ना इत्युच्यते। ते पाशाः कस्य कुत्रत्याः केन कथमग्निहोत्रोरन्तरेण च्छिन्ना इत्यस्यादित्यपरत्वं विना नोपपत्तिरिति पूर्वं प्रतिपादितं। तादृश आदित्यस्तान् वारुणान् तावतः पाशानस्तत्स्थलत आरभ्य होतृस्थानप्राप्तिपर्यन्तं छित्वा तत्स्थानं प्राप्तः। स चातिधीर अतिमन्दमेति। एवं मन्त्रेणादित्यस्यातिमन्दगतित्वेन शनैश्चरत्वं बोध्यते। होतृस्थानं चोदयस्थानतः पूर्वं त्रिंशदंशावशेषे गमनमार्गे, तत्स्थानं प्राप्तस्यादित्यस्याध्वर्युस्थाने किरणसंस्पर्शस्तस्यानुकरणार्थमयं होता तादृशस्थानं गच्छति यत्र गतस्याध्वर्युणा करसंस्पर्शः कृतः स्यात्। तदप्याश्वलायनेन श्रौतसूत्रे उक्तम् "उत्थाय ऋतस्य पन्थामन्वेमि होता इत्यभिक्रम्यांसेऽध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना" इति। यद्यपि अयं मन्त्रो वैषुववृत्तस्थले विस्पष्टं सम्बन्धं बोधयति। तथापि अत्र पाशानामंशरूपत्वस्य स्पष्टमनुक्त्या सुमेरुकुमेरुगतपर्यायपरत्वमपि पाशानां वक्तुं शक्यमिति तत्स्थतयाप्यादित्यस्य अतिमन्दगतित्वं बोधयतीत्यतिमन्दगतिनिबन्धनमस्य शनैश्चरत्वं बोधयतीति तदेव गृहीत्वा सप्तम-

वारस्य शनैश्चरनामत्वं सुमेरुकुमेरुसाधारण्येन बोध्यते। इदं तु पाश्चात्यैरपि प्रकारान्तरेणानुमन्यत इति संभावना। यतस्तेषां सप्तमवारस्य नाम (saturday) 'सातुर्' इति भाषाविपर्ययनियमेन भवितुमर्हति। सातुर्शब्दो दानार्थकषणु दाने इति धातुतो निष्पद्यते अर्थश्च साता दाता इति। आदित्यस्य विषये दातृत्वादिकल्पनोभयप्रदेशसाधारणीति। तस्योक्तविधदातृत्वमभिप्रेत्य सप्तमवारनाम तेषां सातुर्दिनमित्यर्थकं (saturday) इति भवति। एतावता सुमेरुकुमेर्वोः साधारण्याभिप्रायेणेदं नाम प्रवृत्तमिति विज्ञायते। मन्त्रे पूर्वोक्ते होतृपदमपि दानार्थकं, 'हु' धातोर्दानार्थत्वात्। होतुश्च पूर्वोक्तरीत्याऽतिधीरगमनेन मन्दगतित्वमित्यादिवर्णनसंभवात्।

एवं चेदं सप्ताहमानमार्याणामेव वैदिकानाम्। तच्च न ग्रहापेक्षं, न तरां तत्क्रमं कल्पितमपेक्षते वाराणां तन्नाम्नां च कृते। न चैतस्य मासपूरकत्वेन कल्पना। ग्रहाणामनपेक्षणेन तदीयदृश्यादृश्यत्वादिकमपि नापेक्ष्यते संज्ञोपपत्त्यर्थम्। नापि होराधिपत्वकल्पना विषमाऽपेक्षणीया। सा च भूसकाशात् कक्षासु भ्रमतां ग्रहाणां सविधग्रहकक्षामारभ्य कल्पने उपस्थितेऽपि तदुपेक्ष्यान्तिमग्रहकक्षामारभ्यैव तत्कल्पनं तत्रापि प्रथमोपस्थितत्वाच्छनेरेव प्रथमवारनामत्वमुपेक्ष्य तदधः कक्षामनुसृत्य तत्कल्पनमिति नानाविधानां सम्भवन्तीनां कल्पनानां परित्यागेन निर्हेतुकेन विषमत्वं तत्कल्पनाया इति पूर्वमुक्तमिति दिक्।

एवं वेदे वर्णनप्रकारो विचित्ररूपः। यथा ऋषेर्नामोच्यते दीर्घतमा इति। तत्र कोऽसौ दीर्घतमा ऋषिरिति। तद्विषये केवलं मातृद्वारकं विशेषणमुच्यते मामतेय इति। का सा ममता यस्या अयं पुत्र इत्यभिप्रायेण मामतेय इति विशेषणमुच्यते यथा मन्त्रे—"दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे। अपामर्थं यतीनां ब्रह्मा भवति सारथि"रित्यत्र। ममता नाम काचित्तस्याः पुत्र इत्येवमेव व्याख्यातृभिर्व्याख्यायते। तत्रारण्यकाद्युक्तरीत्या ऋषिनामान्यादित्यस्यैवैतानि नामानीति यदि गृह्यते तदानीमसौ दीर्घतमा अपि उपाधिविशिष्ट आदित्य एव। तस्य मामतेय इति विशेषणेन रात्रिसम्बन्धो बोध्यते। ममताशब्देन शून्यरूपा मता। मेत्यस्य शून्यार्थकत्वात् शून्यं चाभावोऽर्थात्तेजस एव। स च रात्राविति ममताशब्देन रात्रिरुच्यते। तस्याः पुत्रोऽसावादित्यो मामतेयः स च दीर्घतमा इत्यनेन दीर्घतमोविशिष्टः। तमसो दैर्घ्यं च कालाधिक्येन, तच्च भुवः पार्श्वद्वये सर्वोच्चे सुमेरुकुमेरुरूपे मेरोः शृङ्गद्वितये भवेत्। तत्रैतेन दृष्टसूक्ते तदीयवाक्यत्वेनोच्यते 'अस्य वामस्ये'ति मन्त्रे "अत्रापश्यं विश्पतिं सप्तपुत्रम्" इति वामादित्यस्य अपश्यमित्यनेन प्रत्यक्षदर्शनं कृतवानहमित्यर्थस्योक्तेरसौ सुमेरौ रात्रिकालिक इति विज्ञायते। कुमेरौ

रात्रिकालिकत्वे तु तत्रस्थवामादित्यस्य तेन प्रत्यक्षदर्शनासम्भवः। आदित्यस्यास्तमयेऽग्नौ तेजोनिधानेन तेजोराहित्येन कृष्णवर्णत्वमिति कल्पना। तदुच्यते सोमे दर्भपिञ्जूलानां दीक्षितसंस्कारे एकविंशतिसङ्ख्योपपत्त्यर्थं यजुर्वेदे—"यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्। ततस्त्वामेकविंशतिधा संभरामि सुसंभृता" इति मन्त्रेण आदित्यस्य कृष्णरूपवैशिष्ट्यमुच्यते। तत्रादित्यं प्रत्युच्यते हे आदित्य त्वं कृष्णं रूपं कृत्वा वनस्पतीन् प्राविशः। वनस्पतिशब्देन स्वप्रकाशा आदित्यप्रकाशेनाप्रकाशितास्तारका उच्यन्ते। अतएव "दिवस्पृथिव्यो"रिति मन्त्रे वनस्पतीनां सकाशतः सहस्तमोऽभिभवकर्तृतेजःपर्याहरणमुच्यते तस्य सङ्गतिः। रात्रिं प्राप्तो भूरिति तस्य तात्पर्यम्। यतस्त्वं कृष्णेन रूपेण रात्र्या विंशतिभागानतीतोऽभूस्ततस्त्वामेकविंशतिधा सम्भरामि। दर्भपिञ्जूलगतैकविंशतिसङ्ख्यावैशिष्ट्येन त्वां पावयामि शुद्धं करोमीति। तच्च कृष्णं रूपमादित्यस्य रात्रावित्युक्तमेव। यथा आदित्य उषसा सम्बद्ध उषःपुत्र इत्युच्यते एवं रात्र्या सम्बद्धो रात्र्याः पुत्र इति गृहीत्वा मामतेयशब्देन ममतायाः पुत्र इत्युच्यते। तदेवोक्तमन्त्रे उच्यते दीर्घतमोरूपो ममतापुत्रऋषिर्दशमे युगे दशमे युग्मे जुजुर्वाञ्जीर्णो भवन्। अत्र युगशब्देन द्वित्वसङ्ख्योच्यते। सा च द्वित्वसङ्ख्या दण्डो वा घटी वेति कालपरिमाणविशेषाभिप्रायेण तद्गता। रात्र्यास्त्रिंशद्दण्डात्मिकायास्सम्बन्धिनो ये प्रारम्भप्रभृतिदशमयुगपर्यन्ता दण्डाः। अर्थाद्विंशतिदण्डाः। तत्र दशमेऽन्तिमे दण्डद्वयेऽर्थाद् विंशघटिकायां जुजुर्वान्। परस्तादर्थमन्तिमगन्तव्यं देशं गच्छन्तीनामपामव्यक्ततेजसां सारथिरग्रगामी ब्रह्मा ब्रह्मरूपो भवतीति।

एवं यजुर्वेदोक्तमन्त्रानुसारेण यज्ञे दर्भपिञ्जूलेषु एकविंशतिसङ्ख्याया दर्भादिद्वारेण पावकत्ववचनेन दशमं युगं विंशतिघटिकापर्यन्तरूपमेव गृह्यते। एवं चोक्तवर्णनतः कृष्ण आदित्यस्तस्य दीर्घतमस्त्वेन ऋषितेति, स च रात्रिसम्बन्धीति मामतेय इति ममता रात्रिः। तस्याः शून्यरूपत्वं तेजःशून्यतयेति। मशब्दस्य तेजःशून्यत्वेन वर्णना गोपथब्राह्मणे मखशब्दसाधनावसरे उक्ता। तत्रोच्यते, यज्ञो मख इत्युच्यते कुतो यतोऽसौ मा खो भवति। तदयमभिप्रायः—खः शून्यस्तस्यापि मेत्यनेन अभावापरपर्यायं शून्यत्वमुच्यते। शून्यशून्यो नाम पूरितस्तच्च पूरणं तेजसेति। एवं सति यथा मखशब्दे मशब्दस्याभावार्थकत्वमेवं ममताशब्देऽपि मस्य तदर्थत्वं। यदि गोपथब्राह्मणे माशब्दस्यैवाभावार्थत्वेन ग्रहणेन तस्य मखशब्दे छान्दसो ह्रस्व इत्युच्यते तर्हि ममताशब्देऽपि सैव विधा। सर्वथा मशब्देनमाशब्देन वा अभाव उच्यते स च तेजस इति। तेजसोऽभावश्च रात्रौ भवतीति रात्रिरेव ममता। अतएव तस्याः पुत्रत्वं दीर्घतमसः संभवति इति। स च ऋषिर्भूसम्बन्धादिति

तस्य वामादित्यादिसाक्षात्कारवचनमुपपद्यत इति। किञ्च तेजसोऽभावे गर्तत्वेन वचनं "दानुमत्या बृहन्तं गर्तमाशाथे" इति मैत्रावरुणसूक्त उच्यते। दानुमती रात्रिरिति पूर्वमुक्तं तस्या गर्तो रिक्तः प्रदेशः। तत्र रिक्तत्वं तेजसोऽभावेनेति शून्यत्वमपि तेजस एवेति तेजसा शून्या ममतेति रात्रिरेव ममतेति।

एवं देवतानां विषये विकलाङ्गत्वमुच्यते "अन्धो भगः" "अदन्तकःपूषा" "सविता हिरण्यपाणिः" इति।

वेदे एकस्यैवादित्यस्य वर्णनाद्भगादीन्यप्यादित्यस्य रूपाणि, उपाधिवशात एक एवादित्यो विभिन्नरूपेण भासते इत्यर्थः। तत्र भगविषये निरुक्तकारेणोच्यते "प्रागुत्सर्पणाद् भगकालः, तस्य कालः प्रागुत्सर्पणात्" इति। उत्सर्पणमूर्ध्वगमनं तच्चादित्यस्य तस्य तत्पूर्णबिम्बोदयादूर्ध्वम्। ततः प्राक् च खण्डितबिम्बत्वान्न गमनं न वोत्सर्पणम्। खण्डितबिम्बावस्थायां विभिन्नेन निमित्तेन भगत्वमिन्द्रत्वं पूषत्वं तत्र कल्प्यते। खण्डितबिम्बता च स्थलद्वये उदयावसरेऽस्तावसरे च। तदुभयं लोकभेदेनैकस्मिन्नवसरे, लोकाभेदे च विभिन्नेऽवसर इति प्रसिद्धम्। लोकभेदश्च यत उदेति यत्रोदेति उदयावधित्वेनोदयाधारत्वेन। तत्र मुख्या वर्णना यत्रोदयो वास्तमयो वा दिनाधिककालसाध्यस्तत्र तत्साजात्यात्स्वल्पकालिके उदये चास्तमये चेति। तादृशोऽनेककालसाध्य उदयोऽस्तमयो वा सुमेरुकुमेर्वोः, सर्वाधिककालसाध्यता तस्य तत्रापरेषु तु न्यूनाधिककालसाध्यतेति सुमेरुकुमेर्वोरेवाभिप्रायेण वर्णना। तत्र कुमेरावस्तमयः सुमेरावुदयश्चैककालसाध्यौ, यथा यथा कुमेरुतोऽयमस्तमियात्तथा तथासौ सुमेरावुदियात्। एवं सति लोकभेदेनैकस्मिन्नवसरे उदय एवमस्तमयोऽपि। लोकाभेदे सुमेरौ वा कुमेरौ वा उदयास्तमयौ भिन्नकालाविति। सा च खण्डितबिम्बावस्था न लोकद्वयान्तःपातिनी। संपूर्णबिम्बदर्शनतो लोकभेदकल्पनात्। एवं चास्तावसरे यत्रान्तिमं पूर्णं बिम्बमादित्यस्य दृश्यते सोऽन्तःपूर्वलोकस्यैवमुदयावसरे प्रथमतो दृष्टं पूर्णं बिम्बं स आदिरुत्तरस्य लोकस्य। तादृशलोकद्वयमध्यवर्तित्वेन निमित्तेन तत्रत्यस्यादित्यस्य भगशब्दवाच्यता। पूर्णे ह्यादित्यबिम्बे शिरःपादाक्षिरूपत्वादिना नानारूपाः कल्पनाः। यथा मित्रावरुणयोश्चक्षूरूपत्वं "चक्षुर्मित्रस्य वरुणस्याग्नेः" इत्यादिभिरुच्यते। अपूर्णे तु चक्षुष्ट्वस्याभावः। तच्चेदमपूर्णत्वेन चक्षूरूपत्वाभावं गृहीत्वा भगस्यान्धत्वेन वर्णना। तत्र चक्षूरूपत्वाभाव एव चक्षुषोऽभावश्चक्षुरभावादेवान्धतेति। तत्र पूर्णे बिम्बे दर्शनोपाधिना पूर्णत्वं खण्डितत्वं तदुपाधित्वे चक्षुः कल्पनाया अभावस्तदभावोपाधिना चक्षूराहित्यं ततश्चान्धतेति उपाधिभेदेनेमाः कल्पनाः। तत्रापि निमित्तकल्पनाभिप्रायेण ब्राह्मणे उच्यते "प्राशित्रमस्याक्षिणी निर्जघाने"ति।

प्राशित्रं यज्ञे दर्शपूर्णमासेष्टियागे ब्रह्मणो दीयमानो भाग: पुरोडाशरूपस्तदाधारत्वात्पात्रमपि तच्छब्दबोध्यम्। तदेव गृहीत्वा देवकर्तृके यागे भगो ब्रह्मासीत्तस्मै तद्भागो दत्त: स च तेनाक्ष्णा गृहीत:। अक्षिरूपस्यैव तद्भागस्याक्ष्णा ग्रहणमक्ष्णा दर्शनमिति यावत्। ततस्तस्याक्षिणी निर्जघान स भाग:। अक्षिरूप एव स भागो भेदकल्पनयाऽक्ष्णा गृहीत इत्युक्ति:। तत्र प्राशित्रभागरूपत्वेऽक्षिभावो विनष्ट:। तदेव गृहीत्वोच्यते दृष्टेन भागेनाक्षि विनष्टमिति अक्षिभावविनाश एवाक्ष्णोर्विनाशस्ततस्तस्यान्धतेति कल्पना।

एवं पूष्णोऽपि विषये। तत्रत्यबिम्बस्यार्धभागद्वयकल्पने तत्र हस्तकल्पना। आदित्यबिम्बं हि आपातदृष्टया प्रादेशमात्रम्। अतएव तस्य बिम्बस्याभिप्रायेण याज्ञे कर्मणि प्रादेशस्योपयोगस्तत्र तत्र। यथा दर्शपूर्णमासयोरुच्यते श्रौतसूत्रे "भूमौ प्रादेशं कुर्यादिति"। एवमेवान्यत्र। पुरुषसूक्ते बिम्बपरिमाणाभिप्रायेणोच्यते "स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुल"मिति। तस्य बिम्बस्यार्धभागद्वयकल्पने प्रत्यकं पञ्चाङ्गुलित्वम्। पञ्चाङ्गुलियुक्तत्वेन हस्तकल्पना। तथा सति उक्तप्रकारेण पञ्चाङ्गुलिभागद्वयं हस्तौ पूष्ण:। निरुक्तरीत्या वाहनमायुधमवयवादि च देवतास्वरूपाभिन्नमिति पञ्चाङ्गुलिभागेनोपाधिना स एव पूषा देव:। उक्तरीत्या तन्मध्यवर्त्यादित्यबिम्बं प्राशित्रं तच्च पूष्णा हस्ताभ्यां गृहीतं तद्धस्तरूपं तत्तेन गृहीतमिति कल्पना। उक्तभागद्वयस्य पञ्चाङ्गुलित्वेन तस्य यथा हस्तशब्देन ग्रहणमेवं हस्तशब्देन कराणां किरणानामपि ग्रहणम्। अतएवादित्यस्य सहस्रकर इति वर्णनम्। किरणानां कङ्कतिकाया: केशविवेचनभागवद्दन्तत्वेन वचनम्। एवं सति पूष्णा प्राशित्रस्य हस्ताभ्यां ग्रहणं नाम च दन्तैर्ग्रहणम्। दन्तैर्ग्रहणस्य चर्वणशब्दवाच्यतेति उच्यते। पूष्णा स प्राशित्रभागो दन्तैश्चर्वित इति तद्वशतस्तस्य दन्ता: पेतुरित्यदन्तक: सञ्जात इति। तस्मिन्भागे रश्मिराहित्यं स्वत एव वर्तमानं पूष्णा हस्तरूपदन्तंश्चर्वणात्तस्त्वमिति कल्पना। अतएव तस्य मध्यवर्तिनो बिम्बस्य रश्मिराहित्येन तस्य च विष्णोर्मध्यमपदत्वेन वचनात्तदभिन्नत्वं विष्णोरिति गृहीत्वा विष्णोर्विशेषणमुच्यते शिपिविष्ट इति। निरुक्तकारेण शिपिविष्ट इत्यप्रतिपन्नरश्मिरित्यर्थ उक्त:। औपमन्यवेनाचार्येणेदं नाम कुत्सार्थीयमित्युच्यते, तदर्थश्च दुर्गाचार्येण निरुक्तानुसारेण शेप इव निर्वेष्टित इत्युच्यते। एवं च पुष्णोऽदन्तकभावत्वेन तस्य सूक्ते पिष्टादनकर्तृत्वेन वर्णनं, तदुच्यते "य एनमादिदेशति करम्भादिति पूषणम्। न तेन देव आदिशे" इत्यत्र करम्भादिति पुष्णोविशेषणमुच्यते करम्भमत्तीति करम्भात्। संयुक्तं यवपिष्टं करम्भ:। तदत्तीति

स करम्भात्। सर्वं वाक्यं सावधारणमिति न्यायेन पिष्टमेवाशीति। तदेव ब्राह्मण उच्यते "पूषा प्रपिष्टभागो अदन्तको हि स" इति। एवञ्चोक्तरीत्या भगस्येव पूष्णोऽपि प्राशित्रसम्बन्धेनादन्तकत्वमिति देवयागे तस्य ब्रह्मर्त्विक्त्वेन-प्राशित्रसम्बन्ध इति भाष्ये प्रोच्यते। एवं सवितुरपि हस्तच्छेदः प्राशित्रसम्बन्धात्। देवताभिस्तस्य हिरण्मयहस्तयोजनेन स हिरण्यपाणिरिति सूक्तेषु वर्ण्यते। उक्तस्थलखण्डितबिम्बत्वेन भगत्वमर्धभागद्वययुतत्वेन पूषत्वं यथा कल्प्यते एवं तद्बिम्बमध्यरूपपूर्वायोगित्वेन तदुपाधित्वेन तस्येन्द्रत्वकल्पना। अतएव तस्य आखण्डलशब्देन वचनं "आखण्डल प्रहूयसे" इत्यत्र। आ समन्तात् अर्थादुभय-लोकयोरर्धाद्यत्रोदेति यतश्चोदेतीत्युभयत्र खण्डश एव लाति गृहीतो भवति न पूर्णत्वेनेति। तस्य पूर्णत्वेन दर्शनाभावेन तस्यास्तित्वसन्देहः सूक्ते उच्यते "नेन्द्रो अस्तीति नेम उ त्व" इत्यत्र। तस्यादर्शनादभावे प्राप्ते कार्यमुखेन तदस्तित्वं सजनीयसूक्ते उच्यते। अतएव ब्राह्मण उच्यते "ऋषयो वा इन्द्रं प्रत्यक्षं न ददृशुः, वसिष्ठ एव प्रत्यक्षं ददर्श, सोऽबिभेदिन्द्रः स मामन्येभ्यो वक्ष्यती"त्यादिना।

तस्मिन्नुदयबिम्बे आग्रयणशब्दव्यवहार इत्यन्यत्र विस्तरेण निरूपितम्। इदमेव मध्यवर्तिबिम्बं गृहीत्वोषसि स्त्रीत्वकल्पना। उषःकाले हि तिर्यक्प्रसारि-व्यायततेजोदर्शनेन सुमेर्वादौ तत्रोरुत्वेन कल्पना। तदेव चादाय उर्वशीत्वं तस्याः। तस्य शब्दस्य निर्वचनं निरुक्तकारेणोच्यते "ऊरुभ्यामश्नुते ऊरुर्वा वशोऽस्या" इत्युर्वशीति। उषसि ऊरुत्वकल्पनायां लोकद्वये मध्यवर्तित्वसाम्येन तत्र बिम्बे भगत्वकल्पना। तदेव गृहीत्वा मन्त्रे "जनन्त उषसो भगम्" इति वर्णना। तद्वशत एव तस्याः स्त्रीत्वेन कल्पना। तस्मिन्नेव मध्यवर्तिनि बिम्बे पुमिन्द्रियत्वकल्पनापि। तदेव गृहीत्वोच्यते "इन्द्रस्येन्द्रियम्" इति। उभयविध-कल्पनायास्तत्रैवैकस्मिन्विषयत्वमित्युभययोगकल्पना अश्वमेधे जायोपनिपातने-नोच्यते सा परस्तात्प्रदर्श्येत। सर्वथैतस्मिन्मध्यवर्तिनि बिम्बे नानाविधाः कल्पना नानाविधैर्निमित्तैर्वेदे उच्यन्त इति।

सोमयागे बहिष्पवमानस्तवो बहिर्योगादिति "यथा वै स्तोत्रमेवं शस्त्रं, स्तोत्रमग्रे शस्त्रा"दित्यतिदेशप्राप्तस्याज्यप्रउगशस्त्रे विपर्यास इत्यादिकमप्यु-क्तबिम्बमध्यवर्तिबिम्बनिबन्धनत्वेनैवोपपद्यत इति पूर्वं निवेदितम्। कर्मविचार-निरूपणे पुनर्विस्तरान्निरूपयिष्यते। इदमेव बिम्बमभिप्रेत्य तल्लाभार्थं देवासुर-युद्धादिवर्णना। इदमेव बिम्बं लब्धुं शूद्रार्ययोश्चर्मणि व्यायमनमित्यादिकं कर्म सूच्यत इति दिक्।

एतावता बहुभिर्मन्त्रैर्ब्राह्मणभागैश्चादित्यस्यैव स्तवो वेदे इति प्रति-

पादितम्। शब्दभेदेन देवताभेदवादिनां मतमप्यविरुद्धमेतन्मतेन। ते ते शब्दा विभिन्नेन निमित्तेनादित्यस्यैव बोधका इत्यादित्यस्यैव तानि नामान्यौपाधिक-भेदश्च तस्येति वर्णनासु न विरोधः। एवं सतीन्द्रेणोष आदीनां प्रवर्तनमुत्पादनं मारणमित्यादीनां विरोधाभावः। निरुक्तमतमपि न विरुद्धमनया कल्पनया। यथा शब्दानामुपाधित्वं गृहीत्वा यथैकस्य सत आदित्यस्य भेद इत्यौपाधिकनानात्वं तस्य, तथा लोकमुपाधिं गृहीत्वा देवतात्रयवादोऽपि नैतन्मतविरुद्धः। अध्यात्म-वादोऽपि न विरुद्धः। यत एकस्य निर्विशेषस्यात्मनो भेदं विना स्तुत्यादेरसंभवे-नौपाधिकत्वेन भेदं गृहीत्वा तस्य स्तवे उपाध्यर्थं जागतिकाः सर्वे पदार्था उपाधित्वेन प्राप्तास्तत्र सर्वादित्वेन तेजस उपाधित्वेन ग्रहणे तदुपलम्भ आदित्य इति तमुपाधिं गृहीत्वा स्तवो वस्तुत आत्मन एव स्तव इति। एवं च प्राचीनमतैर्नैतन्मतस्य विरोधः किन्तु एतन्मतमेव प्राचीनं सर्वसम्मतं चेति।

आदित्यवर्णनस्थलेऽपि सर्वा वर्णना विशिष्टदेशकालस्थस्यैवादित्यस्येति गृहीत्वा पुनर्मतभेदो नूतनैराश्रीयते। यद्यपि निरुक्तकारैर्वेदे प्रतिपाद्यानामनेक-कथानां मध्ये वृकमुखतो वर्तिकामोचनकथा आदित्यसम्बन्धितया प्रकाशिता। तत्रापि कस्य केन मोचनं कुत इत्यस्मिन्नंशेऽश्विभ्यां वर्तिकाया वृकमुखतो मोचन-मित्यंशस्य संमतत्वेऽपि वृकवर्तिकास्वरूपविषये मतभेदः। तत्र वृकत्वमादित्यस्य वर्तिकात्वं रात्रेर्वोषसो वेति न सम्यक् निर्णय इति पूर्वं प्रतिपादितम्। तत्रापरासां वेदे वर्णनानां न सम्यगुपपत्तिः प्रदर्शिता। अश्विभ्यामनेकेषां संकटमग्नानां नौकादिसाहाय्येनानेकैर्दिवसैर्मोचनमित्यादीनामुपपत्त्यभावात्। अपरे पुनरुषस-मेव गृहीत्वा देवाः, सूर्यः, प्रातःकालो, दिनं, वसन्त इत्यादिकानां जननी, सरण्या अश्विनीरूपं गृहीत्वा तस्यापत्यद्वयस्य उत्पत्तिः, सूर्योदये तदभावः, सूर्यायाः सोमेन विवाहो वृषाकपाय्या बलीवर्दानामिन्द्रेण भक्षणमुर्वशीप्रभृतिसम्बन्धिवर्णना उषःपरा एवेति। कथानामुषःपरतयैव निर्णयार्थं तेषां प्रयासः। सा चोषास्तेषां-ध्रुवस्थानीयोषोऽपेक्षया भिन्नस्वरूपा मध्यवर्तिदेशसम्पृक्ता दैनन्दिनीति तेषा-मभिप्रायः।

एवं पर्जन्यकल्पनया सूक्तानामर्थनिर्णयः। यथेन्द्रेण सोमपानेनासुरविनाशः। तत्र विनाश्या असुरा वृत्रादिरूपा मेघरूपास्तेषां हननेनेन्द्रेण पर्जन्यो वर्ष्यत इति। वृत्रवधेन नदीनां मोचनं कृतमित्यर्थस्य न सम्यगुपपत्तिः। नहि मेघेन नदीनां रोधः सम्भवति। एवमपरापराः सर्वाः कथा मेघपरत्वेन न सूपपन्ना भवन्ति इति।

तृतीयः प्रकारो वसन्तप्रारम्भप्रकारवर्णनेनेति। तत्र हैमे कालेऽप्रवृद्धतेजस आदित्यस्य वसन्तकाले प्रवृद्धतेजस्कतया च्यवानस्याश्विभ्यां युवत्वं संपादनम्।

अत्रेस्तमसो मोचनम्, कूपे पतितस्य मोचनप्रभृतिवर्णनानामुपपत्तावपि वसन्तोपपत्त्या बहूनि वर्णनानि नोपपद्यन्ते। वन्दनात्रिभुज्युप्रभृतीनां तमसः सकाशतो मुक्तिरुच्यते तच्च वसन्तोपपत्त्या न युज्यते, नहि शीतकाले तेजसोऽल्पत्वं-तम इति वर्णयितुं शक्यम्। यत आदित्यरूपवन्दनप्रभृतीनां मोचनं वसन्तकाले सूर्यस्य तेजस्विरूपत्वमिति न वर्णयितुं शक्यं, तमस्सकाशतस्तस्य मोचनरूपत्वाभावात्। भुज्योर्नौकाभिर्दिनरात्रित्रयेणाश्विभ्यां मोचनमुच्यते तन्नोपपद्यते, दीर्घतमा दशमे युगे जीर्णः सञ्जातस्तस्यापत्तितो मोचनमश्विभ्यां कृतमित्यस्यानुपपत्तिः, तथोक्तस्य भुज्योरश्विभ्यां मोचनं कृतं यस्मात्स्थानात्तत्स्थानमनारम्भणं तम इत्युक्तं तस्यानुपपत्तिरिति द्यौविकवसतिस्थानकल्पनयैतस्य सर्वस्योपपत्तिरिति साऽवश्यमाश्रयणीयेति। अस्यामप्युपपत्तौ भूयस्यो वर्णना उपपद्यन्ते, नैतावताऽनयाऽनुक्रमणिकाकारमतेन विरोधः परन्तु अस्या उपपत्तेः केवलं सुमेरुसम्बन्धित्वेनैव प्रवृत्त्या वेदोक्तसर्वासां वर्णनानां सङ्ग्रहासम्भवः। नहि आदित्योषोदेवप्रभृतीनां वामत्वेन वर्णनस्य प्राङ्प्राच्यादिशब्देन व्यवहारस्य सम्यगुपपत्तिस्तत्पक्षे। किञ्च दिने ऋतुत्रयपर्यन्तं तापयुक्तता, रात्रौ सर्वां रात्रिं यावद्वृष्टिसम्बन्धस्य 'देवानां माने' इत्यादिषु वर्ण्यमानस्यानुपपत्तिः। नहि दक्षिणायने मृतस्य चन्द्रमःसायुज्यमुत्तरायणे मृतस्यादित्यसायुज्यमित्यस्य वर्णनमेतत्पक्षे उपपद्यते, 'अस्य वामस्ये'ति सूक्ते "भूम्या असुरसृगात्मा क्व स्विदि"ति पृथिव्याः प्राणादिविषये सन्दिग्धत्वेन वर्णनस्याप्यनुपपत्तिः केवलं, किन्तु तेषां तादृशानां तत्सूक्तीयवर्णनानां देवान् प्रत्यपि निहितत्वं गुप्तत्वं रहस्यरूपत्वमित्यस्य वर्णनस्याप्यनुपपत्तिः। ब्राह्मणे वेदिद्वयवर्णनस्य "द्वे वेदी भवतो द्वावेव लोकौ दक्षिणान्योत्तरान्योत्तरया देवलोकमवरुन्धे दक्षिणया पितृलोकमिति" वर्णनस्याप्यनुपपत्तिः।

एवं बहूनि स्थलान्यनुपपन्नानि भवन्ति ध्रुवस्थानीयवर्णनमात्रपरत्वे। यानि च तत्साधकानीत्युच्यन्ते तेषामपि मध्ये अनेकेषां तन्मात्रसाधकत्वाभावात्। तथाहि तत्रोच्यते वैदिकी उषा मासादिपर्यन्तकालस्थायिनी ध्रुवस्थानीयत्वं साधयति इति। तदेतन्न ध्रुवप्रदेशमात्रसम्बन्धी भवति। ध्रुवप्रदेशेत्यनेन देवलोकनिवाससुमेरोर्ग्रहणात्। नहि सुमेरावेव मासादिकालिकत्वमुषसः किन्तु सुमेरुविरुद्धः कुमेरुरूपदेशस्तत्रापि तस्यास्तादृशत्वात्। यत्तु उषसो ध्रुवप्रदेशे दिनाधिककालिकत्वख्यापनाय मन्त्रस्योद्धरणं तत्तस्या अधिककालिकत्वं बोधयदपि न सुमेरुरूपध्रुवप्रदेशसम्बन्धितामुषसो बोधयति। तथाहि—

"तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य।
यतः परि जार इवाचरन्त्युषो ददृक्षे न पुनर्यतीव" ।। इति।

एतस्यां सूर्योदयात्पूर्ववर्तिषु बहुस्वहस्सु उषसो दर्शनमुच्यते तच्च न दैनन्दिनोषःपरं भवितुमर्हति, तावता तस्य न सुमेरुमात्रसम्बन्धसाधकत्वम्। यतोऽस्मिन्नेव मन्त्रे इच्छब्दस्य प्रयोगः। तेन शब्देन मनुष्यनिवासरूपपृथिवीरूपकुमेरुसम्बन्धस्य प्रतीतेः। तानि अहानि इत् कुमेरौ बहुलान्यासुर्यानि सूर्यस्योदयादिति शेषः, प्राचीनमुदितानि। प्राचीनशब्देन प्रागञ्चनं यथैवं प्राचीनशब्दो नात्र कालवाचकः किन्तु दिग्वाचको दिक्सम्बन्धेन प्रवृत्तः प्रागञ्चनमाह। एकवचनप्रयोगादिदमव्ययम्, तदुक्तं प्राचीनं प्रागञ्चनं यथा तथा इति सूर्यस्य शब्दस्य प्राचीनमित्यत्रावधित्वे हि पञ्चम्यापत्तिः स्यात्। सूर्यशब्दस्य तदुदयपरत्वेऽपि सैवावस्था। उदिताशब्दस्योदययुतार्थबोधकत्वेऽपि न तस्य सूर्येण सम्बन्धः। सामानाधिकरण्याद्यच्छब्दवाच्यदिनयोगस्यैव तेन बोधनात्। तस्मादत्रोदये इति शेषः। सूर्यस्योदये उदयावसरे प्राचीनभावेनोदितानि सुमेरौ बहुलान्यासन्। अथवा सूर्यस्येति कर्मणि षष्ठी तस्य परवर्तिनाऽर्थेन सम्बन्धः। यतो गच्छतः सूर्यस्य गच्छन्तं सूर्यं परिचरन्ती हे उषः त्वं ददृक्षे दृष्टाऽभूः। अत्र पूर्वार्धसम्बन्धाय येषु दिवसेषु इति शेषः। अथवा यतः पदमावर्त्य यतः सूर्यस्य यतो येषु इति अर्थो व्याख्येयः। न केवलं दिवसार्थकत्वं यत इति गृहीत्वाऽत्रनिर्वाहः। दृष्टान्ताननुगुण्यापत्तेः। जार इव परिचरन्ती नयतीव गच्छन्तीव ददृक्षे। एवं सति इयमुषा गच्छतोऽपि सूर्यस्यानुसारेण यती गच्छन्ती न ददृक्षे किन्तु यतोऽपि सूर्यस्य परि आ समन्तात् परस्ताच्चरन्ती सञ्चरन्त्येव ददृक्ष इति। जार इवेत्यनेन न सर्वथा तदनुसरणमिति। तावता उषसो बहुलदिनपर्यन्तं परितस्सञ्चरणेन चरणार्थानां बहुलदिनानां वर्णनेन बहुदिनव्यापित्वावगमेऽपि नेदं सुमेरुस्थलीयं वर्णनं इत्यदस्वारस्यात्। एवं चैतद् बहुदिनव्यापित्वमुषसो बोधयदपि उभयसाधारणमपि तत् ध्रुवप्रदेशमात्रसम्बन्धीति वर्णनं वेदस्य ध्रुवप्रदेशसम्बन्धिबोधकत्वमिति ग्रहणात्। एवं परो द्वितीयो मन्त्रस्तदर्थस्याप्येषैव गतिः। तथाहि स मन्त्रः—

पर ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम्।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि॥

अत्र वरुणं प्रत्युच्यते—मदीयानि ऋणानि परः परस्तात्सावीः विदूराणि कुरु। हे राजन् वरुण अन्यकृतेनाहं मा भोजम्। अन्याधीनत्वं मम मास्तु, इत् सन्निकृष्टे प्रदेशे भूयस्य उषासो नु अद्यापि अव्युष्टा न सम्यगुदितास्तासूषस्सु नोऽस्माञ्जीवाञ्जीवयुक्तान् यथास्माकं जीवनं विपन्नं न स्यात्तथा कुरु इति। एवं चात्राव्युष्टानामित्यनेनानुदितानां ग्रहणेऽपि तासां विभिन्नदेशीयानां विभिन्न-

कालिकीनामसन्ततानां ग्रहणं न प्राप्नोति किन्तु सातत्येन कृतकरिष्यमाणोदयाना-मेवेति। एतावता एता भूयस्य उषसो न सुमेरुमात्रसम्बन्धिन्यः किन्तु कुमेरावपि तत्सत्त्वम्। किञ्च प्रकृते मन्त्रे कुमेरुमात्रसम्बन्धितैव प्राप्नोति वरुणस्य संबोधनात्, वरुणश्च पश्चिमदिक्सम्बन्धी। एवं च पश्चिमदिक्सम्बन्धिनामेवात्रोषसां ग्रहणम्। न चात्र तर्हि सुमेरावस्तोत्तरवर्तिनीनां सान्ध्यतेजोरूपाणां तासां ग्रहणमिति तासां सुमेरुमात्रसम्बन्धिता सुमेरावस्तावसरीयत्वं वरुणस्येत्यपि वर्णयितुमत्राशक्यम्। अद्याप्यव्युष्टा इत्यनेनाकृतोदयानां तदानीमसतीनां तासां वर्णनात्। नहि अस्तावसरेऽस्तोत्तरं सान्ध्यन्तेजोऽदृष्टं परस्तादृश्यं भवति किन्तु सत एव तस्य क्रमेणावहीयमानत्वमिति न तद्रूपाणां तासां तदानी ग्रहणसम्भवः। सुमेरौ पश्चिमायां सूर्यस्योषःप्रभृतीनामस्तेऽपि कुमेरौ तत्रोदयात्। एवं च वरुणसम्बन्धादुदेष्यन्तीनामुषसां वर्णनादिदं वर्णनं कुमेरुसम्बद्धमेव न सुमेरुसम्बद्धम्।

न चैवं सति सर्वत्र कुमेरुसम्बद्धत्वमेव तासामनेकासामुषसामिति भवति, सुमेरुकुमेरुरूपोभयसाधारण्येनापि तासां वर्णनदर्शनं यथा—

"कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान्।
अनु पूर्वाः कृपते वावशाना: प्रदीध्याना जोषमन्याभिरेति"।।

अत्र पूर्वाः शब्दः कालपर एवेति एतस्य वर्णनस्योभयसाधारण्यम्। यतोऽत्र या उदिता याश्चोदेष्यन्त्यस्तासां मध्ये समया सम्यक् गमनशीला वर्तमाना कियात्या कियत्या कियत्या मात्रया कालमात्रया कालेनेत्यर्थः, भवाति भवति। एषा वर्तमाना कियता कालेन संपूर्णोदिता स्यात्। अथवा कियती कियत्संङ्ख्याका भवति। यद्यतोऽनेका उषसो व्युष्टा इतः पूर्वं परस्तान्नूनं निश्चयेनोदेष्यन्ति, तन्मध्ये एषा समया सम्यग्गमनशीला वर्तमानेत्यर्थः। कियती, अनेका उदिता अनेका उदिता भविष्यन्ति तन्मध्ये वर्तमानायाः सङ्ख्याविज्ञाने निश्चयेनावशिष्टानां ज्ञानं स्यादिति। एका गता वर्तमाना पश्चादागच्छति अहमागतेति ब्रुवाणेवापराभिर्गच्छति तूष्णीमित्येवं क्रमो बहुकालं दृष्टः। एवं सति एषा कियती यद्वशतस्तासां सङ्ख्यानेनावसानं विज्ञातं स्यादुदयश्चादित्यस्य विज्ञायेतेत्यर्थः। एवं चेदं वर्णनमेकस्थानेन सातत्येन वर्तमानानामुषसामिति भवति। तच्च सुमेरुकुमेरुसाधारणमपि वक्तुरभिप्रायेण विशेषस्थलं स्यात्। एवं बहुषु स्थलेषु साधारण्यमप्युषसां वर्ण्यते। एवञ्चोषसां सातत्येन बहुत्ववर्णनं न सुमेरुप्रदेशीयत्वस्यैव बोधकं स्यादिति।

एवं "शश्वत्पुरोषा व्युवास देवी" इत्यत्र पुराशब्दो न कल्पान्तरार्थकः किन्तु इदानीमिव पूर्वमपि व्युवास इत्येवं बोधयति। यथोषसां दीर्घत्वमनेककाल-

सम्बन्धित्वमेवं तमसोऽप्यनेककालसम्बन्धो न ध्रुवप्रदेशमात्रसम्बन्धी भवति। उभयत्र ध्रुव उभयपार्श्वयोरत्युच्चप्रदेशरूपसुमेरुकुमेरुसम्बन्धात्। एवमपां निरोधादिकमप्युभयसम्बद्धं न ध्रुवप्रदेशमात्रं बोधयितुमलम्। किञ्चापोऽत्र सूक्ष्माकाराणि जलानि सर्वस्मिन् ब्रह्माण्डेऽप्रतिहतप्रसराणि तद्वशतोऽपि ध्रुवप्रदेशसम्बन्धित्वसाधनं न भवितुमर्हति। यतोऽत्र वेदे वृत्रनिरुद्धा आपो न लोके प्रसिद्धाः स्थूलाः सूक्ष्मा वा आपः, किन्तु अन्यरूपाः। यतो वृत्रादयः सर्वे वेदप्रतिपाद्या असुरा इन्द्रेण विनाश्या वर्ण्यन्ते। इन्द्रश्चादित्यात्मा, आदित्येन तु न वस्तुसतां तेषां नाशनं किन्तु तस्य तेजोरूपत्वेन तेजस्तमसोरेकत्रानवस्थितेस्तेजोरूपस्येन्द्रस्य सत्तादशायां तत्र तमसोऽनवस्थानेन तेन तस्य विनाश इति कल्पना। एवं सति इन्द्रविनाश्या असुरास्तमोरूपा भवेयुस्तैश्च तमोरूपैः स्वरूपसतां लोके जलत्वेन प्रसिद्धानामपां निरोधस्यासम्भवेन वृत्रनिरुद्धा आपोऽत्राव्यक्ततेजोरूपा एव वक्तव्याः। तासामव्यक्ततेजोरूपाणामपां निरोधोऽन्धकारस्य स्वल्पाधिककालवर्तिना तमसा क्रियमाणः। तमसां च न्यूनाधिककालिकता देशभेदादितः। अधिककालिकतमःसत्ताया उभयदेशसाधारण्येन ध्रुवप्रदेशरूपसुमेरुसम्बन्धमात्रप्रतीतेर्वर्णयितुमशक्यत्वात्। एतेन तस्य तमोमयकालस्य वेदे वचनं यथा नैकमात्रसम्बन्धसाधकमेवं पारसीकग्रन्थेषु तत्त्वमपि नैकदेशमात्रसाधकमिति।

एवं युगशब्दो मानुषा दैव्येत्यादिविशेषणयुक्तत्वेन वेदे नपुंसकलिङ्गतया प्रयुज्यमानो न केवलं पृथिव्या उत्तरपार्श्वीयसुमेर्वादिरूपध्रुवसम्बन्धिप्रदेशसम्बन्धं प्रतिपादयति, किन्तु तस्या दक्षिणपार्श्वीयोच्चस्थलरूपकुमेर्वादिप्रदेशसम्बन्धमपि प्रतिपादयति। तथाहि तत्र युगपदार्थः प्रथमतो निर्णेयः। यद्यपि युगशब्दस्य युज्धातोर्निष्पादेन तस्य योजनं सम्बन्धनमित्यर्थकयोगार्थकत्वेन युगं द्वयमिति प्रतीयते। किं तद् द्वयमिति विचारेऽनिर्णीतयत्किञ्चिद्द्वयं गृहीत्वाऽहोरात्रे मासद्वयमृत्वोर्द्वयमित्यादिकं नानाविधमर्थं गृहीत्वा वर्णनं न युक्तम्। नच तस्य कालबोधकत्वं गृहीत्वोक्तार्थकत्ववर्णनं न विरुद्धयत इति वाच्यं, तथा सति वत्सरद्वयार्थकत्वमपि स्यात्। किञ्च दीर्घतमसो विषये दशभिर्मासैर्वृद्धत्ववर्णनं दाशमासिकवत्सरस्वीकारद्वारा ध्रुवप्रदेशसम्बन्धसाधकमिति न स्यात्तत्र वत्सरार्थकत्वेन दशभिर्युगैर्विंशतिवत्सरैरित्यप्यर्थो वर्णनीयः स्याद्वर्णितश्च स पाश्चात्यदेशीयैः "पारम्परिकं जीवनं" 'पिढी' "पुस्त" इत्यादितदीयभाषया। एवं सति युगपदार्थानिर्णयेन दीर्घतमस्सम्बन्धिमन्त्रस्याव्यक्तार्थत्वमेव न तु ध्रुवप्रदेशादिसम्बन्धसाधकत्वम्। किञ्च तत्र द्वितीयार्थस्याव्यक्तार्थत्वं स्वीक्रियत एव। अथ चोक्तार्थसाधकत्वं निराबाधमित्युक्तिरयुक्तैव स्यात्। युगशब्दस्यानेकार्थत्वेनोक्तां-

शबपातोऽर्थनिर्णयासम्भवात्। तदर्थं तन्मन्त्रार्थस्तावद्विचार्यते। अयं हि मन्त्रः—

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः॥

अत्र युगपदस्यार्थः किं सामान्यतो मानुषकं जीवनमित्यभिप्रायस्तथा सति दशमे युगे इत्यत्र युगशब्दस्य वत्सरद्वयमित्यर्थं गृहीत्वा दशमं युगं विंशतिवर्षाणि तत्रान्तिमे भाग इत्यर्थः। अत एव तदीयकथाया अप्युपपत्तिः। तदीया कथैव-मुच्यते—दीर्घतमा उचथ्यस्याङ्गिरसस्य ममतानामिकायाः सकाशतः सञ्जातः पुत्रः प्रद्वेषिण्या तन्नामिकया भार्यया कृतपरिणयोऽपत्यान्युत्पाद्यापत्यैर्जराजीर्ण इति तस्य भरणमनिच्छद्भिस्तस्य समुद्रे प्रक्षेपे सोऽश्विनौ तुष्टावाश्विभ्यां तस्य जीर्ण-स्यान्धस्य मोचनमिति। सच बृहस्पतिशापेनान्ध इति। एवं च तस्यापत्योत्पत्ति-योग्यकालपर्यन्तं जीवनमपेक्ष्यते तच्च युगशब्दस्य वत्सरद्वयमित्यर्थकत्वे कथं चन न संभवति। विंशतिवत्सरपर्यन्तं जीवने विवाहस्यापत्योत्पत्तेश्च सम्भवात्। परन्त्वत्र कथायां जीर्णस्यान्धस्य भरणमनिच्छद्भिरपत्यैः समुद्रे परित्यागस्यानुप-पन्नत्वं, नहि विंशतिवर्षमध्ये कृतापत्योत्पादस्यापि अपत्यैस्तस्य भरणोपयोग्यायुष्य-लाभसंभवस्तदर्थं युगशब्दस्य वत्सरद्वयार्थत्वं परित्यज्य ज्यौतिषिकवेदाङ्गज्यो-तिषरीत्या पञ्चसंवत्सरमिति रूढार्थः स्वीकार्यः। तथासति दशमयुगेन पञ्चा-शद्वर्षाणि गृहीतानि भवेयुस्तथासति तावति कालेऽपत्यानां पितृसम्भरणयोग्य-कालप्राप्तिसम्भावना जराजीर्णत्वस्यापि संभावनात्। परन्त्वस्मिन्नर्थेऽपि अपामर्थं प्रति गन्तृत्वं तत्सारथित्वं च दीर्घतमस अर्थाविज्ञानात् स्पष्टार्थं न भवति। वेदे आदित्यस्यैवैकस्य स्तव इति प्राचीनमतविरोधश्चेति।

तस्मादत्रादित्यपरत्वेन व्याख्यानं, तथा सति दीर्घतमाः उचथ्यस्य ममतायाः पुत्र आदित्य एव। स च ममतायाः पुत्र इति रात्रिसम्बन्धी प्रतीयते। ममताशब्दो रात्रिं बोधयति। ममतेति शब्दे 'मेति मता' ममतेति व्युत्पत्तेः। तत्र मेति मशब्दस्य कृतह्रस्वस्य ग्रहणमर्थश्च शून्यमभाव इति। यथा मख-शब्दस्य व्युत्पत्तिर्गोपथब्राह्मण उच्यते मा खो मख इति। तत्र खेत्यनेनाकाश-रूपं शून्यमभावरूपमुच्यते। तस्य पुनर्माशब्देनाभाव उच्यते। एवं सति अभावस्याभावरूपो मखशब्दार्थः। सचाभावः कस्येति विचारे मखशब्दस्य यज्ञनामसु निघण्टौ पाठेन यज्ञार्थकत्वं, यज्ञश्चादित्यरूप इति मखोऽप्यादित्यरूप एव। तथा सत्यादित्यस्याभावरूपत्वं मखशब्देनोच्यते इति प्रथमोऽभावस्तेजसो वक्तव्यः। एवं च तेजसोऽभावस्याभावस्तेजोरूप इति मखशब्देन तेजःपूर्ण-त्वेनादित्य उक्तो भवति। एवं सति तेजसा पूर्णत्वस्य मखशब्देन ग्रहणे

तद्राहित्यं गर्तशब्देन वर्ण्यमानं सङ्गच्छते। तदुच्यते मैत्रावरुणसूक्ते "दानुमत्या बृहन्तं गर्तमासाथे" इति। एवं च रात्र्या गर्तरूपत्वे तस्या मेत्येवं तेजोऽभावरूपत्वं गृहीतं भवति। मतेत्यनेन स्वीकृतेत्यर्थेन कल्प्यमानता भवतीति ममता तेजोऽभावरूपिणी रात्रिः स्त्रीत्वेन कल्पिता। तस्या आङ्गिरसस्य उचथ्यस्य सकाशतः पुत्रो मामतेयो दीर्घतमा इति। स च दीर्घतमा इति नामवशतो दीर्घतमोरूपः, दीर्घतमश्च भुवः पार्श्वद्वयेऽत्युच्चस्थाने सुमेरुकुमेरुरूपोभयोरपि संभवति, तथाप्यत्र मन्त्रे स सुमेरुस्थलीयो भवति आङ्गिरसपुत्रत्वाभिधानात्। ऐतरेयब्राह्मणे प्रजापतेर्दुहित्रारोहकथायां दुहितुः सान्ध्याया उषसः कुमेर्वभिप्रायेण तस्यामारोहात्प्रजापतिना तत्रास्तमयोत्तरं वर्तमानैर्देवैं रुद्रद्वारा वेधे विद्धः प्रजापतिर्नक्षत्रात्मनावस्थित इति वर्णनात्तस्य कुमेरावस्तोत्तरं सम्भवो यतो रोहिण्या देवेषु सुमेरौ तस्योदये कुमेरावस्तमये परवर्तिमृगनक्षत्रस्य तत्र सान्ध्योषसि सत्त्वं, तस्य दर्शनतस्तत्रत्यैर्वृष्ट्यागमनस्यानुभवात्तस्य ग्रीसदेशीयपुराणे पर्जन्यनक्षत्रत्ववचनादृग्वेदे कुमेरौ सर्वां रात्रिं व्याप्य वृष्टिवर्णनस्य दर्शनेन तादृशत्वं विज्ञायते। एतद्विषये बहुलो विचारः पूर्वं प्रदर्शित एव। अतएव स प्रजापतिर्विद्धस्तस्य रेतः प्रवृत्तं देवताभिर्वैश्वानराग्निसाहचर्येण तत्सन्तापने घनीभावो यः संपन्नस्तस्यादित्यरूपत्वं ब्राह्मणे उक्तम् "यत्प्रथममुददीप्यत सोऽसावादित्योऽभवदि"ति। तत्र यत्प्रथमं पूर्वाञ्चनं तेज उद्दीप्तं स कुमेरुस्थ आदित्योऽभवदिति। अत एव द्वितीयमुद्दीप्तस्य वारुणिभृगुरूपता। तत्परस्ताद्वर्तिनो येऽङ्गारा ज्वलन्त उददीप्यन्त तेऽङ्गिरसोऽभवन्नित्युक्तिः। तेषामङ्गिरसामुचथ्यो नामैकः। स उचथ्यः उक्थ्यः केवलं शब्देन बोधनीयः। तस्योक्ताभावरूपिण्या ममतायाः पुत्रोऽपि दीर्घतमानामको दीर्घतमोरूपः, तस्यापि मातापितृवत्कल्पितमेव पुत्रत्वम्। तस्य तमोरूपस्य जीर्णत्वं रात्र्या अवसाने परदिनप्रारम्भे भवेत्, स च रात्र्या अवसानरूपः परदिनप्रारम्भो मन्त्रे उच्यते 'दशमं युग'मिति। तत्रोत्पत्तेः परस्ताज्जीर्णित्वस्योत्पत्तिमारभ्य जीर्णित्वावधिः कालो दश युगानीति निर्दिश्यते। एवं सति कथं तस्य कालस्य दशयुगरूपत्वमिति विचारणीयम्।

तत्र सुमेरुकुमेर्वोर्मासषट्कं यावद्दिनं मासषट्कपरिमिता च रात्रिः। रात्रावपि प्रारम्भे सावित्रः पश्चादुषोरूपिसान्ध्यतेजसः प्रत्येकमेकैको मास इति मासद्वयं परस्तात्तमसः प्रवृत्तिः। तच्च तमो मासद्वयव्यापि। परस्तात्परदिनीयोषःसवित्रोश्च मासद्वयं काल इति कालक्रमः। तत्र तमोमयः कालो मासद्वयव्यापीत्युक्तमेव। तस्य स्थानान्तरापेक्षया तमसः कालाधिक्येन दीर्घतमोरूपत्वम्। तस्य च कालपरिमाणस्य मासद्वयस्य दशयुगत्वकल्पनायां दिन-

षट्कं युगार्धत्वेन व्यवतिष्ठते। तथा सति दशमे युगे षष्टितमदिने मासद्वयावसानरूपे जीर्णित्वं दीर्घतमस इति भवति। दिनषट्कमेव युगस्वरूपं तच्च प्रकारान्तरेणापि सिद्धयति। तथाहि—सुमेरुकुमेर्वोरादित्य उदयन्न हठाादुदितो भवति, न वाऽक्षपातस्थलरूपविषुवसविधदेश इव कतिभिर्निमेषैरुदेति, किन्तु तत्र प्रदक्षिणाप्रदक्षिणावर्तनैः कतिपयैरुदेति। तत्रत्यैका आवृत्तिरस्माभिर्दिनशब्देन व्यवह्रियते। तादृशैस्त्रिभिर्दिनैस्तस्योदयस्तत्र। आदित्यबिम्बस्य षष्टिकलात्मकैकांशपरमितो व्यासः। तत्र षोडशकलात्मकं बिम्बं प्रतिदिनमुदितं भवति। अतएव तस्य षोडशकलः पुरुष इति व्यवहार उपनिषत्सु। तस्य बिम्बस्योदयार्थमावृत्तित्रयं पूर्णमुपयुज्यते। यद्यपि षष्टिकलात्मकबिम्बस्य आवृत्तित्रयेणाष्टाचत्वारिंशदेव कला उदिता भवन्ति, द्वादशकला अवशिष्यन्ते बिम्बस्य संपूर्णत्वाय, तावतापि तदर्थं पूर्णावृत्तेरसम्भवेन खण्डितायास्तस्याः परित्यागेनावृत्तित्रयेणादित्यो वा तद्बिम्बं वोदितं भवतीति व्यवहारः। तत्रत्यानामावृत्तीनामृग्रूपत्वेन व्यवहारः। अतएवादित्यस्य सुमेरुकुमेर्वोरभिप्रायेण यज्ञरूपत्वेन दानरूपत्वाद्दानार्थमुपयुज्यमाना ऋक् याज्यारूपत्वेन वेदे व्यवह्रियते। सा याज्या दानरूपैवेति ऐतरेये उच्यते "प्रत्तिर्वै याज्ये"ति। एवं चर्चो दानात्मकत्वोक्तेर्दानावसरीयाऽन्तिमावृत्तिर्याज्यानामिकर्गिति वर्णनादावृत्तीनामृगात्मकत्वं विज्ञायते। तथा सत्यैतरेये स्थलान्तरे साम्न ऋचश्च वाकोवाक्यस्योपपत्तिः।

तत्रोच्यते—"ऋक् च वा इदमग्रे साम चास्तां सैव नाम ऋगासीदमो नाम साम, सा वा ऋक् सामोपावदन्मिथुनं संभवाव प्रजात्या इति नेत्यब्रवीत्साम ज्यायान्वा अतो मम महिमेति, ते द्वे भूत्वोपावदतां तेन प्रति च न समवदत तास्तिस्रो भूत्वोपावदंस्तत्तिसृभिस्समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिःस्तुवन्ति तिसृभिरुद्गायन्ति तिसृभिर्हि साम संमितमिति"। एवं सति पूर्वोक्तरीत्या आवृत्तित्रयेण मण्डलोदयेन तिसृभिर्मितं मण्डलं भवति। मण्डलस्यैव सामरूपत्वं सामवेदीये तलवकारब्राह्मणे उच्यते तदन्यत्र प्रपञ्चितम्। एवं चावृत्तित्रयेण मण्डलोदय इति भवति। मण्डलस्य चैकांसव्यासता। अत एव वृत्ताकारभ्रमे मण्डलस्य दण्डनिपातन्यायेनैकस्मिन् वृत्ते षष्ट्युत्तरत्रिशतवारं सम्बन्धेनैकस्य वृत्तस्य तावन्तो भागा इति मन्यते, सम्मन्यते चायमर्थो यद् वृत्ते षष्ट्यधिकत्रिशतं भागा भवन्तीति। किमित्येतावन्त एव भागाः प्रतिवृत्तं कल्पनीया न न्यूना नाप्यधिका इत्यस्य प्रकारान्तरेण समाधानाभावः। वृत्तभागस्य चाक्षरशब्देन व्यवहार इति गृहीत्वा ऋङ्मन्त्रे उच्यते—

"गायत्रेण प्रतिमिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः" ।। इति ।

तत्र गायत्रेण छन्दसा अर्कमृचं मिमीते, अर्केण ऋचा साम मण्डलं मिमीत इत्युच्यते। गायत्रं च छन्द एकाक्षरात्मकं दैवम्। तदुक्तं छन्दोग्रन्थे "दैव्येक"-मिति। ऋचि दैवं गायत्रं छन्द एकाक्षरात्मकं अर्केण साममानमिति। तत्तु उपर्युक्तब्राह्मणेनोक्तमेवं सति सुमेर्वादावावृत्तित्रयेण स्थूलतया बिम्बोद्गम इति ऋक्त्रयं सामसंमितमिति यज्ञे गानावसरे ऋक्त्रयेणैकं साम गीयते इति वचनम्। तत्र तावता पूर्णबिम्बसंग्रहो न भवतीति बिम्बद्वयेन सविधवर्तिना दण्ड-निपातन्यायेन पूर्णबिम्बसकलांशग्रहसम्भवमभिप्रेत्य बिम्बद्वयप्रत्यक्षात्मकस्य त्रिक-द्वयरूपस्य वेदे युगशब्देन व्यवहारः। स च सुमेराविव कुमेरावपि भवति। स चोक्तः काल एकस्मिन्वत्सरेऽनेकवारमावृत्तो भवति इति तस्यानेकत्वेन व्यवहारः। स च सुमेराविव कुमेरावपि भवतीति युगानां दैव्या मानुषा इति विशेषणम्। एवं च दैव्या दैव्यानि युगा युगानि सुमेर्वभिप्राये, कुमेर्वभिप्राये च मानुषा मनुष्यसम्बन्धीनि युगा युगानीति व्यवहारः।

एवं च युगशब्देनेदमेवावृत्तिषट्कात्मकषडहमानं गृहीत्वा प्रवृत्तिः। तादृशं मानं चोक्तमन्त्रे "दशमे युगे" इति वर्णनाद्दशवारमावृत्तं गृह्यते। तथा सति दशयु-गानि नाम षष्टिदिनानि मासद्वयं वेति लभ्यते। युक्तं चैतदत्र तमसस्तावत्कालमे-वावस्थितेः। ततः परं तदसत्तया दशमयुगे दीर्घतमसो जीर्णत्ववचनं न विरुध्यते। ततः परं च रात्र्याः सम्बन्ध्युत्तरेऽवशिष्टे षष्टिदिनात्मके भागे मासद्वयरूपे परदिन-प्रारम्भीयसान्ध्यतेजसः प्रवृत्तिः। तच्च तेज उषःशब्देन व्यवह्रियतेऽथवा उषाः सवितेति भेदकल्पनया व्यवह्रियते। तत्र भेदकल्पे आद्यो भागो मासरूप औषसो द्वितीयो भाग उदयसन्निकटो मासात्मकः सावित्र इति। एवं चौषससूक्तेषूषसां त्रिंशत्सङ्ख्यया व्यवहारः "सदृशी"रित्यादिसूक्तेषूच्यमानः सङ्गच्छते। एवं सवितुर्मित्राभिन्नतया मैत्रोऽयं भागो तृतीयो भवति तस्मिंश्च भागे मैत्रीये उक्त-षडावृत्त्यात्मकयुगरूपभागस्य पञ्चवारमावृत्त्या युगपञ्चकं तत्र भवति, तस्य ग्रहणं कृत्वा मैत्रेषु सूक्तेषुच्यते "मित्राय पञ्च येमिरे" इति।

एवं चोक्ततमोमयकालतः परस्तात्परदिनीयस्योषआदिरूपस्य व्यक्तस्य तेजसः प्रवृत्तिरिति पूर्वदिनीयरात्रिसम्बन्धिभागस्यावशिष्टस्यामण्डलोदयं सत्त्वेऽपि तदीयतेजसोऽप्यत्र सत्त्वमपेक्षणीयं तच्चाव्यक्तम्। अव्यक्तस्य तेजसोऽब्रूपत्वं तस्य तमोमयकाले तमोरूपेण वृत्रेण निरोधवचनं, वृत्रस्य हननेन तस्याव्य-क्तस्य तेजसः प्रवृत्तिरिति वचनं, तत्राव्यक्ते तेजसि अप्त्वं तत्प्रदत्वाद् वृत्रे

मेघत्वमिन्द्रे वृष्टिप्रदातृत्वमिति कल्पनां विना नोपपद्यत इति अव्यक्ते तेजसि अपृत्वं प्रोक्तम्। ताश्चापस्तमोमये कालेऽप्यगतेऽपि दिनान्तरीये व्यक्ते तेजसि प्रवृत्तेऽपि यथापूर्वं गच्छन्त्येव, तासां तद्गमनमवधिपर्यन्तं, स चावधिरादित्य-मण्डलं, तस्यैव गमनावधेरर्थशब्देन व्यवहारः। तदुक्तं मन्त्रे "अपामव्यक्तानां पूर्वदिनीयानां तेजसामर्थमवधिभूतमादित्यमण्डलं यतीनामसौ मामतेयो दीर्घतमा जीर्णत्वेनासमर्थः सारथिः समानरथयोगी भवति, येन मार्गेण ता आपो गच्छन्ति ताभिस्सह तमवधिं प्राप्नोति"। भवति चैवं दिनान्तरीयस्य रात्रि-सम्बन्धात्कृष्णरूपत्वमुपगतस्य मण्डलं यावद्व्यक्तरूपेणादर्शनमिति। उदीय-मानमण्डलस्य पूर्वदिनीयतेजसोऽवधित्वेन कल्पनं देवानामाजिधावनकल्पनया विस्पष्टम्। आजिधावनेऽवधिरपेक्ष्यते, देवानामाजिधावने आदित्यस्यावधित्वेन वचनं वेदे यथा—"तेऽग्नेर्गृहपतेरादित्यं काष्ठामकुर्वत" इति। देवानां तेजोरूपत्वं तस्य तेजसोऽवधिरादित्य आदित्यबिम्बमिति। न च योऽत्रदशम-युगस्यावसानप्रदेशः स वत्सरे दशममासस्यावसानस्थलीय इति मासदशकेन वत्सरप्रवृत्तिसाधकं तदिति वाच्यम्। तस्य वत्सरे दशममाससम्बन्धित्वेऽपि वत्सरस्य दशमासपरिमितत्वाभावात्। यद्यत्र वत्सरान्त उच्येत तर्हीतो वत्स-रान्तरप्रवृत्तिर्वक्तव्या। एवं पूर्वरात्रिशेषे मासद्वयमुदयपर्यन्तमुदयमारभ्यास्तमय-पर्यन्तं मासषट्कं ततो दिनावसानीयरात्रिप्रारम्भीयसवित्रोषसोर्मासद्वयं तमोमय-कालिकं च मासद्वयमिति वत्सरस्य २+६+२+२=१२ द्वादशैव मासाः साकल्येन प्राप्नुवन्ति न दशैवेति। अन्यथैतस्य मासद्वयस्य पूर्वोत्तरवत्सरान्तःपातो न स्यादिति असंलग्नकतापत्तिः स्यात्।

उक्तरीत्या मण्डलद्वयस्य युगरूपस्य सम्बन्धिदिनषट्कस्यैव युगकल्पना-मभिप्रेत्य नाभानेदिष्ठकथोक्ताङ्गिरसां सत्रे षडहान्ते मोहोक्तिः सङ्गता। तत्रोच्यते नाभानेदिष्ठस्य ब्रह्मचर्यं वसतो भ्रातरः पैतृकं धनं विभज्य गृहीतवन्तः। नाभानेदिष्ठो ब्रह्मचर्यतो निवृत्तो भ्रातॄणां सविधे पैतृकं स्वं भागं प्रार्थितवान्। तदा तैः प्रत्याख्याय पितुः सकाशतः स्वो भागः प्रत्येतव्य इत्युक्तम्। तेन पितृ-सविधे स्वभागप्रार्थने पित्रोक्तमिमेऽङ्गिरसः स्वर्गार्थं सत्रमनुतिष्ठन्ति, ते प्रतिषडहं मुह्यन्ति तानेतं सूक्ते शंसय, ततस्ते कर्मानुष्ठाय स्वर्यन्तः स्वीयं यागार्थं सञ्चितं धनं तुभ्यं दास्यन्ति इति। अङ्गिरसां षडहे मोहकारणं किमपि नोक्तं केवलं सूक्त-द्वयशंसनेन स्वर्गप्राप्तिफलोत्कीर्तनात्तत्सूक्तद्वयशंसनेन मोहनिवृत्तिर्ध्वन्यते। तस्यायं भावः—अत्र स्थूलेन मानेन मण्डलस्योदयार्थं प्रदक्षिणात्रयं गृहीतं तावता पूर्णमण्डलसङ्ग्रहो न जात इति तदर्थं द्वितीयवारं मण्डलसम्बन्धेनापेक्षितानां

तिसृणां प्रदक्षिणानां योजनेन तत्संघद्वयग्रहणे पूर्वोक्तप्रदक्षिणात्रयापेक्षयावशिष्ट-भागस्य लाभेऽपि तदधिकभागस्य प्रवृत्त्या तं दण्डनिपातन्यायेन द्वितीयबिम्बीय-भागस्यापि पूर्णबिम्बयोगाय पुनः पूर्वोक्तन्यायेन प्रदक्षिणात्रययोगेऽपि न द्वितीय-बिम्बस्यैवावशिष्टभागमात्रलाभः किन्तु दण्डनिपातन्यायेन तृतीयबिम्बभागप्राप्ति-रधिका भवेत्। तदर्थं पूर्वोक्तप्रथमषट्प्रदक्षिणारूपदिनषट्कयोगोत्तरं द्वितीय-बिम्बीयसकलभागलाभार्थं केवलमेका प्रदक्षिणा चेदधिका गृह्येत तावतापि न भक्षितलशुनन्यायातिपातः। पुनः कलाष्टकस्याधिकस्यावशेषादिति प्रतिषडहा-न्तमनुष्ठानसामञ्जस्यसम्पादननिर्णयाभावेन मोहोऽङ्गिरसाम्। तन्निरासश्च सूक्तद्वययोगश्चेदधिकः क्रियते तेन पूर्वोक्तवैषम्यनिरासेन व्यामोहनिवृत्त्या पूर्णानुष्ठानेन कर्मणः फलं स्वर्गलाभप्राप्तिरिति। तस्यायं भावः—प्रतिवेलं प्रदक्षिणात्रितयद्वयरूपयुगग्रहणे वत्सरान्तेऽन्तिमयुगेन निरवशेषबिम्बभागलाभेन षडहावर्तने न कोऽपि दोषो वत्सरोपलब्धौ केवलं षडहस्वरूपे निखिलभाग-लाभकल्पनार्थं केवलं सूक्तद्वयस्याधिकस्य योगः कर्तव्योऽनुष्ठाने, तावता तत्र पूर्णलाभकल्पनासम्भवः।

तथाहि आदित्यस्य रश्मियोगस्त्रिधा—पाश्चात्त्यः पौरस्त्यःसम्मुखी-नश्च, तत्र पाश्चात्त्यस्य वन्दनादिशब्दैर्व्यवहारः, पौरस्त्यानामीडनादिशब्दै-र्व्यवहारः सम्मुखीनस्याह्वानादिशब्दैर्व्यवहार इति पूर्वमुक्तं, तत्र प्रतिप्रदक्षिणमा-वृत्तावेवंरूपस्त्रिविधरश्मियोगः। रश्मियोगस्य स्तुतिशब्देन ग्रहणमिति षडहान्ते प्रदक्षिणाद्वयेन तत्संपत्तिसम्भव इति प्रतिषडहान्तं स्तुतिद्वयमधिकं प्रयोक्तव्यम्। स्तुतिश्च सूक्तेन पूर्णा भवतीति सूक्तद्वयप्रयोगेण पूर्वोक्तवैषम्यनिरास इति। तच्च सूक्तद्वयं नाभानेदिष्ठसम्बन्धिप्रकृतानुगुणमिदमिति विशिष्टमेव तच्छं-शनीयमिति। एवं च षडहरूपयुगस्य युगशब्देन ग्रहणं तस्य च युगस्य सुमेरौ कुमेरौ च वत्सरे बहुवारमावृत्त्या बहुवचनं सुमेर्वादिसम्बन्धबोधाभिप्रायेण "दैव्या मानुषा" इति युगविशेषणं मन्त्रेषु। किञ्च तस्य युगस्य सामान्येनैकवचनेनापि व्यवहारः, पूर्व्येतिप्रभृतिविशेषणयोगः। उक्तविधविशेषणैर्यथा तद्बोध एवं "देवानां" "मानुषे"त्यादिप्रयोगेणापि तद्बोधः सूक्तेषु, यथोच्यते—

देवानां नु वयं जाना प्रवोचाम विपन्यया।
उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे।। इति।

अत्र 'उत्तरे' इति विशेषणम्। विशेषणे पूर्वोत्तरशब्दयोर्द्वन्द्वतया प्रयोगात्पूर्वशब्दस्य पूर्वाञ्चनार्थकत्वेनोत्तरशब्दस्य प्रत्यगञ्चनार्थत्वं उत्तरदिक्स्थत्वार्थकदेवतासम्ब-न्धार्थकत्वं वा ग्रहीतव्यम्। एवं च वयं देवानां जाना जातानि जन्मानि नु यद्यपि

जानीमहे इति शेषः, तथापि विपन्यया स्तुत्या प्रविरुद्धदिक्सम्बन्धेन बोचाम उक्तवन्तः। तत्रायमभिप्रायः—यदोत्तरे युगे उत्तरस्यां देवानां यागानुष्ठानं तत्र शस्त्रशंसनं स्यात्तदानीं शस्त्रेषु उक्थ्येषु शस्यमानेषु यःकोऽपि तानि देवानां जन्मानि पश्यात् जानातु इति। अत्रोत्तरशब्दो युगसामान्यार्थविशेषणम्। एवं "देवानां पूर्व्ये युगे सतः सदजायत। देवानां युगे प्रथमेऽसतः सदजायत" इत्यत्रापि पूर्व्य-शब्देन पूर्वाञ्चनस्य दक्षिणदिक्सम्बद्धस्य कुमेरुसम्बद्धस्य ग्रहणेन युगविशेषणम्। प्रथमेऽर्धे "पूर्व्ये" इत्यनेन कुमेरुसम्बन्धस्य वचनादुत्तरेऽर्धे प्रथम इत्यनेन प्रथम-सृष्टयवसरीयार्थकत्वं प्रथमशब्देन बोध्यते। तथा च देवानां प्राथमिकसृष्टौ सद्रूपमादित्यमादित्यमण्डलमसतोऽव्यक्तरूपात्तेजसः सकाशादजायत। देवानां पूर्व्येऽर्थाद्दक्षिणदिक्के कुमेरुसम्बद्धे सतो व्यक्तादादित्यमण्डलात्सत्तत्र विद्यमान-मादित्यमण्डलं सोमरूपं समभूत्। उच्यते च वेदे आदित्यसकाशतश्चन्द्रमस उत्पत्तिरादित्ये विलयश्च। आदित्यमण्डलस्य च सर्वविश्वव्यापिनोऽव्यक्तात्तेजसः समुत्पत्तिः। तदुक्तं नासदीये, एवं तत्र प्रथमो मन्त्रः—

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥ इति।

अत्र तदानीमित्यनेन सकलभुवनसृष्ट्यादौ सदपि नासीदसदपि नासीत् रज आदिकं व्योम तत्परस्तादित्यपि किमपि नासीत्। अत्रावारणावार्य भावोऽपि नासीत् न किञ्चिदावारकमावार्यम्। आवरणे देशश्चेत्यादिकं किमपि नासीत्।

एवं सति असतः पूर्वम् आदित्यस्य सत उत्पत्तिरिति गृहीत्वोक्तं मन्त्रे—देवानां प्रथमे युगे देवाभिप्रायके प्रथममण्डलकल्पनाभिप्रायके युगे उत्पद्यमान-रूपमादित्यमण्डलमसत एवोत्पन्नम्। ततः पृथिव्याद्युत्पत्तिक्रमेण पूर्व्ये पूर्वाञ्चन-भावादिरूपे कुमेरुस्थे आदित्यमण्डलसंपाद्ये युगे तस्यादित्यमण्डलस्य सद्रूपस्य देवलोके सतः सद्रूपान्मण्डलादेवोत्पत्तिरिति। तदुक्तं मन्त्रे 'देवानां पूर्व्ये उक्तरूपे पूर्वाञ्चने युगे सतो विद्यमानादेवादित्यमण्डलात्सत्कुमेरौ दृश्यमादित्यमण्डलम-जायते'ति। अयं भावः—वस्तुत आदित्यस्यैकत्वेऽपि देशादिभेदेन भेदकल्पनया भिन्नस्य तस्योदय उत्पत्तिरिति वर्णना। सा कुमेरौ सुमेरौ विद्यमानात्सत आदित्य-रूपात्कुमेरुस्थस्येति सतः सदुत्पत्तिवर्णनम्। सुमेरौ तु भुवोऽभावकाले कुमेरुस्थ-मण्डलस्याप्यभावेन ततः सुमेरुस्थमण्डलस्योत्पत्तेर्वर्णयितुमशक्यत्वेन न तस्य सत उत्पत्तिसम्भव इति। एवं च तत्र मन्त्रेऽपि युगशब्देन पूर्वोक्त एवार्थो गृह्यते।

अत एव—

यज्ञं पृच्छाम्यवमं स तद्दूतो विवोचति।

क्व ऋतं पूर्व्यंगतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ।।

इति मन्त्रेऽवमयज्ञपृच्छा, तत्र पूर्वं विद्यमानस्य ऋतस्य गमनदेशजिज्ञासा को वा नूतनस्तद्बिभर्ति इत्यादिवर्णनमुपपद्यते। अत्र पूर्वनूतनशब्दयोर्विरुद्धार्थकत्वादिकमपि "अग्निः पूर्वेभि"रित्यत्रोक्तमुपपद्यते इति। एतावता युगशब्दो न कृतादिकालबोधक उक्तस्थले किन्तु दैव्या मानुषेत्यादिविशेषणेनोक्तविधमण्डलसम्बन्धं संपाद्य षड्हकालरूपयुगबोधकस्य च सुमेरुसम्बन्धमिव कुमेरुसम्बन्धमपि बोधयतीति नैकमात्रस्थानबोधकता तस्येति।

एवं स्वनयदानसूक्ते 'दशरथे'त्यत्र रथशब्देन युगस्य ग्रहणेन तत्र वधूमत्त्वमुच्यमानं संगच्छते। तस्य दशरथस्य शोणाः इत्यादिवर्णनस्यापि तदैवोत्पत्तिरिति युगस्य रथशब्देनापि बोध इति शम्।

।। समाप्तोऽयं ग्रन्थः ।।

ग्रन्थोद्धृतमन्त्रादीनामाकरग्रन्थप्रदर्शनपूर्वकं वर्णानुक्रमिकसूचीपत्रम्

आ

इ

ई

उ

ओ

औ

क

ध

न

र

व

श

ष

साङ्केतिकाक्षरविवरणम्

आ. श्रौ. सू.	.	..	आश्वलायनश्रौतसूत्रम्
ऋ. अनु.	..	..	ऋग्वेदसर्वानुक्रमणी
ऋ. सं.	..	..	ऋग्वेदसंहिता
ऐ. आ.	..	..	ऐतरेयारण्यकम्
ऐ. ब्रा.	..	..	ऐतरेयब्राह्मणम्
छान्द. उ.	.	..	छान्दोग्योपनिषत्
छा. म. ब्रा.	..	..	छान्दोग्यमन्त्रब्राह्मणम्
ताण्ड्य. ब्रा.	..	..	ताण्ड्यमहाब्राह्मणम्
तै. ब्रा.	..	..	तैत्तिरीयब्राह्मणम्
तै. सं.	..	..	तैत्तिरीयसंहिता
पा. सू.	..	..	पाणिनिसूत्रम्
व्या. म. भा.	..	..	व्याकरणमहाभाष्यम्
शत. ब्रा.	..	..	शतपथब्राह्मणम्
शु. य. सं	..	..	शुक्लयजुर्वेदसंहिता
ष. ब्रा.	..	..	षड्विंशब्राह्मणम्
सा. भा.	..	..	सायणभाष्यम्
सि. कौ.	..	..	सिद्धान्तकौमुदी

शुद्धिपत्रम्

अशुद्धपाठः	शुद्धपाठः	पृष्ठम्	पङ्क्तिः
या ओषधी:	या ओषधी:	४	२५
० सर्पयन्	० सपर्यन्	५	२
सम्मगु०	सम्यगु०	,,	३१
पूवषां	पूर्वेषां	८	१
त्रये	त्रयं	९	४
स्वस्वस्विके	स्वस्वस्तिके	,,	६
प्रसिध्या	प्रसिद्धया	९	८
एक०	त्रि०	११	२१
सत्बे	सत्त्वे	१३	२४
आदित्यस्येव	आदित्यस्यैव	१४	७
मध्य:, तत:	मध्यस्तत:	१६	२४
तावत्पर्यविकले	तावत्पर्यन्तमविकले	१७	२१
ग्रहणेऽपि पञ्चाशत्	ग्रहणे त्रिपञ्चाशत्	२६	१९
तद्रुपे	तद्रूपे	,,	२१
घातघात०	घातघात०	२७	४
०घात०	०घात०	,,	६
ग्रहणेन	ग्रहणे न	,,	२३
रूपानि	रूपाणि	२९	२८
तदेतन्मत्रे	तदेतन्मन्त्रे	३०	२०
याज्ञिक०	याज्ञिकै०	३१	१
इन्द्रपानमुच्यते	इन्द्रपानमेव तदुच्यते	३१	३१
समासित०	समासे	३२	१३
प्रतिषा०	प्रतिषया	,,	१५
०मुदयनी	०मुदयनीय	,,	२३
गृह्वाति	गृह्णाति	,,	२६
वर्नमा०	वर्णा	३४	२
तस्या: समन्तात्	तस्याऽऽसमन्तात्	३५	२५
तेज०	तेज:०	३९	१४
सम्भवति	सम्भवतीति	४०	२९
किञ्चैवेव	किञ्चैवैव	४१	३

अशुद्धपाठः	शुद्धपाठः	पृष्ठम्	पङ्क्तिः
०मुर्ध्वं	०मूर्ध्वं	,,	२४
तद्वतो	तद्वती	४२	१७
षष्ठयंश०	षष्टयंश०	४४	२, ३, ८
०रात्रयो:	०रात्रयो:	,,	८
वृत्रस्य	वृत्तस्य	,,	६
प्रत्येहं	प्रत्यहं	४६	१६
चकादश	चैकादश	,,	२४
०द्रुपिणी	०द्रूपिणी	,,	२५
०दंक्षो	दंक्षो	४६	१
व्याख्यातृणाम्	व्याख्यातॄणाम्	,,	६६
दृह्यमानस्य	दृह्यमाणस्य	४४	२४
०मशीत्युर्ध्वं	मशीत्यूर्ध्वं	५५	२६
मनुष्यानां	मनुष्याणां	५६	१४
निघन्टुसु	निघण्टुषु	५६	२५
भु०	भू०	६०	२४
सम्मक्	सम्यक्	६२	१६
निरूक्त	निरुक्त	६३	६
सोऽपि	सोऽपि न	६५	१६
०मते ऋतु०	०मतेर्ऋतु०	,,	२१
०पत्यर्था०	० पत्यर्था०	६८	८
अपरोऽशंस्तु	अपरोंऽशस्तु	,,	१४
समासपूर्वस्य	समासमासस्य	७०	१२
फाल्गुन०	चैत्र०	,,	२६
०रूप०	०रुप०	७०	११
कर्त्तुरच्छान्	कर्त्रे अच्छान्	७७	१
अतिशयने	अतिशयेन	,,	४
०मादित्यमच्छान्	मादित्यायाच्छान्	,,	१२
ज्योजि:	ज्योति:	,,	१५
कृतनि	कृतानि	८७	६
०मुज्जापन्ति	मुज्जापयन्ति	६०	१३
गभमावेशितं	गभ आवेशितं	६१	१५
परातय	परतया	,,	२२
०अश्वे	०अश्वे"	६२	२६
देवा	दैवा	६३	६

शुद्धिपत्रम्

अशुद्धपाठः	शुद्धपाठः	पृष्ठम्	पङ्क्तिः
आच्छावाकस्यापि	अच्छावाकस्यापि	९६	२५
तस्यैते	तस्यै ते	१०४	१६
अपेक्षमाण	अपेक्षमाणः	१०५	११
दृष्टै	दृढैः	१४४	३
भूरूपो	भूगुरूपो	१४६	७
अहूतो	अहुतो	१४७	२६
च न	न च	१४८	३
अतो	अतः	"	१५
पूव०	पूर्व०	१५१	१
त्युच्यते । इ सन्ध्या०	इत्युच्यते । सन्ध्या०	१५२	२-३
असून्	असुन्	११	३
हस्तनक्षत्र०	हस्तनक्षत्रे	१५८	१२
०दहिवु०	०दहिर्वु०	१६१	६
अवभृत	अवभृथ	१६४	१२
कल्प्यः	कल्पः	१६५	१३
०स्योत्तरायाणस्य	०स्योत्तरायणस्य	१६६	६
इति	एति	१६६	७, १३
भवन्ति	भवति	१६६	२८
फाल्गुनश्चैत्रो	फाल्गुनचैत्री	१७२	५
तेन तत्र	तत्र	"	१४
विकर०	विकार०	१७४	४
ग्राह्यः	ग्राह्यः	१७६	२४
देशीयानम्	देशीयानाम्	१७७	११
प्रदशित	प्रदर्शित	१८७	२१
रश्मि०	रश्मिभि०	१८८	२०
वाजिवती	वाजिनीवती	२५०	१५
न्यायनावृस्था	न्यायेनावृस्था	२५७	२७

वीर सेवा मन्दिर
पुस्तकालय
काल नं० 281.11 सीतारा
लेखक शास्त्री सीताराम
शीर्षक वेदार्थविचार
खण्ड क्रम संख्या 41073